मीमांसा-दर्शनम्

डॉ० मण्डनमिश्रविरचितम्

प्रकाशकः

आचार्यः पट्टाभिरामशास्त्री, विद्यासागरः

श्रीलालबहादुरशास्त्रि-केन्द्रीय-संस्कृत-विद्यापीठम्
[illegible], नूतन दिल्ली-१६
१९८३-८४

श्रीः

मीमांसा-दर्शनम्

डॉ० मण्डनमिश्रविरचितम्

सम्पादकः
आचार्यः पट्टाभिरामशास्त्री, विद्यासागरः

श्रीलालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विद्यापीठम्
शहीदजीतसिंहमार्गः, नूतन दिल्ली
१९८३

संस्कृत-विद्यापीठ-ग्रन्थमालायाः पञ्चचत्वारिंशत्तमं पुष्पम्

श्रीः

मीमांसा-दर्शनम्

[महर्षि-जैमिनि-प्रवर्तितस्य विचारशास्त्रस्य
समालोचनात्मकमध्ययनम्]

प्रस्तावना-लेखकः
डॉ० बलरामजाखडमहोदयः
लोकसभाध्यक्षः

•

सम्पादकः
आचार्यः श्री पट्टाभिरामशास्त्री, "पद्मभूषणम्"
विद्यासागरः, मीमांसा-न्याय-केसरी, वाराणसी

•

लेखकः
डॉ० मण्डनमिश्रः, प्राचार्यः
श्रीलालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विद्यापीठस्य

•

प्रकाशन-स्थलम्
श्रीलालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विद्यापीठम्
शहीदजीतसिंहमार्गः कटवारिया सराय
नूतनदिल्ली–११००१६

प्रकाशकः—

डॉ० मण्डनमिश्रः, प्राचार्यः

श्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठम्

शहीदजीतसिंहमार्गः कटवारियासराय, नूतन दिल्ली–१६

दूरभाषाङ्का: ६५०८३१

प्रकाशनाब्दः १९८३ ई०

□

प्रथमं संस्करणम

□

१००० पुस्तकानि

□

मूल्य रूप्यकाणि

मुद्रकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय-

मुद्रणालयः, वाराणसी–२२१००२

प्रस्तावना

मीमांसा-दर्शन वैदिक-वाङ्मय की आधार शिला है। इसे वेदरूपी किले की परिखा के रूप में वर्णित किया गया है—जो वेददुर्ग की रक्षा कर रही है। वैदिक कर्मकाण्ड और वाक्यशास्त्र के रूप में अनेक विवादास्पद समस्याओं के लिये समाधान का मार्ग प्रशस्त करने के कारण मीमांसा-दर्शन चिन्तकों और विचारकों के लिये समालोचना का विषय बना। दार्शनिक ग्रन्थों के अतिरिक्त साहित्य, व्याकरण धर्मशास्त्र आदि अनेक शास्त्रों को इस दर्शन से प्रेरणायें मिलीं। इन शास्त्रों की गंभीर ग्रन्थियां आज भी मीमांसा-दर्शन के ज्ञान के विना नहीं सुलझायी जा सकती हैं।

यह दुर्भाग्य का विषय है कि इतने महत्त्वपूर्ण विचारशास्त्र के विद्वानों और अध्येताओं का क्रमशः ह्रास होता जा रहा है। विगत ५०-६० वर्षों में महामहोपाध्याय श्रीचिन्नस्वामी शास्त्री और आचार्य श्रीपट्टाभिरामशास्त्री महामहोपाध्याय डा० गंगानाथ झा इन तीन महनीय विभूतियों ने इस शास्त्र के पुनर्जीवन के क्षेत्र में उल्लेखनीय कार्य किये। इनमें श्री पट्टाभिरामशास्त्री ने वाराणसी, जयपुर, कलकत्ता की विशिष्ट संस्थाओं में रहकर मीमांसा-दर्शन के सैकड़ों स्नातक तैयार किये जिनमें प्रस्तुत ग्रन्थ के लेखक डा० मण्डन मिश्र भी एक हैं।

डा० मण्डन मिश्र ने प्रस्तुत ग्रन्थ को विचार-काण्ड, ज्ञान-काण्ड और कर्मकाण्ड इन तीन भागों में विभाजित कर मीमांसा-दर्शन का सारसर्वस्व इसमें प्रस्तुत किया है—जो अपने आप में अन्य शास्त्रों की अपेक्षा इसकी विशेषता के प्रतिपादन के साथ-साथ इसके ऐतिहासिक और शास्त्रीय महत्त्व की पुष्टि करता है। दूसरा ज्ञान-काण्ड आत्मा, सृष्टि, मोक्ष, प्रमाण आदि दार्शनिक तत्वों का सप्रमाण विवेचन करता है जो मीमांसा की दार्शनिकता की सिद्धि के लिये पर्याप्त हैं। तीसरे कर्मकाण्ड भाग में वैदिक कर्मकाण्ड के क्षेत्र में इस शास्त्र के योगदान की सांगोपांग व्याख्या की गयी है। ग्रन्थ के ये तीनों भाग मीमांसा-दर्शन की पूर्णता और सम्पन्नता के स्तम्भ हैं।

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ के प्राचार्य, अखिल भारतीय संस्कृत साहित्य सम्मेलन के यशस्वी महामन्त्री एवं राजस्थान अकादमी के अध्यक्ष के

प्रस्तावना

मीमांसा-दर्शन वैदिक-वाङ्मय की आधार शिला है। इसे वेदरूपी किले की परिखा के रूप में वर्णित किया गया है—जो वेददुर्ग की रक्षा कर रही है। वैदिक कर्मकाण्ड और वाक्यशास्त्र के रूप में अनेक विवादास्पद समस्याओं के लिये समाधान का मार्ग प्रशस्त करने के कारण मीमांसा-दर्शन चिन्तकों और विचारकों के लिये समालोचना का विषय बना। दार्शनिक ग्रन्थों के अतिरिक्त साहित्य, व्याकरण धर्मशास्त्र आदि अनेक शास्त्रों को इस दर्शन से प्रेरणायें मिलीं। इन शास्त्रों की गंभीर ग्रन्थियां आज भी मीमांसा-दर्शन के ज्ञान के विना नहीं सुलझायी जा सकती हैं।

यह दुर्भाग्य का विषय है कि इतने महत्त्वपूर्ण विचारशास्त्र के विद्वानों और अध्येताओं का क्रमशः ह्रास होता जा रहा है। विगत ५०-६० वर्षों में महामहोपाध्याय श्रीचिन्नस्वामी शास्त्री और आचार्य श्रीपट्टाभिरामशास्त्री महामहोपाध्याय डा० गंगानाथ झा इन तीन महनीय विभूतियों ने इस शास्त्र के पुनर्जीवन के क्षेत्र में उल्लेखनीय कार्य किये। इनमें श्री पट्टाभिरामशास्त्री ने वाराणसी, जयपुर, कलकत्ता की विशिष्ट संस्थाओं में रहकर मीमांसा-दर्शन के सैकड़ों स्नातक तैयार किये जिनमें प्रस्तुत ग्रन्थ के लेखक डा० मण्डन मिश्र भी एक हैं।

डा० मण्डन मिश्र ने प्रस्तुत ग्रन्थ को विचार-काण्ड, ज्ञान-काण्ड और कर्मकाण्ड इन तीन भागों में विभाजित कर मीमांसा-दर्शन का सारसर्वस्व इसमें प्रस्तुत किया है—जो अपने आप में अन्य शास्त्रों की अपेक्षा इसकी विशेषता के प्रतिपादन के साथ-साथ इसके ऐतिहासिक और शास्त्रीय महत्त्व की पुष्टि करता है। दूसरा ज्ञान-काण्ड आत्मा, सृष्टि, मोक्ष, प्रमाण आदि दार्शनिक तत्वों का सप्रमाण विवेचन करता है जो मीमांसा की दार्शनिकता की सिद्धि के लिये पर्याप्त हैं। तीसरे कर्मकाण्ड भाग में वैदिक कर्मकाण्ड के क्षेत्र में इस शास्त्र के योगदान की सांगोपांग व्याख्या की गयी है। ग्रन्थ के ये तीनों भाग मीमांसा-दर्शन की पूर्णता और सम्पन्नता के स्तम्भ हैं।

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ के प्राचार्य, अखिल भारतीय संस्कृत साहित्य सम्मेलन के यशस्वी महामन्त्री एवं राजस्थान अकादमी के अध्यक्ष के

रूप में डा० मण्डन मिश्र देववाणी संस्कृत की सेवा में अपने आपको लगाये हुए हैं। २०-२१ वर्ष पूर्व साधन-सम्पदा के अभाव में भी दिल्ली विद्यापीठ की स्थापना करके उन्होंने राजधानी में ही नहीं अपितु समस्त देश में संस्कृत के प्रचार-प्रसार में जो योगदान दिया है—वह ऐतिहासिक महत्त्व रखता है। उनके द्वारा संपादित और प्रकाशित अनेक ग्रन्थों से संस्कृत साहित्य की श्रीवृद्धि हुई है। प्रस्तुत ग्रन्थ उनकी सक्षम लेखनी की एक उत्तम देन है--जिसके कारण डा० मण्डन मिश्र और विद्यापीठ हमारी बधाई के पात्र हैं।

(अध्यक्ष, लोकसभा नई दिल्ली) बलराम जाखड़

दिनांक २१-९-८३

वक्तव्यम्

अस्ति भारतीय-दर्शनेषु मीमांसा-दर्शनस्य महनीयं स्थानम्। अस्य दर्शनस्य विषय-बाहुल्यं नितरां प्रशस्तम्। महामनसां कुमारिलभट्टपादानां वचनानुसारमियं विद्या—'बहुविद्यान्तराश्रिता' विद्यते। परःशता उत्तमोत्तमा विद्वच्चक्रचूडामणय इदं दर्शनमधिकृत्य गणनातीतैः पृष्ठैः स्वीयान् विचारान् पुरस्कृत्य लिखितवन्त-स्तथाऽस्य भाण्डागारं पूरितवन्त इति न तिरोहितम्।

दर्शन-सदृश्यां गम्भीर-ज्ञान-धारायां किमपि लेखनं नास्ति यस्य कस्यापि सहजं कार्यं, तत्रापि मीमांसा-विषये तु दुःसाहस एव मन्यते। परं मम श्रद्धेया गुरुवरचरणा आचार्य श्रीपट्टाभिरामशास्त्रिमहाभागा एतस्मिन् कर्मणि प्रवर्तनायादिशन् तमेवादेश-मनुपाल्य क्रियात्मकरूपेण 'मीमांसा-दर्शना' भिधमिमं ग्रन्थं प्रस्तोतुमहं समर्थोऽभवम्। संस्कृतभाषाध्ययनसमकालमेव श्रीचरणानां (यदा ते महाराज-संस्कृत-कालेज-जयपुरस्या-ध्यक्षा आसन्) कृपामासाद्य प्रायः सप्ताष्टवर्षाणि यावन्मीमांसादर्शनस्याध्ययनमकार्षम्। आचार्योपाधिप्राप्त्यनन्तरं च त एव प्रस्तुतग्रन्थस्यालेखनाय प्रैरयन्। साम्प्रतिके युगेऽगाध-विचारशीलता-वैदिकाध्ययन-चिन्तन-मननानामपेक्षावति मीमांसा-दर्शने यादृ-शस्य बहुकार्यव्यापृतस्यापि ग्रन्थग्रथनमिदं श्रीगुरुचरणानामाशीर्वादफलितमेवेति कथने नातिशयोक्तिः।

अस्मिन् ग्रन्थे १. विचारकाण्ड २. ज्ञानकाण्ड ३. कर्मकाण्डनामभिस्त्रि-भिर्भागैर्मीमांसादर्शनस्य महत्त्वपूर्णा विषयाः सङ्कलिताः सन्ति। पूर्वाचार्याणां विचार-सरणे रूपरेखामिव प्रस्तुवन्नयं ग्रन्थः क्रमेण विचारकाण्डे-मीमांसाया विषये समुदीय-मानानां प्रश्नानामुपस्थापनपूर्वकं समाधानं प्रस्तौति। ज्ञानकाण्डे कर्मकाण्डे च विचार-काण्डस्य सिद्धान्तानां सङ्कलनं विद्यते। जिज्ञासायाः प्राचुर्येण क्रियाकाण्डस्याकारो विशदीकृतः ज्ञान-कर्मकाण्डयोराकारौ तदपेक्षया संक्षिप्तौ स्तः। कारणञ्चास्येदमेव यद्व्यापक-सामान्ययोरध्ययनानन्तरं ये मूलभूताः सिद्धान्ताः स्थिरतां लभन्ते त एव वस्तुतः कर्मकाण्डस्य सञ्चालकाः सन्ति। अतः विवेचनावसरे तान् मूलसिद्धान्तान् प्रति दृष्टेर्गमनं स्वाभाविकमावश्यकं चास्ति। यावदहं स्मरामि, तेषां निरूपणे मया कापि न्यूनता कृता, भवतु नाम तस्याकारो लघुर्महान् वा। इमे त्रयोऽपि काण्डाः सम्भूय

पूर्णाः सन्ति । मम मन्तव्यमस्ति यदयं ग्रन्थो मीमांसायाः सर्वस्वं मा भवतु, परं सर्वस्वं यावद् गमनस्य साधनमवश्यमस्ति। किञ्च गोविन्दापेक्षया गोविन्दं यावत् प्रापयितुर्गुरोरधिकं महत्त्वमस्माकं परम्परासिद्धमेव ।

अस्तु, अस्य ग्रन्थस्य प्रणयनं बहोः कालात् पूर्वमेवाभूत्, परं तदा मित्राणामभिभावकानां चाग्रहातिशयेन तथा मीमांसादर्शनस्य सर्वसाधारणोपयोगित्वाभिवृद्ध्यै पूर्वं राष्ट्रभाषायामस्य प्रकाशनं माननीय डा० सम्पूर्णानन्दमहाभागानां (उत्तर प्रदेशस्य मुख्यमन्त्रिणां) प्रस्तावनया सह १९५८ तमेशवीयवर्षे सम्पन्नम् । श्रीव्रजमोहनलाल माहेश्वरीमहोदया (रमेश बुक डिपो, त्रिपोलिया बाजार जयपुर, स्वामिनः) अस्य प्रकाशका आसन्, येषां सौहार्देन महता प्रयासेन च भूयान् प्रचारोऽस्य समजायत, तदर्थं ते भूरिशो धन्यवादार्हाः सन्ति ।

प्रायः पञ्चविंशतिवत्सरेभ्यः प्राक् प्रकाशितस्यास्य ग्रन्थस्य संस्कृतभाषायां प्रकाशनमभिलषताऽपि 'अ० भा० संस्कृतसाहित्यसम्मेलन'--'श्रीलालबहादुरशास्त्री केन्द्रियसंस्कृतविद्यापीठादिसंस्थानां तथा 'विश्वसंस्कृतशताब्दीग्रन्थप्रकाशन दि-प्रवृत्तीनां सञ्चालन-संस्थापन-समायोजन-सम्पादनादिकर्मसु भृशं व्यापृतेन मया तथा कर्तुं नापारि । साम्प्रतं दिल्लीस्थश्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठस्य प्रकाशनमालायामस्य प्रकाशनं सुकरमभूत् । तथाऽस्य गौरववर्धनायानुकम्पां विधाय लोकसभाध्यक्षैः श्रीबलरामजाखडमहाभागैः प्रस्तावना लिखितेति नितरां प्रसीदामि स्वीयां कृतज्ञतां च तेभ्यः प्रकटयामि ।

अस्य निर्माणकाले स्वीयाभिराशीर्भिरभिषिच्य मदीयोत्साहं वर्धयतां--म० म० डा० उमेशमिश्र--म० म० श्रीचिन्नस्वामिशास्त्रि--राजस्थानशिक्षामन्त्रि--मा० श्रीभोला नाथ--राजस्थानविश्वविद्यालयभूतपूर्वोपकुलपतिडा०मथुरालालशर्ममहाराजसंस्कृत - कालेजाध्यक्षश्रीमाधवकृष्णशर्मप्रभृतीनां महतीमुपकृतिततिमुररीकरोमि । इदानीञ्च पूज्यप्रवर-गुरुवर्याणां तेषां निर्देशानुसारं पूर्वरूपसंशोधनादिभिः सहयोगं विदधतां सर्वेषामपि ज्ञाताज्ञातसहायकानां मित्राणामाभारं मन्यमानस्तेभ्यस्तेभ्यो यथोचितान् प्रणाम-नमस्काराशीर्वादान् वितीर्य विरमामि ।

—डा० मण्डनमिश्रः

समर्पणम्

मीमांसादर्शनस्य भारतविख्याता विद्वांसः
सकलशास्त्र - पारावार - पारदृश्वानः
पूज्या आचार्य - श्रीपट्टाभिरामशास्त्रिणः

वन्दनीयचरणाः !

अतीतेभ्यो वत्सरेभ्यः श्रीमतां मातुरिव ममत्वेन पितृ-तुल्येन स्नेहेन बृहस्पति-समेन वाक्पटुत्वेन शङ्करसदृशेनाद्वैतेन गणपतिसमानेन लेखनकौशलेन कण्व-सदृश्या

शिष्यवत्सलतया जैमिनि-तुल्यया जिज्ञासया चेदं चैतन्यशून्यं मस्तिष्कं सततमन्ते-वासित्वमुपलभ्यापि स्वीययाऽसमर्थतया यत्किञ्चिदल्पाधिकमादातुमपारयत्--तस्येदं सङ्कलनमद्य भवतां करकमलयोरर्पयन्नहं सङ्कोचमनुभवामि, किन्तु यादृशमस्तीदं तद् भवतामेवास्ति तदर्थमेव भवद्भ्योऽर्पयामि ।

भवतां स्वीकृतिरस्यापूर्णतां पूरयिष्यति ।

त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्पये ।।

गुरुपूर्णिमा
आ० शु० १५, वि० सं० २०४०

कृपापात्रम्
डा० मण्डनमिश्रः

विषयानुक्रमणिका

विषयः

पृ० सं०

मीमांसादर्शनम्

तत्सामान्य-परिचयः

मीमांसाशब्दार्थः—

व्याकरणशास्त्रस्य प्रचलितस्वरूपप्रवर्तकस्याचार्यपाणिनेर्मतेन 'मान' धातोः 'सन्प्रत्यये कृते 'मीमांसेति'[१] शब्दो निष्पद्यते। "मान" धातुश्चायं[२] पूजायां विचारे चेत्यर्थद्वये प्रयुज्यते। अस्मादेव धातोः सन् प्रत्ययो जिज्ञासार्थे विधीयते कात्यायनेन 'मानेर्जिज्ञासायामि'ति वार्तिकेन 'मानवधे'तिसूत्रस्थेन। विद्वत्समुदाय इममेव सन्प्रत्ययं विचारार्थप्रतिपादकतयाऽभिप्रैति। अनेनैव चाभिप्रायेण स चेमं शब्दं प्रयुङ्क्ते।

शाब्दिकं महत्त्वम्—

अर्थ-सादृश्ये सत्यपि कतिपये शब्दाः स्वपर्यायेभ्यः किञ्चिद् वैशिष्ट्यमावहन्ति। अभिप्रायदृष्ट्या नावीन्येऽसत्यपि तेषु कश्चिच्छक्तिविशेषोऽन्तर्हितस्तिष्ठति। सर्वत्र पर्यायेषु सामान्यरूपेण स्थितत्वात्समानोऽपि स शब्दो विशेषमाश्रित्य कामपि विच्छित्तिं पुष्णातीति कृत्वा शाब्दिकमहत्त्व (शब्दव्यक्तित्व) नाम्ना व्यवह्रियते। इयमेवान्तर्हिता शब्द-शक्तिः काव्यशास्त्रक्षेत्रे बहूनामलङ्काराणां जननी। प्रकृतः मीमांसाशब्दोऽपि तादृश्या एव शक्तेर्निदानम्, यस्य विद्वद्वर्गोऽपरिमितात् कालात् सादरभरं प्रयोगं करोति। अनु-सन्धान-परीक्षण-विचार-वितर्क-विवेचनादयोऽनेकेऽभिप्राया अस्मिन्नेकस्मिन् शब्देऽविरोध-पूर्वकं सह सन्निहिता वर्तन्ते।

अत एव वाङ्मयस्य विविधान्यङ्गानि शब्दस्यास्य महत्त्वेनाप्रभावितानि नातिष्ठन्। भगवत्पादश्रीशङ्कराचार्यैस्त्वनया मीमांसयैव सह स्वप्रतिपाद्यमक्षय्य-ज्ञानराशिं सम्बद्धसंयुक्तनाम्ना ब्रह्ममीमांसेत्यभिहितम्। तेषां विमर्शपरिधौ शब्दोऽयं विचारार्थकतायामेव सीमितो भूत्वा न प्रायुज्यत, अपितु स्वकीयं विचार-सामान्यवाचकत्वमतीत्य पूजितविचाराणां[३] वाचकतां जग्राह। नैतावन्मात्रम्, यत्रा-धिकरणनिकषे स्थापयित्वा विवेचनापूर्वं विषयस्य निर्णयोऽक्रियत तत्रायमेव शब्दः

---

१. मानवधदान शान्भ्यो दीर्घश्चाभ्यासस्य। (पाणिनिः ३।१।६)

२. 'मान-पूजायाम्' भ्वादिः, मान विचारे, चुरादिः।

३. पूजितविचारवचनो मीमांसा शब्दः। (ब्रह्मसूत्रशाङ्करभाष्यम् पृ. ४६ बम्बई)

परीक्षण-विचार-वितर्क-विवेचनाद्यनेकानभिप्रायान् युगपत् प्रकटीचक्रे । यत्र तु समन्वयस्य समस्योत्पन्ना तत्रास्य प्रयोगो युक्तिन्यायात्मकतान्यतरार्थे[१] जातः । सारांशतो वक्तुं शक्यत एतद्—यत्र तावद् गभीरतराणां विषयाणां सूक्ष्मतमविवेचनस्य प्रसङ्गो भवति तत्र तावद् विशालतरस्याभिप्रायस्य संक्षेपेणाभिव्यञ्जनार्थमेतस्मादुत्कृष्टः कोऽपि शब्दो नास्ति प्रयुक्तिपथे । एतदेकं निर्विवादं सत्यम्, यदस्य 'शाब्दिकमहत्त्वस्य' साक्षि ।

प्रायोगिकमितिवृत्तम्—

वाङ्मयस्य प्रथमं विलसितमारभ्याद्यावधि शब्दस्यास्य प्रयोगोऽनेकत्र समुपलभ्यते । आधुनिकसमीक्षकाणां समीक्षानुसारेण वैदिकसाहित्यस्य पौरुषेयतायामङ्गीकृतायामपि तदस्ति सृष्टेराद्यं साहित्यमिति स्वीकारे नास्ति काऽपि विप्रतिपत्तिः । तस्यादिवाङ्-मयस्यानेकेषु भागेष्वस्ति शब्दोऽयं समाम्नातः, यस्य च समाम्नानकालो वस्तुतो गणनातीतः । यदि विश्वस्य तद् वैभवशालिवाङ्मयं भारतीयपद्धत्यनुसारेणापौरुषेयं स्वीक्रियेत, तदा तु किमु वक्तव्यम्, शब्दस्यास्य प्रायोगिकमितिवृत्तं ततोऽप्याधिकतर-महत्त्वसम्पन्नं स्यात् । किञ्च यदीश्वरस्य कृतिरिति स्वीक्रियेत, ततस्तस्या ऐश्वर्यमय्या विभूतेर्मुखारविन्दाद् विनिर्गतत्वरूपं सौभाग्यमप्यस्य शब्दस्य प्राप्तं स्यात् । तैत्तिरीय[२]काठकादि[३]-संहितासु तथा ब्राह्मण[४] भागेष्वप्येवंविधाः प्रयोगाः प्राचुर्येणोप-लभ्यन्ते । वेदानामन्तिमभागस्याथवा ब्राह्मणभागस्यानुवर्तिनः परिच्छेदस्या-(उपनिषद) नेकानि स्थलान्यपि शब्देनानेन शोभितानि[५] । अनुशीलनेनैतदपि प्रतीयते यत् संहितायां ब्राह्मणभागेषु च शब्दोऽयं यावता प्राचुर्येण प्रयुक्तस्तथा नोपनिषद्भागेषु । मध्यकाल-साहित्येनापि शब्दोऽयं पर्याप्तं प्राप्तादरः ।

दशमशताब्द्यामुत्पन्नेन साहित्यमहारथिना यायावरीयेण राजशेखरेण साहित्य-शास्त्रस्य सूक्ष्मतरसमीक्षासम्पन्नः स्वकीयो ग्रन्थः काव्यमीमांसेति नाम्नाऽभिहितः । स्वग्रन्थस्य प्रतिज्ञावाक्येऽपि तेन विचारात्मकत्वाभिप्राये 'मीमांस्य' इति[६] शब्दं प्रयुज्य स्वकीयाऽतिशयिताऽऽस्था परिचायिता । वेदान्तशास्त्रमपि 'उत्तरमीमांसे'त्यथवा

१. सा न्यायात्मिका मीमांसा । (ब्र० शां भा० पृ० ४६ कल्पतरुः)

२. इति मीमांसन्ते ब्रह्मवादिनः । (तैत्तिरीयसंहिता ५।७।१)

३. उत्सृज्यां नोत्सृज्यामिति मीमांसन्ते । (काठकसंहिता ३।३।७)

(A) इति मीमांसन्ते । (मैत्रायणीयसंहिता १।८।५)

४. उदिते होतव्यमनुदिते होतव्यम् । (कौषितकी ब्राह्मणम्)

(A) ब्राह्मणं पात्रे न मीमांसेत । ताण्ड्यमहाब्राह्मणम् (६।५।८)

५. सैषा आनन्दस्य मीमांसा भवति । (तैत्तिरीयोपनिषद् ८ अनुवाकः)

६. इयं नः काव्य-मीमांसा काव्यव्युत्पत्तिकारणम् ।
इयं सा काव्यमीमांसा मीमांस्यो यत्र वाग्भवः ॥

"ब्रह्ममीमांसे"ति नाम्ना व्यवाह्रियत। अद्यत्वेऽपि समीक्षात्मका ग्रन्थाः सूत्ररूपेण स्वीयमाशयमभिव्यञ्जयितुं लिखिताः "साहित्यमीमांसा" "अध्वरमीमांसे" तीदृशनामभिः शब्दमिममाश्रयन्त उपलभ्यन्ते। इमे सर्वेऽप्यस्य सोपपदाः प्रयोगाः सन्ति ये मध्ययुगे गृहीतजन्मानः। वैदिकसाहित्यान्तरर्वर्तिनि कालेऽस्य मीमांसाशब्दस्य निरुपपदः प्रयोगो विचारस्यैकस्यानिन्दितायाः परिपाट्यास्तात्पर्येण प्रारब्धः। तथापि यथा किलोपर्युक्तविवेचनेन विस्पष्टमस्ति यद् वाङ्मयस्य विभिन्ना वर्गास्तदीयमहत्त्वेनावश्यमननुप्राणिता नातिष्ठन् तैश्च तदर्थमादरणीयं स्थानं दत्तम्। इदमेव तस्य प्रायोगिकं संक्षिप्तमितिवृत्तं वर्तते, यदस्य गौरवस्य प्रतिष्ठायाश्च परिचयाय पर्याप्तम्।

मीमांसाया उदयः—

मानवो मननप्रधानः प्राणी। तदीयेयमेव चिन्तनमननशक्तिर्यस्याधारो बौद्धिकी शक्तिस्तं पशुभावात् पराङ्मुखयति। विचारस्य पूर्णतायामेव मानवता तिष्ठति। विचारहीनो हि मानवः पशुतामप्यतीत्य दानवो जायते। आहार-विहार-व्यवहारणां समान यां सत्यामपि मनुष्य इतरप्राण्यपेक्षया स्वविवेकबुद्धिमहिम्नैव महनीयोऽभवत्। इतिहासेन प्रतीयते यद् विवेकशून्यो मानवस्तस्मिन्नादिकाले पशुप्रकारेष्वेक आसीत्। यथा यथा विवेकबुद्धिरुदियाय तथा तथा मानवः स्वान्यसहयोगिजीवेभ्यः क्रमश उत्कृष्टतां प्रापत् अयमेव तस्य विकासमार्गः। एतं विकासं प्रति गन्तुं तस्य संख्यातीतसंवत्सराणां सीमानामतिक्रमणमावश्यकमभूत्। यथा यथा तस्येयं शक्तिः समृद्धिं गता, तथा तथा स प्रगतिशीलोऽभूत्। अद्यापि स तस्य पराकाष्ठां प्राप्तुं न शशाक। केवलमेतदेवैकं साधनं येन तस्य प्रत्येकं कार्ये वैलक्षण्यमापादितम्। अद्यत्वेऽनुभूयतेऽस्माभिर्यदन्यप्राण्यपेक्षयाऽस्माकमाहारविहारादिक्रियाकलापा - ये कदाचित् सर्वथा समानाः सुसंस्कृताः सम्पन्ना इति। मानवजीवनस्य प्रत्येकं सूक्ष्मात् सूक्ष्मतरांशेऽप्यस्यानिवार्यः प्रभावः संलक्ष्यते, वस्तुतो मानवो बुद्धिवादी पशुरस्ति, तस्माच्च यदाऽयं बुध्यंशो विचारांशो वाऽदृश्यो भवति तदा तस्मिन् पशौ च न किञ्चित्तात्त्विकमन्तरमवशिष्यते।

अत एव विचारारम्भ एव मानवतायाः आरम्भः, विचारस्येतिहास एव मानवताया इतिहासो वर्तत इति वक्तुं शक्यते। विचारस्योत्थान एव मानवताया उत्थानं निहितमस्ति। अयमेव विचारो यदा सहस्राणां संवत्सराणामनुभूतिभिः परिपक्वं दृढनियतञ्च स्वरूपं प्राप्नोति तदाऽचाररूपतया परिणमति, यं भारतीयपरम्परा प्रथमकर्त्तव्यत्वेन स्वीकरोति। विचारस्यैव सत्यसमन्विता पराकोटिः आगमक्षेत्रे मीमांसाशब्दवाच्या तथा विचारप्रधानः प्रस्तुत आगमो मीमांसाशास्त्रेण।

एतदेव विचारप्रामुख्यमधिकृत्य विधीयमानेऽन्वेषणे, विचारशास्त्रस्य प्रवृत्तेर्मीमांसाया उदयस्य चेतिवृत्तं जैमिनिमहर्षेरनेकपरम्परातोऽपि पूर्वमुपयाति भारतीयवाङ्मयस्य प्रथमविभूतौ। वेदेऽनेकेषु स्थलेषु पूर्वोक्ता विचाराः प्रवर्तिताः सन्ति।

मीमांसादर्शनस्य मन्तव्यं किञ्चित् क्षणमुपेक्ष्य केवलयाऽऽधुनिकयैतिहासिक्या दृष्ट्या समीक्षणेऽधोनिर्दिष्टः प्रतिभासते ।

यथा—यजुर्वेदस्य ज्योतिष्टोमप्रकरणे समाम्नातेषु—

"प्रजापतिर्वा इदमेक आसीत् स तपोऽतप्यत, तस्मा—
त्तपस्तेपानात् त्रयो देवा असृज्यन्त, अग्निर्वायुरादित्यः ।
ते तपोऽतप्यन्त । तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्त—
अग्नेर्ऋग्वेदः वायोर्यजुर्वेद आदित्यात् सामवेद इति ।"

वाक्येष्वेषु समालोच्यमानेषु वेदानां पौर्वापर्यस्य समयः सङ्केतितो भवति । त्रय्याम् ऋग्वेदस्याविर्भावः सर्वतः पूर्वं यजुर्वेदस्य च तदनन्तरमभवत् इत्यस्माकं दैनिकेन प्रायोगिकेणानुभवेनापि सिद्धम् । एवमेवोपनिषदां शैली सर्वतः तासामर्वाचीनतां प्रमाणयति । तदाधारप्रवर्तितं वेदान्तशास्त्रमपि तासां वेदान्तत्वं प्रत्याययति । ऋग्वेदो-ह्यस्माकं वाङ्मयस्य प्रथमस्तरङ्गस्तर्हि यजुर्वेदो द्वितीयः । ऋग्वेदयुगस्य मानवः किञ्चि-न्मुग्ध इव[१] प्रतीयते, क्वचिच्च तस्मिन्ननेकदेववादित्वं क्वचिच्चाधिदेववादित्वं प्रतीयते । किन्तु तस्य युगस्यान्तिमचरणे मानवस्य विवेकशक्तिः किञ्चिद् विकसितेवाभाति, यत्र स दृढतया एकदेववादी भवति । यजुर्वेदवर्णिताः कर्मकलापास्तात्कालिकं मानवं कर्मानुष्ठानलीनं प्रमाणयन्ति । स एव च मानव उपनिषत्कालमवाप्य दार्शनिक आत्म-चिन्तनपरश्च दृश्यते । तथापि कर्म प्रत्येव स्वाभाविको विवेकस्तस्मिंल्लक्ष्यते । क्रमेण स प्रतिभाशाली सुशिक्षितो विवेकशीलश्च प्रतीयते । अतएव ऋग्वेदस्यान्तिमो यजुर्वेदस्य च प्रारम्भिकोऽयमेव सङ्क्रमणकालो वस्तुतो विचारस्य प्रारम्भकालः । इत्थमयं समय आधुनिकैरितिहासविद्भिः[२] खिस्तात् सप्तसहस्र ७००० वर्षेभ्यः पूर्ववर्ती-त्यनुमीयते ।

यजुर्वेदस्य प्रारम्भ एव विचाराः प्रवर्तिताः सन्ति, येषामाकलनेन तात्कालिकस्य मानवस्य विवेकशीलत्वं प्रतिभाशालित्वञ्च प्रतीयते । विवेकस्य विकासोऽयं क्रमेण समवर्धत, ब्राह्मणभागपर्यन्तं गच्छतस्तस्यैकं नियतं स्वरूपं प्राप्तमभवत् । ब्राह्मणभाग-स्थानेकेषु प्रकरणेषु विचारस्य प्रणालीयं "मीमांसेति" नाम्ना व्यवहृता । शैल्याः परिशीलनेन ब्राह्मणेष्वपि मैत्रायणीय-तैत्तिरीय-शाखयोः प्राचीनत्वमैतरेयादिशाखानाञ्चा-र्वाचीनत्वं स्पष्टं प्रतिभाति, यतस्तासां वर्णनप्रणाली शब्दशास्त्रस्य नियमानुबद्धा लौकिक-संस्कारसंस्कृता कथावस्त्वाहिता काव्यानुरूपा चास्ति, अतस्तासामर्वाचीनत्वं युक्तिसङ्ग-तम् । मैत्रायणीयतैत्तिरीयब्राह्मणाभिव्यञ्जनापद्धतिर्वैदिकपद्धतेरनुरूपा । अतएव

१. एकं सद विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः (ऋ०)
२. भारतवर्ष का इतिहास (भगवद्दत्त पृ० ७८)

तयोः प्राचीनत्वं प्रतीतिगम्यं विद्यते। विख्यातेन विचारतत्त्वज्ञेन ए०बी० कीथमहाशयेन तथ्यमिदं **'कर्ममीमांसा'**—नाम्नि स्वग्रन्थे शब्दैरेभिः प्रकटितम्—

"Not rarely in the Brahmanas, especially in later texts like the Kausitaki the term Mimansa occurs etc. (Page 18)

मैत्रायणीय[१]शाखायां तैत्तिरीयशाखाया[२]ञ्चानेकेषु स्थलेषु विचाराः प्रवर्तिताः। अनयोर्द्वयोः शाखयोरपि विचारप्रामुख्यं तैत्तिरीयशाखाया अर्वाचीनतां विचारस्याल्पत्वं च मैत्रायणीयशाखायाः प्राचीनतां प्रतिपादयति। विचाररूपाया अस्या एव धारावाहिन्याः परम्पराया विकसितं नियतञ्च स्वरूपम्—मीमांसा नाम। यस्या ऐतिहासिक उदयो ब्राह्मणभागतो वर्तते। अतोऽयमेव ब्राह्मणकालो वस्तुतो मीमांसाया उदयकाल इतीयं धाराऽविच्छेदेन प्रवहन्ती समायाति।

मीमांसाया अनेकरूपत्वम्

(क) समयविद्या—

इत्थमुदये सञ्जातेऽस्या विकासेऽधिको विलम्बो नाजायत, यत इयमेवंविधं-मूलमधिश्रिता सती प्रावर्तत यज्जीवनस्य मूलमस्ति। यद्यपि जीवनस्यानिवार्यभूतस्याङ्गस्य तस्य विवेचनार्थं प्रमुखं कर्त्तव्यं कालेऽस्मिन् कल्पसूत्रेष्वेवावधृतम्, किन्तु तान्यपि (कल्पसूत्राणि) मीमांसान्यायानां प्रभावेणानुप्राणितान्यासन्। तद्गतसिद्धान्तेषु मीमांसाया न्याया अनुस्यूता अभवन्। प्रयोगविषये तैः सूत्रकृद्भिर्ये क्रमा निर्णीय समुपस्थापितास्ते सर्वेऽपि वस्तुतो मीमांसान्यायनिकषे विशोधिताः। मन्थानेनानेन तत्सर्वं पूर्णतया विलोडितम्, तच्च तद्विलोडनोद्गतं नवनीतकल्पम्। अयमेव हेतुः कल्पसूत्र-मीमांसयोराधाराधेयभावे। कल्पसूत्राणि हि विशिष्टं प्रयोगशास्त्रम्। यथायुर्वेदशास्त्रे विचारः प्रयोगश्चेति प्रकारद्वयम्। तद् द्वयञ्च भिन्नमपि सदेकम्—निर्णयप्रदो विचार एव प्रयोगे उपयुज्यते। प्रयोगश्च चरकादिभिः प्रस्तावितेषु विचारेष्ववधृतः। तदेव स्थानं तद्वदेव मीमांसाशास्त्रेणोपलब्धम्। मीमांसाशास्त्रेण ये निर्णयाः कृताः कल्पसूत्रैस्त एव प्रयोगार्थतया स्वीकृताः। येन कल्पसूत्राणां प्रयोगशास्त्रतोपपन्ना। किन्तु विचाराणां परम्परेयं—यस्याः विकासः ग्रन्थरूपेण न भूत्वा व्यावहारिकरूपेणाभूत्—तस्मिन् काले मीमांसेति नाम्ना व्यवहृता नासीत्। भगवता विष्णुनेवानया स्वीयं रूपं समये समये नानाकृतिषु प्रकटीकृतम्। सूत्रकाले पद्धतिरियमेव **'समय'** शब्देन प्रचलिताऽभूत्।

---

१. ब्रह्मवादिनो वदन्ति—यदेको यज्ञश्चतुर्होताऽथैकस्मात् सर्वे चतुर्होतार उच्यन्ता इति।
(मैत्रायणीयसंहिता १-९-६ संग्रह १-४-४)

२. तैत्तिरीयसंहिता १।५।६, ५।५।१, ५।३।३, ६।१।४, ६।१।८, ६।५।९ आदि।

आपस्तम्बमहर्षिणा[1] स्वकीयश्रौतसूत्रस्याद्ये सूत्रद्वयेऽस्य स्पष्टमुल्लेखः कृतः। एतयोः प्रथमं सूत्रं व्याचक्षाणेनोज्ज्वलाटीकाकारेणाचार्यहरदत्तेनास्या[2] व्यवस्थाया विचारस्य चोपर्युक्तायाः पद्धतेरभिप्राये समयशब्दः प्रमाणीकृतः। तदवधि गन्तुं नास्त्यपेक्षा—स्वयं सूत्रकारेण (आपस्तम्बेन) द्वितीये सूत्रे 'धर्मज्ञसमयं" प्रमाणतया स्वीकृत्य मीमांसान्याय-सिद्धेष्वर्थेषु स्वकीयामगाधश्रद्धां व्यञ्जयता व्यवस्थेयं परम्पराप्राप्तेति साधितम्। इतरस्थानेष्वपि समयविद्येति नाम्ना ते न्यायाः स्वीकृताः। इदमेव मीमांसायाः प्रारम्भिकं स्वरूपम्।

(ख) न्यायस्तर्कविद्या वा

प्रारम्भिकयुगानन्तरकाले युक्तिकलापोऽयमनेकान् संवत्सरान् यावद् 'न्याय[3] इति नाम्ना व्यवहृतः। वस्तुत एतत्सङ्गतमप्यासीत्। न्यायविषयिणी यावती सामग्री शास्त्रेणानेन प्रस्तुता न तावती प्रचलितेन न्यायशास्त्रेण विभिन्नैर्न्यायालयैश्च (अधिकरणैः) घोषिता। अस्य (शास्त्रस्य) न्याया लोकशास्त्रयोरुभयत्र क्षेत्रयोः समान-रूपेण समाहृताः सन्ति। यथैकस्मिन् न्यायालये प्रतिवादिनः पोषको वाक्कील इतर न्यायालय-प्रदत्त निर्णयमुद्धृत्य तदनुरूपं निर्णयं दातुं न्यायाधीशं निर्बध्नाति—तद्वदस्य शास्त्रस्य न्याया अपि निर्णयार्थमाग्रहं कुर्वन्ति।

तेषां प्रामाणिकत्वं महत्त्वञ्च सर्वानुमोदिते स्तः। "हिन्दू-न्यायः" (लॉ) एतेषामेव न्यायानां परिष्कृतं रूपम्।

वस्तुतोऽस्य शब्दस्य प्रयोगोऽस्मा एव वाङ्मयायोपयुक्तः परं न जाने कथङ्कार-मेष प्रचलितस्य वाङ्मयस्य शब्दजालप्रधानधारया संयोजितः! मीमांसाशास्त्रस्यानेकेषु ग्रन्थेष्वयं शब्द उपात्तः—अनेन च सह संयोज्यानेकेषां ग्रन्थानां नामाकरणमपि कृतम्[4]।

---

१. अथातः सामयिकाचारिकान् धर्मान् व्याख्यास्यामः।

(A) धर्मज्ञ-समयः प्रमाणम्। (आपस्तम्ब श्रौत सूत्रम् १।२)

२. समयः पौरुषेयी व्यवस्था, तन्मूला आचाराः, तत्र भवाः सामयाचारिका धर्माः (उज्जवला २ पृ०)

३. अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः।

(आपस्तम्बसूत्रम् II ४।८।१३)

(A) अथापि नित्यानुवादमविधिमाहुर्न्यायविदः।

(आपस्तम्बसूत्रम् II ६।१४।१३)

४. मण्डनमिश्रविरचितस्य 'विधिविवेक' स्य व्याख्या...."न्यायकणिका" (वाचस्पतिमिश्रः)

(अ) न्यायरत्नमाला (पार्थसारथिमिश्रः)

(ब) न्यायमाला विस्तरः (आचार्य माधवः)

यया च धारावाहिन्या गत्या गोतम-प्रवर्तितस्य न्यायशास्त्रस्य प्रचारः प्रावर्धत, तयैव गत्या मीमांसकैः सम्बन्ध-विच्छेदः प्रारब्धः। न्यायसमाख्यया सह विचाराणामेतेषां परिणामसङ्गतौ कस्यापि मनीषिणो मनुष्यस्य संशयो नास्ति। अत एवास्य न्याय-विद्यात्वमपरिहार्यम्।

धर्मजिज्ञासाया इमान्येवोपकरणानि कतिपयेषु स्थलेषु 'तर्क' इति नाम्नोद्-घोषितानि। हिन्दूविधानस्य प्रवर्तकेनाचार्येण मनुना[१] धर्मज्ञं लक्षयता विचारा इमे तर्क नाम्नोपात्ताः। इयमेकाऽभिख्या भवितुमेवार्हति। वस्तुतो यस्यामप्रतिष्ठायां[२] कार्य-कारितायामद्यत्वे शब्दोऽयं प्रचलितस्तया सह तु धर्मस्य काल्पनिकः सम्बन्धोऽप्यशक्यः। सम्भाव्यते न्यायार्थेऽद्यत्वे प्रवर्तमानायाः प्रणाल्या इव शब्दस्यास्य प्रयोगः प्रचलितोऽभूत्। किन्तु न्यायशब्दस्य यावती सङ्गतिरुपर्युक्तया विचारधारया सह वर्तते तावती सङ्गतिस्तर्कशब्दस्य लेशमात्रमपि नास्ति। एष शब्दो व्यावहारिकतां न प्राप्त इत्यत्र कारणमिदमेव।

(ग) मीमांसा

आचार्यशङ्करस्य शब्देषु पूजितानां[३] विचाराणां राशिरितीयं विचारसरणि-र्मीमांसेति नाम्ना सर्वसम्मत्या बोध्याऽभूत्। यदा हि चतुर्विधपुरुषार्थेषु प्रथमं पुरुषार्थमधिकृत्य स्वविचारं प्रकटयन्त्यास्तञ्च नियम्य तस्य क्रमं शास्त्रीयत्वेन सत्यापयन्त्या अस्या विचारेषु पूज्यतमत्वविषये कः सन्देहो भवितुमर्हति? अत एव कालस्य गणनातीत परिधेरारभ्य पूजितानामेषां विचाराणां महत्त्वपूर्णेनानेनैव शब्देन समाख्यानं प्रवर्तते स्म। पार्थसारथिमिश्रेण स्वकीये 'श्लोकवार्त्तिक' व्याख्याने मीमांसाया अनादितां साधयता निम्नलिखिता परम्परैवमुद्धृता—"ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सोऽप्यादित्याय, स च वसिष्ठाय, सोऽपि पराशराय, पराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये, स च स्वोपदेशानन्तरमिमं न्यायं ग्रन्थे निबद्धवानिति"। नायकरत्न० पृ० २)

आचार्यकुमारिलेनापि एतं गुरुपर्वक्रमं प्रति सङ्केतितम्[४]। पर्याप्तेऽनुसन्धाने विहितेऽपि ज्ञातुं नाशक्यत यत् पार्थसारथिमिश्रैः क्रमोऽयं किमाधृत्य प्रस्तुतः कुतश्चोद्धृत इति? तथाप्यस्य वाक्यस्य प्रामाणिकत्त्वे सन्देहोद्भावनं परम्परां प्रत्यन्याय एव भविता। क्रमेऽस्मिन्नास्थां दर्शयता शास्त्रदीपिकायाः प्रथमेन व्याख्याऽऽचार्यरामकृष्णेनो[५] पर्युक्तः क्रमोऽयं किञ्चित् परिवर्त्य निर्दिष्टः। क्रमस्यास्य प्रामाणिकत्वे सन्देहे

---

१. यस्तर्कणानुसन्धत्ते स धर्मं वेद नेतरः। (मनुस्मृतिः)

२. तर्कोऽप्रतिष्ठितः।

३. अवलोक्यतां प्रथम पृष्ठगता टिप्पणी।

४. "क्रियानन्तर्यरूपो वा गुरुपर्वक्रमोऽपि च।" (श्लो० वा०)

५. सिद्धान्तचन्द्रिका पृ० ४ पं० १२ (निर्णयसागरीयं सं०)

सत्यपि इदन्तु शक्यत एव निश्चयेन वक्तुं यद्य एव न्यायाः सिद्धान्ता वा जैमिनिना ग्रन्थरूढतया ग्रथितास्त एव प्राचीनात् कालादेव मीमांसेति नाम्नाऽभिहिता आसन्। एतावन्मात्रसिद्धिरेव प्रसङ्गायास्मै पर्याप्ता।

(अ) मध्यकालः—पूर्वार्द्धः

इदं तु प्रत्यक्षं यन्महर्षिणा जैमिनिना स्वकीयया लेखन्या स्वप्रवर्तितायै विचार-धारायै मीमांसेति शब्दस्य प्रयोगो न कृतः। यदीतस्ततः क्वचित् प्रयुक्तोऽपि भवेत् सशब्दः परं सोऽप्रत्यक्षोऽप्राप्तो वा शब्देऽस्मिन् येऽभिप्राया अन्तर्हिता आसंस्तेभ्यो जैमिनिना स्वप्रतिज्ञासूत्रे जिज्ञासेति पदस्य साङ्केतिकः प्रयोगः कृतः। एतदेवाधिकृत्याचार्यः शबरोऽपि[1] सूत्रमिद व्याचक्षाणो विचारस्याभीप्सितां (द्धतिं जिज्ञासेत्याह।

आचार्यशङ्करोऽप्यनेन[2] प्रभावेणास्पृष्टो नातिष्ठत्। अत एव तेनापि स्वकीय विचारपद्धत्यर्थं मीमांसायाः साङ्केतिकाभिप्राये जिज्ञासाशब्द एव प्रयुक्तः। किं बहुना ब्रह्ममीमांसायाः प्रवर्तके बादरायणे[3] वैशेषिकदर्शनस्य प्रवर्तके कणादेऽपि[4] शब्दस्यास्य प्रभावः स्पष्टं परिलक्ष्यते। अनया विवेचनया स्पष्टं यदियं विचारस्य परम्परा कदाचिद् जिज्ञासापदवाच्याऽप्यासीत्। शब्दशास्त्रे परिगणित-धातुपाठे पठितस्य 'मान' धातोर्जिज्ञासार्थत्वमस्यैव साक्ष्यम्।

(आ) उत्तरार्द्धः—

मध्यकालस्य पूर्वार्द्धेन यो हि शब्दः सादरमङ्गीकृतः, मनोवैज्ञानिकविश्लेषण-माश्रित्य स एव शब्द उत्तरार्द्धेन तथा न स्वीकृतः। तेन 'मानेर्जिज्ञासाया' मिति वाक्यं श्रुत्वा तत्रान्धविश्वास एव नैव विहितः परं विषयेऽस्मिन्नपेक्षणीयं विश्लेषणमपि[5]

---

१. अविचार्य प्रवर्तमानः किञ्चिदेवोपाददानः विहन्येत, अनर्थञ्च ऋच्छेत् तस्माद् धर्मो जिज्ञासितव्यः" इति। (शाबरभाष्यम्, पृ० १)

२. ब्रह्मजिज्ञासितव्यं न वा (ब्रह्ममीमांसाभाष्यम्, १।१)

३. अथातोब्रह्मजिज्ञासा (ब्र० मी० १।१)

४. अथातो धर्मजिज्ञासा (वै० द० १।१)

५. "जिज्ञासापदस्य ज्ञानेच्छारूपक्रियावाचकस्य मीमांसापर्यायत्वाभावात्-श्रोतृ क्रिया हि ज्ञानेच्छा-रूपा जिज्ञासा, वक्तृक्रिया तु विचारात्मिका मीमांसा, कुतस्तयोरैक्यम्"। (शास्त्रदीपिका-सिद्धान्तचन्द्रिका। (पृ० ४)

(अ) ज्ञानेच्छावाचकत्वाद् जिज्ञासापदस्य, प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात्। न च प्रवर्त्यप्रवर्त्तकयोरैक्यम्। (ब्र० सू० शां० भा० भामती पृ० ४८)

(ब) जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः।
ज्ञातविज्ञान्तरस्यान्याया मीमांसापुरस्सरा ॥ (न्या० र० पृ० ९)

कृतम् । आत्मनः साऽऽद्या प्रक्रिया, यया स इन्द्रियाणि ज्ञानार्थं प्रेरयति, जिज्ञासाऽऽच सा भवति या ज्ञानेच्छारूपा । इतः परं कोटिमाटीकते मीमांसा यस्यश्च प्रवृत्तिजननकार्यं जिज्ञासायाः । यदि नाम जिज्ञासायाश्च प्राथम्यं तर्हि मीमांसा तस्या विकसितं रूपम् । सा चैका प्राणिमात्रवर्तिनी स्वाभाविकी प्रवृत्तिः । अकस्माद् घण्टारवमाकर्ण्य चलन् वृषभोऽपि चकितो भूत्वेतस्ततः पश्यति, इयं जिज्ञासा मानव इव तस्मिन्नपि तत्स्वरूप-सामर्थ्यानुकूला । किन्तु मीमांसा पशौ साधारणे वा मानवे नोदयते । प्राणिमात्रं जिज्ञासाया अधिष्ठानं भवितुमर्हति न तु मीमांसायाः । तथा भवतुं विद्या-विकाससम्पन्नत्वमनिवार्यम् । एतन्मौलिकं भेदमाश्रित्योत्तरार्द्धस्योन्नायकाः पर्याप्त-विश्लेषणानन्तरं जिज्ञासाशब्दस्य प्रयोगं समापयामासुरिव । तञ्च विचारार्थप्रतिपादनेऽसमर्थं मत्वा लाक्षणिकं घोषयामासुः । यद्यपि स्वयमाचार्यशबरस्वामिना मीमांसाशब्दो न प्रयुक्तः परं नास्त्यत्र सन्देहो यदयं विचारनिधिस्तेन मीमांसेति नाम्नैव परिगृहीतः । तस्यैव भाष्यं सर्वसम्मत्या मीमांसासूत्रेषूपलब्धः प्रथमो ग्रन्थः स्वीक्रियते । तदनुवर्तिना लेखकेन कुमारिलभट्टेन स्वरचनासु शब्दस्यास्य पर्याप्तं विश्लेषणं कृतम्, यस्य समीक्षया निश्चीयते यत् तत्कालं यावत् एतदागमार्थं मीमांसापदस्य प्रयोगो व्यापकतां प्रत्यप-द्यतेति । भट्टेन शब्दोऽयं शास्त्रमिति विद्येत्यादि च गौरवव्यञ्जकेन पदैः सह प्रयुक्तः । तेनेदमुत्कृष्टं शास्त्रं विकसिता विद्येति च साधितम्[१] । तत्स्थितिकालादनन्तरं शब्दस्यास्य प्रयोग आदरश्च क्रमेण प्रावर्धेताम् ।

(घ) तन्त्रविद्या

जैमिनिमहर्षेर्विचारधारामिमां सम्बोधयितुमन्यदधिकतरं व्यापकमभिधानं तन्त्र-विद्येति तन्त्रशास्त्रमिति वा वर्तते । लोकव्यवहारे कामं शब्दोऽयं न प्रयुज्यताम् । शास्त्रसन्दर्भे बहुधा शब्दमिमं प्रधानसिद्धान्तपर्याये परिगणयन्तः प्रायुञ्जत एव । कोशकारः[२] मेदिनीकारः[३] शब्दमिमं शास्त्रभेदस्य, इतिकर्तव्यतायाः सिद्धान्तस्य शाखान्तरस्य चाभिप्रायेषु समग्रहीत् । येनैतत् स्पष्टमवगम्यते यन्मेदिनीकारस्य समयं यावत् शब्दोऽयं मीमांसायां प्रचलितानां न्यायानामभिप्राये रूढः सञ्जात आसीदिति । वस्तुतः शास्त्र-सम्बद्धा यावन्तो विभेदाः प्रकारा वा मेदिनीकारेणोपस्थापितास्तेषां सर्वेषां निधिः मीमांसा । कोशकारसंमत्या मीमांसासिद्धान्ताः प्रधाना आसन् स कालस्तादृश

---

१. मीमांसाख्या तु विधेयं बहुविद्यान्तराश्रिता । (श्लोक० वा० ३८)

२. तन्त्रं प्रधाने सिद्धान्ते सूत्रैक्ये सपरिच्छेदे' (अमर० तृ० नानार्थ०)

३. तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे ।
प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे ।
श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजने ।
इति कर्त्तव्यतायाञ्च···· ···· ···· ···· ···· । (मेदिनी)

आसीद्यस्मिन् मीमांसायाः मन्तव्यानि सर्वथा शिरोधार्याणि हृदयङ्गमानि चाभूवन्। एनामेव प्रधानसिद्धान्ततामाधृत्य परिपाटीयं तन्त्रशब्देन सम्बोधिता। इयं सिद्धान्त प्रमुखता मीमांसाया महत्त्वानुमानायालम्। मेदिनीकारेणेतिकर्त्तव्यताया अर्थेऽपि तन्त्र शब्दोऽभिहितः। वस्तुतो मीमांसैव धर्मे इतिकर्तव्यतारूपा वर्तते।[१] आचार्य भट्टेना-मुमेवाभिप्रायं स्वीकृत्य मीमांसाया इतिकर्त्तव्यता साधिता। किं बहुना, तन्त्रशब्दो मीमांसा-न्यायानाम्, श्रुतेः प्रधानत्वप्रतिपादकतायाः, इतिकर्त्तव्यताभागस्य, शास्त्री-यत्वस्य चेत्यादीनां समग्राशयानां भूमिरस्ति। इमे सर्वे गुणा मीमांसाशास्त्रातिरिक्ते कस्मिन्नप्यागमे तेन (तन्त्रशब्देन) नोपलब्धाः। अत एव विचारशास्त्रस्य वाचकत्त्वं प्राप्य तन्त्रशब्द आत्मानं सौभाग्यशलिनममन्यत। एतादृशार्थगर्भितत्वमाश्रित्य विचारशास्त्रज्ञैरयं शब्दो विचारधाराया नामधेयतया सादरं गृहीतः।

सर्वतः पूर्वं निजनिर्मितं शाबरभाष्यव्याख्याया मध्यभागं 'तन्त्रवार्तिक' मित्याख्याय भट्टकुमारिलेनात्मीयाऽऽस्था शब्देऽस्मिन् प्रकटीकृता। शनैः शनैः शब्दस्यास्य प्रयोगः प्रावर्धत, अद्यत्वेऽपि मीमांसाशास्त्रमभिप्रेत्यायं शब्दः प्रयुज्यते। प्रथितयशसा व्याख्याकृता मल्लिनाथेन स्वपरिचयं ददता स्वकीयां मीमांसाशास्त्रज्ञतां प्रकाशयता तन्त्रशब्दोऽभिहितः[२]। मत्परमाचार्यैः मीमांसकशिरोमणिभिः श्रीचिन्नस्वामि-शास्त्रिवर्यैः विचारशास्त्रविषयकस्य स्वग्रन्थस्य तन्त्रसिद्धान्तरत्नावलीत्येतन्नाम तन्त्र-शब्दस्य प्रामुख्यमभिप्रेत्य कृतम्। किं बहुना बौद्धिकक्षेत्रसम्बद्धा यावन्तोऽभिप्राया-स्तन्त्र शब्देऽन्तर्हिताः तावन्तो मीमांसाशास्त्र एव समाविष्टाः।

(ङ) पूर्णमीमांसा

उत्कृष्टाया विचारधाराया इयं परा काष्ठा या च मीमांसा प्रभृतिभिश्शब्दैः सम्मा-निता सती समयस्य विस्तृतत्वाद्धेतोः व्यावहारिके क्षेत्रे पूर्वमीमांसेति नाम्ना व्यवहृता। व्यवहारश्च सर्वदा स्फुटां प्रतिपत्तिमपेक्षते। स स्वंप्रतिपाद्यं सर्वथाऽवितथं कर्त्तुं चेष्टते। वस्तुतोऽनेनैव स्वाभाविकेन नियमेन 'मीमांसाया' सह पूर्वेति विशेषणमनिवार्यमभूत्। इदं निर्विवादं सार्वभौमिकञ्च सत्यं यदितरव्यावृत्तय एव विशेषणान्युपादीयन्ते। 'मीमांसायाः' पूर्वप्रतिपादितं शाब्दिकं महत्त्वमुपलक्ष्य ब्रह्मविचारकाः स्वकीयं शास्त्र-मनयैवाख्ययाऽभिधातुं प्रारेभिरे। एतद्गतमहत्त्वेन ते प्राचुर्येण प्रभाविताः बभूवुः। तैरतिसंक्षिप्तकाल एव स्वविचारेषु महत्त्वमापादयितुमस्य शब्दस्य प्रयोगक्षेत्रं विस्तीर्णतां

१. धर्मे प्रमीयमाणे हि वेदेन कारणात्मना।
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ॥ (श्लोक वार्तिकस्य प्रस्तावना)

२. अन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्। (रघुवंशसञ्जीवन्या मङ्गलाचरणम्)

नीतम्। अनेनैव विस्तरेण हेतुना मीमांसानाम्ना के विचारा नियतारूपेण परिग्राह्या इत्येवं समस्या प्रादुर्भूता। अस्यां स्थितौ स्वव्यवहारस्याबाधप्रतिपत्तये उत्तरमीमांसाया ब्रह्मसम्बद्धविचाराणां व्यावृत्तये च पूर्वं प्रवर्तितया प्रसृतया च तन्त्रविद्यया सह व्यावहारिकाणां कृते पूर्वेति विशेषणपदस्योपादानमनिवार्यं जातम्। इदमेवैकं मनोवैज्ञानिकं तथ्यं पूर्वमीमांसाशब्दस्य प्रवृत्तौ निमितम्। तथापि परिवर्तनमिदं केवलं व्यवहारपरिधिं यावत् सीमितमासीत्। शास्त्रज्ञैर्निरुपपदेन मीमांसाशब्देन स एव वैदिको ज्ञानराशिरभिहितः।

ब्रह्मविचारकैर्मीमांसानाम्ना वस्तुतः स एव व्यवहारः कृतो योऽसुरैः सह देवैर्विहितः। देवानां विजयात् पूर्वं देवशब्दोऽसुराणां वाचक आसीत्। स च शब्दोऽसुराणां सम्पूर्णाथाः शक्तेरैश्वर्यादेश्चाभिव्यञ्जने क्षम आसीत्। यदा देवैर्महता परिश्रमेणासुरेषु विजयः प्राप्तस्तदा तेषामतुलविभवं हस्तसात्करणेन सहैव सर्वशक्तिसम्पन्नो देवशब्दोऽपि देवता आचकर्ष। तेषां लोलुपत्वमियद् ववृधे यत् ते महत्त्वेन पूर्णं 'देवशब्दं त्यक्तुं नाशक्नुवन्। परिणामतो देवशब्दः असुरार्थे प्रचलित आसीत्। तन्महत्त्वाकृष्टमानसैर्विजयिभिर्देवैः स्वाभिप्राये प्रयोक्तुमारब्धः। तत एवारभ्य देवारूपेऽर्थे रूढो जातः। किन्तु व्यवहारोपपत्तये तदानीन्तनानां समक्षं व्यवहारे समस्येयमुत्पन्ना यद् देवशब्देनासुरा ग्राह्या देवा वेति ? अस्यामवस्थायां राक्षसानां व्यावृत्तये तैः सह पूर्वेति विशेषणस्य योजना प्रारब्धा। ततस्ते हि पूर्वदेवा इति व्यवहृताः। विख्यातस्य कोशकारस्यामरसिंहस्य 'पूर्वदेवाः सुरद्विषः' इति वचनं पूर्वोक्तं तथ्यं स्थापयितुमलम्, एवं मीमांसाशब्देन च सह प्रयुक्तः पूर्वशब्दोऽपि मीमांसाया महत्त्वं प्रमाणयितुमलम्।

लौकिकानुभवोऽप्यस्मिन्नर्थे प्रमाणम्—एकमेव रिक्तं पदम्, अथ च तत्र नियुक्तिप्राप्तये कश्चिदेक एव जनः यद्युपतिष्ठते, तदा तदर्थं योग्यता विशेषा नापेक्ष्यन्ते, यदातु तस्यैव पदस्य कृतेऽनेके प्रार्थयितारो भवन्ति तदा सावधानतया विस्तृतयोग्यता निर्देशेन च विचारः क्रियते। बहुषु तुरगेषु यदा इतरव्यावृत्तिपूर्वकमेकस्यैव ग्रहणं भवति तदा स कृष्ण इत्यादिविशेषणैर्विशेष्यते। इदमेव लौकिकं तथ्यं "पूर्वपदघटित मीमांसापदेनावद्योत्यते।

(च) पूर्वतन्त्रम्

वस्तुत ईदृशी काचिल्लौकिकी शास्त्रीया वाऽऽवश्यकता नासीद्, यामाश्रित्य मीमांसाशास्त्रस्याभिधानार्थं तन्त्रेण सार्धं पूर्वेति विशेषणोपादानमनिवार्यमिति। न हि प्रामाणिकतया, तथापि मीमांसाया अभिप्रायेण पूर्वतन्त्रशब्दस्य प्रयोग इष्ट एव। मम तु मत इदमापनत एवत मीमांसया सह पूर्वेति विशेषणमवलोक्य तदनुयायिभिस्तन्त्रपदेनापि साकं पूर्वपदस्य प्रयोगः प्रारब्धः। एतदतिरिच्य नास्ति किञ्चिदधिकं रहस्यं तन्त्रापेक्षया पूर्वतन्त्रशब्दप्रयोग इति।

(अ) इतराण्युपपदानि

न केवलं पूर्वशब्दस्यैव प्रयोगः, विद्वत्समुदायेन क्वचन 'धर्ममीमांसा'[१] क्वचिच्च अनीश्वरमीमांसा'[२] इति विभिन्नैर्धर्मादिभिरुपपदैः सह मीमांसाशब्दस्यास्योपादानं कृतम्। समासतो यथा-यथा ब्रह्ममीमांसा विकरिता तथा तथैव जैमिनेरिदं विचारशास्त्रमपि विभिन्नैरुपपदैः सह व्यवहार पथ आनीतम्। तथाऽपि मीमांसाचार्यैः शास्त्रकारैः प्राय एतेषामुपपदानामुपादानं न कृतम्, क्वचित् कृतमपि तदकृततुल्यमेव। अतएव सोपपदं मीमांसापदं विचारशास्त्रस्य वस्तुतो नाभिधायकम्, किन्तु केवलं व्यवहाराय प्रवृत्तम्। उत्तरमीमांसेत्याभिख्यापीमामेव सरणिमनुवर्तते।

(छ) विचारशास्त्रम्

मीमांसाया विचारात्मकत्वे कस्यापि संशयो नास्ति। अतएव विचारशास्त्रमिति कथनं न युक्तिविहीनम्। विचारप्रधानस्यास्यागमशास्त्रस्याभिप्रायमभिव्यञ्जयितुं बाह्ये व्यवहारे यद्यपि 'विचारशास्त्र' मित्यभिधानं नास्ति, तथाप्यवान्तरव्यवहारेषु तदनेकत्र प्रयुक्तं वर्तते। आचार्यमाधवस्य समयं यावदस्य शास्त्रस्य विचारात्मकता निश्चिता सर्वसम्मता चाभूत्। अत एव तैः शास्त्रमिदमभिलक्ष्य विचारशास्त्रशब्दः प्रयुक्तः। न्यायमालाया जिज्ञासाधिकरणे शास्त्रमिदं विचारशास्त्र[३] मिति नाम्नाभिहितं तैः। तेषां शब्देऽस्मिन् महत्यास्था प्रतीयते, यतस्तैः शब्दोऽयमेकस्मिन्नधिकरणे बहुधा प्रयुक्तः। सङ्कुच्छतेऽपि वस्तुतः शास्त्रस्यास्य कृतेऽभिख्येयं रोचिका सरसाऽन्वर्था च।

माधवेनायं प्रयोगः प्रायेण निजपूर्वजपरम्परायाः पुष्टिमभिलक्ष्य कृत इत्यनेकैः ग्रन्थकृद्भिः[४] स्वग्रन्थेषु विचारस्य साम्राज्यं विस्तृतं तथा मीमांसाशास्त्रं विचारस्याकररूपं पथप्रदर्शकं च साधितम्। ततश्च माधवाचार्यस्य विचारशास्त्रमिति कथनं व्यावहारिकानिवार्यतामवद्योतयति किन्तु प्रयोगोऽयमवान्तरव्यवहारं यावदेव सीमितोऽतिष्ठत् सार्वदेशिकश्च भवितुं, नाशकत्।

---

१. धर्ममीमांसावत् वेदार्थमीमांसया ब्रह्ममीमांसाऽप्याक्षेप्तुं शक्यते। (ब्र० सू० शां, भामती १-१-१ पृ० ७८)

२. कृतानां कर्मणां कालान्तरभाविफलदानेऽदृष्टं कारणमित्यनीश्वरमीमांसकादिमतम्।
(ललितात्रिशती भाष्यम्, आचार्यशङ्करः)

३. स्वाध्यायोऽध्येय इत्यस्य विधानस्य प्रयुक्तितः।
विचारशास्त्रं नारभ्यमारभ्यं वेति संशयः॥
(जैमिनीय न्यायमाला, ३० तमं प्राथम्)

४. विचारोपायभूतन्यायनिबन्धनं मीमांसाशास्त्रम्।
(प्रकरणपञ्चिका, शालिकनाथमिश्रः, पृ० १२)

(ज) अध्वरमीमांसा

यद्यपि नाधिक्येन, परं विदुषां व्यवहारे मीमांसाशब्देन सह अध्वरेति विशेषणमपि क्वचित्क्वचित् प्रयुक्तं दृश्यते । अध्वरेण (यज्ञेन) मीमांसायाः कः सम्बन्धः ? तस्याञ्च दिशि मीमांसा किमुपकरोतीति सर्वविदितं तथ्यम् । अतएवाचार्य वासुदेवेन स्वकृतसूत्रवृत्तेः 'अध्वरमीमांसाकुतूहलवृत्ति' रिति नाम प्रयुक्तम् । धर्मविवेचनस्य प्रमुखतामभिलक्ष्य क्वचित्क्वचिद् शास्त्रमिद धर्मशास्त्रमित्यप्युच्यते ।

(झ) वाक्यशास्त्रम्

मीमांसा संस्कृतसाहित्यस्य वाक्यरचनायाः शिक्षयित्री काचित् प्रणाली SYNTEX । वाक्यार्थनिर्णयाय यावन्ति साधनानि शास्त्रमिदमस्मान् शिक्षयति यथा, न तथाऽन्यत् । अनेन प्रकरणादिभिर्वाक्यार्थं नियम्य तात्पर्यनिर्णयाय[1] उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिरूपाणि लिङ्गनि ज्ञानस्यानिवार्याणीति प्रतिपादितानि । अतएवास्य वाक्यशास्त्रता सर्वथोपयुक्ता । परमस्य नाम्नो व्यवहार आन्तरिकीं सीमां यावदेव सीमितोऽतिष्ठत् । पूज्यपादैः पट्टाभिरामशास्त्रिवर्यैः स्थाने स्थानेऽभिख्येयं प्रमाणीकृता ।[2]

समासतो विचारशास्त्रस्येमा अभिख्या न केवलं तस्यानेकरूपतां परिचाययन्ति परं तस्य व्यापकतां प्रगतिश्चापि सन्दिशन्ति । भारतीयो न कोऽप्यागम एतावद्भिर्नामभिः कीर्तितः, अनेनैव हेतुनाऽस्य महत्त्वमनुमातुं शक्यते ।

विचारप्रणाली

विचारशास्त्रस्येयं विचारप्रणाली अनितरसाधारण्या दृष्ट्या प्रवृत्ता । कस्यापि विषयस्य निर्णयं न हठात्करोति, अपितु सुपरीक्षणेन । परीक्षणार्थं यथार्थज्ञानसम्पादनार्थञ्चैकं न्यायालयमेव घटयति यस्य चाधिकरणमित्याख्या । नियतप्रकरणप्राप्ते विषये यदा सन्देह उत्तिष्ठते तदा वादिप्रतिवादिनौ स्वस्वयुक्तिप्रदर्शनपुरस्सरं स्वाभिमुखमाक्रष्टुं चेष्टेते, वादिना प्रतिपादितानां तर्काणां खण्डने जाते य एव पार्यन्तिको निर्णयः सिद्ध्यति स विचारनिकषपरीक्षितो हीरकः । प्रत्येकमधिकरणं न्यायालयरूपतां दधन् स्वकीयैः पञ्चभिरङ्गैः परिपूर्णं तिष्ठति[3] ।

१. विषयः, २. संशयः, ३. पूर्वपक्षः, ४. उत्तरपक्षः, ५. प्रयोजनम् ।

---

१. उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य निर्णये ॥

२. (तन्त्रसिद्धान्तरत्नावलिः प्राक्कथनम्, पृ० ३)

३. विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः ।
प्रयोजनञ्च पञ्चाङ्गं प्राञ्चोऽधिकरणं विदुः ॥

कमपि निश्चितं प्रमाणमनुपलब्धुं स्वविचारेभ्यो विपरीतानां सम्भाव्यमानाना-मारोपाणां विवरणं पूर्वमुपस्थाप्यते, अतोऽस्य पूर्वपक्ष इति वस्तुतोऽन्वर्थाऽऽख्या। पूर्वपक्षिणा प्रस्ताविताानां सर्वासामापत्तीनां निराकरणेन प्रस्तावितानां प्रश्नानामुत्तर प्रदानकार्येण च विचारस्य द्वितीया शृङ्खला 'उत्तरपक्ष' इत्युच्यते। अनेन विलोडनेन निर्गतः सिद्धान्तः स्वच्छं पवित्रञ्च[1] नवनीतम् विद्यते। विचारस्य प्रणाल्या महत्वं स्वीकुर्वन्नाचार्यखण्डदेवः[2] सर्वासां दृढीकरणमेव विचारस्योद्देश्यमिति निर्दिदेश।

विचारस्यास्याः शैल्याः शालीनता न केवलं जैमिनिना तदनुगामिभिश्च स्वीकृता परम् आगमस्यानेकासां धाराणामनुयायिभिरपि स्वीकृता। अनेकपूर्वपूर्वपुरुषानुक्रमं यावदनयैव रीत्या विचारविनिमयः समभूत्। वि यस्फुटीकरणस्य परिणामोऽसम्भाव-नाया विपरीतभावनाया वा निवृत्त्या बौद्धिकशक्तेर्विवृद्ध्यादिगुणैः सह प्रणाल्यामस्यां महति दूरे भवतीति महान् दोषः,यश्च तत्र तत्र विचारस्यारुचिकरत्वं दुरूहत्वञ्च जनयति। यतो हि कारणं क्यचिदस्ति तत्कार्यञ्च क्वचिदव स्थितम्। इमामसंङ्गतिं दूरीकर्तुं विचारशास्त्रज्ञैरनेकाः सङ्गतयः उद्भाविताः। विचारेणैकेन विचारान्तरं शृङ्खलारूपेणा-बध्यते येन विचारस्य परम्परा कुतोऽपि विच्छिन्ना न स्यात्। यत्रैकः क्रमः समाप्यते तत एव द्वितीयः प्रथमं, तृतीयो द्वितीयं चतुर्थश्च तृतीयं गृह्णाति। अनेन प्रणालीयं सातत्येनाविच्छिन्नतया च प्रक्रमते।

आचार्यजैमिनेरनुयायिषु अस्याः (सङ्गतेः) विकसितं स्वरूपं सर्वतः पूर्वमाचार्य-शबरे समुपलभ्यते। पार्थसारथिमिश्रस्य समयं यावत् परिपाटीयं सर्वथा समृद्धा समजायत।

यस्याः परिणामः आचार्यमाधवेन स्वकीयस्य 'न्यायमालाविस्तरस्य' प्रारम्भेऽस्य स्वरूपमपि विवेचनीयमभूत्। माधवेन प्रामुख्येन चतस्रः सङ्गतयः स्वीकृताः। १. शास्त्रसङ्गतिः, २. अध्यायसङ्गतिः, ३. पादसङ्गतिः, ४. अधिकरणसङ्गतिश्चेति।

शास्त्रसङ्गतिः

धर्मः खलु मीमांसाशास्त्रस्य प्रतिपाद्यः, प्रमाणं तस्य प्रथमाध्यायः, विधि-विवेकश्च तस्यैवाध्यायस्य प्रथमपादस्य विषयः। प्रथमाध्याये प्रथमपादस्य द्वितीये धर्मलक्षणाधिकरणे धर्मस्य लक्षणप्रमाणयोः सद्भावः साधितः। इदमधिकरणमपि

---

१. निर्मथ्य निगमसिन्धून् विविधन्यायाभिधानमन्थानैः।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये॥ (कु० वृ० पृ०१)

२. असम्भावनाविपरीतभावनानिवर्तनेन विषयदृढीकरणम्।
(मीमांसाकौस्तुभम् १—३ स्मृत्यधिकरणं)

मीमांसाशास्त्रस्य ध्येयभूतं धर्मं विचारयति । अतएव विचारैक्यमेतयोर्द्वयोः शास्त्रसङ्गतिं प्रमाणयति । प्रतिपाद्यस्यैकतामाश्रितत्त्वाद् सङ्गतिरियं सर्वतः प्रधानभूता । मीमांसाशास्त्रस्य किञ्चिदप्यधिकरणमनेनाङ्केन हेतुना किञ्चिद् सम्बद्धं वक्तुमर्हति । सहस्राधिक-संख्येष्वधिकरणेषु प्रतिपाद्यस्यास्य प्रामुख्यमन्तर्निहितम् ।

अध्यायसङ्गतिः

प्रमाणपरीक्षा हि प्रथमाध्यायस्य विषयः । प्रस्तुतेऽधिकरणेऽपि प्रमाणस्यानुचिन्तनं प्रस्तावितम् । अतएव प्रामाण्यचर्चाया एकत्वेनाध्यायवत् शृङ्खलाबद्धा विचारधारेयमध्यायसङ्गतिरित्युच्यते । एकस्मिन् सूत्रे विषयान् सम्बन्धयितुमयं द्वितीयः प्रकारः येन तेषां क्रमो न विच्छिद्यते । सम्पूर्ण आगमोऽध्यायेषु विभक्तो भवति, प्रत्येकमध्यायश्च स्वस्वविषयस्य चर्चायां स्वतन्त्रो भवति ।

पादसङ्गतिः

इतोऽपि सङ्कुचितं सीमितं वा स्वरूपं पादसङ्गतिः यया संक्षिप्ते परिधौ सम्बद्धा विचाराः सङ्कलिताः क्रियन्ते । यथा प्रथमाध्यायस्य विषयः धर्मप्रमाणचिन्तनम् । तस्य (प्रथमाध्यायस्य) एकदेशस्य प्रथमपादस्य विधिचिन्तनम् अनेनैव प्रामाण्येनापर्युक्त प्रकारेणैव शृङ्खलितम् प्रामाण्यचिन्तने गणनाप्रसङ्गे विधिविचारः सर्वप्रथमं प्रस्तुतोऽस्ति, तस्यैव विधिवाक्यस्योपन्यासोऽधिकरणेऽस्मिन् धर्मस्य प्रमाणरूपतया क्रियते, अतएव पादेन सहास्याधिकरणस्य विषयसङ्गतिरुपपद्यते ।

इमास्तिस्रः प्रमुखाः सङ्गतयः प्रकारेणानेनैव सर्वत्र प्रवृत्ता विषयान् सम्बद्धान् कुर्वते । यथा किलाभिख्ययाऽभिव्यज्यते, आसां सम्बन्धः केवलं शास्त्राध्यायपादमात्रं यावत् सीमितः । किन्तु विचारशास्त्रज्ञैरेकेनाधिकरणेनान्यस्याधिकरणस्य विचारान् सम्बद्धान् कर्त्तुमनेका आवान्तरसङ्गतय उपकल्पिताः । आसु प्रमुखाः सन्ति-१. आक्षेपसङ्गतिः, २. दृष्टान्तसङ्गतिः, ३. प्रत्युदाहरणसङ्गतिः ४. प्रासङ्गिकसङ्गतिः ५. उपोद्घात सङ्गतिः, अपवादसङ्गतिश्च ।

आक्षेपसङ्गतिः

प्रथमाध्यायस्य प्रथमपादस्य द्वितीयेऽधिकरणे (धर्मलक्षणाधिकरणे) लौकिकाकारहीनत्वाद् धर्मो लक्षणप्रमाणाभ्यां रहितः । अत एव प्रत्यक्षस्य तन्मूलकनामितरेषां प्रमाणानामपि च प्रवेशो दुःशकः, एवमाकाशकुसुमवत् धर्मसदृशस्य निराधारस्य वस्तुनो विचारशास्त्रस्य विधेयतापादनमनुपयुक्तम् इत्येते विचाराः प्रवर्तिताः येषु धर्मस्य विचारशास्त्रविधेयताऽऽक्षेपविषयीकृता यस्य समाधानं उत्तरपक्षिणा कृतम् । एवंविधानामाक्षेपमूलकानां विचाराणां पूर्वविचारैः सह यः सम्बन्धो भवति स वस्तुत आक्षेपसङ्गतिरिति व्यवहृतः ।

दृष्टान्तसङ्गतिः

प्रथमाध्यायस्य प्रथमेऽधिकरणे नियमविधिरूपतया विचारशास्त्रस्य विधिप्रयुक्तता साधिता। तस्यैव द्वितीयाधिकरणे यदा धर्मलक्षणं प्रमाणरहितं प्रतीतं तदा तदर्थमपि प्रामाण्यरूपे प्रथमाधिकरणवद् विधेः शरणीकरणमनिवार्यमभवत्। इदं विधेरनुचिन्तनं यदा पूर्वाधिकरणवदुपलभ्यते तदा विचाराणामयमेव बिम्बप्रतिबिम्बभावो दृष्टान्तसङ्गति-रूपं दधाति।

प्रत्युदाहरणसङ्गतिः

एवं पूर्वोक्तस्य द्वितीयाधिकरणस्य पूर्वाधिकरणेन सह पूर्णं साम्यं व्यवस्थितं भवितुमर्हति। तस्मिन्नुदाहरणे "विचारशास्त्रस्य विधेयतायै" यावन्ति "नियमविधित्व" प्रभृतीनि प्रबलानि कारणानि प्राधान्यासन् न तावन्ति द्वितीयेऽधिकरणे लभ्यन्ते। अत एव पूर्वविचारेण सह पूर्णसाम्येऽजायमाने एतादृशविचाराणां ग्रन्थनं प्रत्युदाहरणरूपतया भवति। इदमेव ग्रन्थनं प्रत्युदाहरणसङ्गतिरिति व्यवहृतम्।

प्रासङ्गिकसङ्गतिः

प्रथमाध्यायगतप्रथमपादस्य पञ्चमेऽधिकरणे विधेःस्वतन्त्र-प्रामाण्यं प्रतिपादितम्। विधिरेकम् वाक्यम्, अतो वाक्यस्य प्रसङ्गेन यदि शब्दे विचारः क्रियते ततः स प्रसङ्गपतितः। एतदाश्रित्य षष्ठेऽधिकरणे "शब्दनित्यत्वं" विचारितम्। अत एव पञ्चमाधिकरणेन षष्ठाधिकरणस्य प्रासङ्गिकसङ्गतिः।

उपोद्घातसङ्गतिः

सप्तमाध्यायगतचतुर्थपादस्य द्वितीयेऽधिकरणे[१] सौर्यादिविकृतिषु प्रकृतितः सम्पूर्णानां वैदिकाङ्गानामतिदेशो विचारार्थं प्रस्तावितः। तस्यातिदेशस्योपपत्तये तत्पूर्वाधिकरणेऽतिदेशस्य धर्मसापेक्षता साधिता। द्वितीयेऽधिकरणे यत् सिषाधयिषितं तस्यैवोपोद्घातः प्रथमेऽधिरणे क्रियते। अत एव प्रथमाधिकरणस्य द्वितीयाधिकरणेनोपोद्घातसङ्गतिः।

अपवादसङ्गतिः

प्रथमाध्यायगततृतीयपादस्य प्रथमेऽधिकरणे 'अष्टकाः कर्त्तव्याः' इत्यादिस्मृतीनां वेदमूलकत्वेन प्रामाण्यं प्रतिपादितम्। तस्यैवाग्रिमे हेत्वधिकरणे पूर्वं प्रस्तुतस्य विचारा-पनोदनं क्रियते। "औदुम्बरी सर्वा वेष्टयितव्या" अस्याः सर्ववेष्टनस्मृतेर्वेदमूलत्व-स्यानुपलब्धौ लोभमूलकत्वं साधयित्वाऽप्रामाण्यं स्वीक्रियते। प्रथमाधिकरणे

१. सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः।

प्रतिपादितात् सिद्धान्तात् सर्वथा विपरीतस्य सिद्धान्तस्य प्रतिपादितत्वात् प्रथमाधिकरणेन सहास्याधिकरणस्यापवादसङ्गतिः। अस्मिन् अधिकरणे कृतं सिद्धान्तं सर्वथापनुद्य ततो विलक्षणो विपरीतश्च सिद्धान्त उपस्थाप्यते।

इमाः सर्वा अपि सङ्गतयो मीमांसायाः सर्वैरप्याचार्यैः स्वीकृताः। आचार्य माधवस्य कालं यावत् शास्त्रीयत्वमाभिरासादितम्। अत एव तेन समासतः सर्वे अपि प्रकाराः सङ्कलिताः[१]।

इमां विचारपरिपाटीमेकसूत्रे सङ्गमयितुमेव प्रकारा इमे समुपकल्पिताः। आवश्यकतोपयोगितयोराधारेण एतेषां प्रकाराणां विवृद्धयेऽपि विस्तृतं क्षेत्रं रक्षितं विद्यते। विषयस्यावान्तरसङ्घटनाय "कृत्वा चिन्ता" इति नाम्ना एकोऽतिरिक्त उपायोऽपि निर्दिष्टः। यस्मिन् वादिनस्तर्केऽसङ्गते सत्यपि तन्मतं यथारूपमेवाभ्युपगम्य तत्रापि दोषा उद्भाव्यन्ते। वादिनं नतमस्तकं कर्तुं श्रेष्ठं साधनमिदम्। शास्त्रदीपिकायां पार्थसारथिमिश्रेण कतिपयेषु स्थलेष्वयमुपायः प्रयुक्तः।

समासतो विचाराणामसम्बद्धताया अनर्गलतायाश्च व्यावृत्तये उपाया इमे समाश्रिताः, न तु तार्किकदृष्ट्या, अपितु व्यावहारिक्या दृष्ट्या च पद्धतेरस्या दुरूहता परिणामदूरता चेति द्वयमप्यनुभवगम्यं सत्यम्। एतस्य निराकरणं तर्कमाध्यमेनन सम्भवति।

---

१. ऊहित्वा सङ्गतीस्तिस्रस्तथावान्तर सङ्गतिम्।
ऊहेताक्षेप दृष्टान्त प्रत्युदाहरणादिकम्॥

विचारकाण्डः

१. मीमांसायाः शास्त्रत्वम्

चराचरमिदं जगत् स्थूलं सूक्ष्ममिति मुख्यतो द्विधा विभक्तम्। तदीयं स्थूलत्वं चर्मचक्षुर्बोध्यम् सूक्ष्मतत्वञ्च ज्ञानचक्षुर्गम्यम्। प्रत्यक्षदृष्टतया तदीया स्थूलतैव सर्वस्वमिति प्रतीयते परं वस्तुतः सैव न सर्वस्वायते। तस्य सूक्ष्मं स्वरूपं स्थूलस्वरूपतोऽपि महीयः। जगतः स्वरूपद्वये एकम्—'अन्तर्जगत्' द्वितीयश्च बहिर्जगदिति वक्तुं शक्यते। द्वयोरेतयोः सङ्कलितं स्वरूपमेव वास्तविकं जगत् तथाऽनयोरस्मिन् सङ्कलन एव जगतः पूर्णतावतिष्ठते। बाह्यजगत् अन्तर्जगतः स्वरूपवहनकार्यं करोति। तस्य (अन्तर्जगतः) विकासं समृद्धिं पुष्टिञ्च विना बाह्यजगत उन्नतेराशा आधारभूमिं विना निर्मितं भवनमिव निराधारा। मानवो नामास्यान्तर्जगतो विकासस्य प्रतीकः। अत एव जगतो जीवकोटौ स सर्वोत्कृष्टत्वेन परिगण्यते। स्थूलशरीरव्यवहारयोः सत्यामप्यन्यजीवैः समानतायां मानवोऽनेनैव वैशिष्ट्येन विश्वस्य नियामकतां बिभर्ति। मानवता नामास्यैव विकसितस्वरूपस्य विचारमय्यभिख्या। आत्मा बुद्धिः हृदयञ्चेति त्रीण्यस्य प्रमुखान्यङ्गानि, येषु प्रथमस्याङ्गस्य पुष्टिरेव नैतिकतायाः, द्वितीयस्य विकासो विद्वत्ताया एवं तृतीयस्योन्नतिः सहृदयतायाः परा काष्ठाऽस्ति। किन्तु त्रयाणामङ्गानां विकासस्याप्येका सीमा वर्तते एकश्च नियतः पन्थाः। तस्याः सीमायास्तस्मात् पथो वा स्खलने तस्य नियन्त्रणमप्यावश्यकम्। अन्यथाऽन्तर्जगत उच्छृङ्खलत्वमिदं (तत्तु कस्याप्यङ्गस्य कथं न स्यात्) मानवं सर्वतः प्रच्यावयति। मानवस्य बाह्यजगतो नियन्त्रणार्थमेकः शासको भवति। स हि शासकस्तस्य स्वच्छताया व्यवस्थितेर्विकासस्य च विषये सम्यगवधत्ते। यस्य कस्यापि जीवस्योच्छृङ्खलत्वं तस्य सह्यं न भवति। एवमेवान्तर्जगतोऽपि नियामकस्य पर्याप्तावश्यकता तस्य कतिपयेषु च क्षेत्रेषु पूर्वनिर्दिष्टान्नियामकादप्यधिकं महत्त्वं विद्यते।

जगतो यावन्तो व्याधयः सन्ति ते केवलया बाह्यस्वच्छतया निवर्तयितुं न शक्यन्ते किञ्चात्रत्या यावत्यो दुष्टा वृत्तयः सन्ति शारीरिकेण दण्डमात्रेण ता न शक्यन्ते निर्मूलयितुम्। अतएवान्तरिकी स्वच्छता नियन्त्रणा वा शारीरिकीं स्वछतानियन्त्रणां वाऽतिशेते। अन्तःकरणस्य स्वच्छतायाः प्रभावः शारीरिके स्वास्थ्ये कियत्या त्वरितगत्या सञ्जायत इत्यत्र मनोविज्ञानं प्रमाणम्। एवं न्यायालयाः कारागाराश्चास्य प्रमाणानि

सन्ति यदन्तर्जगतोऽनियान्त्रतत्वं प्रतिवर्षमपराधिनां संख्यां कियतीं वर्धयति। तच्च शारीरिकं नियन्त्रणं प्रभावरहितं करोति। अन्तर्जगतः सर्वतोभावेन सामर्थ्यन्त्वस्ति। यदि तदीया गतिस्सच्चारित्रोन्मुखी स्यात्। तथासति जगतः कापि शक्तिस्तं नमयितुं न शक्नोति। अस्य पूज्यो गान्धी हि प्रत्यक्ष मुदाहरणम्। अनैतिकतामभिलक्ष्य प्रवृत्तो जनः शारीरिकीं यातनां नैवावरोद्धुं शक्नोति। यत्र यस्य वस्तुन उत्पत्तिर्भवति, तदाधारेण तस्य सर्वतोभावेन विनाशः सम्भाव्यते। चोरस्य ताडनं वधं वा विहाय चौर्यजनकबुद्धेर्विनाशः श्रेयस्कर इति लोकोक्तिः। अन्तर्जगदेव भावनास्थानम्। अस्मादेवोद्गता भावाः क्रियारूपतया परिणमन्ते। अतएव प्रत्येकं क्रियाया अनेन साक्षात् सम्बन्धोऽस्ति। प्रपञ्चं यदि व्यवस्थितं समुन्नतं नैतिकबलसम्पन्नञ्च कर्तुमभिलषामस्तर्हि अस्मिन् भावलोकेऽधिकारो नियन्त्रणञ्चेति द्वयं कर्तुं प्रयतनीयम्। तदर्थमेतादृशो नियामकः शरणीकर्तव्यः य इदं सुशोभितं कर्त्तुं शक्नोति। अत इदमावश्यकं सम्पन्नम् यच्छासकात्मकशास्त्रस्य प्रणयनं नाम। अस्यैवान्तर्जगतः शासनं प्रधानं कार्यम्, यदाधारेण "शास्यतेऽनेन" इति व्युत्पत्तिस्तां (शास्त्रमिति) अभिख्यामन्वर्थतां नयति। अनेन (शास्त्ररूपेण) शासकेन स्वकीयेन संयमशालिना शासनेन प्रजाभ्यो व्यवस्थितिः समृद्धिः सुरक्षा पवित्रा च भोजनसामग्री प्रदत्ता। येन लोके जनिमातस्थिवान् मानव आत्मबलस्य भाण्डागारतां बुद्धिप्रकर्षस्याधिकारितां सहृदयताञ्च प्रत्यपद्यत। इतिहासस्य प्रतिपृष्ठं तस्यावदानेन रञ्जितं वर्तते।

यथा नियामकेन स्वनियतेर्नियन्त्रणाय नियमजालं माध्यस्थ्येनावलम्ब्यते तथैव प्रस्तुतेन शासकेनापि अन्तर्जगतः शासनाय धर्मो माध्यमतयाऽङ्गीकर्त्तव्यो भवति। यथा शासकस्य साम्राज्यं निर्दुष्टशासनं नियमान् आश्रित्यैव समेधते तथैव शास्त्रस्य शास्त्रत्वमपि धर्मस्य प्रतिपादकतामवलम्बते। शासकेन शक्तेः स्रोतः पूर्वजपरम्परातो वा प्रजातो वा प्राप्तव्यम्, अन्यथा तस्य शासनं सर्वसम्मतं न स्यात्। स्वविधानेऽपि तेन द्वयोरेतयोरन्यतरस्यावलम्बः कर्तव्यो भवति। शास्त्रेणापि शासनस्य योग्यता सामर्थ्यञ्चेत्येतद् द्वयमपि स्वकीयानादिनिधेर्वेदतोऽवाप्तव्यं भवति। तथा स्वविवेच्यविषये विधाने वा वेदप्रमाणानां प्रदर्शनमनिवार्यम्। प्राचीनकालस्यायमेवैको निकषः यत्र कषणेन मीमांसाशास्त्रस्य शास्त्रत्वं सर्वोत्तमतया प्रमाणितं भवति।

धर्मो ह्यस्य प्रतिपाद्यः। वेदोऽस्य मूलम्। यत्रारूढमिदं स्वप्रभावेणाधिकं[1] चमत्कुरुते। साक्षात्सम्बद्धत्वेन हेतुना तेनालौकिकज्ञाननिधिनाऽपि मुक्तहस्तेन सता शक्तेर्योग्यतायाश्चात्र यावान् सञ्चारः कृतः न तावान् अन्यस्यां कस्याञ्चिद् विचारधारायाम्। अतएवास्य शास्त्रत्वं सर्वत आधिक्येन विकसितं परिपुष्टञ्च वर्तते। एवञ्चास्येदं महत्त्वं[2] 'शास्त्रप्रमुखमि' त्यभिदधताचार्यशङ्करेणापि समर्थितम्।

---

१. मीमांसाशास्त्रतेजोभिर्विशेषेणोज्ज्वलीकृते। (आचार्यभट्टः-श्लोकवार्तिकम् पृ० १)

२. ननु शास्त्रप्रमुख एव प्रथमे पादे (शङ्करभाष्यम् ३।३।५३, ८४९ पृ०)

२. दर्शनं मीमांसा च

दर्शनपरिभाषा

मानवो हि तस्या अमरशक्तेरंशभूतः। अतएवामृतत्वोपलब्धिस्तस्य स्वाभाविकी। सर्वोत्तमा चैषणा, यस्याः पूर्तये सदा सर्वमपि कर्त्तुं तत्परो दृश्यते सः। तस्य प्रत्येकं कार्यं भावनयाऽनयैव प्रारभ्यते। भावनेयं तस्य सर्वस्मिन्नेव प्रारम्भेऽन्तर्हिता तिष्ठति। संसारस्यासारतया चिरं प्राप्तपरिचयो भारतीयो मानव एषणयाऽनयाऽधिकं प्रभावितः। तस्य जीवनस्य प्रमुखतयेदमेव प्राप्तव्यम्। एवमितराणि प्राप्याण्यस्य पूरकाणि सन्ति। अतएवैषणेयं तस्य परमधर्मः समपद्यत। भारतीयवाङ्मयेन पर्याप्तगवेषणानन्तरमस्या एषणायाः पूर्त्तये नाना पन्थानो निर्धारिताः ये ह्यनेनोद्देशेनैव सृष्टिस्थित्युत्पत्तिप्रलयविषये स्वं दृष्टिकोणमभिलक्ष्य मानवं प्रेरयन्ति। स ह्यस्य स्वरूपस्य साक्षात्काराय लोकात्परावृत्तोऽलौकिकं क्षेत्रमवतरति, यत्र तेनैतेषां वास्तविकी स्थितिर्ज्ञायते। अमृतत्त्वप्राप्त्याकाङ्क्षया परिपूर्णस्य मानवस्येयमेव साधना। यान्यनुभूतानि तथ्यानि प्रस्तौति तेषामेव शास्त्राणां सङ्कलितं रूपं वस्तुतो दर्शनशास्त्रमस्ति, यस्य मानवस्य चरमं प्राप्यं विवेचकत्वेन समग्रकर्मणामुपायत्वं समग्रविद्यानां प्रकाशकत्वञ्च सिध्यति।

दर्शनस्य दृष्टिः

ज्ञानाधिगमे सत्येव भावस्य फलं जायते। जगतो रूपद्वयम्—बाह्यमान्तरञ्चेति। तत्र बाह्यज्ञानेन बाह्यस्य जगतः, अन्तर्ज्ञानेन चान्तर्जगतः पुष्टिः। अनेनैवाधारेण तस्य जिज्ञासायाः पूरकमुपकरणमपि मार्गद्वयेन प्रचलति। यत्र मानवस्य प्रवृत्तिर्बहिर्मुखी भवति तादृशः स मार्गस्तं लौकिकं दर्शनमभिलक्ष्य नयति, एवं तस्य श्रेयः प्राप्तिप्रवर्तकोऽपरो मार्ग आत्मदर्शने प्रवर्तयति। आत्मदर्शनेऽस्मिन् समग्राणां शास्त्राणां विद्यानाञ्चाशयोऽन्तर्हितस्तिष्ठति, जगतश्चराचरत्वञ्च विविक्तं भवति। यथेन्द्रियाणामन्तर्मुखप्रवृत्तिं विनाऽऽत्मदर्शनमसम्भवं तथैवात्मदर्शनं बिनाऽमृतत्वप्राप्तिरपि स्वप्नमात्रम्। अनेन प्रकारेण मानवस्य ज्ञानं सर्वतः पूर्णं भवति यदा तदा स्वविज्ञानेन सह स ज्ञानाधिकरणे लीनः सन्नमरत्वमवाप्नोति।[१] तस्यैतद् दिव्यं दर्शनं दिव्यदृष्ट्यधीनम्। तद् विना बलबुद्धि-सम्पन्नोऽर्जुनोऽपि दिव्यं दर्शनं लब्धुं नाशक्नोत्, ततश्च तन्मित्रेण श्रीकृष्णेन तस्मै दिव्या दृष्टिः प्रदत्ता।[२] दिव्यस्यास्य दर्शनस्य दर्शनं साधनम्। शाश्वतिकानाम

---

१. ब्रह्मविद् ब्रह्मैव भवति (उपनिषद्)
(A) तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। (यजुर्वेदः)

२. न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥

प्रत्यक्षाणाञ्च गम्भीरविषयाणां खनिर्दर्शनम् । अन्तर्जगदस्य प्रयोगशाला, यत्र निर्मितेष्वाध्यात्मिकेषु प्रयोगेषु सत्यसाक्षात्कारस्य दृष्टिं बिभर्ति । तस्येयमेव सत्यसाक्षात्कारविद्याऽध्यात्मशास्त्रत्वं साधयति । 'दृश्यते[1]ऽनेन' इति शाब्दिकी व्युत्पत्तिस्तस्य चरमज्ञानस्य चरमसाधनत्वं साधयति ।

दर्शनस्य विकासः

दर्शनशास्त्रं हि मानवस्य बुद्धिबलस्योत्कृष्टं प्रयोजकम्, मानवविकासो दर्शन विकासेन संलग्नः । वस्तुतो दर्शनशास्त्रस्य मूलत उत्पत्तेः कश्चन समयो निर्धारयितुं न शक्यते । तत्र ये विषया विवेचिताः, तेषां विषयेऽनादिकालादेव किञ्चिद् विवेचनं प्रवर्ततेतराम्, अतएव विवेचनदृष्ट्या दर्शनोत्पत्तेः समयनिर्धारणमाकाशं शृङ्खलयितुं प्रयत्न इव भवेत् । विकासिनि सति च तस्मिन् तदीयं क्षेत्रमपि विस्तीर्णं जायते । अनेके विचारका दार्शनिकेषु विषयेषु विकासस्य पूर्वभागे श्रुतिं प्रमाणत्वेनोन्नीय स्वातन्त्र्येण विचारं प्रकटयन्ति । किन्तु तेषां वेदमर्यादायाः यथायथं पालनं तदनुशासनानुवर्तनञ्च नियतम् । अयमेव तेषां स्वतन्त्रताया निरपेक्षो मानदण्डः, विकासस्यान्या धारा पर्याप्तं प्रगतिशीला सती प्रवहति । मूलतो विषयास्त एव सन्ति ये प्रथमया स्वीकृताः । या स्वतन्त्रता प्रथमधारायाः शिरोधार्याऽऽसीत् साऽनया धारया नितरामुपेक्ष्यत इति मौलिकमन्तरं प्रतीयते । सा क्वचित् स्वच्छन्दतायां बहुषु स्थलेषु चोच्छृङ्खलतायां परिणमते । प्रथमया धारया या मर्यादा पाल्यते स्म, द्वितीया तां बन्धुं भेत्तुं त्वरिता सती समुपतिष्ठते । उभयोरेतयोः परस्परं सङ्घर्षेण विचाराः परिणतिमायान्ति । इदमेव विचाराणां परिणतेर्युगं वस्तुतो दर्शनस्य विकासयुगमस्ति । विकासस्येयमेव प्रथमा धारा 'आस्तिक दर्शन' मिति द्वितीया धारा 'नास्तिकदर्शन'मिति चाभिधीयते स्म ।

दृष्टिकोणस्य विभिन्नता

अत्रागमनात् परं दर्शनस्य दृष्टिकोणे विभिन्नता सम्भवतिष्ठते । दर्शनममृतत्वप्राप्तेः साधनं तदा न भवति, अपितु विचाराणां सङ्कलनमात्रमवशिष्यते । अस्यां स्थितौ सृष्टेस्तथा तस्याः सर्वतो मुखस्य याथार्थ्यस्य विषये प्रस्तुता अनेकेषां विचाराणामेकतोमुखा विचारा एव नियतायां परिणतायाञ्चावस्थायां दर्शनमित्यभिधातुं शक्यन्ते । यथाऽनेकेषां प्राणिनामेकेन क्षेत्रेण गमनागमनयोः सततस्तत् स्थानं मार्गरूपतया परिणमति, यथा चानेकेभ्यः क्षेत्रेभ्य एकस्मिन् लक्ष्ये सम्पद्यमानं परिवर्तनं वादरूपतामेति तथैवात्मनाऽन्तर्जगता च सम्बद्धेषु विभिन्नेषु संयुक्ततत्त्वेषु नियतां परिणतामवस्थां गता विचारा दर्शनशास्त्रस्वरूपतां प्राप्नुवन्ति । अस्यामवस्थायां दर्शनशास्त्रं केवलमध्यात्मविषय प्रतिपादनमात्रेण नोपरमते, किन्तु विचारशास्त्रस्य रूपमप्यवाप्नोति । यत्र तस्य दृष्टिः परिवर्तते तत्र तर्को हि तस्य साधनं भवति । तेन तर्केण प्रत्येकमपि विषयं स्वकीये

१. दृश् धातुः (पाणिनिः)

संकुचिते परिधौ बद्धुं दर्शनं प्रयतते। अत्रागत्य तदीयं नैजं स्वरूपं विकृतं भवति। तेन तदाध्यात्मिकतत्त्वप्रतिपादनं नैजं कार्यं विहाय तर्कजालरूपतामेति। तर्कस्येदं साम्राज्यं यस्तवात् तथ्यात् क्वचित् बहुदूरं नीत्वा मानवं पातयति यदधिकृत्य तर्कोऽप्रतिष्ठ इतीयमुक्तिः प्रचलिता। अस्यां स्थितावेव दर्शनं श्रद्धाविश्वासयोर्विघातकं सत् केवलं मस्तिष्कव्यायामस्य साधनं भवति। प्रायोगिकदृष्ट्या तस्येयमेवाप्रतिष्ठा श्रद्धावतां धार्मिकाणां कृते तस्यानुपादेयतां साधयति। सर्वमेतत् तस्य सेतोर्ध्वंसस्य परिणामः, यश्च सेतुः प्रवहधाराया अवरोधक आसीत्।

विविधा विभागाः

इहैवागत्यैतास्वेकतः प्रवृत्तासु धारास्वेतावान् मतभेदः समुत्पन्नः येन ता धारा विविधेषु विभागेषु विभक्ताः अनायान्त। इमे विभागास्तात्कालिकस्य समाजस्य विचारस्वातन्त्र्ये मार्गप्रकाशका अभवन्। मानवः स्वविचाराभिव्यञ्जने स्वतन्त्रः। स प्रौढपरम्परासम्मतमीश्वरसदृशं वस्तुतत्त्वमपि नीराकर्तुं सामर्थ्यवान् भवति। ब्राह्मणैः कल्पितं वाग्जालमात्रं वेदः वेदतत्वज्ञानविधिरपि निरर्थकः प्रतिपादित स्वोदरपूरणायैवेदं कल्पनामित्युक्त्वा निराकर्तुं शक्नोति[१] किन्तु तात्कालिकमिदं विचारस्वातन्त्र्यं आधुनिकविचारवदस्थैर्येण भावुकतया च समन्वितम्। कोऽपि विचारको यान् विचारान् आदाय प्रवर्तते, गाम्भीर्येण वैदुष्येण बुद्ध्या च तान् विचारान् सिद्धान्तरूपेणाचाररूपेण च परिणमयितुं सततं चेष्टते स्म तदानीन्तनः। अतएव ते विचाराः समृद्धा अनेकैरुपकरणैः परिपुष्टा व्यावहारिकैर्वृत्तान्तैश्च प्रमाणिता भवन्ति स्म। तेषां वास्तविकत्वं सत्यापयितुं क्वचिच्छास्त्रं क्वचिच्च लोकः शरणीक्रियते स्म। एतेषां विचाराणां स्पष्टता पूर्णता चैक प्रकारेण द्वितीया सम्पत्-ततः प्रभावितेन प्रसिद्धदार्शनिकेन मोक्षमूलर महाशयेन[२] विचारकेष्वेतेषु स्वकीयाऽगाधाऽऽस्था प्रकटिता। साधितश्च तेन यत् पाश्चात्यदार्शनिकानां विचारापेक्षयाऽधिकं विस्पष्टाः पूर्णाश्चेमे विषया इति।

एतेषामेव विचाराणां नियतां परिणताञ्च स्थितिमाश्रित्य दर्शनस्य विविधा विभागा उपकल्पिताः। दर्शनस्योत्पत्तिरिव विभागानामेतेषां विषयाधारेणेति वृत्तोपलब्धिर्न केवलं दुःशकः किन्त्वसम्भवाऽपि। ये विचारा एतैर्विभागैर्निरूपिताः, आंशिकतया तेषामुपादानं ततः प्राचीने वाङ्मये विकीर्णतया कृतम्। तेषां पौर्वापर्यविनिश्चयेऽपि इयमेवैका प्रबला बाधा। तथाप्यैतिहासिकीपरम्परा विभागानां पौर्वापर्यं विचारकाणां समयानुसारेण कथञ्चित् स्वरूपं निरूपयितुं साहसं करोति। विचाराणां स्पष्टतां सर्वाधिक पूर्णताञ्चापि सा स्वनिर्णयस्य द्वारं विधत्ते। बुद्धबृहस्पतिभ्यां तदनन्तरं तदवान्तरकालवर्तिभिराचार्यैः प्रवर्तितविचारातिरिक्ताः षड् विभागाः साङ्ख्यम्, योगः, न्यायः, वैशेषिकः, पूर्वमीमांसा, उत्तरमीमांसा, इति सर्वतः परिपुष्टा विद्वद्भिः शिरसा समादृताश्च।

१. बुद्धि पौरुषहीनानां जीविका धातृ निर्मिता। (चार्वाकदर्शनम्)

२. पूर्व टिप्पणी पृ० ३

मौलिकमैक्यम्

एतद् विभाजनानन्तरमपि दर्शनानां मौलिकमैक्यं सततमक्षुण्णं तिष्ठति। सत्यपि प्रतिपादनशैल्या विभेदे इमे सर्वेऽपि पन्थानो लक्ष्यमेकं प्रत्युन्मुखाः सन्ति। उपनिषद्[1] हि सर्वेषामेषामुद्गमस्थलम् यत इमा धारा मूलतः समुद्गताः मस्तिष्कद्वारेण विहरन्ति, अतएवैतेषु कस्यापि प्राथम्यमानन्तर्यं वा प्रतिपादयितुमशक्यम्। सर्वदर्शनकारैः श्रीसायणमाधवाचार्यैर्वैदिकधारावैदिकधारयोर्विवेचनं सर्वतः पूर्वं समुपस्थापितम्, अनेन नास्तिकदर्शनस्य कतिपयानामङ्गानां विकासः प्रथमकोटौ प्रतीयते। दर्शनानां विकासस्य चरमं स्वरूपं ब्रह्ममीमांसेति सर्वैः सादरं स्वीकृतम्। एतयोः प्रथमोदयस्य द्वितीय विकासस्य च परिचायिका कोटिः।

विचारस्यास्याः शृङ्खलाया उदयः संसारस्य सत्यत्वमाश्रित्य प्रवर्तते। तस्य च चरमो विकासस्तं सर्वथाऽसत्यं साधयति। अनेकेषां विभागानां पक्षं परित्यज्य यदि बृहस्पतिमारभ्य शङ्करं यावत् विचारा एकक्षेत्रान्तर्गताः कल्प्येरन् ततोऽस्य दर्शनस्य लक्ष्यं विकासश्च स्पष्टं प्रतिभायात्। मध्यकालस्यानेके दार्शनिका विचाराणां सङ्घर्षेऽस्मिन्नवतरन्ति, स्वकीयं शाश्वतिकमवदानं वितरन्ति। शङ्कराचार्या इमानि, सर्वाणि तत्त्वानि सङ्कलय्य स्वकीयं विचारं प्रस्तुवन्ति। अतएवैतन्मौलिकैकताधारेण दर्शनस्यात्रैव पराकाष्ठा वर्तते। तथ्यमिदं स्वीकृत्य विचारयामस्तर्हि नास्तिकं दर्शनस्वरूपं प्रारम्भिक आकार; आस्तिकञ्च तस्य विकासः सिद्ध्यति। नास्तिकता खलु पूर्वपक्षः, आस्तिकता सिद्धान्तः। प्रथमोऽसत्यमार्गः; यश्च सत्यसाक्षात्कारं यावत् अभ्यासेन[2] प्रापयति। अनेनास्तिकधाराया महत्त्वमपि साधितम् अस्योत्कर्षः प्रगतिशालितैव चास्य प्राथम्यम्। यथायथार्थे यथार्थः प्रच्छन्नः तिष्ठति तथैव नास्तिकतायाः पृष्ठदेशे अस्तिकता विराजते। सत्तां विना निषेधो निराश्रयः, निषेधं विना सत्ता माहात्म्यहीना। इदं तु विचाराणामक्षुण्णं शृङ्खलामात्रम्, येनैषामैक्यं स्थिरं सन्तिष्ठते।

विचाराणामियं सरणिः सततं पारम्पर्येणाक्षुण्णा तिष्ठति, तस्य विचारस्य विकासस्यानेका धारा एव वस्तुतो विभाजनस्य मूलकारणम्, किन्तु तस्याभिप्रायस्तस्यैक सूत्रता बाधको न भवति। स्थूलत आरभ्य सूक्ष्मं यावत् तेन गन्तव्यम्। अस्मिन् वितते दीर्घे च मार्गे यत्र स्वल्पोऽप्याश्रयः तेन लभ्यते तदेवावस्थानस्थानं जायते। अमी विभागा इदमेव तथ्यं बोधयन्ति। श्रुतिरप्येतस्य प्रमाणम्।

यथा शिशोः कटुकौषधपायनात् पूर्वं शिशुः मधुस्नेहहनेनाकृष्यते तथैव सूक्ष्मतत्त्व परिज्ञानात्पूर्वं स्थूलानां व्यवहारे सम्बद्धानां प्रियपदार्थानां सूक्ष्मवस्तुत्वेन प्रदर्शनं भवति

१. पूर्वं टिप्पणी पृ०

२. उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा, ततः सत्यं समीहते॥ (वाक्यपदीयम्-भर्तृहरिणः)

यथा अन्नामात्येति साध्यते,कदाचिद् शरीरं कदाचिदिन्द्रियाणि, कदाचित्प्राणाः, कदाचित् मनः। एकस्मादपरस्य सूक्ष्मत्वमिति तत्त्वज्ञानशिक्षणस्य महत्त्वमुपादेयत्वञ्च प्रथयति।[१] अधिकारिणो योग्यताऽप्यस्य मानदण्डः।

अन्धं प्रतिगजस्य परिचयप्रदानावसरे न तस्य श्वेतता श्यामता वा वर्ण्यते, परं गत्वा च स्पर्शेन निर्दिश्यते। आधारेऽस्मिन्नवैदिकं दर्शनमास्थितम्। इमानि स्थूलेनाधिकं निकटभाञ्जि, सूक्ष्मेण चाल्पम् तेष्वप्यनन्तरकालिकानि बौद्धप्रमुखानि दर्शनानि स्थूलतामतिरिच्य वर्तन्ते।

सूक्ष्मतरं तत्त्वं यावदुपगमस्यायमेवैको मार्गः। उदयविकासयोर्मध्यवर्तिन्यः समग्राः स्थितयस्तस्य मार्गस्य श्रेष्ठपथिकानां प्रगतिसूचिकाः सन्ति। वस्तुतो वैदिकावैदिकविभागाः कल्पनामात्रम्, ये चैषामवान्तरस्थितेः परिचायकाः। इदञ्च सर्वमेकस्या एव साधनायाः कृते कृता विभिन्नाः प्रयत्नाः सफलाश्च प्रयोगाः सन्ति, येषां साफल्यविषये संसार आकृष्टः। एवमेतावन्मात्रप्रलम्बस्य लक्ष्यस्य पूर्णतायां सहयोग कारकाणाम्, एतत्पर्यन्तं प्राणं जीवनमपि व्ययीकृतवतां साधकानां कृते समग्रं विश्वं सततमधमर्णम्।

दर्शनस्यावदानम्

१. रागद्वेषयोर्बहिष्कारः

याथार्थ्यस्य परिचयो दर्शनस्य प्रमुखमवदानम्। दर्शनमलस्यं ज्ञानस्य यथार्थ्यमवगमवति। किं नाम जगत्, तत्र चास्माकं कियत् स्थानम्, दर्शनमस्मभ्यमस्य प्रत्यक्ष प्रदर्शकम्। जीवनस्य क्षणभङ्गुरतामुपदिश्य दर्शनमस्मान् प्रेरयति यन्नास्त्यत्र तादृशं किञ्चिद् वस्तु यस्य मोहेन शान्तिः भवेत्। तदस्मान् निर्लोभान् सन्तुष्टान् शान्तानहिंसकान् विचारशीलांश्च वितनुते। अस्या एव विचारशीलताया आधारे वयं रागद्वेषयोः सीमाया निर्गत्य विश्वबन्धुत्वस्य भावनां मूर्तिमतीं कर्त्तुं शक्नुमः। यथा एकेनैव प्रस्तरखण्डेन रामस्य रावणस्य च प्रतिमाद्वयं निर्माय रामाकृतिरेका अन्या च रावणाकृतिः। रामाकृतिमवलोक्य तस्यां रागो भवति, रावणस्य प्रतिमायां च द्वेषः। द्रष्टा एते उभे मूर्ती पश्यन्नपि न पश्यति यदत्रोभयोः पाषाणनामकं वस्तु समानमिति। अपितु स केवलं तयोर्नाम्नोराकारविशेषयोश्च दृष्टिं निक्षिपति, येनैकस्मिन् रामभावनयाऽनुरागः अन्यस्मिन् रावण भावनया द्वेष उत्पद्यते। मानवोऽनेनैव भावनाजगता शासितोऽस्ति। अस्मात् शासनात् विमोकः तस्य नासम्भवोऽपितु दुःशकोऽवश्यमस्ति। अस्य शासनस्योच्छेदो दर्शनस्य प्रधानं कार्यम्। दर्शनं जगति विद्यमानां दृढां भावनां दूरीकृत्य मानवस्यान्तर्जगति निष्ठामभिविवेशञ्च जनयति। दर्शनस्य माहात्मेन मनुण्योऽन्धश्रद्धाजालं

---

१. तैत्तिरीयोपनिषद्

परिहरति। तनैतत् विदितं भवति यद् यस्मिन् वस्तुनि रामेण हेतुनाऽनुरागः रावणेन च हेतुना द्वेषः क्रियते न तद् रामो न वा रावणः। तद् हि प्रस्तरमात्रम्। तच्चोभयत्र समानम्। तस्येयमेव विवेकशीलता तं निष्ठावन्तं प्रकुरुते यत्र नामरूपजन्या हेतवः सर्वथोच्छिद्यन्ते, साम्यभावनायाश्च साम्राज्यं स्थापयति। अनयो रागद्वेषभावनयोर्विनाशे सति चित्तवृत्तिर्निश्चिन्ता एकतोनुखेन सततं प्रसन्ना सती साम्यावस्थां बिभर्ति, यत्र तस्याःकृते न किञ्चित् प्रियमप्रियं वा। नापि वा किमपि स्वीयं परकीयं वा। इयमेव परा काष्ठा मानवतायाः। अत एव वाल्मीकेः सीता यदा रामस्य दुःखेनाक्रान्तमात्मान मनुभवति तदा स्वात्मनि हीनतामनुभवति। तस्या विचारे त एव महात्मनो धन्या येषां प्रियाप्रिये[1] न स्तः।

वस्तुतस्तेषां नमस्करणीयतायां कस्यापि संशयो न जायते। स्थितिमेनामधिगत्य मानवो जीवन्मुक्तः सम्पद्यते। जीवात्मपरमात्मनोर्न कोऽपि भेदः समवतिष्ठते। इदं दर्शनस्यैव प्रमुखमवदानम्, यदस्माकं दैनिकीषु वृत्तिषु परिवर्तनं विधायास्मान् एतावत्या उच्चतायाः परां काष्ठामुपयातुं सङ्केतयति।

२. विश्वबन्धुत्वम्

दर्शनं आत्मनो विभुतां प्रतिपादयदुदारतां शिक्षयति। किञ्च तद् व्यापकं तेजः स्फुलिङ्गं यतस्तन्निर्गतं तद्वदेव विशिष्य तद् व्यापकं प्रयतते। "एकमेवाद्वितीयं ब्रह्म" प्रतिपादनेन समग्राणां जीवानामेकत्वं प्रमाणीकृत्य 'उदारचरितानां वसुधैव कुटुम्बकम्' इतीमां सूक्ति जीवने समवतारयितुं वाञ्छति। इहागत्य तस्य साम्प्रदायिकी धार्मिकी च रूढिः सर्वथोच्छिद्यते। ऐक्यभावना साम्यभवना च तस्या रूढेः स्थानं गृह्णीतः। तस्य विभोर्दिव्यांशत्वेन न तेन कस्यापि समक्षं दैन्यमाचरणीयम्। न च सकलसमानास्तित्व शालितया तेनाभिमानसमुल्लसितेनापि भाव्यम्। अस्मिन्नेवावसरे तस्यात्मतत्त्वस्य विकासो भवति, यस्य प्रथममवदानं करुणेति। इदमीदृशं सूत्रं येन निबद्धा न केवलं द्वित्रा अपितु सङ्ख्यातीता शृङ्खलिता भूत्वा ऐक्यं प्राप्तुमर्हन्ति। उदारता अस्यैव विकसितं रूपम्, मानवता चास्या एव उत्कृष्टविचारसमन्विता कोटिः, अस्याश्च महत्त्वं सर्वानुमोदितमस्ति। आत्मनो विकासस्य प्रमुखावदानत्वेन सर्वेषु गुणेष्वस्याः कोटिरुन्नता। वैदुष्यस्य प्रौढावस्थातोऽप्यस्य स्थानं प्रथमम्। सूत्रेणानेनानुस्यूताया वसुधाया एकपरिवारत्वं सहजगम्यं सत्यम्। शोकावसरे परस्परसाहाय्यदानकर्तृषु कियताऽधिक्येन जायते आत्मीयताया विकास इत्यत्रास्माकं लौकिकानुभवः प्रमाणम्, मनुष्यतायाः परीक्षणस्यायमेवावसरो भवति 'धीरज, धरम, मित्र अरु नारी। आपतिकाल परखिये चारी' कवेरेतत्कथनं प्रयोगसिद्धम्, एतादृश एवावसरे मनुष्यस्य नैज-

---

१. धन्यास्तु ते महात्मनो येषां न स्तः प्रियाप्रिये। वा. सु. का.

वास्तवस्थितेः परिचयो लभ्यते । स स्वभावतः स्वीयां हीनतामनुभूय तत् चरमंतत्त्वं प्रत्याकृष्टो भवति । यदीदृश्यः स्थितयो मनुष्यं नाभिगच्छेयुस्तदा स स्वात्मानं परमात्मनोऽप्यधिकतरमदम्यमनुभवेत् । अतएव कबीरेणोक्तम् "दुखमें सुमिरण सब करैं, सुखमें करै न कोय ।

अतएव कवयित्री महादेवी[१] विरहमेव निजजीवनस्य सर्वस्वं मन्यते । किं बहुना एकतायाः सूत्रमिदमात्मतत्त्वस्यैवावदानम्, यस्य विकासस्य प्रेरणां दर्शनशास्त्रं ददाति । एवं मनुष्यः सहजतयैव पृथिव्या जीवैरतादात्म्यं स्थापयितुमर्हति । अद्यत्वे चेयं विश्वबन्धुत्वभावनानेन प्रायोगिकेणानुभवेन मूर्तिमती भवितुमर्हति, न केवलेन शास्त्रीयेन प्रतिपादनेन । अपितु प्रयोगदृष्ट्या विचारयितुं कबीरोक्तमुद्धरणं पर्याप्तम् । भारतीय दर्शनस्यावदानमिदमात्मसाद् विधाय कबीरेण हिन्दूयवनयोरैक्यवादः सम्प्रवर्तितः । दर्शनस्यैकात्मवादमाधृत्य तेन रामरहीमयोरेकत्वं स्वयुगस्य प्राचार्य प्रतिनिधित्वमर्जितम् । रूढीः साम्प्रदायिकभावनाश्च निराकृत्य तेन हिन्दूयवनोभयविधजनसमूहे श्रद्धा प्रतिष्ठापिता । इदं दर्शनस्यैवावदानम् ।

३. जीवनस्य विशालता

दर्शनमस्माकं चित्तवृत्तीः संयता विस्तृताश्च करोति । जीवनस्य कृते तदेकं विशालं क्षेत्रं प्रस्तौति-येनास्माकमेषणा अलौकिकत्वमापद्यन्ते । तदीयदृष्ट्या दृश्यं जगदेव पूर्णं नास्ति, तदतिरिच्यैकस्य विभुलोकस्यास्तित्वमपि तत् सम्मनुते । अतएव तत् (दर्शनं) जीवनं दृश्यलोकस्य सीमात उच्चैरुत्थापयति-अतो लौकिकः स्वार्थस्तद् बद्धं न शक्नोति । अस्मिन् विशाले क्षेत्रे दर्शनस्य प्रभावो मनुष्यानितस्ततः सम्भ्रान्तेरभिरक्षति । इहागत्य तस्य समग्राः वृत्तयः शक्तयश्च विकसन्ति । ता ह्यस्मिन् विशालतरे क्षेत्रे निर्बाधं स्वातन्त्र्येण च विहर्तुं प्रभवन्ति । इन्द्रियाणां गतिरपि तीव्रा प्रगतिमयी च जायते । तेषामाराध्या अद्वितीया विस्तृताश्च भवन्ति । यथैकस्मिन् विस्तृते स्वच्छे च क्षेत्रे तुरगस्त्वरितगत्या स्वच्छन्दं धावति, शीघ्रं च प्राप्यं स्थानमुपगच्छति, सैव स्थितिरिन्द्रियाणां भवति । तेषां क्षेत्रं लोकवदपवित्रं न भवति । तेषाञ्च वृत्तिः स्वच्छा पूता च जायते । लोकस्य क्षुद्रा विषयाभिलाषाः तत्प्रयुक्तं बन्धनञ्च तान्यवरोद्धुं न शक्नुवन्ति । वृत्तीनां विशालतायां मनुष्यस्य समग्राणि दुःखानि सुखानि च विलीयन्ते । वृत्तयो यावन्मात्रं सङ्कुचिता भवन्ति तावदधिकं मानवो दुःखेनाभिभूयते । साधकः परमात्मनः क्षुद्रतराण्यपि वस्तून्यवलोक्यानन्दमग्नो भवति । विकसितं पुष्पमवलोक्य स तथैवोल्लसति यथा कश्चन पिता स्वकीयां सन्तितिपरम्परां परिवर्धमानामवलोक्योल्लास विशेषमनुभवति । नदीनां निर्झराणाञ्च कलकलनिनादस्तं वीणातोऽप्यधिकतरमानन्दयति, प्रकृतिलीला च तं चित्रपटतोऽप्यधिकतरमाह्लादयितुं पर्याप्ताः । एवं तस्यानन्दः

---

१. "मिलन का मत नाम ले मैं विरह में चिर हूँ" । (?)

स्वाभाविकः सीमारहितश्च भवति। न च तं सांसारिकं दुःखमधीरं कर्तुं क्षमते। वृत्तीनां विस्तारेण यथा सुखं वर्द्धते तथैव ततोऽप्यधिकमात्रया दुःखं नश्यति। आपत्काले यदा सहजसुहृद्भिः सहानुभूतिः प्रकाश्यते तदा कष्टं किमपि विभाजितं सत् सह्यमिव भवतीत्यस्माकमनुभवः। एवमेव सुखमपि न केवलेनैकेव भोक्तुं योग्यम्। वरः स्वयंवरयात्रायां संख्यातीतान् सम्मिलितान् जनानवलोक्य यथाऽह्लादमनुभवति तथा नैकाकी परिणेतुं गच्छन्। अतएवेदं सर्वसम्मतं यद् वृत्तीनां विशालतायां सुखं यावद् वर्धते, दुःखं तावदेवाल्पतरं भवति :

"सुख बढ जाता, दुख घट जाता, जब है वह बँट जाता।"
कस्यचित् परीक्षकस्योक्तिरियं वस्तुतः सङ्गता।

जीवनस्यानया विशालतया सुखमपि विस्तृतं सञ्जायते। न हि स क्षणभङ्गुरमिदं सुखमेव सुखं मन्यते। न चैतदर्थं स प्रयतत एव। स आत्मानममरशक्तेरंशभूतमनुभवति। अतएवाविनश्वरं वस्तुजातं प्रत्येवाकर्षणस्वभावं निर्माति। विशालतया ममत्वभावनाः सर्वथा लुप्ता एव भवन्ति। विद्यमाना अपि एतावन्मात्रं विस्तृताः सम्भवन्ति यतः समग्रविश्वमपि तस्यां ममतायां[१] प्रविलीयते। का कथा कामिन्याः काञ्चनस्य[२] वा समग्रस्य जगत एकच्छत्राधिपत्यं वा तस्मै न रोचते। स्वकीयं लक्ष्यमतिरिच्य सर्वे प्रयोगमार्गा अपि तं विचलयितुं न पारयन्ति। अतएव व्यापकतेयं व्यापकस्य निरतिशयस्य चानन्दस्यावाप्तये तं प्रेरयति। श्रेयोमार्गेण तस्य विशालता विभुताया पराकाष्ठयां लीना सती कृतकृत्यतामेति।

४. साहित्यस्य स्थायित्वम्

यथाहुराचार्यरामचन्द्रशुक्लाः "साहित्यं नाम जनतायाश्चित्तवृत्तीनां सञ्चितं प्रतीतिबिम्बमिति[४]। तद्धि जङ्गमस्य जीवनस्य स्थिरं कलात्मकं गणनमिति। जीवनेन सम्बद्धं सुन्दरमसुन्दरञ्च, ययार्थमादर्शश्च तत्र तत्र सङ्कलितानि भवन्ति। किन्तु तदीयमसुन्दरं सौन्दरस्य सौन्दर्यवृद्धये समुपैति। तदर्थं स्वतन्त्रतया साहित्ये किमपि स्थानं नास्ति। एवमेव तदीयमसत्यमपि सत्यस्य परिपुष्टये भवति। महाकवेस्तुलसीदासस्य-रामस्यादर्शताया रावणो यथासमष्टिः। रामः सत्यस्य रावणश्चासत्यस्य रामरावणयोः

---

१. त्यक्तव्यो ममकारस्त्यक्तुं यदि शक्यते नासौ।
कर्त्तव्यो ममकारः परं स सर्वत्र कर्त्तव्यः॥

२. वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
कामिनी,कनकेभ्योऽपि, न सुखं शान्तचेतसाम्॥

३. प्रेयो मन्दो योगक्षेमाद्वृणीते। काठकोपनिषद् २।२

४. हिन्दी साहित्य का इतिहास पृ. १

सङ्घर्षः सत्यासत्ययोः सङ्घर्षः। तत्र च रावणस्य पराजयोऽसत्यस्य पराजयः, रामस्य विजयो वस्तुतः सत्यस्य विजयः।

रावणस्य बलवीर्ययोर्विस्तरेण निर्देशो रामस्य महात्म्यावबोधकः। एवं साहित्यं सत्यस्य साक्षात्कारेण मानवं शिवं पन्थानं प्रत्याकर्षति। तदा हि वस्तुतः 'सत्यं शिवं सुन्दरम्' इत्यस्य प्रवृत्तिः। अतएव तन्नश्वरं जगद् अमरं रूपयितुं प्रभवति। इदमेव तस्य स्थायित्वम्।

साहित्यस्य पक्षद्वयम्

भावपक्षः कलापक्षश्च। भावपक्षस्तस्य मूलम् कलापक्षस्तमभिव्यञ्जयितुं कलापूर्णा पद्धतिः। महात्म्यस्य स्थायितायाश्चाधारेण साहित्यस्य भावपक्षो रूपद्वयेन विभक्तो भवति। आध्यात्मिको भावपक्षः साहित्यं स्थायिरागात्मकतत्त्वेन सङ्गमयति। येन तत् सार्वदेशिकं सार्वकालिकञ्च जायते। भौतिको भावपक्षोऽस्मान्महाभूतमयप्रपञ्चात् उच्चैर्नोत्थापयति। केवलमैन्द्रियकाणि तत्त्वानि स्पन्दयितुमेव स क्षमते। पक्षमेतमाश्रितं साहित्यं देशकालयोः सङ्कुचिते परिधौ सीमितं भवति। न हि तत् सार्वदेशिकतां सार्वकालिकतां च प्राप्तुमर्हति। अतएव तादृशं साहित्यमपूर्णमवतिष्ठते। स (पक्षः) साहित्यस्योद्देश्यपूर्तये साधारणं साधनं सदुपतिष्ठते। साहित्ये स्थायितायाः पूर्णताया मौलिकताया महत्तायाश्च यदि सञ्चारो भवति तर्हि तत् सञ्चारभवनं आत्मिकभावपक्षदर्शनस्यैवावदानम्, येन साहित्यस्य स्थायिता सुरक्षिता तिष्ठति।

उदाहरणेनेदं तथ्यमितोऽप्यधिकं स्पष्टयितुं शक्यते। तुलसीदाससूरदासौ हिन्दी साहित्यस्यामरमहाकवी स्तः। कालिदासः न केवलं संस्कृतसाहितस्य अपितु विश्ववाङ्मयस्य कविषु सर्वोत्कृष्टत्वेन परिगण्यते। तुलसीदासकालिदासयोर्ग्रन्था विश्वसाहित्येऽपि प्रतिष्ठां लभन्ते, यतस्तत्र प्रतिपादितं सत्यं शाश्वतम्। वैशिष्टचमेतदस्ति यत् तत् सत्यं दैनान्दिनं नवतामुपैति। अनुसन्धातारस्तस्य सत्यस्यानुसन्धाने यावदधिकं प्रवृत्ताः सन्तोऽनुसन्दधते तत् तावदेवागाधं सम्पद्यते। इदमेव कारणं यदिमे ग्रन्था न केवलमैन्द्रिकाणि तत्त्वान्युद्बोध्य कृतकृत्यतां लभन्ते, अपितु मानवस्य जीवने सत्यस्य शाश्वतस्य पन्थानं प्रदर्शयन्ति। तुलसीदासस्य रामचरितमानसं स्वकीयाया अस्या एव मौलिकताया आधारेणानेकेभ्यः शतकेभ्यः जनमानसेषु शासनं करोति। तदीया रचना स्थले स्थले दार्शनिकैः सिद्धान्तैरोतप्रोतास्ति। अतएव तया स्थायित्वमुपलब्धम्, विदुषां कृते च सम्पत् सम्पन्ना।

कालिदासस्य काव्यं निगमागमाभिप्रायस्य निधिभूतम्। रागात्मकानां तत्त्वानामुद्बोधन एव तस्येतिकर्त्तव्यता न समाप्ता। तत् खलु दृढान् दार्शनिकान् विचारान्-

विवेकेन परिशीलयितुं प्रस्तौति। कालिदासस्य ऋषिकल्पता[1] विषये सर्वतः प्रथमं आचार्यवर्यः श्रीपट्टाभिरामशास्त्रिमिरनुसन्धाय स्पष्टीकृतं यत् कथङ्कारं कालिदासस्य साहित्यं सत्यं शाश्वतञ्च संवृत्तमिति।

एतदतिरिक्तकोट्याः साहित्यं यत्रात्मिकभावपक्षस्य स्थाने भौतिको भावपक्षः समुपातिष्ठते, तद्वास्तवं स्थायित्वं नासादयति। तत्रैवंविधानि तत्त्वानि न समावेष्टुमर्हन्ति यानि तत् सत्यं शाश्वतञ्च न सम्पादयेयुः। हिन्दीसाहित्यस्य रीतिकालिकानां कवीनां वैदुष्ये कस्यापि मनीषिणः संशयो नास्ति, तथापि तेषां साहित्येन तस्य कालस्य सीमातो बहिरादरो नासादितः। देशस्य सीमातो बहिस्तु सम्मानस्य कल्पनाऽपि कर्त्तुं न शक्या। तादृशं साहित्यं कस्यचिद् वर्गस्य सम्पद् बभूव, यस्य पूर्वजेषु तदा धृतमासीत् अथवा सञ्जातेऽप्यधिकाधिके विकासे एतावदेवाभवत् यत् तत् परिगणितेषु केषुचित् क्वचन गन्थागारेषु केषाञ्चिद्विदुषो दृष्टौ च स्थानमुपलब्धुमशक्नोत्। अखिल-भारतीयत्वञ्च तेन नोपलब्धम् तत् इतरेषु देशेषु सम्मानस्य कल्पना त्वाकाशकुसुमायमानैव। सत्यपि पर्याप्ते वैदुष्ये सत्यामपि उत्कृष्टायां लोकशास्त्रकाव्यनिपुणतायां विकासिताया-मुदभावनाशक्तौ, मनोरमायाञ्चाभिव्यञ्जनापद्धतौ तदीयं साहित्यं संमानितं सार्वदेशिकं च भवितुं न शशाक, यतो हि तस्य मूलं (भावपक्षः) सत्यं शाश्वतञ्च नासीदिति। तदभावे च तस्य स्थायितायाः महत्तायाः उपादेयतायाश्च। तत्खलु बहूनां जनानां दृष्टौ हेयताया भाजनमपि सञ्जातम्। अतएवाचार्यशुक्लेन हिन्दीसाहित्यस्येतिहासे रसिकशिरोमणेर्बिहारीति नाम्नः कवेः सर्वगुणसम्पन्नतां स्वीकृत्यापि तदीयशैली दवीयसी ति साधितम्। वस्तुतोऽस्य दर्शनस्यावदानेन वञ्चितमेवंविधं साहित्यं मानवमुच्चं पद-मभ्युन्नेतुं क्षमं न भवति।

विवेचनेनानेनेदं निर्विवादं सिद्धचति यत् यदि साहित्ये किमपि तत्त्वं स्थायिता मासादयेत् तत्खलु दर्शनस्य विकसितमवदानमिति। एवं यदा साहित्ये दर्शनस्य प्रभावः स्पष्टः तदा साहित्येनानुप्राणनशीलः समाजोऽथवा जीवनं दर्शनं विना कथमिव जीवितुं शक्नोति। समाजेऽस्यैव दर्शनस्य प्रभावः कदाचित् संशोधनरूपेण कदाचिच्चोच्छृङ्-खलतारूपेणाऽथवा व्यवस्थारूपेण भवति। दर्शनस्येदं पवित्रमवदानं यदाऽयोग्यानामन-धिकृतानाञ्च व्यक्तीनां हस्तेषु पतति, तदा उच्छृङ्खलताया अव्यवस्थायाश्च साम्राज्यं विस्तृतं भवति। मानवस्तर्कजाले निपतन् तर्कजालजं तथ्यं निश्चेतुं प्रक्रमते। अयथार्थज्ञाने तं व्यापारयति येन कदाचिदप्यसौ वास्तविकतां नाभ्युपेयात्। इमे हठयोगादयो निर्गुणसम्प्रदायस्य विकृतपरम्परान्तर्भूताः। इमानि विकृतानि भाण्डा-गाराणि सन्ति।

किं बहुना भारतीयैर्विचारकैरात्मसम्बद्धेषु बौद्धिकेषु च विषयेषु समर्पिता नीमानि विवेचनानि जीवनसौन्दर्यस्यामरताप्राप्तेः साधनानि सन्ति। अनेनास्माकं

---

१. द्रष्टव्यम् 'ऋषिकल्पः कालिदासः' (पट्टाभिरामशास्त्री)

जीवनस्य सौन्दर्यं सत्यं शाश्वतञ्च भवितुमर्हति । दर्शनं हि वस्तुतो मानवजीवनस्य विकासस्थानम् । भावुकतायां निष्ठा, धार्मिकहठधर्मितायां धार्मिकी सहानुभूतिः, पशुतायां विवेकस्य विजयश्चास्ति । विश्वविख्यातानां दार्शनिकानां तथास्माकमुपराष्ट्रपतीनां सर एस्, डा० राधाकृष्णन् महाशयानामिमे शब्दा एतस्य महत्त्वं प्रमाणयितुं पर्याप्ताः[१] ।

दर्शनं मीमांसा च

प्रथमं वर्गीकरणम्

दर्शनस्यैतेषु विकसितेषु विभागेषु षण्णां दर्शनानां प्रमुखं स्थानं विद्यते । अतएव तेषामेव पारस्परिकसम्बन्धविषये विचारोऽत्र प्रसङ्गात्क्रियते । चतुर्दशशताब्द्याः पूर्वं यावदेतेषां वर्तमाना रूपरेखा निश्चिता नोपलभ्यते, न चैतेषां कुतोऽप्येकत्र समाख्यानमेवास्ति । सर्वतः पूर्वमुपनिषत्सु सत्यस्यान्वेषणार्थं कतिपयानि विद्यास्थानानि विज्ञापितानि सन्ति । तेष्वेतेषां नाम्नाप्युल्लेखो नोपलभ्यते । महर्षिणा याज्ञवल्क्येन[२] यानि विद्यास्थानि परिगणितानि तेषु न्यायामीमांसयोः समाम्नानमस्ति । महाकविना कालिदासेन स्वकीये रघुवंशमहाकाव्ये (५।२१) याश्चतुर्दश विद्याः सङ्केतितास्तासु विख्यातेन टीकाकारेण मल्लिनाथेन मीमांसान्यायावपि[३] परिगणितौ । दशम-शताब्दयामुत्पन्नेन समी केण श्रीराजशेखरेण काव्यमीमांसायां[४] वाङ्मयस्यानेकासु धारासु शास्त्राणां गणनाप्रसङ्गे आन्वीक्षिक्या मीमांसायाश्च नामोल्लेखः कृतः। इयमान्वीक्षिकी न्यायाभिप्राये प्रयुक्ता वर्तते । एतेषां तथ्यानां सङ्कलनेनेदं सारल्येन निर्णेतुं शक्यते यदेतेषां षण्णां दर्शनानां यद् वर्गीकरणमद्योपलभ्यते, नास्ति तदाद्यमिति । प्रथमंवर्गीकरणं नहि षट्सु विभागेषु, अपितु द्वयोरेव रूपयोः प्रचलितं भवति । अध्ययने, सत्यस्य गवेषणायां विद्यास्थानेषु च एतयोरेव निर्देशोऽस्य प्रमाणम् । प्रथमं वर्गीकरणं[५] न्यायमीमांसयोः खण्डद्वये सम्पन्नम्, यस्योल्लेखः सर्वप्रथमं महर्षिणा याज्ञवल्क्येन कृतः । न्यायमीमांसयोर्दर्शनविषयसम्बद्धानि समग्राण्यङ्गानि विचाराश्च समाविष्टानि । न्यायः प्रमाणशास्त्ररूपेणाङ्गीकृतः, मीमांसा च प्रमेयशास्त्ररूपेणाङ्गीकृता । द्वयोरेत-योर्न्यायः प्रथमः, मीमांसा च पार्यन्तिकः परिणामः । मीमांसायामनुसन्धानविचार वितर्कविवेचनानि सम्मिलितानि, यदर्थमाधार नर्माणकार्यं न्यायेन सम्पादितम् ।

जगति ज्ञातव्यपदार्थानां प्राधान्येन भागद्वयम्—प्रमाणभागः प्रमेयभागश्चेति । प्रमाणं ज्ञानस्य साधनम्, प्रमेयश्च तेन साधनेन सिद्धोऽर्थः । प्रमाणाधीना हि प्रमेय

---

१. गङ्गानाथ झा महोदयस्य पूर्वमीमासा प्रस्तावना द्रष्टव्या ।

२. पुराणन्याय मीमांसा धर्मशास्त्राङ्ग मिश्रिता ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ (याज्ञवल्क्यस्मृतिः)

३. रघुवंश टीका ५-२१.

४. काव्य मीमांसा ३. अध्याय

५. डा० गङ्गानाथझा प्रस्तावना पृ. ३

सिद्धिः। यथा प्रमेयात्पूर्वं प्रमाणमुपादीयते, तथा मीमांसातः पूर्वं न्याय उपादीयते। मीमांसा यादृशं गवेषणं चित्रनिर्माणं वाऽभिलक्ष्य प्रवृत्ता, तदर्थं भित्ति-निर्माणकार्यं न्यायः करोति। अस्मिन् खलु विभागद्वये समग्रा एव दार्शनिकविचारा अन्तर्भवन्ति। 'अयमेव हेतुर्यदस्माकं दर्शनानां प्रथमं लक्ष्यं प्रमाणविवेचनम्। तच्च प्रथमं प्रमुखाध्यायरूपेण च समुपतस्थे। तदीयावश्यकता न कस्मादपि तिरोहिता। किन्तु तदीयं महत्त्वमेतेनैवानुमातुं शक्यते यद् दर्शनस्यानेकैराचार्यैस्तदेव स्वलेखन्याः सर्वस्वतां नीतम्, प्रत्येकं दर्शने च तदीयं स्थानं सुरक्षितं जातम्। अनेन तस्य व्यापकत्वमपि स्पष्टम्।

यदीदं शब्दद्वयं रूढेऽर्थे न गृह्येत ततोऽद्यत्वेऽपि वस्तुतः प्रत्येकं दर्शनस्यैतदेव रूपद्वयं लभ्येत। तस्य वर्गीकरणं विषयदृष्ट्या एतस्मिन् विभागद्वये कर्तुं शक्यते-प्रथमो भागो यस्य सम्बन्धः प्रमाणविवेचनेनास्ति, यथा न्यायः। द्वितीयो भागो यस्य सम्बन्धः प्रमेयविवेचनेन विद्यते यथा मीमांसा। एवं प्रत्येकं दर्शनं न्यायमीमांसयोः सङ्कलितं रूपमस्ति। अनयैव विषयदृष्ट्योपकल्पितौ विभागौ समुदायरूपेण महर्षिणा याज्ञवल्क्येन नामद्वयेन सम्बोधितौ।

काल्पनिकक्रमः

विचाराणां रत्नमालेयमित्थं गुम्फिता वर्त्तते, यदत्र कस्यचिदपि रत्नस्य गुम्फनक्रमो दुर्बोधो विद्यते। अस्य क्रमस्य निश्चयः प्रमुखेनाधारद्वयेन कर्तुं शक्यते-प्रथमो विचारकाणां कालनिर्णयः, द्वितीयो विचाराणां विकासः। विचारकाणां कालस्य निश्चये सति वयमेतत् सर्वथा वेत्तुं शक्नुमो यत् कस्य समयस्य विचारकैः कस्मिन् समये विचारा व्यक्तीकृता इति। अनेनैतस्य पूर्णं पौर्वापर्यं निश्चेतुं शक्यते। किन्तु पुष्टैतिहासिकतथ्यानामप्राप्तेरस्मिन् विषये न कोऽपि निश्चयो भवितुमर्हति नापि सन्नि-हिते काले भविष्यति। स्थितावीदृश्यां क्रमनिर्णयायोपायान्तरेण विना न काचिद् गतिः। सर्वतः प्रथममाधारेऽस्मिन्निदमस्माभिर्विचारणीयं यद् विचारस्य विभिन्नासु परिपाटीषु कस्य विकासोऽधिकः, कस्य वापकर्षोन्मुखतेति। विचाराणां विकासस्य क्रम एव वस्तुत एतेषां पौर्वापर्यस्य मानदण्डो भवितुमर्हति। एनमाधारमादाय दार्शनि-केष्वनुसन्धातृष्वनेकानि मतानि प्रकाशितानि, परं तैरप्यस्मिन् विषये महत्यापदनुभूता। यतो विकासस्याधारेणापि विचारधाराया आविर्भावस्य पौर्वापर्यनिश्चयो न सुसाध्यः। यया विचारधारया ये स्वलक्ष्यतां नीतास्तत्र तेषां पूर्णतायां सन्देहस्य नास्त्यवसरः। इदं सम्भाव्यते यदेकया परिपाट्या एको विषयः स्पृष्टोऽपि न स्यात्, अन्यया च स एव प्रधान्येनोपादीयते। एतावन्मात्रेणैव कस्याप्यपूर्णता साधयितुं न शक्यते। एतदवश्यं यद्येन ये विषयाः स्वप्रतिपाद्यतां नीतास्त एव यदि अन्याभिः परिपाटीभिर्विस्तरेण-विवेचितास्स्युस्ततो वयं तुलनात्मकपद्धत्या तेषां विकासं निर्णेतुं शक्नुमः। इयमीदृशी समस्या वर्तते, यथाऽद्यत्वेऽनुसन्धाने प्रवृत्ता इमं क्रमभुपाददते।

विचाराणां विकासस्य साहाय्यदृष्ट्या एतासां प्रणालीनां विचारपद्धतिरस्मिन् कार्ये साहाय्यं कर्त्तुमर्हति। प्रतिपादनशैल्यां कालप्रभावोऽधिकतया स्पष्टः प्रतीयते। विषये गम्भीर्यपूर्णे, समाने एकतोमुखे च सत्यपि तदभिव्यञ्जनशैली इदं प्रमाणयितुं पर्याप्ता यदेते विचाराः कस्य कालस्यावदानानीति। भाषाऽप्येतत्सम्बद्धा, याऽस्य परिज्ञाने मूलम्। आधुनिकाः समालोचकाः कस्याप्यविज्ञातकविसमयस्य काव्यस्य-कालनिर्णयाय तदस्मिन्नेव प्रधाने निकषे परीक्षन्ते। 'पृथ्वीराजरास' इति नाम्नः काव्यस्य भाषैव महामहोपाध्यायं डा० गौरीशङ्कर हीराचन्द्र ओझा महाशयं तस्या प्रमाणिकत्वप्रतिपादनार्थं सर्वतोऽधिकं प्रेरयति। एतेष्वेव कानिचित् तथ्यानि आधृत्य दर्शनेतिहासविद्भिरेतेषां क्रमो निर्धारितः। विषयेऽस्मिन्ननवरतं ससाधनायां कृतायां ये परिणामास्तैरुपलब्धास्तेषां सङ्ग्रहमात्रमस्मिन् प्रसङ्गे पर्याप्तम्।

विख्यातैः दाक्षिणभारताभिजनैः म० म० प्रो० कुप्पुस्वामिशास्त्रिभिः उपरि निर्दिष्टानि काठिन्यानि विवेचयद्भिः एतासु वक्ष्यमाणासु षट्सु परम्परासु साङ्ख्यस्य पूर्वत्वं वेदान्तस्य चरमत्वं प्रतिपादितम्। १ साङ्ख्यम् २. योगः ३ न्यायः ४ वैशेषिकः ५ पूर्वमीमांसा ६ उत्तरमीमासा। अयं क्रमः तैरुद्घोषितः काल्पनिकः क्रम-इत्युक्त्वा तैः स्वयमेवोपरि प्रतिपादितं तथ्यञ्च प्रमाणीकृतम्। साङ्ख्ययोगयोर्द्वयोरपि दर्शनयोः प्राचीनत्वं तदभीष्टम्। तच्च प्रतिपादयितुं कठोपनिषदः श्वेताश्वतरोपनिषदश्च प्रमाणत्वेनाम्नानं तैः कृतम्। यत एतयोरुपनिषदोरेतैः द्वावेव प्रस्तुतौ स्तः। न्याय-सूत्रेषु साङ्ख्यस्य मन्तव्यान्याशङ्कितानि येनापि न्यायापेक्षया साङ्ख्यस्य प्राचीनत्वं स्पष्टम्। न्याये ये नाम पदार्था नाङ्गीकृताःवैशेषिके विशिष्य ते स्वीकृताः। अतएव वैशेषिकापेक्षया न्यायस्य प्राथमिकत्वं स्पष्टतरम्। पूर्वमीमांसा तूर्द्ध्वकालवर्तिनीभिश्च-तसृभिः परिपाटीभिः प्रस्तावितेषु सिद्धान्तेषु प्रत्यालोचनायै बहून् स्वीकराति, अतएव तदन्तरत्वं प्रतीतिगम्यम्। वेदान्तस्यार्वाचीनत्वे संशयलेशस्य नास्त्यवसरः।

विंशति शताब्द्या अग्रगण्या दार्शनिका डा० गङ्गानाथझामहाशया[1] अपि क्रममेनं स्वीकुर्वन्ति। तन्मते साङ्ख्यदर्शनं मानवस्य स्वाभाविक्याः प्राथमिक्याश्च जिज्ञासायाः तृप्तेः कार्यं सम्पादयति। तद् गोचराण्यगोचराणि च वस्तूनि पर्याप्तं विश्लेष-यन्ति। आगोचरणां वस्तूनामनुभूतिमपि प्रतिपादयति। मानवः प्राक् कालादेव गोचरा-गोचरवस्तुभेदं जानाति। तस्यैव मानवस्य ज्ञानस्य विकसितं रूपं साङ्ख्यदर्शनं प्रस्तौति। अतएव तस्य प्राथम्यमेष्टव्यम्। योगस्तस्यैव प्रायोगिकोऽनुभवः। अनेन तस्यानन्यत्वं स्पष्टम्। साङ्ख्यदर्शनं यावदवधि गच्छति, न्यायस्ततोऽप्यग्रे याति। स भौतिकानामभौतिकानाञ्च पदार्थानां कृते सुगममार्गं निर्धारयति। वैशेषिकञ्च तस्यैवा-विभाज्यं रूपम्। इमाश्चतस्रो धारा यानि कार्याणि अवशिष्टानि त्यजन्ति, शिष्टे द्वे धारे तत्पूर्णतां नयतः।

---

१. द्रष्टव्या 'पूर्वमीमांसायाः' प्रस्तवावना।

'पाश्चात्यदर्शनानामितिहासस्य'[1] कर्त्रा गुलाबराय एम० ए० महाशयेन अनेकत्वत एकत्वं प्रति जायमानां प्रगतिमाश्रित्य तेषामस्तिकदर्शनानामेवं क्रमो निर्धारितः—१. वैशेषिकम् , २. न्यायः, ३. साङ्ख्यम् , ४. योगः, ५. मीमांसा, ६. वेदान्तः इति । संस्कृतविद्याया इतिहासस्य लेखकेन श्री कपिलदेवद्विवेदिमहाशयेनाप्यमेव क्रमः स्वीकृतः ।

अनेकैर्विद्वद्भिर्निधारितेऽस्मिन् क्रमे निर्णयदृष्ट्या किञ्चित् कथनं दुस्साहसमात्रम् । न चास्य कोऽपि निश्चयो भवितुमर्हति । कथञ्चिन्निश्चितेऽपि स्वयं काल्पनिक इति वदत्सु पुनर्विकासक्रमस्याधारेऽपि कः कस्मात् पूर्ववर्तीति कथनं दुःशकम् । इहागत्य बाबू गुलाबराय महाशयस्य निम्नलिखितो भावः स्वयमेव पुष्टरूपेण पुनरुक्तीक्रियते— "सर्वथा[2] निष्पक्षेण सता दर्शनशास्त्रेतिहासस्य लेखनं तथैव कठिनं यथा पक्षहीनस्य पक्षिणो वायावुड्डयनम् ।" यस्येयमुक्तिर्वस्तुतोऽनुभवसिद्धा यस्य घोषणा बाबूजी सदृशस्य निकषपरीक्षकस्य मुखाद् विनिर्गता सती विशिष्य महत्त्वशालिनी भवति ।

एतावति सत्यपि शैलीपरिशीलनानुसारेण यद्यस्य क्रमस्य निर्धारणं क्रियेत, ततो मीमांसादर्शनं सर्वेभ्योऽप्येतेभ्यः प्राचीनमित्यवगम्यते । जैमिनेः प्रतिपादनपरिपाटी विकसिता नास्ति, अतएव वैदिकसाहित्यस्य परम्पराया अधिकं निकटवर्तिनी । तस्य प्रतिपाद्यमाधुनिकवस्तुना न सम्बद्धम्, एवं भारतस्यादिमनुना सम्बद्धं वर्तते । मीमांसायाः प्रथमभाष्यकारेण श्रीशबरस्वामिना जैमिनीयसूत्राणां विषये विवरणं प्रस्तुवता स्वभाष्यारम्भे लिखितम्—

"लोके येष्वर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् ।" अर्थात् यथासम्भवं जैमिनिना समग्राणि पदानि लोकप्रसिद्धेष्वर्थेष्वेव गृहीतानि, तस्येदं 'सति सम्भवे' इति पदद्वयं सूत्रेषु कतिपयानां लोकेऽप्रसिद्धार्थानां शब्दानामुपादानमपि सङ्केतयति, येन सूत्रेषु वैदिकानां पदानां समावेशोऽपि सूचितः । अनेनैव तेषामतिप्राचीनत्वमपि स्पष्टम् ।

अनेकैर्विद्वद्भिः साङ्ख्ययोगाभ्यामपि न्यायवैशेषिकयोः प्राचीनत्व युक्तमित्युक्तम् । यतः स्वकीयानुमानप्रणाल्यां साङ्ख्यं ता आख्याः शब्दान् साधनानि चाङ्गीकरोति यानि न्यायेन प्रतिपादितानि । विचारमेनमादाय प्रवृत्तेऽपि मीमांसादर्शनस्य प्राचीनत्वमधिकं पुष्टं भवति । न्यायदर्शनेन पूर्वपक्षतया बहवो विचाराः, येषु मीमांसायाः प्रभावः स्पष्टः । न्यायदृष्ट्या शब्दा अनित्याः । अस्या अनित्यतायाः साधनाय नित्यताया व्यावृत्तये च तेन प्रयत्नः क्रियते, सा शब्दनित्यता मीमांसाया अवदानम् ।

---

१. पाश्चात्य दर्शनों का इतिहास (पृ० ८)

२. पाश्चात्य दर्शनों का इतिहास (पृ० ३)

अनेन न्यायापेक्षयाऽपि मीमांसायाः प्राचीनत्वं प्रतिपादितं भवति, गुलाबराय एम०ए०महाशयो विषयविकासदृष्ट्या वैशेषिकदर्शनं सर्वतः प्राचीनं निर्दिशति-किन्तु विचारपरिपाट्यनुसारेण वैशेषिकदर्शनेऽप्यस्य दर्शनस्य प्रभावोऽवश्यं दृश्यते। न केवलं प्रभावमात्रं वैशेषिकदर्शनं विषयमपि तमेव स्वीकरेति, योऽस्य शास्त्रस्यास्ति। तस्यैव प्रतिपादने तद् (शास्त्रं) उपशाम्यति। इमे सर्वेऽपि विषयसम्बन्धिनः पक्षा मीमांसाशास्त्रस्य तथ्यमिदं सर्वसम्मतं प्रतिपादयन्ति। अर्थात् मीमांसाशास्त्रस्य स भागो वस्तुतः सर्वतः प्राचीनो वर्तते, यः कर्माण्यनुशास्ति। विचाराणां दृष्ट्या परीक्ष्यते चेत् मीमांसादर्शनस्यारम्भोऽस्माभिर्जैमिनितः स्वीकर्त्तुं न शक्यते, जैमिनेः पूर्ववर्तिनामाचार्याणां मन्तव्यान्यपि येन केनापि रूपेणावश्यमुपलब्धानि सन्ति। तैः प्रतिपादिता न्यायाः सदा सम्मान्या अभूवन्। अत एव तेषां प्राचीनत्वे केनापि सन्दिग्धचेतसा न भाव्यम्। एतत्तु सत्यम्, यद् दर्शनरूपेण मीमांसाया विकासः पञ्चमकोटिमेत्य सञ्जातः। मम सिद्धान्तेन मीमासाया भागद्वयं कर्त्तुं शक्यते-प्रथमः तस्य सम्बन्धो मुख्यरूपेण कर्मकाण्डेन सहास्ति, द्वितीयश्च सः यस्य सम्बन्धः केवलं ज्ञानमात्रेणास्ति। मीमांसादर्शनस्य प्रारम्भिकं रूपं कर्मकाण्डमनुशास्ति, तदेव च स्वरूपमधिकं विकासं प्राप्तुमशक्नोत्। यस्य प्राधान्य मात्रदृष्टिशालिनः कतिपये समालोचका इमां दर्शनपदेनाभिधातुं सङ्कोचमनुभवन्ति। एतस्यास्य प्रारम्भिकरूपस्याधारेण वयं मीमांसादर्शनं सर्वतः प्राचीनमिति वक्तुं शक्नुमः। किन्तु यया विचारधारयाऽत्र दार्शनिकता समाविष्टा, वस्तुतः सा बहुकालानन्तरं विकासिता। इदं सर्वं कल्पनाया भाण्डागारकल्पम्, यस्य सर्वसम्मत सिद्धान्तताप्रापणम् विदुषां कार्यमस्ति।

समुदायत्रयी

(१) **प्रथमः समुदायः**—एतेषां पौर्वापर्यविषये कियानपि स्यादन्धकारः परमेतेषामन्योन्यादानप्रदानयोः प्रभावाश्च स्पष्टाः प्रतिभान्ति। वस्तुतः, इमाः षट् परम्परा न स्वतन्त्राः। इमे प्रायस्त्रयः समुदायाः सन्ति, येषाममी षडवान्तरप्रकाराः। गतिशीलतामावृत्य वयमिमान् '-यः समुदायाः' इत्यनुक्त्वा 'तिस्रः प्रणाल्यः' इति वक्तुं शक्नुमः। यद्यप्येतासां षण्णां परिपाटीनां पारस्परिकं ग्रन्थनमेवैवंविधं सञ्जातं यद् एकस्याः परिज्ञानमथवा एकस्यां पूर्णं पाण्डित्यम् इतरानिवार्यतयाऽपेक्ष्यते। तथापि विभागशो दृष्टिपाते कृते एतेषां त्रयः समुदाया एतावन्मात्रमन्योन्यं संश्लिष्टाः सन्ति। यद् एतेषु एकं विनाऽपरस्य पूर्णताऽसम्भवप्रत्यया। तेषामयं पारस्परिकः संयोगः शृङ्खला वा तथा संश्लिष्टो येन तयोर्विभज्य विश्लेषणं कष्टसाध्यम्। प्रथमः समुदायः साङ्ख्ययोगयोर्वर्तते। साङ्ख्यदर्शनं मूलरूपेण स्वीकृत्यैव पतञ्जलिना योगदर्शनं प्रवर्तितम्। साङ्ख्यं खलु दार्शनिकानां सिद्धान्तानां विवेचनं प्रस्तौति। एवं तेनैव प्रवर्तितानां सिद्धान्तानां प्रायोगिकानुभवज्ञानं योगदर्शनेन कार्यते। साङ्ख्यं शास्त्रमस्ति

योगश्च तस्य प्रयोगशाला। किञ्चास्यां प्रयोगशालायां ये ये प्रयोगाः प्रत्यक्षीकृताः तैः समग्रं विश्वं प्रभावितम्। एतदेव कारणं यत् साङ्ख्यापेक्षया योगेन स्वकीयं स्वतन्त्रमस्तित्त्वं निर्मितम्। विचारापेक्षया क्रियात्मकतायाः प्राधान्यमस्य महत्ताया मूलम्। योगस्य चमत्कारैर्न केवलं समग्रः संसारः प्रभावितः, अपितु तदस्माकं जीवनस्यैकं ध्येयमेव समजनि। तथापि साङ्ख्ययोगयोः सैद्धान्तिके एकत्वेऽद्यावधि न काऽपि बाधा समुत्पन्ना। केवलं योगेन उपासनाया आधार एकः केन्द्रबिन्दुः (ईश्वरः) स्वीकृतः—अतएवास्यैकस्य समुदायस्य प्रथमा प्रणाली निरीश्वरं साङ्ख्यमिति द्वितीया च सेश्वरं साङ्ख्यमिति नाम्ना च व्यहृते। अस्य समुदायस्यानन्यतां सत्यापयता भगवता व्यासेन गीतायामुक्तम्—"साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः" इति। साङ्ख्यसिद्धान्तानां पूर्णतायै योगो निजं विधानमुपस्थापयति। चित्तस्य नियन्त्रणं योगस्य मूलमवदानम्। तद् विना च साङ्ख्यसिद्धान्तानां चमत्कारोऽसम्भवः। अतएव योगः साङ्ख्यस्य पूरकः।

२. **द्वितीयः समुदायः**—न्यायवैशेषिकयोरस्ति। एते द्वे अपि प्रणाल्यौ दार्शनिकस्य सत्यस्यान्वेषणं विवेचयतः, तदर्थञ्चानुसन्धानं विवादश्च माध्यमतया गृह्णीतः। यथा प्रथममुक्तम्—प्रथमः समुदायः पदार्थानां विश्लेषणार्थं प्रवर्तते। स आद्यमानवस्याराध्यायै प्रकृत्यै महनीयं स्थानं ददाति। ततोऽग्रेतनं कार्यं यच्च सत्यस्यान्वेषणायाधारभित्तिनिर्माणाय भवति। अयं द्वितीयः समुदायः स्वकीयाभ्यामभेद्यप्रणालीभ्यां पूरयति। यत्तयोर्न्यायापेक्षया वैशेषिकमधिकं संक्षिप्तं वर्णनात्मकञ्चास्ति। द्वयमप्येतत् परस्परमविभाज्यमस्ति।

३. **तृतीयः समुदायः**—सत्यान्वेषणस्य भित्तिर्यदाऽनेकैः पूर्वरङ्गैः सन्नद्धा क्रियते, तदा स्वकीयं पवित्रं ध्येयमादाय तृतीयः समुदाय उपतिष्ठते। अयञ्च समुदायो मीमांसाद्वयीत्यभिधीयते। अस्य समुदायस्यानयोर्द्वयोः प्रणाल्योः कार्यमाध्यात्मिकस्य सत्यस्य विवेचनम्। इदमाध्यात्मिकं सत्यं साधारणैः साधनैर्न लभ्यम्, अतएवास्योपलब्धये देवानां साधनानां शरणमनिवार्यम्। एतेषामेव दैवसाधनानामुपस्थापनस्य विवेचनस्य वा कार्यमस्य समुदायस्य प्रथमप्रणाल्या पूर्यते। एतेषां दैवसाधनानामनुष्ठापनेनेयं न केवलं मानवस्य बुद्धेः विकासं शारीरिकशक्तिविकासं च करोति परं त्यागमय्या भावनयैवेयं तं शक्तिसम्पन्नमात्मबलसम्पनञ्च विदधाति। तस्यास्यात्मिक विकासस्य सम्पत्तिः द्वितीयस्याः प्रणाल्या विषयः। इहोपस्थाय मानवस्तत् सत्यं साक्षात् करोति यत्खलु तस्य जीवनस्य लक्ष्यमस्ति। इदमेव च दर्शनस्य चरमं ध्येयम्। एवं स प्रवाहो यः प्रकृतेः निर्गतः प्रवाहस्तस्मिन् परात्परे पुरुषे गत्वा विलीनो भवति। तथा तद्विवेचनं यद् जङ्गमस्य जगतो गोचरागोचरपदार्थाभ्यां प्रवृत्तं तस्यां वर्णनातीतायां सत्तायां सम्प्रविशति। संक्षिप्तेनानेन विवेचनेन मीमांसाया यद् दर्शनत्वं दर्शनानां समुदाये यच्च तस्या महत्त्वं तत् साधितं भवति।

३–पूर्वमीमांसोत्तरमीमांसा च

प्राक्प्रदर्शितेन विवेचनेन तिसृणामेतासां प्रणालीनां पारस्परिकः सम्बन्धः स्पष्टः सञ्जायते। विशिष्य तृतीयः समुदायः प्रकृतेन ग्रन्थेन साक्षात् सम्बद्धः। अतएव तत्र किञ्चिद् विशिष्य विवेचनमपेक्षितम्। द्वाभ्यां परिपाटीभ्यां सार्द्धं क्रमशः पूर्वोत्तरशब्द द्वयं विशेषणतया संलग्नम्। तदुभयमपि तयोः पारस्परिकादानप्रदानयोः परिचयाय पर्याप्तम्। आभ्यामादानप्रदानाभ्यां उभावपि शब्दावतिशयेन प्रभावितौ वर्तेते। यथा च, पूर्वमीमांसाया मनीषिप्रवरेण आचार्यभट्टेन परमजिज्ञासायास्तृप्तये वेदान्तनिषेवण[१] मुपदिश्य वेदान्ते स्वीकायाऽगाधा श्रद्धाऽवद्योतिता, तथैव वेदान्तस्य प्रधाननायकेनाचार्य शङ्करेणापि पूर्वमीमांसा शास्त्रप्रमुखशब्देन निर्दिष्टा। न केवलमेतावदेव, उभावेव तौ द्वयोर्मीमांसयोः समन्वितं स्वरूपमेव कृत्स्नशास्त्रमिति[३] वदतः। द्वयोः परिपाट्योर्लक्ष्यं प्रधानं मन्तव्यं वा मूलतो बौद्धाद्यवैदिकधर्माणामाघातेभ्यो वैदिकधर्मस्य रक्षणमेवास्ति।

पूर्वमीमांसाया उत्तरवर्तित्वाद् उत्तरमीमांसा अतिशयेन प्रभाविताऽस्ति। तस्या बहवः सिद्धान्ता यथाऽन्यैर्दर्शनैः शास्त्रैश्चाहृतास्तथैषा विचारधारापि तैर्गृहीता। क्वचिद् दृष्टान्ततयाऽस्यास्तथ्यान्युपस्थापितानि, क्वचिच्च सिद्धान्तेषु किञ्चिद् वैशिष्ट्यं सम्पाद्य ते समुपस्थापिताः। परिणामो इदमभूत् यत् क्वचिद् बिम्बप्रतिबिम्बभावः क्वचिदेकस्याभावेऽन्यस्याः पूर्णता च केवलं कल्पनेव प्रतीयेत। पूर्वप्रवृत्तत्वात् पूर्व-मीमांसा उत्तरमीमांसां विशिष्य प्रभावितां कर्त्तुं नाशक्नोत्, परं तस्यामेतस्याः प्रथम पद्धतेः विशेषेण महासमर्थकस्याचार्यभट्टस्यैतावान् चमत्कारपूर्णः प्रभावोऽवर्तत यत् तैरत्यादरेण "व्यवहारे भट्टनयः" इत्युक्त्वा भट्टनीतीनामुपादानं कर्त्तुं प्रारब्धम्।

एकशास्त्रत्वम्

द्वयोरेतयोः शास्त्रयोरभिन्नत्वं प्रतिपादयितुमनेकैराचार्यैः प्रयतितम्। द्वयोर्मी-मांसयोः समग्रान् विंशत्यध्यायान् संयोज्यानेकैर्विद्वद्भिर्विंशतिलक्षणा मीमांसेति सम्बो-धितम्। तत्र षोडशाध्याया जैमिनीयाश्चत्वारश्च वैयासिक्या मीमांसयाः सन्ति। तेषु विशिष्य श्रीभाष्याचार्याः श्रीरामानुजाः "संहितमेच्छारीरकं जैमिनीयेन षोडशलक्षणेन"

---

१. दृढत्वमेतद् विषयप्रबोधः प्रयाति वेदान्तनिषेवणेन (श्लो० वा०)

२. शङ्करभाष्यम् ३।३।५३ (पृ० २४६)
"ननुशास्त्र प्रमुख एव प्रथमे पादे इत्यादि।

३. शाङ्करभाष्यम् (३।३।५३ पृ० २४) इह चेदं चोदनालक्षणेषूपासमानेषु विचार्यभाणेष्वा-त्मास्तित्वं विचार्यते कृत्स्नशास्त्रशेषत्वप्रदर्शनाय।

इत्युक्त्वा द्वयोः साहित्यं स्पष्टमुद्घोषितवन्तः। मध्यकालस्य कतिपयैरनुसन्धातृभिरिदं तथ्यं स्वीकृतम्। विंश्यां शताब्द्यामुत्पन्नैर्गणनीयैर्मीमांसकैः डा० गङ्गानाथझा महोदयैरपि एतयोरभेदः प्रमाणितः। "मीमांसां" प्रोवाच इत्यादिस्थलेषु संलग्न (मीमांसया सह) मेकवचनं प्राचीनकालिकस्यैकत्वस्य प्रतिपादकमिति।

शास्त्रभेदः

परमिदमेकत्वं नाधिककालावधि स्थायितामगच्छत्। यावद् द्वयोः परिपाट्योर्विकासो न समजनि, तावत् स्वतन्त्रमस्तित्वमपि समभवत्। उपर्युक्तस्यैकत्वस्य मूलं सम्भवत आधारस्य उद्देश्यस्य वाऽभिन्नत्वं वर्तते। परमियमभिन्नता नाधिकं कालं यावत् सुरक्षिता स्थातुमशकत्। बहुषु सिद्धान्तेषु सत्यामपि मौलिक्यामेकतायां परिपाटीद्वयस्य विचारशीलैर्विवेचकैस्तयोः सूक्ष्ममन्तरं स्थापयितुं प्रयतितम्। यथा वेदापौरुषेयत्वं न केवलं द्वयोः प्रणाल्योः प्रमुखं मन्तव्यम्, अपितु ईदृशोऽयमाधारो यस्मिन् विनष्टे एतयोः स्थितिरसम्भवा। परं साऽपौरुषेयता सूक्ष्ममन्तरमेकं बिभर्ति। मीमांसाया अपौरुषेयत्वस्य क्षेत्रे केनापि रूपेण पुरुषविशेषस्य प्रवेशोऽसम्भवः, किन्तु वेदान्तस्य क्षेत्रे श्वासनिःश्वासयोर्माध्यमेन[1] तस्य सर्वशक्तिमयस्य परमपितुः (ईश्वरस्य) ग्रहणं भवति। इयमेव दशाऽन्येषां प्रमुखसिद्धान्तानां विषये वर्तते। मोक्षस्योपादेयत्वं द्वाभ्यामपि परिपाटीभ्यां सादरं स्वीकृतम्, किन्तु तस्य स्वरूपे तयोरैकमत्यं विभिद्यते। उत्तरभागस्य मनीषिणो मोक्षमानन्दस्वरूपं साधयित्वा तं जीवब्रह्मणोरेकामभिन्नामवस्थां स्वीकुर्वन्ति, परं पूर्वभागस्य समीक्षकास्तस्यालौकिकस्यानन्दस्यानुभवाय जीवस्य पार्थक्यं भोक्तृत्वञ्चानिवार्यं मन्वते। किं बहुना, न केवलमेतासु विभिन्नासु दशासु सृष्टिक्षेत्रेऽपि नैतावैकमत्यमावहतः। सृष्टिरेकः प्रमुखः स्तम्भः, यस्य विवेचने एव दर्शनानां विभेदोऽवतिष्ठते। अद्वैतविशिष्टाद्वैतद्वैताद्वैतशुद्धाद्वैतादिपरम्पराः न सृष्टिविषये नियताः कतिपयपरिणामरूपा एव। मीमांसका एनां शाश्वतीति सत्येति च साधयितुं प्रयतन्ते। प्रश्नेऽस्मिन् उत्तरभागेन सह तेषां महान् विरोधः, यस्य प्रतिद्वन्द्वित्वं न श्रद्धया, किन्तु विवादादिपरम्परया कुर्वते। बौद्धास्तस्य गणनीयाः प्रतिद्वन्द्विनः, परमासु समस्यासु वेदान्तिनोऽपि तैः सम्यक्त्वेनालोचनाविषयतां नीताः। जीवब्रह्मणोरनन्यत्वं वेदान्तिनां मूलम्। 'सृष्टिर्ब्रह्मणः कौतुकममिति' तैरभ्युपगम्यते। परं पूर्वाचार्या अद्वैतमतं प्रबलाभिर्युक्तिभिः सबलेन सामर्थ्येन चापाकुर्वन्ति। विभेदस्यासां दशानां प्रत्यक्षं प्रभावोऽस्मदाचार्यशङ्करेऽपि दृश्यते। तेन बहुषु स्थलेषु चर्चाऽप्यस्य कृता। किन्तु भट्टपादे तु तस्यागाधा श्रद्धाऽनुमीयते। न च तेन मीमांसा भट्टातिरिक्ता परिगणिता।

---

१. 'तस्य निःश्वसितं वेदाः'।

२. यः कल्पः स कल्पपूर्वः।

पूर्वमीमांसकेषु विभिन्नतेयं पार्थसारथिमिश्रं यावत् स्थिरतां गता। मीमांसकैः तस्याः स्थिरतायाः रक्षणाय कृतेषु प्रयत्नेषु सङ्कोचो न दृश्यते। अप्पय्यदीक्षितेन्द्रैः स्वकीयवादनक्षत्रमालायामयमेवाशयः सम्पोषितः।

स्वतन्त्रमस्तित्वम्

विंश्यां शताब्द्यामनेकैर्मीमांसकैरेतां समस्यामधिकृत्य स्वकीयविचारः प्रकटितः। शास्त्रदीपिकाया बम्बईसंस्करणस्य भूमिकां लिखद्भिराचार्यानन्तकृष्णशास्त्रिभिस्तकैरनेकैर्मीमांसा स्वतन्त्रशास्त्रत्वेन साधिता। शाबरभाष्यस्य पुनासंस्करणस्य प्राक्कथने शास्त्रद्वयमिदं तुलयता म० म० विरूपाक्षशास्त्रिणाऽस्य शास्त्रस्यातिरिक्ता सत्ता प्रमाणीकृता। वस्तुतो द्वयोरनयोरस्तित्वे संशयो याथार्थ्यस्य व्याघातः। सत्यपि वेदसमाश्रितत्वे विषयविचारदृष्ट्या द्वयोः परिपाट्योः पन्थाः पृथक् पृथक् वर्तते। विवेचनशैलीमाश्रित्य वेदार्थस्य भागद्वयं कर्त्तुं शक्यते, प्रथमः सिद्धभागः द्वितीयश्च साध्यभागः। ब्रह्म खलु सिद्धम् तस्य सिद्धस्य सर्वथा स्वतन्त्रतया विवेचनं वेदान्तस्य प्रधानं कार्यम्। विचारशास्त्रं साध्यं (यागजन्यापूर्वादि) स्वविषयीकरोति। एकस्य सम्बन्धः पूर्वभागेनास्ति, अपरस्य चोत्तरभागेन। द्वयोरपि श्रेयःसाधनत्वं निर्विवादम्। किन्तु इदं श्रेयोऽपि मौलिकमन्तरं बिभर्त्ति। एकं श्रेयः सापेक्षम् अपरञ्च निरपेक्षम्। सापेक्षं श्रेयोऽभ्युदयविशेषः, अस्य साधनं धर्मजिज्ञासा, तस्याः प्रतिपादकश्च विचारशास्त्रम्। कैवल्यमिति श्रेयसोऽन्या विधा तच्च निरपेक्षमस्ति, वेदान्तसेवनं तद् द्वारभूतम्। कर्तृभेदोऽप्यनयोः स्वतन्त्रास्तित्व साधकः। एकस्य प्रवर्तको जैमिनिः अपरस्य च वेदव्यासः। एकस्याः परिपाट्याः पृथक् पृथक् प्रवर्तकाः कल्पयितुं न शक्यन्ते। एतयोः पृथक् प्रतिज्ञावाक्यमप्यस्य साक्षिभूतम्। अनेन संलग्नो 'अथातः' इति शब्दः तयोर्व्यवधानमभिव्यनक्ति।

महर्षि-जैमिनेः प्रतिपाद्या धर्माः

'तानि धर्माणि प्रथमान्यासन्' न हि धर्माधर्मौ चरत आवां स्व इति न देवगन्धर्वा न पितर इत्याचक्षतेऽयं धर्म्मोऽयमधर्म्म इति। यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः यं गर्हन्ते सोऽधर्म इति।

ते चानुष्ठेयहोमयागादिपराः सन्ति, न हि तत्र ब्रह्मणः प्रवेशावसरः। व्यास प्रतिपादितं ब्रह्मापि स्वसीमां यावद्गन्तुं कर्मानुष्ठान पात्रयोग्यतासम्पादकत्वेन गृह्णाति तदनिवार्यमिति न मन्यते। आचार्य शङ्करेणानेकेषु स्थलेष्वाशयोऽयमुद्घोषितः। द्वयोरप्यनयोः सिद्धान्तयोः सूक्ष्मभेदस्तु प्रायः सर्वत्रास्त्येव परं बहूनि स्थलानि त्वीदृशानि सन्ति यत्रेमौ मिथो विरुद्धावपि भवतः। सृष्टिविषये यथाऽनयोः परिपाट्योर्वैपरीत्यं स्पष्टम् तथैव देवतानां विषयेऽपि पूर्वभागो देवान्

द्रव्यापेक्षया गौणान् परिकल्पयति, किन्तूत्तरभागो हविरपेक्षया हविर्भोक्तुः प्राधान्यमधिकं रुचिकरं मनुते। यत्र तत्र जैमिनेर्विचारप्रवाहे ब्रह्मण आम्नानमवश्यं वर्तते, यथा तस्य नक्षत्रेष्टिदेवता ब्रह्मास्ति[1]। किन्तु तत्रापि सूक्ष्ममन्तरमस्माभिः परिगृह्यते। सृष्टेरुद्देश्यभूतं तद् ब्रह्म व्यासस्य सच्चिदानन्दरूपात् परब्रह्मणः सर्वथा भिन्नमस्ति। स तु तथाविध एव शाब्दो देवः, यः पूर्वभागेन प्रतिपादितासु यज्ञपरम्परासु त्यागस्योद्देश्यरूपं सत् सम्प्रदानकारकेण सार्थमुपैति। "अध्वरमीमांसायां" तस्य सच्चिदानन्दस्य सत्तां स्वीकर्तुं स्थानमेव नास्ति। अस्यां स्थित्यां यदा किल प्रवर्तका भिन्नाः फलानि भिन्नानि जिज्ञास्याश्च भिन्नास्तदाऽनयोः पृथगस्तित्वविषये को नाम सन्दिहीत। अत एव सूत्रकृदाह—**फलजिज्ञास्यभेदाच्च (सू०)**

अधिकारी प्रमेयोऽपि च भिन्नौ स्त इति। धर्मजिज्ञासुर्मीमांसाया अधिकारी, ब्रह्मजिज्ञासुश्च वेदान्तस्य। प्रमेयभेदश्च स्पष्ट एव। एकाधारत्वेनैकस्रोतोनिर्गतत्वेन चानयोरभेदोऽनेकशताब्दीं यावद् मान्य असीदिति सम्भाव्यते। किन्तु विचारान्तरेणेदनुपगन्तुं शक्नुमः, यदेतयोरयमभेदस्तावदेवोपलभ्यते यावदनयोर्विकासो नाभवत्। विकासात् पूर्वमनयोः स्वतन्त्रास्तित्वस्य कल्पनाऽपि कथमिव कर्तुं शक्यते। एकस्य पितुः पुत्रद्वयस्य वयस्कत्वप्राप्ति यावत् पार्थक्यं नापि कल्प्येत तथापि यत्र तयोः पृथगुत्पत्तिर्भवति-तत एव कालादारभ्य तयोः स्वतन्त्रमस्तित्वमपि समुपस्थितं जायत एव। विकासात् पूर्वं न हि तन्मूर्त्ततां प्राप्नोति सम्यक्। इयमेव स्थितिर्वेदस्यास्य सन्ततिद्वयस्य वर्तते।

पारस्परिकोऽभेदः

अस्तित्वे स्वतन्त्रेऽपि सति यथा पितुः सन्ततिद्वये कश्चिदीदृशो माध्यमः (रक्तसम्बन्धः) समवतिष्ठते यस्तत्र पारस्परिकमभेदमपि स्थापयति, तञ्च सुरक्षितं कुरुते। तथैवानयोः पारस्परिकाभेदविषये "समुदायत्रयी" शीर्षके कथितं विश्लेषणं पर्याप्तम्। यत्रैतेषां षण्णां दर्शनानां मौलिक्या एकतायाः प्रतिपादकस्य प्रश्नो वर्तते, तत्र द्वयोरनयोः सम्बन्धो नात्यन्तनिकटवर्तित्वमात्रम्, अपित्वनन्यत्व रूपोऽपि। आभ्यन्तरे विचारे समुपस्थिते वस्तुतो भिन्नाविमौ, परं बाह्यास्तित्व विचारप्रसङ्गे त्वभिन्नतां गच्छतः। उदाहरणमत्र युधिष्ठिरस्यैकमादर्शवाक्यं हठादिव स्मृतिपथमायाति। आभ्यन्तरमस्तित्वमवलम्ब्य कौरवपाण्डवौ परस्परं रक्तपिपासू वैरिणौ चास्ताम्, परं बाह्यसम्बन्धप्रश्नकाल उभावपि तौ समन्वितरूपेण

---

१. विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्। जै० सू०

पञ्चाधिकशतमभूताम् । एतेन तयोः स्वतन्त्रास्तित्वेन सह पारस्परिकाभेदोऽपि सिद्धयति । अयमेवाशयः––

"परस्परं विरोधे तु वयं पञ्च शतञ्च ते ।
अन्यैः सह विरोधे तु वयं पञ्च शतञ्च ते ।। इति ।

युधिष्ठिरेण प्रकटीकृतः । एतस्मादधिकं कथनं लोकविदितेऽस्मिन् प्रसङ्गे नावश्यकम् ।

पौर्वापर्यम्

सम्प्रदाययोरनयोः समालोचकेषु यदि कश्चिदधिको विवादविषयो विद्यते तर्हि केवलं पौर्वापर्यविषये एव । बहुभिर्विद्वद्भिरत्र विस्मयोऽपि प्रकटीकर्त्तुं शक्यते यदत्र सम्प्रदायद्वये पूर्वोत्तरशब्दौ सम्पृक्तौ, ततः कथमिव पौर्वापर्यविषयकः संशयः समुत्तिष्ठत इति । किन्तु नैतत् । समस्येयं यावन्मात्रं स्वाभाविकी तावन्मात्रं दुस्समाधेया । सुप्रसिद्धेन विदुषा मोक्षमूलरमहाशयेनोक्तम् यत् पूर्वोत्तर[१] शब्दयोरभिप्रायः पौर्वापर्यस्य प्रकाशनं नास्ति । एतदेवाश्रित्यानयोः पौर्वापर्यकल्पनमन्याय्यमपि विद्यते । वेदस्य विषयविभागाश्रयणेण संयोजिते विशेषणे स्तः ।

स्थितावस्यामनयोः पौर्वापर्यविषये निर्णयार्थमितरेषाम् उपादानानां विश्लेषणमनिवार्यतां गच्छति । पौर्वापर्यनिर्णयाय प्रमुखमाधारद्वयं प्रथमं प्रतिपादितम् । तत्र प्रथम आधारो विषयविवेचनं द्वितीयश्च प्रवर्तकानां समयः ।

अस्मिन्नाधारद्वये केवलं विषयविभागमाश्रित्य पौर्वापर्यं निश्चीयेत, ततः पूर्वमीमांसायाः पूर्वत्वमसन्दिग्धम् । मीमांसेयं वेदस्य पूर्वभागमधिकृत्य विचारयति यं कर्मकाण्डमिति कथयन्ति । अस्या अपरे सिद्धान्ता अपि उत्तरभागस्य सिद्धान्तापेक्षयाऽविकसिताः । अतएव विषयः, तत्प्रतिपादनपरम्परा, सिद्धान्तविकासः इत्याद्याश्रित्य पूर्वमीमांसायाः पूर्वत्वं सर्वसम्मतम् । किन्तु समालोचकानां परम्परा तावत् स्वीकृत्यापि न सन्तोषमावहति । सा प्रथमेनाधारेण समं द्वितीयाधारेऽपि दृष्टिपातं वाञ्छति । यत्र प्रवर्तकानां विषये निर्णय आवश्यकतां गच्छति । अनयोः परिपाटयोर्द्वयोः प्रवर्तकयोः सम्बन्धस्य च विषये बहुभिर्विद्वद्भिरनेकानि मतानि समुपस्थापितानि, किन्तु हन्त ? यत्तेषामनेकत्वस्यैकत्वेन परिणतिः न जाता । तयोर्निदेशोऽग्रे सङ्क्षेपेण करिष्यते ।

---

१. इण्डियन फिलासफी, मीमांसा प्रकरण ।

४. जैमिनिर्व्यासश्च

मीमांसाया भागद्वयस्य प्रवर्तकाविमौ शिरसाऽभिवन्द्यौ। नाद्यावधिनिश्चितं तथ्यमैतिह्यविद्भिरेतयोर्विषये समुपस्थापितम्। ऐतिह्यविद्भिरस्मिन् विषये यत्न एव न कृत इति नास्त्यभिप्रायः किन्तु तैः कृतो यत्न एतावान् व्यापको विस्तृतश्च संवृत्तो यत्तद् विषये दिङ्निर्धारणमद्य नास्त्यसम्भवम् परं कष्टसाध्यमवश्यमस्ति। इयमेव स्थितिरनयोर्महामानसयोर्विचारो वर्तते। यत्तयोर्विचारास्तथा व्यापकाः येनानयोः परस्परं पौर्वापर्यसम्बन्धनिर्णयो दुश्शकः।

समालोचकपरम्परा एतयोर्विषये नवानि तथ्यान्युपस्थापयति। कतिपये विद्वांसः व्यासं जैमिनेर्गुरुं परिकल्पयन्ति, कतिपये च जैमिनिव्यासात् पूर्वं निर्धारयन्ति। नाना किंवदन्त्योऽपि विषयेऽस्मिन् प्रचलिताः सन्ति या आश्रित्य जैमिनिव्यासयोर्गुरुशिष्यभावः प्रकटी भवति। अनेकैः समालोचकैरेतावताऽऽग्रहेण दाढर्येन च गुरुशिष्यभावः सम्पोषितः यथा स एवाद्य प्रसिद्धिं गतः। विषयस्यास्य विवेचनाय जैमिनिव्यासयोरिमे विचारा उपस्थाप्यन्ते—

जैमिनिसूत्राणि—

महर्षिजैमिनिना स्वीयसूत्रेष्वनेकत्र महताऽऽदरेण बादरायणशब्दः प्रयुक्तः। परम्परयाऽयमेव बादरायणो व्यास उत्तरमीमांसायाः प्रवर्त्तकोऽस्ति। जैमिनिना[१] सर्वतः पूर्वं बादरायणस्य नामोल्लेखः कृतः पञ्चमे सूत्रे। तस्य व्याख्यां कुर्वताऽऽचार्यशबरेणोक्तं यत् सूत्रे [२]बादरायणनामोल्लेखस्तत्प्रसिद्ध्यै कृत इति। अत्र नास्ति सन्देहो यद् बादरायणोऽयं न केवलमुत्तरमीमांसायाः अपितु पूर्वमीमांसाया अपि विशेषज्ञः। तस्येमां पूर्वमीमांसाविशेषज्ञतामाश्रित्य जैमिनिस्तस्मै सूत्रेष्वादरणीयं स्थान ददाति। जैमिनिना पञ्चसु स्थलेषु बादरायणो नाम्ना स्मृतः। अयमेव सुमहानाधारः, येन व्यासस्य पूर्ववर्तित्वं जैमिनेश्चोत्तरवर्तित्वं साध्यते। अस्य द्वितीय आधारो गुरुपरम्परायाः प्रचलनमस्ति। किन्तु सा गुरुपरम्परा कुतः, कस्मात् कालात्, केन च प्रवर्तितेत्यस्मिन् विषये न किञ्चित्प्रमाणमुपलभ्यते। आचार्यभट्टेन स्वकीये 'श्लोकवार्तिके' गुरुपरम्परायाश्चर्चाऽवश्यं कृता, तस्याश्च स्पष्टतया निर्देशार्थं

१. औपत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे: तत्प्रमाणं बादरायणस्यानपेक्षत्वात् (१।१।५)

२. बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुम्। (शबरस्वामी)

३. अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात्। (५।२।१७)
जातिं तु बादरायणोऽविशेषात् तस्मात् जत्यर्थस्याविशिष्टत्वात्। (५।२।१७) ६।१।३९
विधिं तु बादरायणः। (१०।९।१४) सू० ४४
विधिवत् प्रकरणविभागे प्रयोगं बादरायणः। (११।१।९ सू० १४)

श्लोकवार्तिकस्याधिकृतेन व्याख्याकारेण पार्थसारथिमिश्रेण गुरुपर्वक्रमोऽप्युपस्थापितः। किन्तु आचार्यभट्टो मिश्रश्च तां निःसंकोचमप्रामाणिकीं साधयतः केवलमेतासां प्रचलितपरम्पराणामाधारेण यदि किमपि तथ्यं निश्चीयते ततः सत्यं प्रत्यन्यायः स्यात्। सामविधानब्राह्मणे[१] परम्परैका निर्दिष्टा वर्तते, यथा व्यासबादरायणयोर्भेद सिद्ध्या सहैव जैमिनिर्बादरायणस्य गुरुरित्यपि प्रमाणितं भवति। अत एव केवल-मेतासां परम्पराणां प्रमाण्यं स्वीकृत्य कल्पनं न युक्तिसङ्गतम्।

व्याससूत्रम्

पूर्वमीमांसायाः सूत्रेषु क्वचिदपि स्पष्टतया व्यासस्योल्लेखो नास्ति। केवलं बादरायण एवोद्धृतः। किन्तूत्तरमीमांसासूत्रेषु स्पष्टतया जैमिनेर्नाम परि-कीर्तितम्। ब्रह्मसूत्रकारेण ३।४।२,[२] ३।४।१८,[३] ३।४।४०[४] एषु स्थलेषु जैमिनिः स्मृतः। एषु ३।४।४० तमे स्थले जैमिनेरुपस्थापनं स्वमतपोषणाय कृतम्। सूत्रमिदं व्याचक्षाणेनाचार्यशङ्करेणास्मिन्[५] विषये जैमिनिबादरायणयोरेकत्वं घोषितम्। उदाहरणैरेतैर्निर्विवादमिदं सिद्ध्यति यत् ब्रह्मसूत्रकारात् पूर्वं जैमिनेः प्रमाणिकी सत्ताऽऽसीदिति।

गुरुशिष्यभावः

जैमिनिव्यासयोर्गुरुशिष्यभावस्य प्रसिद्धिविषये यत्किञ्चिदुपर्यभिहितं तन्नास्ति पर्याप्तं सन्तोषावहञ्च। वायुविष्णुभागवतादीनि पुराणानि जैमिनिं व्यासस्य शिष्य इत्युद्घोषयन्ति। गुरुशिष्ययोः पवित्रे सम्बन्धे सत्यपि द्वावपीमावाचार्यौ परस्परं सादरं नामोपादानं कुरुतः। अयमेव आश्चर्यस्य विषयः। यतो हि बहुषु स्थलेष्वेतौ विरुद्धानि मतान्यादायापि प्रवर्तेते। विषयेऽस्मिन् वेदान्तदेशिकेनापि[६] सङ्केतितम्।

वस्तुत इदं कल्पनामात्रमेव प्रतीयते। पूर्वमीमांसापेक्षया उत्तरमीमांसायाः महत्तां प्रतिपादयितुं अनेकान् संवत्सरान् यावत् प्रयत्नाः प्रावर्तन्त। वेदान्तस्यास्य

---

१. सोऽयं प्रजापत्योविधिस्तमिमं प्रजापतिर्बृहस्पतये प्रोवाच, बृहस्पतिर्नारदाय, नारदो विष्व-क्सेनाय, विष्वक्सेनो व्यासाय पाराशर्याय, व्यासः पाराशर्यः जैमिनये, जैमिनिः पौष्पि-ण्ड्याय पराशर्यायणोबादरायणाय।

२. ब्र० शा० भा० पृ० ८१० 'शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः।

३. ब्र० शा० भा० पृ० ८७७ 'परामर्शं जैमिनिरचोदना चापवदति।'

४. ब्र० शा० भा० पृ० ९०८ 'तद्भूतस्य नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः।

५. ब्र० शा० भा० ३।४।४० जैमिनेरपीत्यपिशब्देन जैमिनिबादरायणयोरत्र सम्प्रतिपत्तिं शास्ति।

६. "शिष्याचार्यौ विरुद्धं मतमधुना साधयितुं प्रवृत्तौ।"

नवस्वरूपस्याविष्कृतेरपि च शृङ्खलाप्राप्तेः पूर्वं मीमांसायाः प्रचारः सार्वदेशिक आसीदित्यत्र लेशमात्रमपि नास्ति संशयः। वेदान्तस्य तादृशप्रतिष्ठायै बहुभिराचार्यैः सम्भूय प्रयत्नः कृतः। अस्य महात्म्यस्य वृद्धये जैमिनिर्व्यासशिष्य इति घोषितो बभूवेति सम्भाव्यते। अनेकान् संवत्सरान् यावदस्माकं देशे परम्परैतादृश्यासीत्। प्रगाढविद्वत्तया अयं सर्वोत्तमः शिष्यो भवेत्। अत्रायमवलम्बस्स्यात् यद् महतो महीयान् विद्वानपि शिष्यो भवेदिति। स्वपाण्डित्यप्रभावस्थापनस्य तथा समकालिके समाजे सर्वोच्चमनीषित्वस्येदमेवैकं लक्षणमासीत् यन्महतो महीयान् शिष्यो भवेत्। शङ्कराचार्यस्य मण्डनमिश्रस्य चोदाहरणमस्य साक्षि वर्तते। पराजितेन मण्डनमिश्रेण शङ्कराचार्यस्य शिष्यत्वं स्वीकृतम्। एवं शास्त्रार्थे सम्पन्ने तत्र पराजिते च मण्डनमिश्रे शङ्कराचार्यस्य समग्रेऽस्मिन् देश आचार्यतया लब्धप्रतिष्ठा सम्बभूव। अयमपि प्रचार एतमभिप्रायं मनस्याधाय कथमिव न स्यात्? जैमिनेर्महत्वमतिशीघ्रं व्यासं प्रापयितुमितो महत्तरं साधनमन्यत् किं स्यात्?

अवशिष्यते पुराणगतानामुल्लेखानां प्रश्नः, तदर्थं किञ्चिद् गम्भीरतरं विवेचनमपेक्ष्यते। स्वल्पकालाय जैमिनिव्यासयोर्गुरुशिष्यसम्बन्धः कथञ्चिदस्माभिः स्वीक्रियेत, तथापि तत्र बलवत्तरेण प्रमाणेन भाव्यम्। जैमिनेर्विचारेषु ब्रह्मविद्यायाः कश्चन प्रभावो नोपलक्ष्यते, यदा हि व्यासो ब्रह्मविद्याया न केवलं वेत्ता अपितु प्रवर्त्तकोऽप्यासीत्। जैमिनीयेषु सूत्रेषु वैयासिक सूत्राणां प्रभावः समभिलक्ष्यते। आकलनेनैतद् विपरीतमेव प्रतीयते। उत्तरमीमांसापेक्षया पूर्वमीमांसायाः प्राचीनत्वं सर्वथा सङ्गतम्। वैयासिकेषु सूत्रेष्वपि जैमिनेः प्रभावः स्पष्टोऽसन्दिग्धश्चासीत्। अतः कथमिव पूर्वमीमांसा सूत्रकारो जैमिनिर्व्यासस्य शिष्य इत्यस्माभिः स्वीक्रियताम्?

अन्यत्तथ्यमस्ति यद् भागवतस्य द्वादशस्कन्धस्य षष्ठेऽध्याये[1] व्यासः जैमिनिं छन्दोगसंहितामध्यापयामासेत्युल्लेखो वर्तते। तत्रैव ततः पूर्वं नवमस्कन्धस्य[2] द्वादशेऽध्याये जैमिनिरेको योगाचार्य इत्येवं रूपेण सगौरवं निर्दिष्टः। सम्भवत एतदेवाश्रित्य कालिदासेन रघुवंशमहाकाव्ये द्वादशसर्गान्तर्गते त्रयस्त्रिंशे[3] श्लोके जैमिनेरुल्लेखः कृतः। तत्र स मनीषित्वेन योगाचार्यत्वेन ससम्मानं स्मृतः। अयं मनीषिशब्दः प्रख्यातेन व्याख्याकारेण मल्लिनाथेन 'ब्रह्मविद्याविद्वानि' ति व्याख्यातः। पुराणस्य साहित्यस्य च द्वित्रस्थलावलोकनेन जैमिनेर्व्यासशिष्यत्वं स्पष्टं भवति। एवं च तस्य योगाचार्यत्वं ब्रह्मविद्यावैदुष्यमपि स्पष्टं प्रतीयते। पूर्वमीमांसाप्रवर्तकतया

---

१. छन्दोगसंहिता प्रदानेन जैमिनिमन्वगृह्णात्।

२. योगाचार्यस्य 'जैमिनेः'।

३. 'महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा।
तस्मात्स योगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरुः'॥

यो जैमिनिराद्दतः, तस्य मीमांसाविशेषज्ञस्य चर्चाऽस्मिन् प्रसङ्गे न कृता। अत एव व्यासशिष्यत्वेन यस्य जैमिनेश्चर्चाऽस्मिन् प्रसङ्गे न कृता। अतएव च व्यास शिष्यत्वेन यस्य जैमिनेश्चर्चा वर्तते स पूर्वमीमांसायाः प्रवर्तको जैमिनिर्नास्ति, किन्तु तदतिरिक्तो ब्रह्मविद्याया विशेषज्ञो द्वितीयोऽथवा तृतीयो जैमिनिरस्तीति।

एवमेव जैमिनीयेषु सूत्रेषु यत्र यत्र बादरायणस्योल्लेख आयाति, स बादरायण उत्तरमीमांसायाः प्रवर्त्तको नैव, अपितु पूर्वमीमांसायाः ख्यातनामा विशेषज्ञो बादरायणः। अत एव जैमिनिना स यथायथमादृतः।

कर्मणः प्रभावः[1] स्पष्टः किन्तु जैमिनौ तु ब्रह्मविषयकः प्रभावो न पतितः। यदि जैमिनिर्व्यासशिष्योऽभविष्यत् तदा ब्रह्मविषये तावन्मात्रमौदासीन्यं तस्य नाभविष्यत्, प्रभाववर्त्ता तु दूरे तिष्ठतु। जैमिनिना कर्मकाण्डातिरिक्तो वेदभागः कथञ्चिन्नीतः। तत्र यदि तस्यार्थवत्ता स्वीकृता सोऽपि केवलं कर्मकाण्डस्य साहाय्यकर्तृत्वेनैव। अप्पय्यदीक्षितैः तस्येदमौदासीन्यमनभिज्ञत्वमित्युक्तम्[2]। एवं च कथमपि तयोर्गुरुशिष्यभावो नोपपद्यते, अन्यथा जैमिनिर्ब्रह्मविषयेऽनभिज्ञः कथं भवेत्। केवलमिदं वेदान्तस्य माहात्म्यसिद्धये तस्मिंश्च प्रवर्तनायार्थवादमात्रमस्ति।

न केवलं जैमिनौ, तत्पूर्ववर्तिनि तदीये कालेऽपि च ब्रह्मविद्यायाः प्रचारः प्रभावश्च जनेषु नाममात्रेणासीत्। यागानां वैभवमीदृशमासीद् यत्ते दिनचर्यायां संल्लग्ना अभूवन्। अस्यां स्थितौ व्यासस्यास्तित्वविषये ब्रह्मविद्यायाः प्रवृत्ति विषये च कल्पनाऽपि न सम्भाव्यते। यदि तदानीं व्यासो ब्रह्मसूत्राणि विरचितवान् स्यात्ततोऽवश्यं जैमिनीयसूत्राणां (जैमिनीयशास्त्रस्य) महत्त्वं प्राप्तं स्यात्। देशस्य विशिष्टमनीषिमण्डले तदा व्यासस्य गणना स्यात् यदा व्यासस्य तद्विरचितशास्त्रस्य च जगति माहात्म्यं प्रसृतं स्यात्। तदैव खलु जैमिनिः तदानीमध्येतुं गतवानिति वक्तुं शक्यते। व्यासस्य व्यापकः प्रचारस्त्वास्तां दूरे, तदानीं तदस्तित्वसाधनमपि दुष्करम्। अत एव तयोरयं गुरुशिष्यभावः कल्पनामात्रम्। व्यासशिष्यरूपेणैव जैमिनिः पुराणेषु निर्दिष्टः, परं स नासीत् पूर्वमीमांसायाः प्रवर्तकः। किन्त्वतिरिक्त एव कश्चिज्जैमिनिः। व्यासस्तु जैमिनेर्बहुकालानन्तरवर्ती। अतोऽनन्तरकालिकत्वेन व्यासो जैमिनेर्गुरुरित्यसम्भवप्रत्ययः।

---

१. ४।१।१३ पृ० ९५४ ब्र० शाङ्करभाष्यम्—
न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे, विद्यत एव सा।

२ 'यागादिरूपं धर्ममेव सकल वेदार्थं मन्वानो जैमिनिः सकलवेदनान्तप्रमाणकं ब्रह्मनित्यनिरतिशयपुरुषार्थ फलानि तदुपासनानि कर्मणां तत्साधनसहकारिभावञ्च नाज्ञासीत्।'
("आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानाम्" १।२।१)

एतेन मीमांसापदात्पूर्वं संलग्ने पूर्वोत्तरविशेषणे अपि मोक्षमूलरानुसारेण केवलं वेदस्य पूर्वमुत्तरञ्च भागमाश्रित्य न प्रवृत्ते। किन्तूभयोर्मीमांसयोः काले विकासे चापि सङ्केतं कुरुतः। एतस्य विषयस्य पूर्णं विवेचनं मीमांसाया अनेकरूपता नामके शीर्षकस्तम्भे प्रतिपादितचरम्। शैलीदृष्ट्यापि व्यासस्यार्वाचीनत्वं स्पष्टम्। जैमिनेः शैली वेदस्य यावदेव निकटवर्तिनी, व्यासस्य तु तावदेव लोकस्य निकटवर्तिनी।[1] आचार्यशबरोऽत्र प्रमाणम्। यथा ब्रह्मसूत्रे भाष्यकारेणाऽऽचार्यशङ्करेण शाबरी शैली समाश्रिता तथैव सूत्रकारेण व्यासेनापि जैमिनेः शैली मार्गदर्शित्वेन स्वीकृता। विचारदृष्ट्यापि वेदान्तशास्त्रं सर्वेषां दर्शनानां समन्वितं विकसितं परिणतञ्च रूपम्। एतत् पूर्वं निरूपितम् प्रत्यक्षसिद्धञ्च तत्। व्यासजैमिन्योर्गुरुशिष्यभावसम्बन्धनिराकरणार्थं प्रतिपादिता उपयुक्ता विचारा अपि जैमिनेः पूर्ववर्तित्वे साक्षिभूताः सन्ति। न केवलमेतावन्मात्रम्, अन्यत्र यत्रापि व्यासजैमिनी चर्चितौ वेदपारशित्वेन च विशेषितौ। तत्र व्यासात् पूर्वं जैमिनिर्गणितः। व्यासस्य गुरुत्वे पूर्ववर्तित्वे तु जैमिनेः पूर्वं तदीयं नाम स्मृतं स्यात्। पराशरोपपुराणादौ प्रतिपादितं तथ्यमत्र प्रमाणम्—

> "अक्षपादप्रणीते च काणादे साङ्ख्ययोगयोः।
> त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्यैकशरणैर्नृभिः॥
> जैमिनीये च वैयासे विरुद्धोंऽशो न कश्चन।
> श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ॥

किम्बहुना, प्रसङ्गेऽस्मिन्नेतावन्मात्रमेव विवेचनं पर्याप्तम्।

५. जैमिनिः

प्राचीनसाहित्ये नैकप्रकारेण जैमिनिर्निर्दिष्टो वर्तते। क्वचित् स मीमांसागृह्यसूत्रयोः कर्तृत्वेन सामवेदप्रवर्तकत्वेन च निर्दिष्टः, क्वचिच्चाधिकृतो ज्योतिर्वित्त्वेनोऽल्लिखितो वर्तते। क्वचिद् योगाचार्य रूपेण, क्वचिच्च ब्रह्मविद्याविशेषज्ञरूपेण। जैमिनेरियमनेकरूपता तदैक्ये नितरां संशयमुपजनयति। पुराणकाव्यादि प्राचीनसाहित्यातिरिक्तेषु मीमांसासूत्रेष्वपि जैमिनेरभिधानमनेकेषु स्थलेषु गृहीतं वर्तते। तेषु समग्रेषु स्थलेषु यत्र यत्र जैमिनिर्निर्दिष्टो वर्तते तत्र यत्र 'अपि' 'तु' 'च' इत्यादयो अव्ययाः शब्दा योजिता उपलभ्यन्ते। यद्यपि स्वकीयरचनायां निजनामोपादानं भारतीयपरम्परायां नास्त्यनुचितम्, तथापि प्राचीने काले यथाऽद्यत्वे दृश्यते,

---

१. लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्। (शबरभाष्यम् पृ० ३)

स्वनाममुद्रा निक्षेपणाकाङ्क्षा न्यूनाऽऽसीत्। मीमांसा सूत्रेषु (४ सूत्रं[1] ३।१।४) (७ सूत्रं[2] ८।३।३) (४ सूत्रं[3] ६।३।१) (३९ सूत्रं[4] ९।२।११) (७ सूत्रं[5] १२।१।३) एतेषु पञ्चसु स्थलेषु जैमिनेर्निर्देशो वर्तते। एतेषु मध्ये ६।३।१।४ इत्यत्र सन्देहः ९।२।११ सू० ३९ इत्यत्र च विपरीतः सिद्धान्त उपस्थापितो वर्तते। अनेन सूत्रकृज्जैमिन्यपेक्षया एकस्य प्राचीनस्य जैमिनेः सत्तायाः सम्भावना स्वाभाविकी। अनन्तरवर्तिनामाचार्याणां व्याख्यातृणाञ्च साङ्केतिकी दृष्टिरपि तथ्यमिदं पोषयति। आचार्यशबरस्वामिना स्वकीये भाष्ये जैमिने रूपद्वय गृहीतम्। तेन क्वचित् महताऽऽदरेण विशेषणैश्च सह आचार्यरूपेण जैमिनिः स्मृतः क्वचिच्च साधारणरूपेण। यत्र तेनाचार्यरूपेण[6] जैमिनिर्निर्दिश्यते, स एव सूत्रकारः स्यात् तदतिरिक्तो जैमिनिः प्राचीनः स्यात्। यस्तेनाचार्यरहितयाऽभिख्यया[7] निर्दिश्यते। किं बहुना, जैमिनिद्वयस्य स्थितिः सम्भाव्यते। प्रथमो जैमिनिर्यो हि सूत्रेषु स्मृतः प्राचीनो मीमांसकः, नियताः परिपक्वा अपि यस्य विचारा ग्रन्थरूपेण नोपलभ्यन्ते। केचित्तु एतदतिरिक्तमेव जैमिनिं परिकल्पयन्ति। श्री भगवद्दत्तेन वैदिकवाङ्मयस्येतिहासे एषां सर्वेषां जैमिनीनामेकत्व-मेवोदघोषितम्, स च व्यासशिष्य इत्यपि साधितः—

> "सामाखिलं सकलवेदगुरोर्मुनीन्द्राद्—
> व्यासादवाप्य भुवि येन सहस्त्रशाखम्।
> व्यक्तं समस्तमपि सुन्दरगीतराजं
> तं जैमिनिं तलवकारगुरुं नमामि॥

---

१. कर्मण्यपि जैमिनिः फलार्थत्वात्।

२. तदवृत्तिं तु जैमिनिरह्नामप्रत्यक्षत्वात्।

३. कर्मभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषामुपपदे स्यादिति।

४. अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात्।

५. जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्र प्रतिषेधः स्यात्।

६. ३।१।४ इत्यत्र शबरस्वामी "जैमिनिस्तु खल्वाचार्यः।"

७. १।१।१ इत्यत्र शबरस्वामी—"अत उपपन्नं जैमिनिवचनम् आकृतिः शब्दार्थः।"
६।३।१ इत्यत्र शबरस्वामी—"प्रयोगवचनैकत्वादिति जैमिनिराह स्म।"

८. उज्जहारागमाम्भोधेर्यो धर्मामृतमञ्जसा।
न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनिः॥ (जैमिनीयं ब्राह्मणम् हस्तलेखः)

सूत्रकारो जैमिनिः

मीमांसासूत्राणां रचयितुर्भगवतो जैमिनेर्जीवनस्य विषये किञ्चित् प्रामाणिकं वृत्तमस्माभिर्नोपलभ्यते। केवलं विष्णुशर्म्मणस्तद् विषयिकी 'पञ्चतन्त्रे-हस्तिना सम्मर्दनस्य सूचनाऽवश्यं लभ्यते। यथा तस्य व्यक्तिगत जीवन विषये निश्चितः तथ्यलाभोऽसम्भवः, तथैव तस्य कालविषयेऽपि। प्रो० याकोबी महाशयस्य कथनानुसारेण जैमिनेः समयः ख्रिष्टीय द्वितीय शताब्दीतः पूर्वं भवितुं नार्हति, यतः स बादरायणस्य समकालिक आसीत्, नागार्जुनेन प्रवर्तितं शून्यवादं स वेत्ति स्म।

जैमिनिः शून्यवादं जानाति स्मेत्यत्र नास्ति संदेहः। परं केवलेन शून्यवाद विषये साङ्केतिकदृष्टिशालित्वेन जैमिनेः कालस्तथा निर्धारयितुं न शक्यते। प्रो० याकोबी महाशयः क्रिस्तीयद्वितीयशताब्दयामुत्पन्नं नागार्जुनं शून्यवादस्य प्रवर्तकं विदित्वा जैमिनेः समयस्य तदनन्तरं निर्धारणे सम्भवतः कौशलं प्रदर्शयति। विषयेऽस्मिन् 'कर्ममीमांसाख्याया[2] लेखकेन (डा० कीथमहाशयेन) कृतं समर्थनं सम्भवतस्तं प्रोत्साहयति, किन्तु वस्तुस्थितिरीदृशी नास्ति। म० म० गोपीनाथ कविराजानां प्रतिपादनानुसारेण अश्वघोषस्य पालिसाहित्यविदां ग्रन्थेषु च शून्यवाद विषये चर्चोपलभ्यते, ते च नागार्जुनात् पूर्ववर्तिनः इति। अतएव नागार्जुन विषये शून्यवादस्य प्रवर्तक इत्यनुक्त्वा 'प्रचारक' इति कथनं युक्तिसङ्गतं स्यात्। एवं नागार्जुनस्य समयमवलम्ब्य जैमिनेः कालस्य निर्णय औचितीं नावहतीति प्रतीयते।

म०म० डा० उमेशमिश्रा जैमिनेः समय क्रिस्तात् शतद्वयवर्षाणि यावात् पूर्वं निर्धारयन्ति। स्वकीयमिदमभिमतं प्रतिपादयद्भिस्तैरिदमुक्तम्—[3]"जैमिनीय सूत्राणां प्रथमो व्याख्याता 'उपवर्षो' बभूव। यश्च समालोचकपरम्परा पतञ्जलेः पूर्ववर्तिनः साधयति। एवं पतञ्जलेः कालात् पूर्वं उपवर्षस्य तस्माच्च पूर्वं जैमिनेः काल इति विचारो युक्तिसङ्गतः।"

म० म० कुप्पुस्वामिशास्त्रिणां पक्षस्य समर्थनं कुर्वाणैः पूज्यपादैः[4] पट्टाभिरामशास्त्रिवर्यैर्जैमिनेः काल इतोऽपि पूर्वं निर्धारितः। व्याकरणाधिकरणे पूर्वपक्षस्य

---

१. सिंहो व्याकरणस्य कर्त्तुरहरत् प्रणान् प्रियान् पाणिनेः मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्॥ (पञ्चतन्त्रम् मित्रसम्प्राप्तिः ३६)

२. कर्म मीमांसा (पृ० ४, ५)

३. भूमिका, रत्नप्रभा हिन्दी व्याख्या (पृ० २)
विशेषतो द्रष्टव्यम्—डॉ० गङ्गानाथझा महाशयैर्लिखितस्य पूर्वमीमांसादर्शनस्य" (आङ्गलभाषायाम्) परिशिष्टम्।

४. दः मीमांसादर्शनोदयः "पट्टाभिरामशास्त्री।"

"प्रयोगोत्पत्त्यशास्त्रत्वात् शब्देषु न व्यवस्था स्यात्" इति जैमिनीयं सूत्रमिदं तैः स्ववक्तव्यस्य पुष्ट्यर्थं प्रमाणीकृतम्। अनेनैतदवगम्यते यद् जैमिनिः कस्यचित् स्थायिनो व्याकरणस्य सत्तां न वेत्ति स्मेति। यतस्तेन प्रयोगोत्पत्तिरशास्त्रीयेत्युच्यते, तस्या व्यवस्थायै च किमपि नियामकं न स्वीक्रियते। यदि जैमिनेः पूर्वं किमपि प्रामाणिकं व्याकरणमभविष्यत् ततः कथमपि स प्रयोगोत्पत्तिरशास्त्रीयेति नाकथयिष्यत्। नैतावन्मात्रम्, पूर्वपक्षानन्तरं यत्र जैमिनिः सिद्धान्ततया प्रयोगस्य साधुताया असाधुतायाश्च निर्णयस्याधारं निर्दिशति तत्र शब्दशास्त्रस्य नाम न गृह्णाति, केवलमभियुक्तानामुपदेश एव निर्णायकत्वेनोपस्थाप्यते। यस्मात् कालात् व्याकरणस्य नियतं स्वरूपं प्रवर्तितम्, तत एव शब्दसाधुत्वासाधुत्वप्रयोगोत्पत्तिशक्तिग्रहाणां कृते सर्वोत्कृष्टं प्रमाणतया तत् स्वीकृतम्। ततश्च कोशः तत्पश्चात् अभियुक्तोपदेशश्चेति क्रमेणास्मिन् विषये[1] लब्धप्रतिष्ठे भवतः। किन्तु जैमिनिना परम्परेयमुपेक्षिता[2]। इदमेव प्रमाणयति यत् जैमिनेः पूर्वं प्रामाणिकस्य व्याकरणस्य कोशस्यापि च तादृशस्य सत्ता नासीदिति। जैमिनेः समयानुसारमधिकरणमिदं व्याकरणाधिकरणमिति संज्ञामुपलब्धुं नार्हति, किन्त्वनन्तरवर्तिभिर्व्याख्यातृभिराचार्यैश्च व्याकरणस्य सार्वदेशिकेन महत्त्वेन व्यापकेन प्रभावेण प्रभावितैरियमाख्या दत्ता, जैमिनेर्विचाराश्चैतेन सम्बद्धतां नीताः। यथोपरिष्टादुक्तं जैमिनेरनन्तरवर्तिभिर्मीमांसकैरपि साधुताया निर्णये व्याकरणस्मृतिः सर्वतः प्रमुखतां नीता, जैमिनिविषयेऽस्मिन्नौदासीन्यं भेजे। तस्येदमौदासीन्यं वस्तुतस्ततः पूर्वं कस्यापि व्याकरणस्यास्तित्वविषये संशयं जनयति।

व्याकरणस्य यद् वर्तमानं स्वरूपं तस्य प्रवर्तको महर्षिः पाणिनिरस्ति। किन्तु पाणिनिपूर्ववर्तिव्याकरणान्यपि यत्र तत्र निर्दिष्टान्युपलभ्यन्ते किन्तु तेषां व्याकरणस्य व्याकरणस्येव नियामकत्वमद्य तु प्राप्तमस्त्येव नहि। अथ च पुरापि नेतीति जैमिनिवचनेन स्पष्टं भवति। पाणिनिना संस्कृतशब्दसमूहस्तथा नियन्त्रितः यत्तत्र लेशमात्रमप्यव्यवस्थायाः प्रसरो नावतिष्ठते। अतएव पाणिनेरनन्तरं प्रयोगोत्पत्तिः शास्त्रस्य विषयोऽभूत्। एवं तेन प्रवर्तिता नियमाः सर्वैः समानमादृताः। एतावता जैमिनिः पाणिनेः पूर्ववर्तीति सिद्धम्, अन्यथा जैमिनिरपि व्याकरणस्यास्य निर्णायकतया स्वीकारे आपत्तिर्न भवेत्। पाणिनेरतिरिक्तः कश्चन व्याकरणकारः जैमिनेः पूर्वं बभूव इति किमपि निश्चप्रचतया न शक्यते वक्तुम्। परं तेषां प्रयोगानवलोक्य व्यवस्था कल्पयितुं शक्यते। तदाधारेण यदि कस्यापि साधारणस्य व्याकरणस्यास्तित्वं सम्भाव्येत, तथापि तादृशेन व्याकरणेनाधुनिकव्याकरणेनेव तदानीं

---

१. शक्तिग्रहः-व्याकरणोपमान कोशाप्तवाक्याद्व्यवहारतश्च। (साहित्यद)

२. तत्र तत्त्वमभियोगविशेषात् स्यात्। (१।३।६।२७)

प्रामाणिकत्वं प्रमुखत्वं वा नाधिगते आस्ताम् तदाहि न नियामकमासीत्, केवलम-भियुक्तानां प्रयोगानाधारीकृत्य तत् सत्यापनमेव तदीयं कर्त्तव्यं स्यात्। अतएव यदि किमप्यतिरिक्तं व्याकरणं तदा स्याच्चेत् तस्याभियुक्तप्रयोगाश्रितत्वेन प्रामा-णिकत्वस्य नियामकत्वस्य च स्वीकारापेक्षयाऽऽप्तोपदेशस्यैव तत्त्वेन स्वीकारणमधिकं सङ्गतं स्यात्। जैमिनेः सिद्धान्तसूत्रमस्य साक्षिभूतम्।

जैमिनेः[1] कालस्योपरि नयनायापरोऽप्याधारो वर्तते—भट्टकुमारिलाचार्यशङ्करयोः समकालिकत्वं प्रायोऽसन्दिग्धम्। शङ्कराचार्यस्य जीवनचरितेऽस्य स्पष्ट उल्लेखोऽपि वर्तते। शङ्कराचार्यस्य कालविषयेऽप्यनेके मतभेदाः सन्ति—"शङ्कराचार्यस्तत्कामकोटि-पीठश्च" इत्यस्य लेखकेन स्वकीये ग्रन्थे भगवान् लालइन्द्रमहाशयस्याशयं प्रस्तुवता नेपालीयप्राचीनशिलालेखस्याधारेण वृषदेववर्मणः शासनकाले शङ्कराचार्यस्य नेपालयात्रा प्राकाश्यं नीयते। इदमभिधीयते तत् तस्या एव यात्रायाः स्मृत्यर्थं वृषदेववर्मणा स्वपुत्रः 'शङ्करदेव' इत्याख्ययाऽभिहितः। यदीदमक्षरशः सत्यं स्वी-क्रियेत, ततः शङ्कराचार्यस्य कालः ख्रिस्तीयाब्दात्पञ्चशतवर्षेभ्यः पूर्वं वक्तुं शक्यते। यद्येतावद् दूरं नापि गम्यते, ततोऽपि ख्रिस्तीयाब्दसीमातो बहिराचार्यस्य कालनिर्णये कयाऽपि बाधया न भवितव्यम्। एवं स्थितौ शङ्कराचार्यात् पूर्वं कानि-चिद् वर्षाणि भट्टपादस्य, ततः पूर्वं शबरस्य एवं सर्वतः पूर्ववर्तिन आचार्य जैमिनेः समयस्य, न केवलं शताब्दीद्वयं पूर्वं किन्तु न्यूनातिन्यूनं पञ्चशताब्दीतः पूर्वं निश्चये नास्त्यतिशयोक्तिः।

जैमिनीयसूत्राणां शैल्यप्यस्य साक्षिभूता, यस्य विषये आचार्यशबरो वैदिकशब्दानां प्रयोगस्य सम्भावनां व्यनक्ति।[2] न केवलं शैली, जैमिनेर्विषयोऽपीदृशः यस्तस्य अतिशयं प्राचीनत्वं स्पष्टमुद्घोषयति। यागस्य विषये जैमिनीयदर्शनस्याधि-करणानां जालमास्तीर्णमस्ति। तस्य सम्पूर्णानि सूत्राणि तदाश्रितानि। उदाहरणाय गृह्यताम् वैदिका विषया ये जैमिनेराधारभूतास्तेषां तदानीन्तने काले व्यापकस्य प्रसारस्य सूचना लभ्यते। साधारणो जनो विषयानिमान् जानाति स्म, एतेषु चर्चाऽऽव-श्यकीति मनुते स्म, अतएव महर्षेर्जैमिनेरितः प्रवृत्तिः सञ्जाता। अनेनैतादृशः समयः कियद्दूरे स्यादित्यनुमाने विधीयमाने जैमिनेर्यः कालः पञ्चशताब्दीतः पूर्वं निर्धारितः स नास्त्यसङ्गत इति प्रतीयते। श्रीभगवद्दत्तो 'वैदिकवाङ्मयस्य रहस्ये' जैमिनिं महाभारतकालिकं प्रमाणी करोति।

---

१. "मीमांसादर्शनोदयः" (आचार्य पट्टाभिरामशास्त्री)

२. लोकेयेष्वर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् (शबरभाष्यम्, पूना सं० पृ० १)

पाणिनेर्व्यासस्य च समयं यावत् विद्वांसो विषयेभ्य एतेभ्यः परमंशतः पराङ्मुखतामापेदिरे। अतएव पाणिनिना लौकिकः शब्दजालः प्रामुख्येन विषयतां नीतः। ब्रह्मविद्या तदानीं न किचिन्महत्त्वपूर्णं स्थानमभजत्। यदि यत्किञ्चिदप्यस्तित्वमासीत् तदपि केवलमेतावन्मात्रं यद् दीपकवत् कस्मिन्नपि कोणे प्रज्वलत् स्यात्। यज्ञाग्नेः प्रबले प्रकाशे न कश्चित्तत आकर्षणमनुबभूव। सर्वेऽप्यमी विचारा जैमिनेः पूर्वत्वनिर्धारणाय पर्याप्ताः।

सफलो ग्रन्थकारः

अस्मिन् हि मीमांसाविचारसागरे जैमिनेरनेकरूपत्वमस्माभिरुपलभ्यते। सर्वतः प्रथमं सूत्रकृद् रूपेण सोऽस्माभिर्गृह्यते। वस्तुतः[१] सूत्रस्याभिप्रायो वर्तते संक्षेपः। एवमल्पाल्पैः शब्दैर्गम्भीराद् गम्भीरतरविषयाणां प्रकाशनं सूत्रप्रणाल्या करणं वैशिष्ट्यमावहति स्म। अस्माकं बौद्धिकविकासयुगस्य प्रारम्भत एवानेकान् संवत्सरान् यावत् परम्परायेमादृता बभूव। अतएव जैमिनिस्तया प्रभावित इति नास्ति नवीनं किञ्चित्। जैमिनिना परम्परेयं कुत उपलब्धेत्यस्मिन् विषये किमपि प्रमाणिकं तथ्यं केनाप्युपस्थापयितुं न शक्यम्। तथापि तेनास्यां दिशि तावत्तु नैव, यावत् यथा पाणिनिनोपलब्धा। परं साफल्यमवश्यमुपलब्धम्। प्रायशो जैमिनीयानि सूत्राणि संक्षिप्तानि तथापि तेष्विदमस्ति वैशिष्ट्यं यत् तानि सुगमान्यपि सन्तीति। पाणिनीयेषु सूत्रेषु प्रत्येकं मात्राया[२] अपि सार्थकत्वं यथा प्रसिद्धम्, तथा जैमिनीयेषु सूत्रेष्वस्तीत्यधिकारेण न शक्यते वक्तुम्। परमेतच्छक्यते वक्तुं यत् तानि पाणिनीय सूत्रापेक्षया सरलानि सन्ति। यथा पाणिनीयसूत्राणां व्याख्यायां शब्दशास्त्रस्यानेके भागाः संलग्नाः सन्ति, न तथा जैमिनीयेषु सूत्रेषु। जैमिनेरेतद्वैशिष्ट्यं प्रकटयताऽऽचार्यशबरस्वामिना तस्य व्यावहारिकता[३] साधिकारमभिव्यञ्जिता। निर्दिशति च यत् शब्दाडम्बरो जैमिनेरुद्देश्यं नासीत्। सूत्राणामर्थचिन्तन एवातिशयं विचारकाणां समयो यापितः स्यात्, प्रमुखं विषयं यावत्ते नाधिगच्छेयुरिति नासीद् जैमिनेर्मनीषितम्। अत एव जैमिनीयानि सूत्राण्यधिकं विस्तृतानि यदानर्थक्यदोषोऽपि (अनेकेषां शब्दानां विषयप्राधान्येन), सम्भावयितुं शक्यते। एकस्यैव सूत्रस्यानेकेषु

---

१. वेदः—असूत्रः पूर्वपक्षः

अ—तेन चैकदेशः सूच्यत इति सूत्रम् (शबरस्वामी पूना सं० २ पृ०)

आ—अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

२. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः। परिभाषेन्दुशेखरः)

३. एवं वेदवाक्यान्येवैभिर्व्याख्यायन्ते, इतरथा वेदवाक्यानि व्याख्येयानि, स्वपदार्थाश्च व्याख्येया इति प्रयत्नगौरवं प्रसज्येत। (शाबरभाष्यम् पृ० २ पूना)

[1]स्थलेष्वावृत्तिरपि दृश्यते। प्रकरणानुसारं तदर्थेष्वन्तरमित्यतिरिक्तं वचः। एतामेव स्पष्टतामुद्घोषयताऽऽचार्य शबरेणोक्तं यदेष्वध्याहारानुवृत्यादीनां [2]कृते नास्ति विशेषावकाशः येनार्थबोधे काठिन्यमापतेत्। न च क्वचन पारिभाषिकशब्दानां प्रयोगेण तेषु क्लिष्टत्वमनुभूयते। वैशिष्ट्यान्येतान्याश्रित्य जैमिनिः सफलो ग्रन्थकार इत्यत्र केनापि मनीषिणा संशयशीलेन न भवितव्यम्।

सत्स्वप्येतेषु जैमिनिना सूत्राणां क्षेत्रे पाणिनिवत् साफल्यं नाधिगतमिति पूर्वं प्रतिपादितम्। किन्तु तेषां व्यावहारित्वं सुगमत्वञ्चावश्यमेव वैशिष्ट्यं बिभृतः येन परवर्तिनी परम्पराऽधिगतप्रभावा सञ्जाता। आचार्यभट्टेन स्वकीये श्लोकवार्तिके[3] चर्चा कृता, जैमिनये च सुस्पष्टं प्रयोगानभिलक्ष्य श्रद्धा प्रकटीकृता।

महानुपकारकः

जैमिनीयस्य शास्त्रस्य प्रवृत्तेरुद्देश्यं वस्तुतो लोककल्याणस्य भावनाऽस्ति। यद्यप्यद्यत्वे तस्य विषयः केवलं पुस्तकस्था सम्पदस्ति, किन्तु तदानीमेवं व्यापक आसीद् यन्निस्सङ्कोचं सार्वजनिकं वक्तुं शक्यते। विंशतिशताब्द्यां तस्य लोकोपयोगितायां संशयः कर्त्तुं शक्येतापि, किन्तु तदीयस्य तात्कालिकस्य चित्रस्य कल्पनां कृत्वाऽस्माभिर्दृश्येत यत् तदीयं कीदृशं महत्वमासीदिति ? न केवलमुपयोगिमात्रमासीत्, परं जीवनस्य सर्वस्वभूतश्चासीत्। जनसाधारणस्य श्रेयोभिः सम्बद्धे धर्मसदृशे वस्तुनि जैमिनिना विचाराः कृताः। जैमिनेरमी विचाराः कियतीं श्रेयस्करतामवापुरिति भारतीयेतिहासस्य पृष्ठेषु प्रतिपादितम्। येनास्माकं दैनिकस्य जीवनस्य घनीभूतः सम्बन्ध आसीत् तद् विषये [4]संशयोत्पत्तिः दौर्भाग्यमतिरिच्य किमिव वक्तव्यम्। इतस्ततस्त्यैराघातैरेतावन्मात्रं जनसामान्येन कैवल्यमनुभूतं यद् नियते पथि स्थितिर्दुःशका समभूत्। तस्मिन् सङ्क्रमणकाले यदा जनसामान्यस्य चित्तवृत्तिः धर्मसदृशे जीवनीयशक्तिस्वरूपेऽनियता सती विकीर्णाऽऽसीत् तदानीं पथप्रदर्शनाय महनीयं कार्यं महर्षिणा जैमिनिना कृतम्। तदपि न कयाचिन्निकृष्टया स्वार्थमूलया भावनया, परं लोककल्याणभावनयैव। अनेन जैमिनेर्व्यक्तिगतं जीवनमस्माभिः अनुमातुं शक्यते यत् तत् कियदिवोच्चादर्श-गुणसम्पन्नमासी-

---

१. लिङ्गदर्शनाच्च (त्रिंशद्वारम्) तथा चान्यार्थदर्शनम्। (चतुर्विंशतिवारम्)

२. नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा (पृ० २) शाबरभाष्यम्।

३. सर्वव्याख्यामुपालम्भे प्रत्याख्यानं तथाऽपरे।
परिसंख्यास्तुती केचिदथशब्दस्य दूषणम्॥ (श्लो० वा० १।१।१। ३६.२७)

४. धर्मं प्रति विप्रतिपन्ना बहुविदः केचिदन्यं धर्ममाहुः केचिदन्यम् (शबरः) पृ० १०

न्यायालयान् (अधिकरणानि) प्रवर्तयन्ति, सर्वांश्चैकसूत्रबद्धान् शृंखलितांश्च कर्तुं प्रभवति। इमे न्यायालया अप्याधुनिकन्यायालया इव प्रभावहीना न सन्ति, किन्त्वेतेषां प्रभावो वाङ्मयस्य प्रत्येकं पृष्ठेऽङ्कितः स्वर्णाक्षरैः। तैः प्रदत्ता निर्णया महत्त्वपूर्णाः पक्षपातरहिताश्चेति कृत्वा न्यायेति नाम्नोद्घोषिताः। तेषां गुरुत्वञ्च जैमिन्यनन्तरवर्तिना एकैकेन मान्येन ग्रन्थकर्त्रा सादरं शिरसि धृतम्।

एवमस्मिन् क्षेत्रे जैमिनिनाऽनेकानि वर्षाणि यावत् न केवलं कर्मजालस्य परं वाङ्मयस्य सर्वेषामङ्गानां नियमनगौरवमधिगतम्। स खलु सफलो नियन्ता, तस्येदं शासनं वस्तुतो न न्यूनमेकतन्त्राद् इति शक्यते वक्तुम्। अनेन विवेचनेन यथा जैमिनिर्योग्यो नियामकः सिद्ध्यति तथैव विधानविशेषज्ञोऽपि प्रसिद्ध्यति। हिन्दूविधिराजशास्त्रादिविषयस्याध्येतारो जानन्त्येव यत् तदीयं प्रत्येकं पृष्ठमेव जैमिनेर्निर्णयैरोतप्रोतमस्ति। विषयास्य विस्तरेण विवेचनमन्यत्र प्रकरणे करिष्यते।

आधुनिकनवपरम्परायामधिगतशिक्षा युवानोऽस्माकं प्राचीनेषु शास्त्रेषु तथ्येषु च 'अन्धपरम्परेति' "अन्धविश्वासोऽयमि" तीत्येवमारोपयन्ति। जैमिनिस्तु बहोः कालात्पूर्वमेवायतौ लोका एवमाक्षिपेयुरिति जानाति स्म। अत एव तेन सर्वतः प्रथममयमन्धविश्वास एव निराकृतः। लोकास्त्वनेन कारणेन वेदानामुत्कृष्टत्वमङ्गीचक्रुः, यत इमे वेदा अविच्छिन्नपरम्परया प्राप्ता इति। तदिदं जैमिनिः परीक्षापूर्वकं साधयामास यद् वेदाः प्रमाण्यमिति। वेदप्रमाण्यवादिनो महत्त्वदर्शिनो वा न तस्मिन् दयाभावेन परं यावत् तस्मै महत्वं दीयते ततोऽप्यधिकं स गुणानामाकर इति। तस्यानेकेषामङ्गानां सार्थकत्वं खण्डशो जैमिनिना विश्लेषितम्, तदुपयोगित्वञ्च साधितम्। तदपि नान्धविश्वासबलेन, न वा हठेन परंच समीक्षाया बलेनैव।

इयमेव स्थितिर्धर्मस्य विषयेऽस्ति। यत्र धर्मविषये तेन वेदः केवलं प्रमाणरूपेणाङ्गीकृतस्तत्र प्रथममेव चिन्तितं तेन यन्मया कश्चन हठोऽथवाग्रहो वा न विधीयते। एवं चिन्तायाम् उपस्थितायामेव स वदति—"केवलं मयोक्तमिति अथवा परम्परा मन्यते, अन्येन केनचिन्महापुरुषेण निर्दिष्टम्," इति कृत्वैव त्वयैतन्न स्वीकर्त्तव्यम् किन्तु तन्निमित्तं प्रथमं परीक्षणीयम्,[१] तस्य योग्यता द्रष्टव्या, तस्योपयोगित्वञ्च विचारणीयम्। इदं खलु तस्यैव (जैमिनेः) समीक्षायाः सामर्थ्यम्, येन सा (समीक्षा) सर्वशिरोधार्यं ज्ञानराशिं वेदमपि स्वकीयनिकषपाषाणे कषणस्य विषयीकर्तुं समर्था अलौकिकं वस्तु धर्ममपि लोकेन सम्बद्धं बलवत्तया प्रयतते इति। यदीत्थमस्ति तर्हि मीमांसा पुरोहितानां जीविकारक्षणसाधनभूता अन्ध-

---

१. तस्य निमित्तपरीष्टिः जैमिनिः १।१।३

विश्वासानामाकर इति च कथनं कथंकारं संगतम् ? जैमिनिना स्वशास्त्रजालस्य प्रस्तावात् पूर्वमेव ते समाहूताः। अत एव स जैमिनिः सर्वथा श्रेष्ठः समीक्षक इति निश्चप्रचम्।

उदारः समन्वयवादी

जगतः स्वरूपद्वयम् आध्यात्मिकं भौतिकञ्च। तत्र प्रथमं सुष्ठुपरीक्षणीयम् ततश्च कोऽपि सिद्धान्तः स्थिरी करणीय इति अस्माकं भारतीयापरम्परा भौतिकत्वापेक्षयाऽऽध्यामिकत्वं सततं प्रधान्येन प्रतिष्ठापयति। परम्पराया अस्या निर्वाहार्थमस्माभिः कियन्त्येव नवानि तथ्यानि स्वीकृतानीति स्यान्नाम। दृश्यादृश्ययोर्जगतोरदृश्यमेव जगद्वयं महीय इति मन्यामहे। दृश्यस्य जगतः सा दशा याऽस्माकं प्रत्यक्षगोक्षरा उपेक्षिता च। इदं कियदवधिव्यावहारिकमिति प्रश्नः समस्यायते न केवलमद्यत्वे, परमनादेरेव कालात्, यतो विचाराणां विकासस्यारम्भः समजनि तस्यादेव जागर्ति। एतावत्त्ववश्यमेव स्वीकार्यम् यत् विंश शताब्द्याः परिस्थित्या एषा समस्या प्रबलतरतां नीतेति। यथा मानवजीवनं दृश्यादृश्ययोः सङ्घर्षस्यालेखो वर्तते तथैवास्माकं दर्शनस्य विविधा धारा अस्मादेव सङ्घर्षान्निर्गताः। तासां प्रवृत्तेश्चैक एष एव आधार आसीत्। द्वयोरप्यनयोर्विचारभेदयोः क्वचिद् दृश्यप्रधानं सदुपतिष्ठति, क्वचिच्चादृश्यम्। एतयोरेकस्य प्राधान्यमन्यत् अभिभूयात्मानं प्रतिष्ठापयितुं प्रभवति। अतएवास्माकं दर्शनानि खण्डनमण्डनानामाकरभूतानि सञ्जातानि। आस्तामस्माकं काचिद् दृष्टिः। तथा विमर्शे कृते एतदेव ज्ञातं भवति यद् द्वयोर्महत्त्वे उपयोगितायाञ्च संशयो न सरलः पन्थाः। तर्काणां जालेन वयं किमप्येकं खण्डयितुम् शक्नुमः, परं लोक एतदर्थमस्मान् सहयोगं साहाय्यं वा कृत्वा नानुगृह्णाति।

महर्षेर्जैमिनेः समक्षमपीयं समस्योपस्थिताऽऽसीत्। तेन तस्याः तथा समाधानं कृतं यथा मन्ये न केनापि कृतम्। अत एव सोऽस्माभिरद्यैवं स्मर्यते। दृष्टादृष्टे इमे प्रायशो यथार्थादर्शयोः स्वरूपे। यथार्थम् आदर्शं विना नोत्तिष्ठते। आदर्शश्च यथार्थं विना स्थिरो भवितुं नार्हति। औन्नत्यमधिगन्तुं यथार्थमादर्शमपेक्षते, आत्मनः पदं स्थिरयितुं आदर्शोऽपि यथार्थसापेक्षः। एकं विनाऽन्यस्यापूर्णत्वम्। एवमेव दृष्टस्यादृष्टं लक्ष्यभूतं प्राप्तिस्थलम् दृष्टमदृष्टस्य च पृष्ठभूमिः। अनेन तर्कव्यवहारयोः उभयोः समन्वयः स्थापितो भवति। जैमिनिना स्वकीये दर्शनेऽप्येवं पक्षोऽङ्गीकृतः। अत एव स समन्वयवादिषु परिगण्यते। किन्तु यस्यायं समन्वयोऽपि केनचिद् वैशिष्ट्येन संवलितः नूतनया पद्धत्या कृत इवास्ते।

यथा यथार्थादर्शयोः समन्वये सत्यपि यथार्थत्वम् स्वतन्त्रेणास्तित्वेन सह वर्तितुं शक्नोति, तस्य कृते आदर्शोन्मुखत्वमनिवार्यम् तथैव जैमिनेर्दृष्टमप्यदृष्टस्य

समक्षं नम्री भवितुमेवागत्य तिष्ठति । अस्य महत्त्वं नास्तीति नास्याभिप्रायः । प्रत्यक्ष-परोक्षयोः फलयोर्जैमिनिना तदनुयायिभिश्च परोक्षापेक्षया प्रत्यक्षमधिकं गौरवास्पदं स्वीकृतम् । अनेन तस्य व्यवहारकौशलस्य परिचयेन सह दृष्टप्रियताया लोक-प्रियताया अपि परिचय उपलभ्यते । व्यासदर्शनस्य प्रौढिया विश्वस्मिन् जगति प्रसिद्धोऽस्ति । अदृष्टमेव जगत् तदाधारभूतम् । किन्तु पर्यन्ते तेनाप्यस्य व्यवहारस्य निष्पत्तये विवशेन व्यावहारिकी सत्ताऽङ्गीकृता । जैमिनिना प्रथममस्मिन् विषये गम्भीरतया विचारः कृतः । अत एव तस्य दर्शने समस्येयं तथा कथितोग्रतां नाधिगतवती ।

जैमिनेरनयैव समन्वयवादितया तस्य शास्त्रं लोकवेदयोः समानरूपेण गौरव-मधिगतम् । यत्र तद् दृष्टस्य महत्त्वमङ्गीकरोति तत्र दृश्यं जगदतिशयेन प्रभावयति, यत्र चादृश्यविषयः प्रश्नः । अत एव मीमांसाऽस्माभिरदृष्टाश्रितेति यथा मन्यते तथैव तस्यादृष्टस्य पृष्ठभूमिरूपेण दृष्टमप्यवस्थितमित्यपि स्वीक्रियते । द्वयोः समन्वयमेवा-श्रित्य संसारोऽयमवतिष्ठते, जैमिनेरस्यां समन्वयवादितायामेव मीमांसाशास्त्रस्य लोक-शास्त्रोभयमान्यता निर्भरा वर्तते ।

महान् आस्तिकः

जैमिनिविषये तद्दर्शनविषये च महान् आक्षेपः आस्तिकतामधिकृत्य क्रियते । पौराणिकेन युगेन परिचालिता इमेऽनेके सम्प्रदाया स्वीयास्तिकतायां गर्वमनु-भवति । तस्यां चास्माकं परम्पराप्राप्तं स्वामित्वमिति स्वाधिकारमुद्घोषयन्ति । देवानां मूर्तिमत्त्वं पौराणिककालस्य प्रमुखमवदानम् । तत एवास्तिकताया अपि निर्धारणं तेनैव मानदण्डेन प्रावर्तत । ईश्वरः खलु सर्वशक्तिसम्पन्नतायाः प्रतीक-रूपेण पुराणैः साकारतया प्रतिपादितः, तत्प्रभावोऽयमभूद् यद् येनेश्वरोऽङ्गीकृतः स आस्तिक इत्यभिहितः । येन स स्वशास्त्रे न वर्णितः, स नास्तिक इत्युक्तः । ईश्वरस्य विषये महर्षिजैमिनेर्मन्तव्यं किमित्यग्रे स्पष्टं भविष्यति, परमेतन्निश्चितं यज्जैमिनिना विषयेऽस्मिन् काऽपि स्पष्टनीतिर्न घोषिता । तस्यानेनैव मौनेन हेतुना कल्पितं जनैः यज्जैमिनिरनीश्वरवादी अत एव च नास्तिकः इति ।

किन्त्वास्तिकतायाः स्वरूप निर्धारणकारैरत्र किञ्चिदौदार्यं न प्रदर्शितम् । अनेन तेषा सङ्कुचितत्वमेव चित्तवृत्तेः परिचीयते । वस्तुत आस्तिकताया उपपत्तये इश्वरस्य सेत्तैव न कारेणम् । यद्यस्माभिः सैव तस्याधारत्वेन स्वीक्रियेत तर्हि वस्तुतः सत्येनान्यायः क्रियेत । केवलं महता पक्षपातेनास्तिकताया महत्त्वं व्याहन्यते, स्वकीयं हठधर्मित्वं च ख्याप्यते । कस्यचिच्छक्तिविशेषस्य माहात्म्याधिष्ठानस्वीकारापेक्षया सिद्धान्तस्य प्रतिष्ठार्पणमधिकं श्रेयः"। इत्थं पूर्वोक्तमतानुसारेण तैर्ये वेदान् ईश्वरस्य रचना मन्यन्ते,

आस्तितताया निर्धारणाधारपरीक्षणनिकषो नेश्वरः, किन्तु वेदा एवेति मन्तव्यम्। अयमेव स्वीकारः श्रेयस्करोऽपि। तेषामस्मिन् पक्षे स्वीयास्तित्वरक्षया सहातिशयौदार्यस्यापि परिचयो लभ्यते। तथ्यमिदमुपर्युक्ततथ्यापेक्षया व्यापकतरम्, अत एव सांख्यवैशेषिकमीमांसादर्शनानामास्तिकदर्शनेषु गणना वर्तते। अन्यथाऽस्माकं षट्सु ज्ञानधारासु तिसृणां सहयोगोऽस्माभिर्लब्धुं शक्येत। यत एतास्वेका परम्पराऽऽसीत् यत्र तासां प्रथमा लहरी ईश्वरविषये आश्रितमौनवृत्तिरिवावलम्बितकिञ्चिदौदासीन्यमेवासीत्। साङ्ख्यं तु विषयेऽस्मिन् मूकीभूतम् किन्तु योगोऽलौकिकीं शक्तिमङ्गीकरोति। अतएव साङ्ख्यमस्माभिर्निरीश्वरसाङ्ख्यमिति योगश्च सेश्वरसाङ्ख्यमित्याख्याभ्यां व्यपदिश्येते। वैशेषिकं पूर्वमीमांसा चेश्वरविषये यावतीं निरपेक्षतां प्रकटीकुरुतः न्यायवेदान्तदर्शने चास्मिन् क्षेत्रे तावतीमेव सापेक्षतां सचेष्टताञ्चाङ्गीकुरुतः। एवमस्माभिर्विचारणीयं यद् यदीश्वर एवास्तिकत्वस्य निकषः क्रियेत कियदेकदेशीयत्वं लभ्येतेति। यदि सकला उक्ताः प्रणालीरेकीकर्तुमिष्यते तर्हि स्वीया दृष्टिर्व्यापिका कार्या। एतावत्या सङ्कुचितया वृत्त्या वयमेतावद् विस्तृतं कार्यं कर्त्तुं न शक्नुमः। प्रतिपादितानि तथ्यान्याश्रित्य सर्वा एताः प्रणाल्यो वेद ईश्वरनिर्मितो न वेति विषये मिथो विवदमाना अपि वेदस्य महत्त्वविषये प्रामाण्यविषये च सन्देहं प्रकटीकर्तुं न प्रायतन्त नवा कयापि तास्वेकयापि तथा कर्तुं दुःसाहसं विहितम्। सर्वसम्मतमिमं प्रकारं स्वीकृत्यैव सर्वसम्मतं मन्तव्यमुपस्थापयितुं शक्यतेऽस्माभिः। अन्यथा क्षेत्रेऽस्मिन् यावत्येकदेशीयताऽङ्गीकरिष्यते तावन्मात्रमेव सीमितैः भूत्वा वर्तितव्यम्। अत एव वेदानां माहात्म्यस्य तत्प्रामाण्यस्य चाङ्गीकार एवास्तिकतायाः सर्वमान्यो निकषः।

शब्दशास्त्रस्याचार्यः पाणिनिरपि विवेचनेनानेनांशतोऽवश्यं सहमतः। व्यक्तिप्राधान्याङ्गीकारापेक्षया सिद्धान्तप्रतिष्ठाऽनिवार्येति तस्य पक्षः। तन्मते दैवमेवास्तिकताया नियामकम्। लोके दैवमिदं भाग्यरूपेण व्यवह्रियते। वस्तुतो दैवमिदमदृष्टातिरिक्तं न किञ्चित्।[1] स्वपूर्वजन्मनां कर्मभिर्यत् किञ्चित् सञ्चीयतेऽस्माभिः, सैवादृष्टसम्पद् दैवरूपेणाग्रेऽग्रे जन्मनि समुपलभ्यते। अस्य पूर्वजन्मनः परलोकस्य वा स्वीकृतावेव दैवस्य सत्ताऽन्तर्हिता, अत एव भाग्यस्य परलोकस्य सत्ता न किञ्चित् पृथग् वस्तु। अयमेव[2] पाणिनिमते आस्तिकताया नास्तिकताया वा प्रकारः। लोकोऽपि तावदेवमेव स्वीकुर्वन्नास्ते। पाणिनेः पक्षोऽपि वेदमेवाश्रितः। अतएवोपर्युक्ते तथ्ये न कश्चिदाक्षेप आघातो वाऽनेन भवितुमर्हति। अयं सिद्धान्तः तथ्यमिदञ्च तथा सर्वसम्मतं संशयहीनञ्च वर्तते यदस्मिन्नेव पुराणानां स्मृतीनां दर्शनानां च मूलानि दृढीभूतानि। अत एवास्य व्यापकतायां हठवादस्य सङ्कुचिततायाश्च विलयो भवति। निकषस्यास्य सर्वग्राह्यता

१. पूर्वजन्म कृतं कर्म तद् दैवमिति कथ्यते। (हितोपदेशः)
२. अस्ति नास्ति दिष्टं मतिः (पाणिनिसूत्रम्) 4-4-60

वेदेन पर्याप्त पोषिता समर्थिता च । आचार्येण[1] मनुनाऽप्यत एव वेदनिन्दको नास्तिक इत्युक्तः, न चेश्वर विषये मौनावलम्बित्वं नास्तिकत्वमिति तेनोद्घोषितम् ।

वेदो वा नियामकत्वेनास्माभिः कल्प्यताम्, दैवं वा, जैमिनेरास्तिकता कथमपि निराकर्त्तुं न शक्यते। वेदविषयकचर्चायां समुपस्थितायां स्वप्रतिपाद्य विषयो (धर्मः) केवलं वेदाश्रित इति मत्वा जैमिनिना प्रमाणस्य समग्रेषूपकरणेषु वेदो निरपेक्षं परमं प्रमाणमिति घोषितम्। एवं तेन स्वीयाऽगाधाऽऽस्थाऽतिशया च श्रद्धा मूर्ततया तत्र दर्शिता वेदानामेकैकभागस्यापि रक्षणार्थं सदाऽऽत्मानमपि समर्पयितुमुद्यतः प्रतीयते जैमिनिः । तस्यैकमपि वाक्यं निरर्थकमिति कथने मृत्योरप्यधिकं कष्टकरमपमानमात्मनोऽनुभवति सः । तेन निर्मितं सम्पूर्णमपि शास्त्रं वेदस्य परिखैव । या तान् विविधेभ्य आघातेभ्यः पाति । एवं वेदस्य महत्त्वं निरपेक्षञ्च प्रमाणत्वं यद्यस्माभिरास्तिकताया निकषरूपेण कल्प्येत तर्हि कोऽसौ सरस्वत्यास्तनयः स्यात् यो जैमिनेरास्तिकतायां सन्दिहीत। अतोऽत्रविषये सर्वैरेव जैमिनेरुत्कर्षः (अन्यापेक्षया) अङ्गीकार्यः। प्रतिपादितमिदं यत् वेदानां रक्षाकार्यं भारतीयेषु येन सर्वाधिकतया सम्पादितं स केवलं जैमिनिरिति । तद्रचितागमस्य वेदैः साक्षात् सम्बन्धः । अत एव वेद संरक्षको जैमिनिरिति कथने न काऽपि बाधा ।

अन्यो मानदण्डः क इति प्रश्नस्यापि यदुत्तरं तदपि वेदाभिन्नमेव। जैमिनौ च तदीयां सत्तां गवेषयित्वा अलम् स्यात् ? जैमिनिस्तस्य प्रथमः श्रेष्ठो वा प्रवर्तको नास्ति चेत् मास्तु, परं प्रचारकस्तु अवश्यमेव । अदृष्टेन सह मीमांसायाः कियदवधिकः सम्बन्ध इति प्रथमे स्तम्भ एव प्रतिपादितम् । पुनश्च दैवास्तित्वाश्रिता जैमिनेरास्तिकता स्पष्टा । तस्याः प्रतिपादनं सूर्याय दीपप्रदर्शनमिव प्रतिभाति । एवं यद्यस्माभिः सकलान्यप्येतानि प्रामाणिकानि शाश्वतानि च तथ्यान्याश्रित्य जैमिनिर्महान् सर्वोत्कृष्ट आस्तिक इत्युच्यते तर्हि कोऽन्यायःक्रियते ? तस्यास्तिकतायामन्धविश्वासस्य कृते लेशमात्रमपि नास्त्यवकाशः ।

आदर्शपरम्परापालकः

समीक्षां परीक्षां चाङ्गीकृत्यापि जैमिनिना कस्याश्चित् परम्परायामाघातो न कृतः। यथाऽऽधुनिका युवानो मार्गे गच्छन्तः पुराणानि स्मृतीराचारादीन् झटिति निरर्थकानीमानीति समाक्षिपन्ति । न खलु तैस्तेषां गन्धोऽप्याघ्रायि तथाप्याक्षिपन्ति । न तथा कृतं जैमिनिना। यथा पूर्वं प्रतिपादितम्—जैमिनिरन्धपरम्पराया अनुगामी नासीत्। नैतस्याभिप्रायोऽस्ति यत्तेन परम्परामात्रमप्रमाणमिति अनुपयुक्तमिति वा

---

१. नास्तिको वेदनिन्दकः (मनुस्मृति २।१०)

प्रसाधितम् । स हि समालोचकः । न च तस्य समालोचना कामपि हठबुद्धिं प्रकटयति समालोचकस्येदमावश्यकम्-यत् समालोच्य विषयाभिज्ञतया सह तत्र श्रद्धातिशयाभावेऽपि अन्ततस्तत्र सहानुभूतिन्तु स कुर्यादिति । याः प्राचीनपरम्परा जैमिनिनाऽऽदर्शतया गृहीताः तत्रेदं वैशिष्ट्यं यत् स आदर्शो याथार्थ्येन संवलितः प्रकाशित इति ।

परम्पराः स्वीकुर्वन् जैमिनिस्ता एकेन सूत्रेण बध्वा नेतुं प्रयतत इति प्रथमं वैशिष्ट्यम् । तस्य निरतिशयं प्रामाण्यं वेदतः प्रारब्धं सत् क्रमेण विध्यर्थवादमन्त्रनामधेय स्मृत्याचारकल्पसूत्राणि यावत् सङ्क्रामति एतत् सर्वं प्रमाणम्, साक्षात् परम्परया वा वेदेन सम्बद्धत्वात् । एतत् सर्वं संबद्धं कृत्वा जैमिनिनाऽस्यां दिशि नवीनः पन्था निर्मित इत्यत्र नास्ति सन्देहः । अनेन तस्य परम्परापालकत्वं प्रतीयत एव, तेन सह परम्परानिर्मातृत्वरूपेणापि जैमिनिः परिलक्ष्यते ।

वेदप्रामाण्यसिध्यनन्तरं स्मृतीनां[1] प्रामाण्यप्रश्ने समुपस्थिते, जैमिनिः तेषां महापुरुषाणां कृतीः सादरं स्मरति । ऐतेषा महामनसामुक्तयो मौलिकमाधारं विना न प्रवृत्ता भवेयुरिति तदीयमभिधानम् । अवश्यमेव तासां येन केनाप्याधारेण भाव्यम् । स चाधारो वेदशाखास्वनेकासूपलभ्यते अनुपलम्भेऽपि वा वेदवाक्यान्यनुमाय प्रामाण्यमस्माभिर्मन्यते । अनेन प्रतीयते यत् जैमिनिना महामनस्सु तेषु श्रद्धामभिव्यज्य स्वीयौदार्यं गुणग्राहित्वञ्च प्रदर्शितम् ।

एवमितरो गम्भीरः प्रश्न आचाराणां प्रामाण्यविषये वर्तते । अद्यत्वे विशिष्यैवमुच्यते लोके यद् आचाराः खलु प्रवञ्चनामात्रमिति । जैमिनेः समक्षमपि समस्येयं न तथोग्ररूपाऽऽसीत् किन्त्वाशङ्कारूपेण सम्भावनारूपेण वा प्रकटीभूता, तेन पूर्वमेवाद्यत्वे वर्तमानस्यान्धकारस्य कल्पना कृता, अत एव तादृशा मुनयो दूरदर्शिन इत्युच्यन्ते। जैमिनिनोक्तम्[2] अस्माकमेतासां परम्पराणां प्रवर्तका इमेऽस्मदपेक्षयाऽधिकं विज्ञा आसन् । पुनर्विना निमित्तमिमे प्रवृत्ताः कथमिव स्युः ? केनापि निमित्तेनेमे सञ्चालिताः। यदि अद्यत्वे वयं केनापि कारणेन तन्निमित्तं परिज्ञातुमशक्तास्तत्र कस्य दोषः ? अतोऽस्मद्गौरवरक्षायै सादरमासां पालनं कर्त्तव्यम् ।

न केवलमेतावदेव, तैराचाराः सार्वजनिकाः सार्वदेशिका इति कथनं सङ्कोचं न बिभर्ति । एकस्मिन्नधिकरणे जैमिनिना निर्दिष्टम् यत् कतिपय आचारा देशस्य

१. धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् १।३।१।१
अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् ॥

२. शास्त्रपरिमाणत्वात (३१।४।६)

दक्षिणस्यां दिशि प्रचलिताः सन्ति नोत्तरस्याम्। कतिपय उत्तरस्यां न हि दक्षिणस्याम्। एतेषां मान्यतायाः प्रश्ने समुपस्थिते तैर्निर्णयः प्रस्तूयते यत् यदि वयमेकेन वेदेन शासितास्स्मः तर्हि कथमिवास्माकं विभिन्नेषु भूभागेषु प्रचलिताः पद्धतयोऽस्मत्कृते न मान्याः[1] स्युरिति ? अद्यत्वे वयं सहयोगमवलम्बामहे, देशस्य समग्रस्य प्रश्नानामाचाराणां राष्ट्रियकरणस्य च स्वप्नं पश्यामः। जैमिनेरस्मिन्नधिकरणे दृष्टिर्दीयेत चेत् विदितं स्यात् यत् स कियन्मात्रमग्रे गत आसीदिति। समग्राणामाचाराणां राष्ट्रीकरणस्य कियदुचितं साधनं जैमिनिना घोषितम्, समग्रेऽपि देशे सांस्कृतिकैकत्वस्यावश्यकत्वञ्च समर्थितम्।

एवमेव कल्पसूत्राणां शब्दप्रयोगाणाञ्च विषये जैमिनिरस्माकं विचारान् सम्मानयति। पौरुषेयाण्यपि कल्पसूत्राणि प्रमाणमित्यतो हेतोः स्वीकरोति यतश्च कल्पसूत्रप्रवर्त्तकास्तत्त्वविदो महर्षयः सन्ति, ये चालूक्षा धर्मकामाश्च। [2]तत्र जैमिनिर्निःसङ्कोचमभिधत्ते-अभियुक्तानामुपदेशमात्रमेवास्य नियामकमिति। नियतस्यैकस्य व्याकरणस्याभावेऽपि तेनास्मिन् विषये काप्यव्यवस्था न दृश्यते आप्तप्रयोगः प्रमाणस्य निकषः सन्नायाति।

विवेचनेनानेनेदं निर्गलति यत् एतावतो विस्तृतस्य विचारशास्त्रस्य प्रवर्तकेन सताऽपि जैमिनिना क्वचित् कथञ्चित् परकीयपरम्परायास्तथ्यांशा नावहेलिताः परं तेन तेषां मान्यत्वसम्पादनाय यथासाध्यं प्रयतितम्। अस्यां दिशि तेन यत् साफल्यमुपलब्धं तद् वस्तुतः स्पृहणीयम्। जैमिनेरस्यौदार्यस्य गुणग्राहित्वस्योच्चभावनायाश्चास्माभिः शिक्षावाप्तव्या।

अधिकृतः समाजवादी

समाजवाद आधुनिककाले उत्कृष्टतमः सिद्धान्तः। तस्योत्कर्षविषये सन्देहकरणं युगधर्मस्यावहेलनं स्यात्। अद्यैष समाजवादो रूपैरनेकैः समक्षमुपतिष्ठति क्वचिद् भूमे राष्ट्रियकरणरूपेण, क्वचिच्च निर्धनानां स्त्रीणां शूद्राणां समानाधिकाररूपेण। स्वीयासु परम्परासु स साहित्यक्षेत्रे प्रगतिवादरूपं धृत्वा प्रकटीभवति। संक्षेपतोऽस्मिन् प्रकरणे जैमिनिरिमान् विषयान् कथं परीक्षत इति पर्यालोचनीयम्। इदमालोचनं न जैमिनेर्महत्त्वं व्यवस्थापयितुम् अपितवस्माकं तेन पोषकतत्त्वान्युपलब्धेरन्निति।

---

१. तेष्वदर्शनाद् विरोधस्य समा प्रतिपत्तिः स्यात् (१।३।५।८)

२. तत्र तत्त्वमभियोगविशेषात् स्यात् (१।३।९।२७)

लौकिक्या भौतिक्या च दृष्ट्या यदि वयमवलोकयामस्तर्हि इमा याज्ञिक्यः परम्पराः समवाद एव पर्यवस्यन्तीति प्रतीयेते। अत्र वैज्ञानिकी दृष्टिर्निक्षिप्येत यदि तर्हीदमधिकं स्पष्टं स्यात्-यत् यस्य कस्यचित् पार्श्वे समुचितसाधनेन सञ्चितं प्रभूतं यद्धनं वर्तते तस्य केनापि प्रकारेण समाज एव वितरणं भवति। क्रतूनां यष्टा यजमानो विहितैः प्रतिग्रहाद्युपायैः समाजात्सञ्चिनोति अथ च तदृत्विग्भ्यो दक्षिणा-रूपेण वितरति, आपणेभ्यो वस्तूनि तेन विक्रीणाति, कर्मकरेभ्यश्च भृतिरूपेण ददातीतीयं समाजवादस्यादर्शपरम्परा, या समाजादुपलब्धं धनं समाज एव वितरीतुं प्रवर्तयति। अतएव यत् तस्मिन्नादर्शतमे युगे पूँजीवादस्य छायाऽपि नालोक्यते। एवं क्रत्वनुष्ठानेन यददृष्टं फलं जायते तत्तु भवत्येव, किन्तु तदतिरिक्तानि यानि दृष्टफलानि जायन्ते यज्ञानुष्ठानेन तेषु फलेषु समाजस्य समानोऽधिकारः स्वतः सिध्यति। यथा-यज्ञ धूमगन्धेन रोगाणां कीटाणवो न केवलं यजमानस्य गृह एव हन्यन्ते, एवं तेन सम्भूता वृष्टिरन्नसमृद्धिः पवित्रो वायुः न केवलमेकस्मिन् विशिष्टे क्षेत्रे, परं समग्रेऽपि समाजे व्याप्ता भवन्ति। 'सत्रयागोऽस्य खलु प्रत्यक्षमुदाहरणम्। यत्रानेकेषु यजमानेषु पारिवारिकभावनया सङ्घशः प्रवृत्तेः प्रामुख्यं प्रदत्तम्। अत्र अनेके सम्मिलिता एकस्योद्देश्यस्य प्राप्तये सततं प्रयतमानाः समानमशं लभन्ते। आस्ताम्, अस्मिन् विषये सम्भाव्यते यत् कतिपये विद्वांसो मतभेदं धारयन्तीति, परमिदानीमस्माभिस्तेषु सामाजिकतथ्येषु विचारः कर्तव्यः-यानि जैमिनिः स्पष्टरूपेण प्रकाशयति।

१—भूमेः सम्बन्धे—

अद्य समाजवादस्य मुख्यो महान् प्रश्नो वर्तते यद् भूमे राष्ट्रियकरणं नाम। समाजवादस्य सिद्धान्तो विद्यते यद् भूमौ कस्या अपि व्यक्तेः (स किल भूप एव कथं न स्यात्) सम्प्रदायविशेषस्य वा नास्ति कोऽप्यधिकारः। साऽस्ति राष्ट्रिया सम्पत्, तथा तदुपर्येकमात्रं राष्ट्रस्य विद्यतेऽधिकारः। मध्यकाले भूमी राज्ञाम-धिकारे (विभाजितप्रणाल्यनुसारेण) त्ववर्ततैव सहैव तस्या उपलब्धिरूप आयोऽपि तेषां सर्वाधिकार इवाभवत्। ते भूमेरायस्य, यो हि जनतायाः सम्पदासीत्, दुरुपयोगं कर्तुं प्रावर्तन्त तथा प्रजाया नेतॄणां दमनेन सह जनतायै सुखसौविध्य प्रदापनविधावप्यलसा इवाभूवन्। इमानि सर्वाण्याचरणानि यत्र नैतिकता विपरीतान्यासँस्तत्रैव समाजवादेन सह कलहोऽप्यभूत्। देशस्य स्वातन्त्र्यप्राप्त्य-नन्तरं स्वनामधन्यस्य स्वर्गीय-सरदारवल्लभभाईपटेलस्य प्रयत्नाद् भूमे राष्ट्रिय-करणस्यैकाऽतिमहती समस्या तदा समाहितेवाभूद् यदा तैर्भारतस्य प्रायः षट्शत-

---

१. ऋद्धिकामाः सत्रमासीरन्। (६-२-१)

मितानां राज्ञां भूसम्बन्धिनोऽधिकाराः केन्द्रीयशासनस्य हस्तसात् कारिताः। साम्प्रतमन्यो भूयानंशोऽस्मिन् विषये शिष्यते, परमस्यां दिशि समाजवादमाधारीकृत्य समुत्थापितमिदं चरणमियद् दृढं विद्यते यतोऽग्रेऽपीयं समस्या स्वल्पेनैव परिश्रमेण समाधानं प्राप्स्यति।

अयमभूत् साधारणः परिचयः, साम्प्रतमुपर्युक्ते विषये जैमिनेरनुशासनं कीदृशमिति प्रतिपादनीयम्। विश्वजिदेको महान् यागो वर्तते—यस्मिन् स्वस्याः समग्रायाः सम्पदो दानमुपदिष्टम्—सा तावच्चलाऽस्त्वचला वा। तस्मिन् प्रकरणे राजा यदा विश्वजिद्यज्ञं करोति तदा विचारो भवति यत् सः कोषस्य दानानन्तरं यस्याः भुवः स स्वामी वर्तते तस्या अपि दानं कुर्याद् न वेति ? संशयेऽस्मिन् पूर्वपक्षी कथयति यद्—यदा सर्वस्वदानस्य विधानमस्ति तदा राजा भूमिं स्वाधिकारे कथं धारयितुं शक्नोति ? किन्तु सिद्धान्तरूपेण जैमिनिरादिशति[1] यद्—राज्ञो भूमौ नास्ति कोऽप्यधिकारः। भूमिरस्माकं सर्वेषां जननी। वयं सर्वे तस्या एव जनिं प्राप्नुमः, भक्षयामः पुष्णीमस्तथा विलीना भवामः: ईदृश्यां स्थितावस्माकं सर्वेषां तस्यां समानोऽधिकारोऽस्ति—दीनो भूस्वामी वाऽस्तु, धनाधिपो भूपतिर्वाऽस्तु। राज्ञे वयं तस्य करं यच्छामः, तदेतदर्थं नैव यत् स तस्याः स्वामी, अपि तु स तदीयां सुरक्षां करोतीत्येव कारणम्। एवं वयं सर्वे पृथ्व्याः स्वामिनः समस्तदैकमात्रं तस्या द्वारपाले राजा दानरूपेण तां वितरितुं नाधिकरोति। दानं तस्यैव वस्तुनः कर्तुं शक्यते यस्मिन् स्वस्य पूर्णं स्वत्वं भवेत्। एवं न भवति यत् किमपि वस्तु-अस्मभ्यं न्यासरूपेण मिलितं तदेव च वयं दानं कुर्याम। कियान् मूलरूपः सिद्धान्तो जैमिनिना स्वस्य साधारणे प्रसङ्गे संस्थाप्य समाजवादाय प्रदत्तोऽस्ति।

२—निर्धनस्य विषये—

समाजवादस्य द्वितीया धारा सम्पद्वादस्य विरोधमाचरन्ती समुपतिष्ठते। तस्यायमभिप्रायो—यद् सामूहिकसम्पदि कस्यापि व्यक्तिविशेषस्याधिकार एव नास्ति। किञ्च सहैव धनाधिपतित्वकारणात् तस्य समाजे तदाधारेण काऽपि महत्ताऽपि न प्राप्येतेति। मानवस्य मूल्यांकनं समाजवादस्य पृष्ठभूमिरस्ति तथा तदर्थमेवावश्यकमस्ति यत् समाजस्य प्रत्येकं कार्ये धनिकस्य हीनस्य च समानं स्थानं भवेत्।

---

१. "न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात्। (६-७-३)
यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् प्रत्यसिद्धत्वात् (७-७-३)

[१]जैमिनिरस्यां दिशि पन्थानं दर्शयति कथयति च—कोऽपि जनः कस्मिन्नपि कर्मणि एतस्मात् कारणादनधिकारीति गदितुं न शक्यते यत् तत्समीपे धनं नास्ति अयं त्वेकः सर्वतो महानभिशापो विद्यते यद् धनवत्त्वकारणादेको जनः कर्मणोऽधिकारी ख्याप्येत परश्च सर्वगुणसम्पन्नतां धारयन्नपि कारणादस्मात् पराक्रियेत यत्तस्य निकटे धनं नास्ति। द्रव्यस्य सत्ता एकं गौणं वस्त्वस्ति तस्य प्राप्तिरप्राप्तिर्वा कस्याप्यधिकारविशेषस्य मानदण्डतायै सर्वथाऽयोग्या विद्यते। मन्तव्यस्यास्य घोषणां विधाय जैमिनिः सत्यमेव सम्पत्तिवादिनो अभिग्रहस्य तथा दीनानां पक्षसमर्थनस्य च प्रेरणामदात्।

३—नारीणां समानाधिकारता

यत्र वयं मानवस्य मूल्याङ्कनं विधातुं प्रचलामस्तत्र वयं कमप्यधिकारं न धारयामो येन कमपि वर्गविशेषमनुचितरूपेणाधिकृतं दलितं वा पश्येम। तथ्यमिदमेवाधारीकृत्येमे द्वे धारे अत्रास्मिन् स्तम्भे पुरस्क्रियेते। स्त्रीणामधिकार विषयेऽद्य लघोर्लघुतमाद् गृहादारभ्य महत्या महत्तमासु धारासभासु विवादाः प्रचलन्ति किञ्चेमे विवादाः साम्प्रतमेकांशेऽपि समाहिता अपि तु प्रतिदिनं द्रौपद्या वस्त्रमिव वर्धमाना एव सन्ति, वयञ्चैतेषु वधिकस्य जालवत् संवलिता एव भवामः। वयं साम्प्रतिकीनमेतासां धारासभानां निर्णयात् पूर्वं जैमिनेरेकस्य न्यायालयस्य निर्णयमस्यां दिशि सम्पादितायाः प्रगतेः परिचयं दातुं पोषणंच प्राप्तुमत्रोपस्थापयामः :

यत्र कर्ममधिकारप्रदानस्य पश्न आयाति तत्कालमेव प्रश्न उत्तिष्ठति यत् स्त्रीभ्योऽप्यधिकारो दीयेताथवा नैव ? पूर्वपक्षिणोऽत्र विषये मनागपि शैथिल्यं न धारयन्ति यत् स्त्रियै कर्मण्यधिकारो न प्राप्नुयात्, यतो हि सा तस्मै केनापि प्रकारेण योग्या नास्ति। किन्तु सिद्धान्ते जैमिनिः[२] स्त्रीभिः सह सम्पद्यमानमेनं दुर्व्यवहारं न सहते, कथयति च यत् तस्या अपि कर्मणि समानोऽस्त्यधिकारः। तया विना यत्र कर्मापूर्णं तिष्ठति तत्रैव पुरुषोऽप्यपूर्णस्तिष्ठति। स्त्रीभ्यः कर्मणि समानमधिकारं दत्त्वा जैमिनिर्यत्र स्वकीयामुदारतामुदघाटयत् तत्रैव तेन नारीजातेर्माहात्म्यस्यापि सुरक्षा विहिताऽस्ति। जैमिनेरिमे सिद्धान्ता अस्मान् प्रेरयन्त्येव, परं मनागेतेषां महत्त्वविषये विचारयेम चेत् ततोऽप्यधिकं परिचिता भविष्यामः।

---

१. त्रयाणां द्रव्यसम्पन्नः कर्मणोऽनित्यापात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः। (६-२-७-८-३९)

२. जातिं तु बादरायणोऽविशेषात् तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्। (६-१-३-८) अर्थेन च समवेतत्वात्।

A. ये यज्ञपत्नीं वर्धानि (श्रुतेः)

अद्येमे कर्मणि समाना अधिकारा अस्मभ्यं निदर्शन मात्रा एव वा तिष्ठन्तु परं तस्य कालस्य स्थितेरनुमानं कुर्याम चेद् ज्ञास्यामो यदस्याधिकारस्य साम्प्रतिकीष्वेतासु धारासभासु समुपलभ्यमानानामधिकाराणामपेक्षया कियदधिकं महत्त्वमस्तीति।

दासी नैव स्वामिनी

जैमिनिः स्त्रीणामधिकारानधिकृत्य ततोऽप्यधिकं स्पष्टयति। तत्र तस्या द्रव्यवत्तायाः प्रश्न उदेति, स तस्या उपार्जनस्याधिकारं ददाति तथैवं साधनेभ्यः पितृपरम्परातो वा प्राप्ते धने तस्या एकाधिकारं घोषयति। वयं स्वकीयया प्रणय-भावनया तथा पवित्रेण सहानुभूतिमयेन सम्बन्धेन पत्नीं दासीमेव कथं महादासीमपि कर्तुं शक्नुमः—यथा हि भवत्यपि। परमस्याभिप्रायः कदाप्ययं न विद्यते—यथा हि सञ्जातः—यत् स्त्री चरणयोरुपानद् मन्येत। जैमिनिः[१] प्रदर्शयति यत्—विवाहानन्तरं यत्र तस्यै कुमारीतः "पत्नी" संज्ञा प्राप्यते, तत्रैव तस्यां स्वामित्वस्य सञ्चारो भवति, य एकः स्वाभाविकोऽधिकारः। द्रव्येऽपि तस्यास्तथैव समानोऽधिकारोऽस्ति—यथा कर्मणि। जैमिनेरिमे शुभाशीर्वादा यत्रास्मान् राष्ट्रजननीनामेतासां समादराय प्रेरयन्ति, तत्रैवैतान् समाजसुधारकानपि सावधानयन्ति यदितो द्विसहस्रवर्षेभ्यः पूर्वमपि कोऽप्येको महानुपकारकोऽस्मिन् विषये मार्गदर्शनमकरोदिति।

५—शुद्रस्तदीयाऽपरतन्त्रता च

यथा गताभ्यः शताब्दीभ्यः प्रचलन्नागच्छति यत्—'शूद्र उत्तमवर्णानां सेवकरूपोऽस्ति' इति जना अवगच्छन्ति। सम्भवतस्तस्मादेव जनास्तस्योत्कृष्टतायां समानतायां च संशयं कर्तुं प्रवृत्ता दृश्यन्ते। अधुनातनं युगं तु प्रवृत्तिमेतामालोचयत्येव तथा मानवः मानवतावादमाश्रित्य स्वमतं समर्थयति स्वालोचनां चानिर्मूलां विदधाति परं जैमिनिरप्येतद्विषये नाभवदुदासीनः।

उपर्युक्ते विश्वजिद्यागे यत्रेतरस्याः सर्वस्याः सम्पदो दानस्य स्पष्टीकरणं विद्यते, तत्रैव दासस्य विषयेऽपि चर्चा विहिताऽस्ति। अस्या एव भ्रान्तिपूर्णायाः

---

१. स्ववत्तामपि दर्शयति। (६-१-३-१६)

A. पत्युर्नो यज्ञसंयोगे (पाणिनिः)

B. पत्नीशब्दस्य स्वामिवचनत्वात् (पार्थसारथिः शास्त्रदीपिका—

C. क्रीतत्वात्तु भृत्याः स्वमित्थमुच्यते, फलार्थित्वात् (६-१-३)
स्वामित्वेनाभिसम्बन्धः (जैमिनिः ६-१-४-१६-२० ।)

प्रचलित—परम्पराया आधारेण पूर्वपक्षिणो शूद्रायापि दासतुल्यमान्यतां प्रदाय देयवस्तुषु परिगणयितुं वाञ्छन्ति। किन्तु महर्षेर्जैमिनेः साम्राज्ये कस्या अप्यन्ध-परम्पराया अस्मिन् रूपे प्रवर्तनमसम्भवमेव, इयमराजकता नियामकस्यास्य नियन्त्रणे चलितुं नाशक्नोत्। स एनां परम्परां साभिग्रहं निराकुर्वन् कथयति—शूद्रो नास्ति दासः केवलं तेन परिचारकता स्वीकृता। सा तु धर्मायैव कृता नैव। व्यक्तिविशेषाय स नास्ति कस्याप्यधीनः। तस्मादेव तस्य समाजे स्वतन्त्रमस्तित्वं स्वतः सिद्धमस्ति। तस्य साम्यं दासेन सह कर्तुं न शक्यते, यतो हि दासः परतन्त्रोऽस्ति। अत एव च तदुपरि स्वामिनः सर्वाधिकारो वर्तते। परं शूद्रे नैव, स तु धर्मशिक्षाप्राप्तय एव तत्रोपस्थितो[1] भवति। अस्यायमर्थः कदापि नैव भवति यद् वयं तदुपरि स्वस्याधिकारं मन्यामहे। जैमिनेरयमभिग्रहो यत्रेमाः परम्परास्तर्जयन्ति तत्रा-स्मानपि मानवतादृष्ट्या समानतां प्रत्यग्रे सारयति।

सङ्क्षेपत उपरि प्रतिपादिताभ्यो विभिन्नाभ्यो धाराभ्यो जैमिनेः समाज-व्यवस्थायां साङ्केतिकः प्रकाश आपतति—यतः सिध्यति यद् जैमिनिरेकः समाज-शास्त्र्यप्यवर्तत। अस्माकं समाजवादिषु ये तैः विदेशेभ्य एतद्विषये मार्गदर्शनमाकाङ्क्षन्ते, स्वस्य सद्मनि निहितस्यास्य निधेर्विषये गर्वबुद्धिराधातव्या।

एको वैज्ञानिकः

जैमिनेः सिद्धान्तेभ्यो यत्रागमस्य भिन्न-भिन्नाभिः पद्धतिभिर्मान्यता दत्ता तत्रैव विज्ञानेनापि मान्यता प्रदत्ताऽस्ति। साम्प्रतमेकोऽनुसन्धाता सम्पूर्णं जीवन-मेकस्य वस्तुनस्तथ्यस्य वा गवेषणायै यतते किञ्च यदा स एकमपि सत्यं शाश्वतं तथ्यं वा स्वकीययप्रयत्नविशेषेणास्माकं पुरतः स्थापयति तदा वयं तमेकं महान्तं वैज्ञानिकं मत्वा सत्कुर्मः।

शब्दनित्यत्वे (यच्चाग्रे साधयिष्यते) जैमिनेरीदृशी विशेषताऽस्ति—याञ्च विज्ञानं सगौरवमद्य स्वीकरोति स्म। अस्मिन् विषये नैके वाद-विवादाः प्रच-लन्ति, परं विंश्या शत्या आकाशवाण्या आविष्कारेणेमं विषयं तर्कपद्धत्या उच्चैरुत्थाप्यास्य सत्यता प्रत्यक्षमाविष्कृता। इदमेव कारणं यद् रात्रौ सपादनव-वादनवेलायां वयं प्रतिदिनं देहलीकेन्द्रात् प्रसारितान् कार्यक्रमान् परःसहस्रस्य क्रोशानां दूरे स्थिता अपि तत्क्षणमेवाकर्णयामः। महत्या अनुसन्धान क्रियाया अनन्तरं वैज्ञानिका इदं वस्तु प्राप्तवन्तः। अत एव तदर्थं ते स्वीयं मस्तकं सगर्वमुच्चैरुत्था-पयन्ति। अतीव सारल्यभावेनास्माकं महानाविष्कारको जैमिनिरस्य मूलमुपास्था-

---

१. शूद्रस्य धर्मशास्त्रत्वात्। (६. ७. ६.)

पयद् यद्द्याङ्कुरितं सत् फलितं पुष्पितं च वर्तते। एतस्मात् तेषां तथ्यानां शाश्वततताया आभासः सुलभो न भवति तथा तेषां प्रामाण्यस्य प्रेरणा प्राप्यते।

भ्रान्ता धारणा

तथापि न जाने कस्माद् विषयेऽस्मिन् जनानां धारणाः भ्रान्ता भवन्ति। परं किं क्रियेत, इदं त्वेकप्रकारेण युगधर्म इव संवृत्तः। अद्य प्रत्येकं क्षेत्रे महत्त्वाकाङ्क्षा-धारिणे मानवायेदं सर्वतः प्रथमं कार्यमिव सञ्जातं यत् स प्राचीन-परम्पराणां खण्डनं कुर्यात्। साहित्यकारः स्वस्या विद्वत्ताया मानदण्डं गणयति—यत् प्राचीनसिद्धान्तानां निराकरणं नाम। सोऽस्मै दृढ़प्रतिज्ञः सन् प्रवर्तते तथाऽऽत्मानमपि तस्य लक्ष्यस्य पूर्तौ विस्मरति, तस्मिन्नेव स्वस्य पूर्णं साफल्यं मनुते, परं स नेदं स्मरति यदिदं सर्वमेतस्माज्जातं यत् स स्वयमात्मानं विस्मृतवान्—यः सर्वतो महतोऽज्ञानस्य मूलमस्ति। इदमेवैको दार्शनिकः समाजशास्त्री च कुरुते। अद्य वयमेतत् समाज-संस्कार इति कथयामः, तस्मिन् किमस्मादशान्तवातावरणात् खण्डनवृत्तेश्चातिरिक्तं कान्यपि रचनात्मकानि तत्त्वानि प्राप्यन्ते ?

पुनरेकोऽन्योऽस्ति प्रकारः—यदीदृशेभ्यो मानवेभ्यो द्वयोर्विपरीतवस्तुनोर्मेलनं नाम। कियतेचित् कालाय मन्यतां यद् वयमन्धकारस्य साम्यं सूर्येण सह कर्तुं प्रवृत्ता भवामस्तत् किमुचितं कुर्मः ? किमयमस्माकं प्रतिपादनस्य कश्चन श्रेष्ठः प्रकारः ? आध्यात्मिकम-दृष्टरूपञ्च प्रकाशं भौतिक दृष्ट्या सिद्धप्रकाशस्य प्रतिद्वन्द्वितया समुपस्थापयामः। किञ्च तदनन्तरं लोके वसतिमतः, मस्तिष्केनापक्वान् आत्मबलेन च विहीनान् कतिपयान् मानव-नामधारिणो लौकिकचाकचक्यमयीभिर्युक्तिभिः प्रभावितान् विधाय तदुपरि स्ववैदुष्यस्य चिह्नमङ्कयामः। इदं किमपि नवीनं कार्यं ते न कुर्वन्ति, अनादिकालादीदृशानां जनाना-मेका परम्पराऽवर्तत। परं किं कारणमासीद् यत् तस्मिन् सभ्यता-संस्कृत्योरुत्कर्षमये युगे एतेषां जनानां द्विदली न गलिता ? मनाग् विचारणात् स्वतः स्पष्टं भविष्यति यदात्मबलस्य हीनत्वमेवास्मान् भौतिकबलस्य समक्षं नतमस्तकान् करोति। तस्मिन्नु-ज्ज्वलकाले वयंमियदात्मबलसम्पन्ना आस्म तद् भौतिकताऽस्मत्-समक्षं स्थातु-मपि नापारयत्। परं किं क्रियेत ? अद्य वयमेव यदेयद् दीना हीनाश्च सञ्जाता-स्तदा जना अस्मान् काष्ठपुत्तलिका इव करमान्न नर्तयेयुः। परं ते किञ्चिद् विचार-यन्तु यद् देशं प्रति ते किं कुर्वन्ति ? भगवताऽस्मभ्यं या विवेक बुद्धिर्दत्ता सा नै तस्मै कारणाय यत्तया वयं जनतां मार्गभ्रष्टां कुर्याम, अपि तु जनतायै श्रेष्ठं पन्थानं प्रदर्श्य देशं समाजञ्च प्रत्यात्मनः कर्तव्यं पूरयेम।

जनतां यदि 'वयमिदमुपदिशामो यद् यूयं यथाऽभिलषत तावता सुखेन वसत, यावज्जीवत तावदृणमपि कर्तव्यं भवेच्चेन्न काचिद्धानिः कियन्त्यप्यनुचितानि साधनानि सञ्चेतव्यानि भवेयुस्ततोऽपि किम् ? घृतं पिबत तथा मोदकानि भक्षयत इत्युपदेशेन किमस्माभिस्साधितं भवेत् ? स्वार्थे प्रत्यक्षे च मानवस्य स्वाभाविकी प्रवृत्तिरस्ति । स्वस्य जठरपूर्तेः सुखस्योपकरणानां च सञ्चयस्त्वेकमीदृशं वस्त्वस्ति—यस्मै तदीयाः प्रयत्ना जन्मजा एव भवन्ति । न हि केवलं तस्मिन्नेव इमाँस्तु प्राणिमात्रे विलोकयामः । किन्तु मनाग् हृदि हस्तं निधाय विचारयेम--किमस्मिन्नेवास्ति जीवनस्य साफल्यम् ? वस्तुत इदमेव सर्वस्वं शाश्वतं च विद्यते ? यद् वयं पश्यामः । अस्तु; सम्बन्धेऽस्मिन्नधिकं विवेचनमग्रे करिष्यते । साम्प्रतं त्वेतावदेव कथनं पर्याप्तं विद्यते यद् यद्दृश्यं वर्तते—तदतिरिक्तमेकं ततोऽप्यधिकं महत्त्वपूर्णं मदृश्यनामकं वस्तु वर्तते--यस्मिन् सर्वमिदमाश्रितमस्ति । यथा मूले वृक्षः ।

लिप्सा नैव, त्यागः

ईदृश्येवैका भ्रान्ता धारणा मीमांसासदृक्षस्य लोकोपयोगितायाः प्रतीकरूपशास्त्रस्य विषये विंशशताब्द्याश्चार्वाकेण माननीयेन महापण्डित-राहुलसांकृत्यायनेनोपस्थापिताऽस्ति । स्वस्य 'दर्शन-दिग्दर्शन' सम्बन्धिनि स्तम्भे । श्रीमान् सांकृत्यायनो मीमांसां पुरोहितानां जीविकारक्षाया उपाय इति कथयित्वा स्वस्य भौतिकतां प्रदर्शयति । अधस्ताद् वयं कानिचिदुदाहरणानि दत्त्वा तेषामस्य मन्तव्यस्य निकषे मीमांसा-शास्त्रं परीक्षितुमभिलषामः । सम्भाव्यते तत्परिणामस्वरूपेण महापण्डित-महोदयानां धारणा परिवृत्तिं प्राप्नुयादिति ।

स्मृतीनां प्रामाण्य-प्रसङ्गे चर्चैका प्रचलति "वैसर्जनहोमीयं[२] वासोऽध्वर्युर्गृह्णाति" इति वाक्यमिदमधिकृत्य । अर्थात् 'वैसर्जनहोम-सम्बद्धं वस्त्रमध्वर्युर्गृह्णाति । अत्र पूर्वपक्षी कथयति—यदा वयं वेदमूलकतामाश्रित्य सर्वाभ्यः स्मृतिभ्यः प्रामाण्यं प्रयच्छामस्तदाऽनयैव किमपराद्धम् ? किं जातं यदि वेदवाक्यं नोपलभ्यते, वयं तस्य कल्पनामपि तु कर्तुं प्रभवामः । परं सिद्धान्ते जैमिनिः कथयति—ईदृक् स्मृतीनां प्रमाण्यमङ्गीकर्तुं न शक्यते । यतो हि यस्मात् कारणादेवंविधानां स्मृतीनामुत्पत्तिः सम्भाव्यते तत्कारणं लोभ-स्वरूपे पर्यवस्यति । अध्वर्यवस्तथाऽन्ये याज्ञिका अपि स्वस्य लाभायेदृशीः स्मृतीः प्रचारयितुं शक्नुयुः । अतो याज्ञिकानामस्याः लोभमय्याः

---

१. यावज्जीवेद् सुखं जीवेद्, ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य, पुनरागमनं कुतः । (चार्वाकः)

२. (१-३-२)

३. हेतुदर्शनाच्च (अप्रामाण्यम्) (१-३-३-४)

प्रवृत्तेरपाकरणस्यायमेवैकः श्रेष्ठ उपायोऽस्ति यदेताहृश्यः स्मृतयः–यासु तेषां वैयक्तिकलाभस्य वर्णनं भवेत्––अप्रामाणिक्यो घोषणीयाः तथा जैमिनिरित्थे-मेवाचरदपि ।

अस्तु, वयं जैमिनेरस्मिन् निर्णये मनाग् विचार्य पश्येम चेत् स्पष्टं भविष्यति यत् 'किं सत्यमेव मीमांसाशास्त्रस्य प्रवृत्तिर्वृत्तिरक्षाया उद्देश्येनैवास्ति' 'यद्येतदेव लक्ष्यम-भविष्यत् तदा तद् वस्त्रम् (यद् हि सुबहु दीर्घमायतं मूल्यवच्च भवति) अध्वर्यवे दापयितुं जैमिनेः का विपदभविष्यत् ? स तु एवंविधाः स्मृतीः याभ्यो ब्राह्मणा लाभवन्तो भवेयुः निर्बाधं प्रमाणरूपेणाघोषयिष्यत् । परं नैव, जैमिनिसदृशेभ्य एतेभ्यो महापुरुषेभ्यः स्वार्थस्यायं तुच्छः परिधिरगण्य एवासीत् । अद्य वयं यत् तान् स्वार्थ-साधकान् प्रतिपादयामः अस्माकमपेक्षा तु एतेषां महामनसां परोपकारितायां विवृद्धिमेव प्राप्नुमः । केवलं तर्क एव नहि, हृदयादपि चिन्तयामश्चेत् ज्ञास्यामो यदिमे जना विश्याः शत्याः प्राणिभ्यः कियन्त उन्नतास्त्यागसवताश्चासन् । इदमेकमुदाहरणमेवेयत् प्रमाणयितुं पर्याप्तमस्ति यद् मीमांसायाः सम्बन्धो लिप्सया नैवापि तु त्यागेन सहास्ति ।

दानं नैव श्रमकर्म

सम्भवत इमे जना ब्राह्मणस्य दक्षिणा-प्राप्त्या रुष्टाः स्युः परमस्मिन् विषये जैमिनिः स्वीयं दृष्टिकोणमुज्वलमस्थापयत् । यज्ञे भागं गृह्णानेभ्यो विभिन्नेभ्यो ब्राह्मणेभ्यो यजमानो यत्किञ्चिदप्यर्पयति, न तद्धर्मरूपेण अपि तु पारिश्रमिकरूपेण वितरति । स तेषु कमप्युपकारं न करोति––यत उपर्युक्ता धारणा दृढतां व्रजेत् । दक्षिणाया अभिप्रायं वयमेकया भ्रान्तपरम्परया दानार्थे ग्रहीतुं प्रवृत्ताः स्मः, परं वयं त्रुटिपूर्णे मार्गे वर्तामिहे । इदं तु एकप्रकारकं श्रमकर्मण उत्कृष्टं रूपं विद्यते । सम्भवतोऽस्मादेवाद्यापि ब्राह्मणः प्रातःकालाद् द्विवादनपर्यन्तं वेदपारायणानन्तरमेव वैश्यस्य निकटे द्रव्यं ग्रहीतुं गच्छति, तदा सोऽनुभवति ब्राह्मणाय यत्किञ्चिदहं ददामि अस्योपरि महान्तमुपकारं सम्पादयामि । स इदं न वेत्ति यदियं दक्षिणा नास्त्युपकारः परं पारिश्रमिको विद्यते––या ह्यनेन विहितस्य परिश्रमस्य परिणामदृष्टयाऽतिन्यूना वर्तते । यावत् प्रभृति धारणेयं यजमानानां हृदयेषु स्थिरीभूताऽस्ति तदाप्रभृत्येव न ते फलं लभन्ते न च ब्राह्मणाः सम्मानम् । परं जैमिनेर्दूरदर्शिता वीक्ष्यतां नेयतीभ्यः शताब्दीभ्यः पूर्वमेव धारणाया अस्या अपाकरणं विहितमासीत् ।

एताभ्यामुदाहरणाभ्यामिदं स्पष्टं भवति यद् मीमांसा समीक्षाशास्त्रमस्ति कस्या अपि व्यक्तेः समुदायस्य वा स्वार्थसाधनस्यायं प्रकारो नैव । एवंविधानां भ्रान्त-धारणानां प्रचारात् पूर्वं शोभनं भवेत्, प्रचारका जैमिनेरेतासां प्रेरणानां गवेषणां कुर्युः, याः स्वीयं दृष्टिकोणं स्पष्टरूपेणोपस्थापयन्ति ।

प्रवर्तको नैव, प्रतिनिधिः

महर्षिजैमिनिर्मीमांसादर्शनस्य प्रवर्तकत्वेन प्रायः प्रसिद्ध्यति । सम्भवतः प्रस्तुते ग्रन्थेऽपि तदाधारेण जैमिनेस्तेन विशेषणेन सह प्रयोगः कृतो भवेत् ? किन्तु वस्तुत एवं नास्ति । जैमिनिं मीमांसाया वर्तमानस्वरूपस्य प्रवर्तकं स्वेच्छयैव चेद् वयं मन्येमहि परमस्यादिम--सिद्धान्तानां जन्मदातारं स्वीकर्तुम् न शक्नुमः । यथा व्यासात् पूर्वमप्यद्वैतसम्बन्धिनो विचाराः पर्याप्ताः प्रचलिता आसन्, तथैव जैमिनेः पूर्वं मीमांसायाः । यथा तेषां विकीर्णानां विचाराणां शृङ्खलीकरणपूर्वकमेकतोन्मुखीकरणस्य महत्त्वपूर्णं कार्यं वेदान्तस्य क्षेत्रे व्यासेन सम्पादितं तथैव मीमांसायाः क्षेत्रे जैमिनिना । जैमिनेः पूर्वमपि मीमांसाया सिद्धान्ता एकं निश्चितं स्वरूपं यावदुपगता आसन् । नास्त्यत्र कश्चन संशयः । स्वयं जैमिनिरपि बहुषु स्थलेष्विदं समर्थयामास । अत एव वयं जैमिनिमादिमं प्रवर्तकं कथयितुं न पारयामः ।

आम्, तमेकमात्रं प्रतिनिधित्वेन सम्मानयितुं शक्नुमः । यावन्तो विचाराः सिद्धान्ताः सूत्रे अथवाऽन्येषु केषुचित् प्रकारेषु जैमिनेः पूर्वं प्रचलिता आसन्, निश्चितमेव जैमिनिस्तेषां सर्वेषां प्रातिनिध्यमकरोत् । प्रातिनिध्यमेतच्चेयत् प्रभावशालि समपद्यत यदद्ययावत्तदीयः प्रभावः सर्वैरपि शिरसि धार्यते । तथा तदाधारेणैव जैमिनिं मीमांसायाः प्रवर्तकमपि कथयितुं सङ्कोचं नानुभवन्ति । तथ्येनानेनाप्यस्माकमियं विचारधारा पुष्टिं गच्छति यत् प्रभावशाली प्रतिनिधिः प्रवर्तकमपि प्रभावहीनं विदधाति । किञ्च स तन्नामापि विस्मारयति-- जनता तमेव सर्वं मन्तुं प्रारभते ।

जैमिनौ मीमांसाया वयमियद् विकसितं स्थिरं च रूपं प्राप्नुमः—यस्मात् ततः पूर्वं मीमांसायाः प्रवृत्तेरेव नैव, प्रचलितताया अप्याभास उपलभ्यते । पूर्ववर्तिनि काले कृतायामपि गवेषणायां वयमीदृशं कमप्याधारं नोपलभामहे—यस्मात् कमपि व्यक्तिविशेषं मीमांसायाः प्रवर्तकं कथयितुं पारयेम । स्वकीयैर्युक्तिकलापैर्मीमांसेयमियती विस्तृताऽभवद्--यस्याः प्रवर्तकरूपेणैकस्य जनस्य स्वीकरणमद्यतनात् कालाद् अनेकशताब्दीतः पूर्वमाचार्यभट्टस्य कृतेऽप्यभिमतं नाभूत् । स कथयति-- इदं तु लोकस्य[१] वस्त्वस्ति, लोकोपयोगितायै आवश्यकताया आधारेण केनापि व्यक्तिविशेषेण नैवापि तु लोकेनैवास्याविष्कारो विहितः । पुनस्तर्हि, केनाधारेण वय जैमिनिं मीमासायाः प्रवर्तकं कथयितुं शक्नुमः ? तेषां प्रातिनिध्ये प्रभावशालितायां न कस्यापि संशयः । तेषां प्रभावस्त्वेतस्मादेव स्पष्टं

१. मीमांसा तु लोकादेव प्रयत्नानुमानादिभिरविच्छिन्न सम्प्रदाय-पण्डितव्यवहारैः प्रोक्ता, नहि कश्चिदपि प्रथममेतावन्तंमित्यादि । (तन्त्रवार्तिकम्)

विद्यते यत् तैः स्वस्मात् पूर्वभाविनामाचार्याणां नामान्यपीतिहासस्य सम्पत्त्वेन सम्पादितानि । अद्य मीमांसायाः क्षेत्रे केवलं तेषामेव साम्राज्यं प्रत्यक्षमस्ति स्थास्यति च, किमयमल्पीयान् प्रभावः ? स्वस्याः पैतृकपरम्परया प्राप्तायाः सम्पदः सदुपयोगं विधाय जैमिनिनाऽस्मभ्यमेक आदर्शान्वितो राजमार्गः प्रदर्शितः एतदर्थं विचारशीलास्सर्व एवाधमर्णाः ।

पैतृकी परम्परा सम्पत्तिश्च

बहव ईदृशाः सौभाग्यशालिनो जना भवन्ति ये च परिपुष्टां पैतृकपरम्परायाः सम्पदं निधिरूपेण प्राप्नुवन्ति । जैमिनिरपि एवंविधो भाग्यशाली विद्यते । स केभ्यः केभ्यो महापुरुषेभ्य एतत्प्रति प्रोत्साहनं प्राप्तवान्—तदर्थं तत्सूत्राण्यतिरिच्यान्यत् किमपि साधनं नास्ति । जैमिनिः स्वस्याः पूर्वजपरम्पराया रूपेणाष्टौ महापुरुषान् परिगणितवान्, अयमेवैक आधारः—यस्मात् निम्नलिखितानाचार्यान् जैमिनेः पैतृक-परम्परायां मानयन्ति—

१—बादरायणः, २—बादरिः, ३—ऐतिशायनः, ४—कार्ष्णाजिनिः, ५—लाबुकायनः, ६—कामुकायनः, ७—आत्रेयः ८—आलेखनश्च । एतेषु प्रथमस्य बादरायणस्य विषये "जैमिनिर्व्यासश्चे" ति शीर्षकस्तम्भे पर्याप्तं विवेचनं विहितमस्ति, शेषेषु प्राप्तानां तथ्यानामाधारेण—येषु माननीय-डॉ० उमेशमिश्राणां सत्सङ्ग्रहः प्रमुखो वर्तते—विचारः क्रियते ।

२—बादरिः

बादरेर्व्यक्तिगतजीवनस्य विषये वयं कान्यपि निश्चितानि तथ्यानि न प्राप्तवन्तः । केवलमस्याभिधानेन सह संयुक्तस्य प्रत्ययस्याधारेण इयदनुमानं कर्तुं शक्यते (यादृशी हि पूर्वं परम्पराऽऽसीत्) यदयं कस्यापि बादरनाम्नो महर्षेः पुत्रोऽभूत् । डॉ० टी० सी० चिन्तामणिमहाशया एनमेवाशयं पोषयन्तो बादरिं बादरायणस्य पूर्वजं बादरायणाच्च किञ्चिदधिकं वयस्वन्तं दर्शयन्ति । जैमिनिः स्वेषु सूत्रेषु चतुर्वारं बादरिं स्मरति—परं तन्मतं यत्र कुत्रापि समुद्धृतं पूर्वपक्षरूपेणैव न सिद्धान्तरूपेण । सहैव च जैमिनिरपि स्वं स्वतन्त्रं मन्तव्यं समुपास्थापयत् । बादरेर्विचाराणामवलोकनाज्ज्ञायते यत् स एकः श्रेष्ठो विचारकस्तथा दृढः प्रतिपादक आसीत्, तस्य दृढताया इदं कियन्मूर्तमुदाहरणं विद्यते यत् स शूद्रायापि कर्माधिकारं दापयति, तदानीं यदा हि तत्कृते वेदानामुच्चारणमपि अन्याय्यं मन्यते स्म । ब्रह्मसूत्रेष्वपि द्विचतुःस्थलेषु बादरिरुद्धृतः । सम्भाव्यते, यदयमेक एव बादरिः पूर्वोत्तरयोरुभयोरपि मीमांसयोरधिकृतो विद्वान् भवेत् !

अस्य कालमधिकृत्य कोऽपि प्रामाणिक आधार उपस्थापयितुं न शक्यते। कात्यायनः श्रौतसूत्रेऽपि बादरिं संस्मृतवान्—यस्मात् तस्य सिद्धान्तानां मान्यताया नियततायाश्च ज्ञानं भवति ।

३—ऐतिशायनः

बादरिरिवैव जैमिनिसूत्रातिरिक्तमैतिशायनस्याभिधानमन्यत्र नास्ति विख्यातम्, तथापि जैमिनिः स्वेषु सूत्रेष्वेनं त्रिषु स्थानेषु समुद्धृतवान्। एतेषु द्वयोः स्थानयोर्जैमिनिस्तं स्वमतस्य समर्थकरूपेण निर्दिशति परमेकस्मिन् स्थाने वयं तं जैमिनेर्विपरीतं प्राप्नुमः। स्वीये ३-२-४२ तमे सूत्रे यत्र बलिखननसमये मन्त्रोच्चारणस्य प्रश्न आयाति जैमिनिरेकस्यैव मन्त्रोच्चारणस्य विधानमाचरति, तत्र च ऐतिशायनं प्रमाणयति। अस्य सूत्रस्य व्याख्यां कुर्वाणः शास्त्रदीपिकाया विद्वान् व्याख्याकार ऐतिशायनस्य ग्रहणं प्रतिष्ठायै दर्शयति। एवमेव फलस्य कर्तुश्च सम्बन्धः कर्मणः प्रवृत्तावावश्यक इति साधयन् जैमिनिरैतिशायनं स्मरति—येन तस्य व्यावहारिकताया ज्ञानं भवति। कर्मणोऽधिकारविषये वयं बादरिं यावन्तमुदारं प्राप्नुम ऐतिशायनं तावन्तमेवानुभवामः। यत्र बादरिः शूद्रेभ्योऽप्यधिकारदाने संकोचं नार्हति तत्रैतिशायनो विधायकवाक्येषु निर्दिष्टं पुल्लिङ्गमवलम्ब्य केवलं पुरुषमात्रायैवाधिकारं दित्सति। जैमिनिराभ्यामुभाभ्यां विपरीतः। स किल नैतावान् उदारः संवृत्तो यद् बादरिरिव शूद्रेभ्योऽप्यधिकारदानाय सम्मतः, किञ्च नैतावान् दृढः सम्पन्नो यत् स्त्रीजातिमपि तस्मादधिकाराद् वञ्चितां कर्तुम्। अस्यां दिश्यैतिशायनो जैमिनेर्मतभेदं धारयति। एतेनैतिशायनस्य सिद्धान्तानां स्थैर्यं प्रतीयते ।

४—कार्ष्णाजिनिः

अन्येषामुपर्युक्ताचार्याणामिवैव कार्ष्णाजिनेर्जीवनविषयेऽपि वयं कमप्याधारं न प्राप्नुमः। एतदेवैकमभिधानं वेदान्ते धर्मशास्त्रे मीमांसायाञ्च लभामहे। तदाधारेणेदमनुमातुं शक्यते यदेक एवायं त्रयाणां विशेषज्ञो भवेत्? केवलं द्वयोः[१] स्थानयोः जैमिनिना कार्ष्णाजिनेः स्मरणं विपरीते सिद्धान्ते कृतम्। रात्रिसत्रस्य प्रसङ्गे जैमिनिर्यत्रार्थवादिकं फलं सिद्धान्तयितुं प्रवर्तते, कार्ष्णाजिनिस्तदङ्गवद् गौणं घोषयित्वा तमवरुणद्धि। एवमेव सत्रस्य कालमधिकृत्य यत्र परम्परा संवत्सरस्याभिप्रायं दिनमिति स्वीकर्तुं नाभिलषति, कार्ष्णाजिनिस्तुतं वर्षस्यार्थे प्रयुक्तं दर्शयति। किञ्च तदुपपत्तये यदा स एकस्य मानवस्यायुरेतावन्न भवेत्, तदा तत्

---

१. (४–३–१७, ६–७–३६)

कुलकल्पमिति कल्पयित्वैकं वंशसाध्यं कर्म घोषयति। अस्मिन्नेव प्रसङ्गे कात्यायन-श्रौत्रसूत्रेऽपि (१-१४.४) कार्ष्णाजिनिं भारद्वाज-लौगाक्षिभ्यां सहोपस्थितं पश्यामः। अनयोरुभयोरपि प्रसङ्गयोर्जैमिनिरेतेभ्यो भिन्नं मतं प्रकटयति।

५—लाबुकायनः

केवल[1] मेकस्मिन् स्थाने जैमिनिर्लाबुकायनस्य विचार उपस्थापितः। एतदतिरिक्तं वयमस्मिन् विषये किमपि न जानीमः।

६—कामुकायनः

एकस्मिन्नेव प्रसंगे[2] द्विवारं जैमिनिः कामुकायनं स्मरति यत्र हि दर्श-पूर्णमासयोर्विहितानामाहुतीनां विषये विचार्यते। पूर्णमासे चतुर्दशानां, तथा दर्शे त्रयोदशानामाहुतीनां विधानं विद्यते। एतौ द्वावेवाधिकृत्य कामुकायनः कथयति—परिणामेऽविरोधं दर्शयितुं सहैवैतेषामेकवारमनुष्ठानं युक्तियुक्तं वर्तत इति। इतोऽधिकं विषयेऽस्मिन् किमपि नोपलभ्यते।

७—आत्रेयः

भारतीय-वाङ्मये आत्रेयस्य नाम नास्त्यपरिचितम्। अस्माकं वाङ्मयस्य विभिन्नासु धारासु वयमेतन्नामोपलभामहे। कर्मणां सम्बन्धे किं तेषु यजमानस्यैवाधिकारोऽस्ति अर्थात् तानि यजमानस्यैव कर्माण्युत ऋत्विजामपीति सन्दिहाना ब्रह्मसूत्रकाराः कथयन्ति—फलश्रुतित्वात् तानि कर्माण्येकमात्रं यजमानस्यैव सन्ति, नर्त्विजामपि। कथनेऽस्मिन् त आत्रेयं पुरस्कुर्वन्ति। महाभारत-कारेणाप्यात्रेयो ब्रह्मविद्याविशेषज्ञत्वेन बौधायन-श्रौत-गृह्यसूत्रेषु च पदकारत्वेन समुद्धृतः। सम्भाव्यते—अयं कार्ष्णाजिनेः समकालिकः स्यात्, तथा वैदिकवाङ्मयस्य कर्मकाण्डस्य च विशेषज्ञत्वेन सहोभयोर्मीमांसयोरप्यधिकृतो मनीषी भवेत्। जैमिनिरेनं महता सम्मानेन सह स्वमतस्य पुष्ट्ये त्रिषु[3] स्थानेषु संस्मृतवान्। सर्वतः प्रथमं जैमिनिरेनं कार्ष्णाजिनेर्मतस्य खण्डनाय प्रस्तौति, यत्र स रात्रिसत्र-सदृशेषु फलहीनेषु कर्मस्वार्थवादिकं फलं स्वीकर्तुं निर्बध्नाति। यदा हि कार्ष्णाजिनिर्निषेधति स्म। द्वितीयस्थाने यत्र शूद्राणां कर्माधिकारदानप्रश्न उदेति, तथा बादरिसदृश आचार्यस्तमनुकरोति तत्र जैमिनिरात्रेयस्य वैशिष्ट्यं सूचयन् कथयति।

१. (६-७-३८)
२. (११-१-५७, ११-१-६२)
३. (४-३-१८, ६-१-२६, ५-२-१८)

यथाऽग्न्याधानादिषु केवलं ब्राह्मण-क्षत्रिय-विशामेतेषां त्रयाणामुच्चवर्णानामेवाधिकारो विद्यते तथैवान्येषु कर्मस्वपि। तृतीयं स्मरणमुपादानेष्टेः प्रायमिकतायाः सम्बन्धे वर्तते। एतेषु त्रिष्वपि स्थलेषु जैमिनिरात्रेयादत्यन्तं पोषणं सम्प्राप्तवान्। अत्र नास्ति कश्चन सन्देहः। तथा वयमेतेषामाधारेणैवानुमिनुमो यदात्रेयः स्वकालस्य श्रेष्ठो मीमांसकस्तथा कर्मकाण्ड्यासीत्। एतस्मादेव कारणात् तदानीन्तनकालिके साहित्ये वयं तस्य मौलिकं सत्कारं लभामहे। बादरायणादनन्तरमेष एवैक ईदृशोऽस्ति—यस्मै जैमिनिरियदधिकं सम्मानं प्रदत्तवान्। अस्य नाम्न एकां परम्परां वयं गोत्ररूपेणाप्यस्मद्देशे प्राप्नुमः।

८—आलेखनः

जैमिनेर्द्वादशस्वध्यायेषु वयं केवलमेकस्मिन् स्थाने[१] ऽभ्युदयेष्टेः सामग्रीसञ्चयविषय आलेखनस्याभिधानं प्राप्नुमः, तथैकवारं सङ्कर्षकाण्डे। भारद्वाजस्य श्रौतसूत्रेऽपि नाम्नैतेनैकस्योल्लेखोऽस्ति यदाधारेण डॉ० कीथ उमेशमिश्रश्चालेखनस्य कालं भारद्वाजात् पूर्वं निर्धारयतः। इतोऽधिकमस्मिन् विषये न ज्ञायते। उपर्युक्तं समयमपि श्रीमिश्रस्तदा प्रामाणिकं प्रत्यपादयत्, यदा हि भारद्वाजस्य स एवाभिप्रेतः स्यात्, यस्मै कौटिल्यस्यार्थशास्त्रे महाभारतस्य शान्तिपर्वणि च राजशास्त्राध्यापकरूपेण स्थानं प्रत्तम्।

प्रामाणिकरूपेणैतत्प्रति जैमिनिरेतेभ्यो महापुरुषेभ्यो यत् पथप्रदर्शनमवाप्तवान्, तद्व्यतिरिक्तयाज्ञिकानां विभिन्ना परम्परा अपि तमवश्यं प्रभावयन्। नास्त्यत्र कोऽपि संशयः। स्वस्याः पैतृकसम्पदो जैमिनिर्यं सदुपयोगं विहितवान्—सोऽस्मत्समक्षं देदीप्यमानो विद्यते।

सङ्क्रमण-कालिका आचार्याः

काशकृत्स्न आपिशलिश्च

एतेभ्योऽष्टभ्यो महामनोभ्योऽतिरिक्तं वयं प्राचीनानामाचार्याणां गणनायां पञ्च सप्त वा [१]नामीनीतराण्यपि प्राप्नुमः, तेषु काशकृत्स्न आपिशलिश्चात्यन्तं प्राचीनौ स्तः। अनयोरुभयोराचार्ययोः कालो निश्चयेन खीस्तीयशताब्दीतः पूर्वतनः। महर्षिजैमिनिरेतयोर्नामिनी स्वेषु सूत्रेषु नागृह्णात्, एतस्मादेव सम्भावनेयं कर्तुं शक्यते यदिमौ जैमिनेरनन्तरमुत्पन्नौ भवेताम्। तथाप्यनयोः प्राचीनतरत्वे कोऽपि मनीषी न संशेते। अनयोः सिद्धान्तान् वयं लिपिबद्धान् न प्राप्नुमः, न चैतयोः कश्चन ग्रन्थं

१. (६-५-१७)

वोपलभामहे। इदमवश्यमस्ति यद् व्याकरणस्यान्तिमेनाचार्येण महामुनिना पाणिनिना (६-१-९२) सूत्रेऽनयोरुभयोः स्मरणं कृतम्, तथा तस्यैवानन्तरभाविना व्याकरणमहाभाष्यकारेणाचार्येण पतञ्जलिना (४-१-३-४०) स्वीये व्याख्यान एतौ सादरं समुद्धृतौ। एताभ्यामुभाभ्यामेवाचार्याभ्यामेतयोर्द्वयोरुद्धरणं व्याकरणस्य मीमांसायाश्चाधिकृतविदुषो रूपेण विहितम्। एतेन यत्रैतयोर्महत्त्वं प्रमाणितं भवति, तत्रैवैतयोः—मीमांसाशास्त्रस्य चात्यन्तं प्राचीनत्वमपि स्वतः सिद्ध्यति। एतस्मादतिरिक्तमस्मिन् विषये किमपि विदितं नास्ति।

उपवर्षो[1] बोधायनश्च

अनयोर्द्वयोर्विदुषोरपि गणना तस्यामेव कोटावायाति—येषां मीमांसक-परम्परायां महत्त्वपूर्णं स्थानं वर्तते, परं एषां सम्बन्ध ऐतिहासिकानि तथ्यानि निश्चितरूपेण नोपलभ्यन्ते। इदं तु निश्चितप्रायं यत् जैमिनिमारभ्य शबरस्वामिनं यावद् मीमांसाशास्त्रमधिकृत्य कोऽपि ग्रन्थो नैव रचितः, तथापि काश्चन व्याख्या वृत्तयो वाऽवश्यं विरचिताः—यासां विषये वयं प्रामाणिकानि वृत्तान्युपलभामहे। तेषामाधारेण वयमुपवर्षं बोधायनं च तासां वृत्तीनां लेखकत्वेनोपकल्पयामः। निश्चप्रचमेवोपवर्षो वृत्तिकार आसीत्, यतो हि स्वकीय-प्रत्यक्षसूत्रस्य व्याख्याने आचार्यः शबरो महताऽऽदरेणोपवर्षस्य नाम गृह्णाति तथा तत्रैव वृत्तिग्रन्थस्योल्लेखमपि करोति। एतेनानयोरुभयोः पारस्परिकः सम्बन्धः कल्पनीयो भवति। कौशिकसूत्रकारः[2] पद्धति ···आथर्वणिकः केशवोऽपि उपवर्षं स्मरति तथा तस्य कालं पाणिनेः पूर्ववर्तिनं सङ्केतयति।

बोधायनोऽपि वृत्तिकार आसीत्, परं समालोचकपरम्परा विषयेऽस्मिन् नैकानि मतानि प्रकटयति। बहवो विद्वांस उपवर्षं बोधायनं च पृथक् पृथगनङ्गीकृत्यैकमेव मन्वते। एवंविधेषु विवेचकेषु महामहोपाध्यायकुप्पुस्वामिशास्त्रिणामभिधानं गणनीय-

---

१. शबरस्वामी "भगवान् उपवर्षः" अथवा "इति वृत्तिकारः"।

(अ) दर्शनोदयः—(भवदास) कुप्पुस्वामी शास्त्री

(आ) जैमिनीय न्या० वि० भूमिका, महामहोपाध्याय शिवदत्तशर्मा पृ० १, समुदितस्याप्यस्य मीमांसाशास्त्रस्योपरि वृत्तिर्व्याकरणाचार्य-भगवत्पाणिनिगुरु-भगवद्वर्ष-सहोदरेण कथासरित्सागरीयकथापीठलम्बकोपवर्णितनन्दराज्यसमयवर्तिना भगवतोपवर्षेण कृता!

२. उपवर्षाचार्येणोक्तम्। मीमांसायां स्मृतिपदे कल्पसूत्राधिकरणे····इति भगवतोपवर्षाचार्येण प्रतिपादितम्। (कौशिकसूत्र पृ० ३०७)

मस्ति । 'प्रपञ्च-हृदय' [1]स्याधारेण महामहोपाध्याय--डॉ०-गङ्गानाथझा उमेशमिश्रश्चै-तयोर्विभिन्नतायां विश्वसितः। अनयोर्विचारानुसारं बोधायनः सम्भवतः स एव विद्यते--यस्य वृतेराधारेणाचार्यो रामानुजः श्रीभाष्यमरीरचत्। इमं मतभेदमपाकर्तुं कोऽपि प्रामाणिकोऽवलम्बो नोपलभ्यते, यत एतयोर्द्वयोरपि विचारकयोर्जीवनविषये इतिहासः साम्प्रतं तमिस्रमेवाश्रयते । तथापि डॉ० झा महोदयोऽस्य कालं ख्रीस्ताब्दात् पूर्वं निर्धारयति तथा तयोः समकालिकतायां विश्वसिति ।

भवदासः

उपवर्षबोधायनयोरिवैव भवदासमपि वयमेकस्य वृत्तिकर्तृरूपेणैवोपलाभामहे, परमस्या विचारधाराया विषये वयमधिके प्रकाशे वर्तामहे । 'प्रपञ्चहृदय' स्याधारेणेदं ज्ञायते यदयमाचार्यशबरस्य पूर्वज आसीत्। एतस्य मन्तव्यान्यतीव विकसितानि स्वतन्त्राणि चाभवन् येषां खण्डनाय स्वयं कुमारिलभट्टः तदनुयायिनश्च कटिबद्धा अभूवन् । श्लोकवार्तिके---

'वृत्त्यन्तरेषु केषुचिद् लौकिकार्थव्यतिक्रमः' (श्लोक सं० ३३) एतस्य पद्यस्य व्याख्यां विदधाना आचार्य मिश्राः 'वृत्त्यन्तरेषु केषुचिद्' पदेन भवदासादीन् गृह्णन्ति । स्वयं कुमारिलभट्टा अपि

प्रदर्शनार्थमित्येके, केचिन्नानार्थवाचिनः ।
समुदायादवच्छिन्नं भवदासेन कल्पितात् ।।[2]

अस्य प्रथमसूत्रस्य व्याख्यानप्रकरण एव भवदासं स्मरन्ति। भवदासो हि 'अथातो धर्म जिज्ञासा' इति प्रथमे सूत्रे 'अथातः' इत्यनयोः शब्दयोरानन्तर्यबोधक शक्तिं मनुते, केवलम् 'अथ' 'अतः' एतयोर्न। अत्र तु स लौकिकीनां परम्पराणामपि निराकरणस्य साहसं कुर्वन् प्रकटीभवति तदर्थं स्वयं भाष्यकारायाऽस्य प्रथमसूत्रस्य व्याख्यां कुर्वत इदमावश्यकं भवति यत् 'सूत्राणां त एवार्थाः सन्ति ये लोके प्रसिद्धाः' इति। लौकिकस्यार्थस्य पोषणं विधाय स भवदासस्य दुःसाहसं प्रति सङ्केतपूर्वकं तदीयामान्यतां स्पष्टयति। एतेन वयं भवदासस्य सिद्धान्तानां स्वतन्त्रतायाः स्पष्टतायाश्च परिचयं प्राप्तुं प्रभवामः । एवमेव "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धि-जन्म, तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भानत्वात्" इति सूत्रव्याख्यानावसरे भवदासेनै-तद् भागद्वये विभज्य 'तत्प्रत्यक्षम्" इत्यन्तमंशं प्रत्यक्षस्य परिभाषाबोधकमग्रिमांशं च तस्य धर्मं प्रति 'अनिमित्तत्वाबाधकं' स्वीकृतम् । कुमारिलस्य व्याख्यानाद् वयमेतौ

१. ३९, त्रिवेन्द्रम् संस्कृत-सीरिजतः प्रकाशितम् ।
२. पृ० २०-२२ ।

प्रति सङ्केतौ प्राप्नुमः। एतेभ्यः सर्वेभ्यो भवदासस्य पाण्डित्यस्य विचार-स्वातन्त्र्यस्य च वयं परिचयं तु प्राप्नुमः, परं तस्य कालविषये जीवनविषये च कस्मिंश्चिदपि निश्चिते तथ्ये न गन्तुं पारयामः। भवतु नाम किमपि, निश्चतमेतावत् शबरस्य पूर्ववर्ती--एकः श्रेष्ठो मीमांसाशास्त्र्यवर्तत, अत्र तु नास्ति कस्यापि संशयः। अस्य वृत्तेरप्रामाण्ये सत्यप्यस्य सिद्धान्ता एतस्यास्तित्वपोषकाः सन्ति।

६. स्वर्णयुगम्

एतावत्पर्यन्तं यो दीर्घः कालः तं मीमांसाया आदियुगमिति कथयितु शक्नुमः। मीमांसायाः प्रारम्भिकं रूपमुपस्थापितम्। तयोत्तरवर्तिनां विचारकाणामेका पृष्ठभूमिः सज्जीकृता--अस्मिन् नास्ति कस्यापि मनीषिणः संशयः। तथापि वयमत्र कालस्य विचारकाणां किमपीतिवृत्तं न प्राप्नुमो न वा तेषां विचाराणां सङ्कलनमेव। अत एव विचारकाणां विचाराणां चोभाभ्यामपि दृष्टिभ्यां वयमिममादियुगमस्पष्टमेव लभामहे यथा हि स्वभावतो भवत्येव। यत्रैतस्मिन् युगे वयं मीमांसायाः सिद्धान्तान् सूत्रबद्धान् प्राप्तुम-स्तत्र तेषु वृत्तीनां व्याख्यानानाञ्चापि सम्भावनां कुर्मः। मीमांसाया यावन्तः सिद्धान्ता अनेकाभ्यो युगपरम्पराभ्योऽस्त व्यस्ता भवन्ति स्म, तेषामस्मिन्नेव युगे महर्षि जैमिनिः एकरूपतां प्रादात्। तथा पूर्वासां परम्पराणामियत्या विद्वत्तया प्रौढतया कौशलेन च सह प्रतिनिधित्वं विहितवान् येन जना जैमिनिमेव मीमांसाया आद्यं प्रवर्तकमङ्गीकर्तुं प्रवृत्ताः। यथा स्वराज्यान्दोलनस्य प्रथम प्रवर्तका महात्मगान्धिनो नासन् यतो हि तेभ्यः पूर्वं तिलकसदृक्षा महान्तो मन्त्रदातार उत्पन्ना अभूवन्। तथाप्यस्यां दिशि पूज्यगान्धिमहोदया यावतीः परम्पराः प्राप्तवन्तस्तासां सर्वासां तैरियत्या नीतिपूर्णया पद्धत्या प्रातिनिध्यं विहितं यस्माद् जनास्तेभ्यः पूर्वतरान् प्रवर्तकान् व्यस्मार्षुः तथपीतिवृत्तस्य परम्परायां तेषामादरणीयं स्थानमस्ति सुरक्षितम्। वस्तुत इयमेव स्थितिर्मीमांसाया इतरेषामाचार्याणां तथा महर्षिजैमिनेर्विषये युक्ताऽस्ति।

एतदनन्तरं जैमिनिसूत्राणां या वृत्तयश्च लिखिताः तासामादियुगेन सह वृत्तियुग इति व्यवहारो भवितुमर्हति। अथ द्वितीयाध्यायः प्रारभ्यते, वस्तुत एतदारभ्यैव मीमांसाशास्त्रस्य शास्त्रीयता प्राप्यते। अतएव वयमेतद् युगं--यस्य विवेचनं प्रस्तूयते, मीमांसाशास्त्रस्येतिहासे स्वर्णयुगं कथयितुं शक्नुमः। स्वनामधन्यो महान् शबरस्वाम्ये-चास्य युगस्य प्रवर्तकः सिध्यति।

सामान्यपरिचयः

यदाऽस्माकं पुण्यभूभागेऽस्मिन्नाचार्यशबरस्य पदार्पणं भवति, इतिहासाद् वयं तस्यानुमानमतीव प्रयत्नानन्तरमपि कर्तुं न समर्था अभूम। तदा पुनर्वयं तस्य कालस्य परिस्थितीनां तु लेखा एव कथं प्राप्तुं प्रभवामः। आवश्यकतैवाविष्कारस्य जननी

विद्यते, अत एवास्माकं ताः परिस्थितयोऽपि विचारणीया आपन्नाः--याश्च श्री शबर-स्याविर्भावं प्रैरयन् ।

श्रीशबरस्वामिनः पूर्वं मीमांसाशास्त्रस्य स्थितिरनिश्चितायामवस्थायामवर्तत,तदा-विर्भावानन्तरमपि शास्त्रीयताया उपयोगितायाश्च दृष्ट्या तस्य काऽपि समुन्नता स्थितिः न बभूव। तावन्तं कालं यावत् मीमांसाया उद्देश्यमन्येषां सम्प्रदाय-विशेषाणां सिद्धान्तानां खण्डनं प्रति नोन्मुखमभूत्, केवलं याज्ञिकपरम्पराणां समीकरण एव तस्याः शक्तिरावश्यकताश्च निहिता आसन् । न चैतादृश्यः काश्चनावश्यकता एवोदिताः । किन्तु शबरस्योदयं यावदीदृशाः सम्प्रदाया अपि प्रवर्त्तिता आसन् ये वेदानाक्षिपन्ति स्म, अथवा केवलं वेदाक्रमणमेव यैः स्वीयं लक्ष्यं निर्धारितमासीत् । यदर्थं शबरस्वामिने कटिबद्धताऽऽवश्यक्यभूत् तथा वयमेतस्मादेव सर्वतः प्रथमं तत एवैतां भावनां प्राप्नुमः । आत्मतत्त्वविवेचनावसरे तेषु यस्य विज्ञानवादस्य खण्डनं पश्यामः, तदस्य प्रत्यक्षं प्रमाणमस्ति । अत्रैवागत्य "मीमांसाशास्त्रं" यत् पूर्वं केवलं याज्ञिक-विचारधाराया एकं निकषोपलमात्रमभासीत्, वेदस्य रक्षाव्रतं धारयति--यस्य निर्वाहायास्य दर्शनस्य समग्रविशेषतानां निखिलेन कर्तव्यता समापन्ना । इदं युगं तासामेव विशिष्टावश्यकतानां पूर्तेः सङ्कलितं स्वरूपं विद्यते, तथाऽऽचार्यशबर एतासां समस्यानां मूर्तिमान् समाधानम् ।

जीवन-परिचयः

शबरस्वामिनो जीवन-विषयेऽद्य यावदितिहासोऽपि निश्चिततथ्यानि यावन्न प्राप्तः । तेषां विचाराणां विषये वयं यावत्यधिके प्रकाशे वर्तामहे, जीवनस्य विषये तावत्येवाधिके तमसि । अस्माकं प्राचीनाचार्यागामियमेका सामान्या विशे-षताऽस्ति यत् ते स्वीया रचनाः स्वस्य जीवन-परिचयात् सर्वथा वञ्चिता अथवा दूरे रक्षणायैव प्रायतन्त । एतदाधारेण श्रीशबरस्य भाष्यादपि तेषां जीवनमनिर्णेय-मपि चाविज्ञेयमस्ति । तथापि अस्माकमितिहासविद्भिर्विचारशास्त्रिभिरस्य महा-पुरुषस्य जीवन-विषये गवेषणयां न्यूनता न कृता । अतस्तैरुपस्थापितानि मन्तव्यान्य-वलम्ब्य विचारः करिष्यते ।

कतिपयानां विदुषां मन्तव्यमस्ति यद् शबरस्वामिनः प्रथमम्—'आदित्यदेव' इति नामासीत्, एते च महान्तो नृपतयोऽवर्तन्त—यैश्चतुर्णां वर्णानां चतसृभिः पत्नीभिर्विवाहः कृतः—याभ्यस्तेषां षट् पुत्रा अजायन्त—१—प्रथमाया ब्राह्मणपत्न्या वराहमिहिरनामा पुत्रोऽजनि—येनाधिकृतज्योतिर्विद्रूपेण प्रतिष्ठोपलब्धा । २—द्वितीयक्षत्रियपत्न्यां भर्तृहरिणा विक्रमेण च जन्म प्राप्तम्, यौ प्रौढशासक रूपेण विख्यातावास्ताम् । ३—तृतीयवैश्यपत्न्यां हरचन्दो वैद्यस्तथा कुशलः-

शङ्कश्चेति द्वे सन्तती सञ्जाते। ४—चतुर्थायाः शूद्रपत्न्या अमरनामकमपत्य-मजायत। एतेष्वमरेण विनाऽन्याः सर्वा अपि व्यक्तयः प्रायेणैतिहासिक्यः सन्ति। तिस्रस्त्वेतादृश्यः सन्ति यासां काल इतिहासाद् निःसार्येत चेद्—बहुष्वंशेषु सोऽपूर्ण एवावशिष्यते। अस्य कथनस्य समर्थनाय परम्परातो वयमेनं श्लोकमुपलभामहे—

ब्राह्मण्यामभवद्वराहमिहिरो ज्योर्विदामग्रणी,
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायां हरचन्दवैद्यतिलको जातश्च शङ्कुः कृती,
शूद्रायाममरः षडेव शबरस्वामिद्विजस्यात्मजाः॥१॥

अस्मिंस्तु शबरो द्विजः कथितः, परमयमीदृशः साङ्घातिकः शब्दोऽस्ति येन वयं कस्या अपि जातेः सम्बन्धे कमपि निर्णयं न प्राप्नुमः। केवलं सामूहिकरूपेणेयदेव ज्ञायते यत् स चतुर्थवर्णे नाभूत्, यथा हि धर्मशास्त्रेण सम्मतः—एको ब्राह्मणः क्रमशश्चतुर्णां वर्णानां स्त्रीभिः सह विवाहान् कर्तुमधिकरोति, क्षत्रियस्त्रयाणां वर्णानां, वैश्य उभयोर्वर्णयोस्तथा शूद्रोऽवशिष्टस्य वर्णस्य स्त्रिया सहैव वोढुमनुमत आसीत्। ब्राह्मणस्य कृते चतसृभिः स्त्रीभिः सह चत्वारो विवाहाः क्रमशोऽन्यायपूर्णा नासन्। संस्कारस्यैकस्या आधारभूमेः सत्त्वेऽपि द्विजशब्दो यावताधिक्येन ब्राह्मणेषु रूढोऽस्ति, तथा स यावता वेगेन ब्राह्मणत्वस्य बोधनायालं भवति, अन्ययोर्द्वयोः (क्षत्रिय वैश्ययोः) वर्णयोर्नैव। चत्वारो विवाहा द्विजशब्दश्चाभ्यां द्वाभ्यामेव निमित्ताभ्यां वयमाचार्यं शबरं ब्राह्मणं स्वीकर्तुं प्रभवामः। अनेन विवेचनेन यत्र तेषां ब्राह्मणत्वं सिद्ध्यति, तत्र तेषां विभवस्यापि सहजः परिचयो मिलति, यतो हि परम्परा व्यवहारश्चास्मान् बोधयतो यद् विभवस्य प्राचुर्ये सत्येवाधिका विवाहाः क्रियन्ते। परमिमान् सर्वान् विचारान् वयं येष्वाधारेषु स्थिरीकुर्मः, तदद्यावधि तेषां प्रामाणिकतायां विश्वासं कर्तुं न शक्ता अभूम, न वा तेभ्यः कामपि भित्तिं स्थापयितुं समर्था अभवाम। एतेषां सन्दिग्धतायाः कारणानि पुरस्ताद्विशदीकरिष्यामः।

अस्मिन् पद्ये एतेषां सर्वेषां महतामात्मनां लौकिकोत्पादकरूपेण शबरस्वामिनोऽभिहिताः सन्ति। इम एव शबरस्वामिनः पूर्वम् 'आदित्यदेव' नाम्ना आसन्। इदं पूर्वं दर्शितमेव। किन्तु जैनबौद्धसम्प्रदाययोराक्रमणेनाभिभूताः स्वीय-जीवनचर्या-परिवर्तनमावश्यकममन्यन्त। तथैते भयेन भिल्लवेषमादृत्य स्वीयामात्मरक्षां कर्तुं प्रवृत्ताः। तदाप्रभृत्येवैतेषामनुयायिन एतान् "शबर-स्वामी" त्याख्यया सम्बोधयन्त आयान्ति। इयमेका सर्वतः प्रथमा किंवदन्ती विद्यते—या शबर—आदित्यदेवस्य भर्तृहरि-विक्रमस्य च जनकयोरैक्यतायां सन्देहमुत्पादयति। इदमाश्चर्यमेव यद् भर्तृहरि-विक्रमसदृशयोः शक्तिशालिशासक-

योर्जनकः कतिचिद्व्यक्तीनामाक्रमणभयादितस्तत आहिण्डमानो भिल्लुवेषेणावर्तत इति कथनं कथं लोकसङ्गतं हृदयङ्गमं च भवेत्। सम्भाव्यते—एतेषां नाम्नः उपपत्तये, एतेभ्योऽनन्तरं जायमानैस्तैः सम्प्रदायैः (य एतेषां तर्काणां विद्वत्तायाश्चाखेटत्वं प्राप्ता आसन्, येषु च बौद्धानां प्रामुख्यमासीत्) स्वेषां प्रतिष्ठायै तथा स्वाभ्युदयस्य प्रचाराय चैतेन नाम्ना सह कथेयं सम्बद्धा कृता स्यात्, किञ्चैषां नामतो लाभोऽयं प्राप्तो भवेत् !

कालः

ऐतिहासिका विद्वांस एतद्विषये कमप्याशयं न प्रदर्शितवन्तः। यदा वयं कालनिर्णयाय प्रयतामहे तदोपर्युक्त पद्यं ततोऽप्यधिकमाश्चर्यपूर्णं प्रतीयते। वराहमिहिरेण सह यः सम्बन्ध उपरि दर्शितः स यदि वास्तविको मन्यते तदा शबरस्य समय ईशवीय चतुर्थशतकस्य निकटवर्ती स्थिरो भवति। किन्तु वराहमिहिरेण सह संयुक्तं 'विक्रमनृप' इति पदमेतद्विषये संशयमुत्पादयति। यद्ययं स एवैतिहासिको विक्रमादित्योऽस्ति—यस्य स्मृतौ संवत्सरः प्रवर्तितः, तदा वराहमिहिरस्य समकालिको भवितुं नार्हति। विक्रमादित्यस्य कालस्तु ईसातः पूर्वं ५७ सप्तपञ्चाशत् संवत्सरो मन्यते। केचन एवमपि प्रमाणयन्ति यद् शबरस्वामी विक्रमादित्यस्य प्रधानेषु पण्डितेष्ववर्तत, तथा स विक्रमादित्यस्य गुरुरासीत्। अत एव यस्य विक्रमनृपतेः कीर्तनं शबरस्यापत्यरूपेण विहितमस्ति, स निश्चितमेव विक्रमादित्यो नास्ति तथा तस्मादेव कैश्चन कारणैरुपर्युक्तप्रतिपादनस्याप्रामाण्यं संशयास्पदमेव नैवापितु निश्चितं भवति। इत्थं शबरस्य काल-विषये वयं सामान्यरूपेणेदं त्वनुमातुं शक्नुमो यत् सोऽवश्यमेव ईशोश्चतुर्थशत्याः पूर्वं विद्यमान आसीदिति। स्वकीये भाष्ये तेन ८-१-२ (स्थले) महाभारतस्यादिपर्वतः १-४९ तमं पद्यमुद्धृतम्—तस्मादपि तस्य पूर्वता प्रमाणतां प्राप्नोति। एतेष्वाधारेषु वयं शबरस्य कालनिर्धारणे तावतीं सरलतां प्रामाणिकतां च नैव स्वीकुर्मः—यावतीं हि तदीयाया रचनाया अवलम्बेन प्राप्नुमः। शबरभाष्यस्य दशमाध्यायस्याष्टमपादस्य चतुर्थे सूत्रे समासविषये विभिन्नानि मतानि प्रस्तुवन्नाचार्यः शबरः कथयति—

> **"इति भगवान् कात्यायनो मन्यते स्म"**
> **"नेति भगवान् पाणिनिः।"**

एतयोर्द्वयोः शब्दशास्त्रिणोरेतेन प्रत्यक्षमुल्लिखतं वर्तते, पतञ्जलेर्नैव। यतो हि पतञ्जलिः कात्यायनस्य पश्चात् समुत्पन्नः। एतेन वयं शबरस्य कालं सहजमेव कात्यायनादनन्तरं पतञ्जलेश्च पूर्वं निश्चेतुं शक्नुमः। एतयोर्द्वयोर्विवेचनं कुर्वन्नग्रे शबरस्वामी लिखति—

सद्वादित्वात् पाणिनेर्वचनं प्रमाणम्, असद्वादित्वात् न कात्यायनस्य, असद्वादी हि विद्यमानमपि अनुपलभ्य ब्रूयात् । (१०८–४)

तस्यास्माद् लेखाद् भगवति पाणिनौ तदीया श्रद्धातिशयता स्पष्टा भवति, तथेदपि प्रमाणीभवति यत् तेभ्यः पूर्वं कात्यायनस्य सिद्धान्ताः प्रकाशमागता आसन् । एतस्मादेव तु ते दार्ढ्येन तमसद्वद्वादीति कथयन्ति । भाण्डारकरमहोदयेन कात्यायनस्य समय ईसातः पूर्ववर्तिन्यां चतुर्थशत्यां तथा पातञ्जलेः समय ईसातः पूर्वतनी द्वितीया शती निर्णीता । अनयोरुभयोर्मध्ये ईसातः पूर्वतनीं तृतीयां शतीं वयं शबरस्वामिनः कालं निर्णेतुं पारयामः । स्वकीये लेखे पूज्यपाद-श्रीपट्टाभिरामशास्त्रिभिरपि निर्णयोऽयमेवाङ्गीकृतः । अस्मादधिकमेतद्विषये किमपि प्रमाणं नोपलभ्यते ।

देशः

शबरस्वामिनः कालविषये वयमवश्यमनिश्चिताः स्मः परं मौलिकमन्तरं न धारयामः । किन्तु देशस्य सम्बन्धे महन्महत्सु विद्वत्सु सदा मतभेद एवावर्तत । तेषामेव भाष्ये समुपलभ्यमानानि कानिचित् तथ्यान्याधृत्य माननीयाः डॉ॰झा महोदया-स्तानुत्तरदेशीयान् काश्मीरस्य तक्षशिलाया वा निवासिन इति साधयन्ति । तेषामेवानु-यायिनो माननीया मिश्रमहोदया भाष्यस्य कियन्ति चिदीदृशान्युदाहणानि प्रस्तुवन्ति–– यैः शबरस्वामी मिथिलाया निवासीति साधयितुं शक्यते, तथा तेषामेवोदाहरणानां सङ्गतिस्तान् दाक्षिणात्यानपि प्रकटयति । इत्थं वयं कस्मिन्नपि निश्चिते तथ्ये गन्तुमात्मानं सर्वथाऽसमर्थं प्राप्नुमः । एतेषां कतिपयान्याधारतथ्यान्यत्र प्रस्तूयन्ते––

श्रद्धेया डॉ॰ झामहोदया येनाधारेण शबरमुत्तरभारतवासिनं दर्शयन्ति त आधारा इम एव सन्ति––येषां साहाय्येन वयं मिथिलाया निवासिनं साधयितुं शक्नुमः किन्तूत्तरभारतेऽपि येषु तथ्येषु ते काश्मीरस्य तक्षशिलाया वा सम्बन्धं स्थिरयन्ति तेष्विमानि प्रमुखानि सन्ति (७-१-७) प्रकरण आचार्यः श्रीशबरः **'वाससि राडाः श्रूयन्ते, वासो रञ्जयन्तीति वाससि च क्रियते'** इति वाक्यं प्रस्तुवन् संशयमुपस्थापयति––**"असौ स्त्र्यर्थः पुरुषार्थो वा"** । अस्मात् सन्देहाद् वयं जानीमो यत् शबर ईदृशस्य प्रदेशस्य निवास्यासीद्, यत्र स्त्रीणां (उभाभ्यामपि) रञ्जितवस्त्रधारणमुपहासास्पदं नाभूत् अथवा परम्परायां सम्मिलितमभूत् । स्त्रीपुरुषयो-रुभयोरपि रञ्जितवस्त्रधारणस्य परम्परा काश्मीरेष्वथवोत्तर-पश्चिमदेशे प्रचलिता-ऽवर्तत । तस्मादेव वयं तं तत्रत्यं निवासिनं स्वीकर्तुं प्रभवामः ।

महामहोपाध्यायः डा॰ उमेशमिश्रमहाभागा येषां तर्काणामाधारेण तानुत्तर-देशीयान् साधयन्ति ते निम्नोक्ता विद्यन्ते, ये उत्तरभारतेऽपि विशिष्य मिथिलायामेव प्रवर्तन्ते—

१—शबरं वयं पञ्चाम्बुप्रदेशवासिनं स्वीकर्तुं न शक्नुमः, यतो हि स (७-१-८) प्रकरणे लिखति—"**वाहीकोऽतिथिरागतः यवान्नमस्मै प्रक्रियताम् ।**" पञ्चाम्बुप्रदेशे कस्याप्यतिथेरागमनानन्तरं भोजनदानस्य पद्धतिरस्ति, अत एव यदि स तत्रत्योऽभविष्यत् कस्या अपि नूतनताया अभावे एतद्विषयिण्याः सूचनायाः प्रदानस्य प्रयासं नाकरिष्यत्। तस्यायं प्रयास एवास्मान् द्योतयति स पञ्चाम्बुप्रदेशवास्तव्यो नासीदिति। तस्मादेवास्या नवीनरीतेरुद्धरणं तदर्थमावश्यकमभूत्।

२ - शतपथब्राह्मणस्यैकं वाक्यमस्ति—'तस्माद् वराहं गावोऽनुधावन्ति" (४-४-३-९) एतद् विचारयन् (१-३-६-४८ पृ०) आचार्यः शबर एतदेकस्याः प्रथाया रूपेणोद्धरति। एनां परम्परां प्रथारूपेण वयमद्यापि दीपावल्याः पूर्वस्मिन् दिवसे सम्पद्यमानायां धार्मिकक्रियायां पश्यामः यया शबरस्य मिथिलया सम्बन्धोऽवगम्यते।

३—"पयसा (२-३-१) षाष्टिकं भुञ्जीत, यदि शालीं भुञ्जीत, तत्र दधि उपसिञ्चेत्" (षाष्टिक नामकं धान्यं दुग्धेन सह भोक्तव्यं, तथा शाली भुज्यते चेत् सा दध्ना सह भोक्तव्या) इयं पद्धतिर्यथावदधुनाऽपि मिथिलायां प्रवृत्ता विद्यते।

४—(३-१-२) स्थले "गर्भदासः कर्मार्थ एव स्वामिनोऽनड्वांश्च क्रीयते" **वाक्ये**-नानेन शबरो दर्शयति यद् जन्मजातो दासः स्वामिन एव क्रीयते। एतस्मात् स दासप्रथां चर्चयति या च बहोः कालात्पूर्वं प्रचलिता, तथाद्यापि उत्तरे भारते प्रचलिता वर्तते, दक्षिणे नैव।

५—(३-१-७३) स्थले श्रीस्वामिनो '**दशापवित्रेण ग्रहं सम्मार्ष्टि**' इत्युद्धरन्ति। एतादृशी प्रथा साम्प्रतमप्युत्तरे भारते प्रवर्तते।

६—(५-३-२६) तथा (७-२-१२) स्थले शबर उद्धरति '**अग्निचिता पक्षिणो न अशितव्याः, शालि-सूप-मांसापूपैर्देवदत्तः भोजयितव्यः**' एतयोर्द्वयोर्वाक्ययोः प्रथमे पक्षिणामशनस्य निषेधो विद्यते यः पूर्वप्राप्तेः सूचकः। द्वितीये भोज्यपदार्थानां परिगणना क्रियते। तथा अस्य विधेरग्रे गत्वा यज्ञदत्तेऽप्यतिदेशः क्रियते। द्वितीयं विधानमेकस्य शिष्टस्य स्वागतार्थमस्ति। एतद्द्वयं विचार्य-आचार्यमिश्रा लिखन्ति यद् शबर एतादृशे प्रदेशे निवसति स्म, यत्रोपरिलिखितानि वस्तूनि नियमितरूपेण भोजने प्रयुज्यन्ते स्म। उत्तरभारते विशिष्य विहारप्रान्तेऽधुनाप्युच्चपरिवारेषु एतदशनपानं प्रचलितं वर्तते।

७—इयदेव नहि, मांसाहारेण सहैव शबरो मत्स्यभोजन-परम्पराया अप्यभिज्ञ आसी-दिति प्रतीयते। १०-७-६६स्थले स कथयति—"एकस्मिन् कार्ये विकल्पेन यानि साधनानि श्रूयन्ते, तानि परस्परं विरोधीनि भवन्ति। विरोधिनां च न सह प्रवृत्तिः, लोकवत्—

मत्स्यान्न यसा समश्पनीयादिति। यद्यपि सगुणा मत्स्या भवन्ति, तथापि पयसा सह न समश्यन्ते।' शबरस्यास्य वाक्यविवेचनया प्रतीयते यत् न केवलं मत्स्यभुग्देशेन स्वयं परिचितः किन्तु तद्गतविशेषज्ञोऽपि। एकस्मिन्नीदृशे स्थाने यत्रान्यस्मात् कस्माच्चिदुदाहरणादपि कार्यं साधयितुं शक्यते, तथा साधारणोदाहरणप्रदर्शनेन कार्यसाफल्यं सिध्यति। तत्र मत्स्यानामुदाहरणाद् वयमेवं विश्वसिमः यत् सोऽनया पद्धत्या घनिष्ठं सम्बन्धं निक्षिपतीति। अधुनापि मिथिलायां प्राचुर्येणास्याः पद्धतेः प्रचारोऽस्ति।

८—(७-२-२०) प्रकरणे त्वाचार्यमहोदय आत्मानमेकं पाकक्रियाविशेषज्ञमिवोपस्थापयन् तथा दर्शयति यत् पाकनाम्न्याः क्रियाया एकरूपत्वेऽपि व्यवहृतावनेकरूपतां धत्ते। ओदनपाचनस्य पृथक् किया विद्यते तथा गुडपाकस्यान्या। इदं किमप्यावश्यकं नास्ति यद् य ओदनं पाचयितुं वेत्ति स शिक्षणं विनैव गुडपाकमपि निर्मातुं शक्नुयात्। "स्याद् वैरूप्यं यथा पाके। यथैक एवायमर्थः पाको नाम। तस्यार्थान्तिरे वैरूप्यं भवति। अन्यथालक्षण ओदनस्य पाकः, अन्यथालक्षणो गुडस्य। येनोदनपाको गृहीतः नासावशिक्षित्वा गुडं पक्तुं जानाति।" डॉ० मिश्राः कथयन्ति यत् सोऽनयोः क्रिययोर्भेदं स्पष्टरूपेणाजानात् तथैवंविधे देशेऽवसत् यत्रैते द्वे अपि क्रिये प्रचलिते अभूताम्। उत्तरभारतस्य विहारप्रान्तेऽनयोर्द्वयोरपि भूयान् प्रचारो दृश्यते। एवमेव स (९-४-५२) स्थले कथयति—"ओदने दधि दत्वाऽभ्यवहर्तव्यम्।" तथाग्रे (१०-१६-२२) स्थाने लिखति—"दधिघृतशालिभिर्देवदत्तो भोजयितव्यः" इति। एते उभे अपि प्रथे अधुनापि तन्दुलप्रधाने देशे मिथिलायां प्रचलिते स्तः।

९—केवलं तक्रमेव नहि, तैलस्य भोजनमपि शबरस्वाम्युपादेयं मनुते तथा तत् क्षणिकं सदपि शक्ति-स्मृति-बुद्धि-वयसां बर्द्धकं कथयति। "यथा तैलपानं घृतपानं वा भङ्गित्वेऽपि सति कालान्तरे मेधास्मृतिबलपुष्टयादीनि फलानि करोति (७-१-५)। अस्मिन्नेक एव स्थले नैवापितु (१-२[1]-६५, १०[2]-६-५, १०[3]-६-२२, १०[4]-१-३६) एतेषु प्रमुखस्थलेषु शबरस्तैलस्य

१. (१०-२-६५) यद्यपि न श्रूयते तैलेन स्नेहयितव्यमिति, तथापि समानकार्यत्वं तैलं घृतस्य विनिवर्तकं भवति।

२. (१०-६-५) यथा मासं घृततैलाभ्यां देवदत्तो भोजयितव्य इत्युक्तेऽर्द्धमासं घृतेनार्द्धं मासं तैलेन।

३. (१०-६-२२) देवदत्तवद् यज्ञदत्तस्तैलेनेत्युक्ते स्नेह नसामान्यात् तैलं स्नेहनकार्य एव विनियुज्यते नोदनकार्ये।

(४१०-३-१६) सामान्यं ह्यस्य स्नेहसामर्थ्यं घृतेनेति।

महत्त्वमुपवर्णयति तथा तस्योपादेयत्वं साधयति। इदमपि तस्मिन् समये यदा हि घृतं पर्याप्तरूपेणोपलभ्यमभूत्। तैलस्य प्रशंसेयं प्रमाणयति यत् कश्मिंश्चिदीदृशे प्रदेशेऽवसत्, यत्र तैलमाधिक्येन भोजन उपयुक्तमासीत्। विहारेऽद्यापि तैलस्य प्रयोगाः प्रदेशान्तरापेक्षयाधिक्येन भवति।

१०—(६[१]-१-५) स्थाने 'तृतीयकाश्चतुर्थकाश्च' अस्माद् वाक्यात् स नियमितस्य रोगस्य चर्चां करोति, यो हि तृतीये चतुर्थे दिने भवति। सम्भवतोऽयं-विषमज्वर (मलेरिया) एव भवितुमर्हति, यो विहारे प्राचुर्येण भवति।

११—(९-४-४१)[२] तमे प्रकरण-आचार्यः शबरः तस्याः पद्धतेरुल्लेखं करोति, यस्या अनुसारं स्थूलतन्दुला दध्ना सह, सूक्ष्मतन्दुला दुग्धेन सह पक्त्वा भोक्तव्या भवन्ति।

आचार्य-मिश्रानुसारमिमे उभे अपि प्रणाल्यौ प्राथमिके काले प्रचलिते अभूताम्।

माननीयस्य मिश्रस्येदमनुसन्धानं शबरस्वामिन उत्तरदेशीयतायाः साधने पर्याप्तमस्ति। एतेष्वेव केचनाधारा ईदृशा अपि सन्ति य एतेषां दाक्षिणात्यत्वप्रतिपत्तौ सहायका भवन्ति।

२—वराहं गावोऽनुधावन्ति'' प्रभृतिभिर्यासां धार्मिकक्रियाणां सङ्केतोऽस्ति ता येन केनापि रूपेण दक्षिण-देशेऽपि प्रचलिता विद्यन्ते। उद्वृषभयज्ञाद्यन्या ईदृश्यः क्रियास्तत्र प्रचार आयान्ति।

३—षष्टि ६० दिनेषूत्पद्यमानस्य धान्यस्य दुग्धेन शालिधान्यस्य च दध्ना सहाशनस्य चर्चा कृताऽस्ति दक्षिणादेशे प्राचुर्येणास्याः प्रथायाः प्रचारोऽधुना पर्यन्तं वर्तते।

४—जन्मजातस्य दासस्य विषये यत् किञ्चदपि कथितमस्ति तत् कस्यामपि मात्रायां दक्षिणभारते प्राप्यं विद्यते। इदमवश्यमस्ति तस्योत्तरभारतमिव तत्राधिकं विकासो न भवितुमशक्नोत् तथाप्युच्चतमानां·······भूस्वामिनां गृहेष्वेतस्य स्वरूपं किञ्चिद् न्यूनाधिकरूपेण सुरक्षितमस्ति।

दुकूलस्य यया प्रान्तगतजालिकया सम्मार्जनस्य वर्णनं विहितमस्ति, दक्षिणदेशोऽप्यनया रीत्या शून्यो नास्ति। एवमेव तैलभोजनस्याधिक्यमपि वयं मिथिलायां

---

१. (६-१-५) विभाषां हि स्म पाणिनिरधीते।

२. (९-४-४१) ये स्थविष्ठास्तानिन्द्राय प्रदान्त्रे दधंश्चरूम् येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति।

मद्रासप्रान्ते च समानरूपेण विलोकयामः। दधि-तक्र-तन्दुलप्रयोगविषये यासां यासामनेक-विधानां वर्णनं कृतमस्ति, ता उभयोरपि प्रदेशयोः समानरूपेणादृतास्सन्ति। विषमज्वरोऽपि तण्डुलोत्पादकप्रदेशेषु सर्वशः प्रसृतो वर्तत एव। यथेमानि सर्वाणि तथ्यानि मिथिलायां साध्यन्ते तथैव दक्षिणप्रदेशेऽपि। शबरस्वामिप्रभृति-नामान्यपि 'स्वामि' पदघटितानि दक्षिणभारते प्रचुरतया प्रयुज्यन्ते। अतोऽनेके विद्वांसः शबरस्वामिनं दाक्षिणात्यं साधयितुं सयुक्तिकं यतन्ते।

तथाप्युपर्युक्तेषूद्धरणेषु मत्स्यभोजनप्रभृतयोऽनेका ईदृश्यः प्रथा अपि सन्ति—यासां मिथिलायां विशेषतः प्रचारो लक्ष्यते। तथाऽन्ये तर्का अपि शबरस्योत्तरदेशीयता-साधने सबलाः सन्ति। ईदृश्यामवस्थायां यदि शबर उत्तरभारतवासीति स्वीकर्तुं काश्मीरस्याथवा तक्षशिलाया अपेक्षया मिथिलायाः तस्य निवासस्थलतया स्वीकरणं युक्तिसङ्गतं भविष्यति। आरम्भादेव मिथिला दक्षिणभारतं च मीमांसा-दर्शनस्य केन्द्ररूपेणास्ताम्। अत एव तयोः शबरस्वामिसदृक्षस्य महतो दार्शनिकस्य जन्म स्वाभाविकमस्ति। परन्त्वेक ईदृशोऽप्याधारोऽस्ति यस्तस्य दक्षिणात्यत्व-साधनाय प्रेरयति। यदि सत्यमेव शबरेण बौद्धानां भयाद् भिल्लरूपं स्वीकृतं तदा बौद्धानां प्रचारो यावान् दक्षिणभारते पुराऽभूत् तावानुत्तरभारते नैव। शबरस्य भाष्ये वर्णितं विज्ञानवादादि-बौद्धसिद्धान्तानां खण्डनं दृष्ट्वा वयमिदं सहजमेवानुमातुं शक्नुमो यत् स कस्यापि बौद्धप्रचुरस्य प्रान्तस्य निवास्यासीदिति। आचार्यशङ्करस्यापि स एव प्रदेशोऽभिजनः। अस्तु, इयमेतादृशी संशयास्पदरूपा समस्या विद्यते-यस्याः सम्बन्धे कमपि निर्णयं यावद्गमनमसम्भवमिव भवति। तथापि मिथिला-मद्रप्रान्तयोरेकतरस्मिन् प्रान्त एव शबरः कस्मिंश्चन स्थाने निवसन्नासीत्। किञ्चेमौ द्वावपि प्रदेशौ तस्य कार्यक्षेत्रतां गतौ। अनयोरुभयोः क्षेत्रयोस्तस्य पूर्णः प्रभावोऽवर्तत। इत्थं वयं शबरस्वामिनो जीवनकाल-देशादिज्ञानेऽनिश्चितावस्थायामेव वर्तामहे। सम्भवतः[1]-स्तेषां जन्म मद्रप्रदेशेऽभवत् तथा बिहारप्रदेशस्तेषां विचारक्षेत्रमवर्तत।

रचना

शाबरभाष्यमेवैका रचना शबरस्वामिनाम्, या च तेषां ख्यातये तथा तान् 'सरस्वत्या वरदपुत्र' इति साधनाय पर्याप्ता विद्यते। मीमांसायाः क्षेत्रे तु जैमिनि-सूत्राणामनन्तरं सर्वतः प्रथमा कृतिरियमेवोपलभ्यते, या सुलभाऽस्ति। एतस्मादेवास्य प्राचीनत्वं सुस्पष्टम्। भाषया विचारैः शैल्या च शबरस्वामिन इयं रचनेयती व्यवस्थिता मौलिकी च विद्यते यस्या अवलोकनेनेयत्यां प्राचीनतमतायां कस्यापि किं संशय उदियात् रचनेयमनेकैः सुदृढैः प्रमाणैः सङ्ग्रथिता अत एव तस्मिन् प्रारम्भिके

१. विशेषतो द्रष्टव्यः म. म. कुप्पुस्वामि शास्त्रिणां लेखाः।

कालेऽपि रचनाया इयं व्यवस्थितिरुच्चकोटिता सर्वगुणसम्पन्नता च शवरस्य महत्तायां अतिशयेन वैमल्यं योजयन्ति। संस्कृत-साहित्येषु विभिन्न-विषयेषु भाष्याणि प्रणीतानि तेभ्यः सर्वेभ्यः इयमेवैका रचनाऽऽधारभूमिः पथप्रदर्शिकोद्गमस्थली च वर्तते। आचार्यशङ्करस्त्वेतेषां शैल्या अनुकरणमेव नाकार्षित् प्रत्युत तदानुपूर्वीमेवोट्टङ्कयति। तथाहि-शबरः कथयति—"धर्मः प्रसिद्धः, अप्रसिद्धो वा प्रसिद्धश्चेन्न जिज्ञासितव्यः, अप्रसिद्धश्चेन्नतराम्। (शाबरभाष्यं १–१–१) तद्वदेव शङ्कराचार्या अपि कथयन्ति—

'ब्रह्म प्रसिद्धम् अप्रसिद्धं वा प्रसिद्धं चेन्न जिज्ञासितव्यम् अप्रसिद्धञ्चेन्नतराम्'। (शाङ्करभाष्यं १–१–१)

इदमनुकरणमनेकेषु स्थानेष्वियत्यां पराकाष्ठायां प्राप्तं यत्तदनुकरणमिति कथनापेक्षयोद्धरणमिति कथनमधिकं सङ्गतं प्रतीयते। व्याकरणमहाभाष्यकारः पतञ्जलिरपि शबरस्वामिन उत्तरकालिकोऽस्तीति साधितपूर्वम्। अत एव वयं पतञ्जलौ तस्य शैल्यां चापि शबरस्वामिनः प्रभावः स्पष्टं प्रतीयते। सरलातिसरलया भाषया गभीरादपि गभीरतमं विषयं लघु-लघुषु वाक्येषु विभज्य विस्तरेण निरूपणस्य यं प्रकारं व्याकरण-महाभाष्ये पश्यामः स आचार्यशबरस्यैव प्रभावेण विकसित-रूपतया दृश्यते। अवशिष्टानां भाष्याणां विषये तु कथनमेव किम्? यतो हि तान्यत्यन्तमर्वाचीनानि सन्ति।

शबरस्वामिन इमां विस्तृतां कृतिं वयं द्वादशाध्यायानां सङ्कलनरूपेण प्राप्नुमः यस्यां शतशः पादाः, तथा सहस्रशोऽधिकरणानि सन्ति। प्राधान्येनास्या द्वौ भागौ स्तः, सूत्राणि व्याख्या च। प्रथमं यत् किञ्चित् वक्तव्यं तदवलम्ब्य सूचना-संक्षेपेण यत्कथ्यते तदेव सूत्रं कथ्यते। ततः परं तस्यैव वक्तव्यस्य विस्तरेणालोचना-प्रत्यालोचनाभ्यां सहोदाहरणोपन्यासपूर्वकं या विवेचना सा व्याख्या। एतेन वयं विवेच्यं वस्तु विशकलितरूपेण प्रतीमः। स्वीययानया शैल्या शबरो यथा भाष्यं सर्वाङ्गपूर्णं निर्मितवान्, तथैव जैमिनिसूत्राणां महत्त्वमपि प्रतिष्ठापयामास। अत एव तस्य भाष्यं सर्वत्र समानरूपेण समादृतम्। शबरात् पूर्वं जैमिनेः शास्त्रं मर्यादाबद्धं नावर्तत। शबर एव प्रथम आसीद् यश्च तत्तदधिकरणरूपेण विभज्य व्यवस्थापितवान्। अत एवेयं शावरी प्रणाली भाविनि काले ग्रन्थनिर्मातॄणां प्रणाल्या उद्गमस्थानमभवत्। तथा जैमिनिसूत्राणि पठन-पाठन-प्रणाल्योर्गौणान्यभवन्। जैमिनेरनन्तरमनेनैव ग्रन्थेन मीमांसायाः सिद्धान्तानां प्रातिनिध्यमाचरितम्। अस्मात् कारणाद् मीमांसायां शबरस्य स्थानं निश्चितं भवति।

भाषा

भाषाया विषये शबरस्य विचारा अत्यन्तं स्पष्टाः सन्ति, शबरस्वामिभिः सरलातिसरलाया भाषाया व्यवहारस्तु कृत एव, परं स्वस्य भाष्यस्यारम्भ एव स्वीयः प्रकारः स्पष्टीकृतः। ते कथयन्ति--

"लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्। नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा अन्यथा ....इति प्रयत्नगौरवं प्रसज्ज्येत।[१]

यद्यपि शबरस्येयमुक्तिर्जैमिनेः सूत्राणां विषये सम्बद्धाऽस्ति, तथाप्यस्यां तेषां वैयक्तिकी रीतिरुट्टङ्किता वर्तते। त आडम्बररहितया भाषया ग्रन्थं लिखितुमिच्छन्तः कथयन्ति—"यदि भाषा कठिना भविष्यति तदा भावानां गम्भीरतया सहैव भाषाऽप्यस्माकं विवेच्यविषयतां प्राप्स्यति। एतस्मिन् भविष्यत्यस्मभ्यं द्विगुणितः श्रमः।[२] शबरस्येदं कथनं समग्रोच्चकोटिकलेखकानाम् आदर्शभूतमस्ति, ते विना कारणेनेतस्ततोऽध्याहाराक्षेपादिषु न प्रसीदन्ति न वा यथेच्छं शब्दप्रयोगेषु। स्वीयामिमामेव धारां ते 'नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वे' [३]ति कथयन्तोऽभिव्यञ्जयन्ति। गम्भीरातिगम्भीरस्य विषयस्य विवेचनसमयेऽपि ते स्वीयया विचारधारया सहैव भाषाया अपि गम्भीरां तथा दुरूहां कर्तुं नावसरं दित्सन्ति, अपि तु तामाधिक्येन सरलां विधातुं यतन्ते, तथा तस्यै वार्तालापतुल्यायाः स्वाभाविकशैल्याः स्वरूपं ददति। शब्दार्थयोः सम्बन्धकर्तारं खण्डयन्तस्ते लिखन्ति—

"अवश्यमनेन सम्बन्धं कुर्वता केनचिच्छब्देन कर्तव्यः, येन क्रियेत, तस्य केन कृतः ? अथान्येन केनचित् कृतः, तस्य केनेति, तस्य केनेति ? नैवावतिष्ठते : (१-१-५)" इति।

कियत् स्वाभाविकं वाक्यरचनाया रूपम् ? यथा हि वयं प्रतिक्षणं लोके व्यवहरामः तादृगेवेदम्। नैयायिकरचनानामिव शब्दाडम्बरप्राधान्याभावादेव शबरस्वामिनः शैल्यनुकरणीया सिद्धा। अत्रायं सन्तोषस्य विषयः यद् शङ्कराचार्यैः महाभाष्यकारैश्च भाषाविषये शबरस्वामिन एव रीतिरनुसृता।

शैली—

रचनाशैल्येव लेखकस्वरूपपरिचायिका। एतदेवाश्रित्य वयं लेखकस्य मौलिकतामनुमातुं पारयामः। यत्र विचाराणां महत्ताऽऽवश्यिकी, तत्र तेषामभिव्यक्तेः प्रकारोऽपि

१-२-३—शाबरभाष्यं १-१-१।

महत्वाधाने न न्यूनतां भजते। लेखकस्य कुशलतात्रैव परिचीयते यत्र च गभीराति-गभीराणां विषयाणां विवेचनमतिसरलया भषयोपस्थापयेत्। रचनायाः प्रत्येकं पदमेवमेव लेखकस्य व्यक्तित्वस्फोरकं भवति। शबरस्वामिनान्तु वयमेतादृश्याः शैल्या जन्मदातारमेवाकलयामः। तेषां भाष्यस्य विषयो गम्भीरः, किन्तु तेषां शैली तावत्येव सुगमाऽस्ति—यस्यामावश्यकतानुसारेण विस्तारः संक्षेपश्च विलोक्येते। विशिष्य प्रथमाध्यायस्य प्रथमपादस्थानां विषयाणां सुगमया प्रणाल्या तैरतिस्फुटतया दर्शनाय यतितम् यत्र लौकिकाख्यायिकारूपेण सारल्यं सरसत्वं चानुभूयते। विवेचनावसरे लौकिकाभाणकसुभाषतानि सम्प्रदर्श्य विषयं विनोदपूर्णं विधातुं प्रयतितवन्तः। अत एव न केवलं मीमांसादर्शनम् अपि तु तदुत्तरं जाताः सर्वेऽपि भाष्यकारा अस्य महामनसः सततमधमर्णाः। अत्र शङ्कराचार्याः पतञ्जलिमहर्षयश्च निदर्शनम्।

आचार्यः शबरः स्वान् विचारान् द्वेधा विभज्य दर्शयति—प्रथमं सूत्ररूपेण ततस्तस्य विवरणरूपेण। जैमिनेः सिद्धान्तानां लौकिक-व्यवहारोपयोगित्वप्रदर्शने सर्वतोऽधिकं श्रेयः महापुरुषस्यास्यैवेति कथनं नार्थवादाय स्यात्। अस्मिन् भाष्ये प्रायस्तैर्वैदिकानामुदाहरणानां स्पष्टीकरणाय लौकिकोदाहरणान्येव प्रदर्शितानि। अत एव भाष्यस्य दूरूहता सर्वथा दूरीकृता। संक्षेपेणेदं सिध्यति यत्-शाबरी शैली मीमांसाशास्त्रस्यालौकिकार्थप्रतिपादकत्वं व्यवस्थापयन्ती स्वगतवैशिष्ट्येन शास्त्रस्य लोकवेदोभयसम्मतत्वमपि प्रदर्शयति।

शबरस्य वाक्यानि जैमिनिसूत्राणीव न विस्तृतानि किन्तु केवलं प्रतिपाद्य विषयस्य प्रतीकरूपाण्येव। जैमिनिसूत्राणि कामं मीमांसास्रोतस उद्गमस्थानम् किन्तु शाबरी शैली तथा तान्यकरोत् यथाहि तेषामध्ययनमनिवार्यं स्यात्। यथा हि व्याकरणाद्यन्यशास्त्रेषु सूत्राणामध्ययने प्राधान्यमद्यापि सुरक्षितं पश्यामो न तथा मीमांसाशास्त्रे। एतेनेदं ज्ञायते यदिदं शास्त्रं विचारधारायाः कारणात् संक्षेपापेक्षया विस्तारायाधिकं महत्त्वं वितनोति। ईदृश एव क्रमोऽन्येष्वपि विचारप्रधानेषु शास्त्रेषु।

प्रमुखो दायः

यस्यां परिस्थितौ विषय-नायकस्योदयः तस्य पूर्णं विवेचनं प्राक् कृतमेव! एतेनैव शबरस्वामिनो व्यक्तित्वानुमानं सरलं भवितुमर्हति। विशेषतोऽहं तु स्वीयमाशयं पूर्वमेव प्रकटितवानस्मि यद् मीमांसायाः प्रारम्भिकीं परिस्थितिं तथा रूप-रेखामाश्रित्याधुनाप्यनेक उदाराशया एतद् दर्शनमिति कथयितुं सङ्कुचन्ति। किन्तु दर्शनेष्वस्मै या प्रतिष्ठा प्राप्ताऽस्ति, सानेन सङ्कोचेनाभिभूता न भवितुमर्हति। संक्षेपतो मीमांसाया अयमेव सम्मानस्तथेयमेव प्रतिष्ठाऽऽचार्यशबरस्वामिनः प्रमुखो दायः—यस्य विभुता न मर्यादिता।

शबरस्वामिनः पूर्वं मीमांसादर्शनस्य काऽपि स्वतन्त्रा दार्शनिकविचारधारा नासीत्, न चास्य कापि तर्कप्रणाल्येवावर्तत । बौद्धाः सर्वतो भारतीयात्मवादस्य याज्ञिक-परम्पराणां तथा वेदानां खण्डने मग्ना आसन्, इयत्पर्यन्तं यद् वर्णव्यवस्थामपि तं उत्पाट्य समाजाद् दूरे प्रक्षेप्तुमैच्छन् । ईदृश्या भयावहस्थितेर्मीमांसायास्तथा तदाधारभूतानां वेदानां रक्षणपूर्वकं तस्यै दार्शनिकताप्रदानं कठिनं कर्मासीत्, यस्य पूर्तेः श्रेयो महते पुरुषाय शबरस्वामिनेऽस्ति ! अस्यां दिशि शबरस्वामी जैमिनिसूत्रेभ्योऽधिगन्तुमशक्यां प्रगतिं संसाधयन् तथा समग्रान् दार्शनिकविषयान् धर्मं मोक्षं च प्रत्यनन्यं साधनं मीमासाशास्त्रं प्रत्यपादयत् । तेन मीमांसैकं स्वतन्त्रं दर्शनं सिद्धमभूत् तथा पूर्वं यथाऽस्य ब्रह्ममीमांसाया गौणरूपेण सत्ताऽनिवार्याऽभूत्, (यतो ह्यस्या दार्शनिकी स्वतन्त्रा विचारधारा नासीत्) अधुना तत्पृष्ठगामित्वं विधूय पृथक् पृथग् दार्शनिकसरणिगामित्वेनोभयोरपि स्वतन्त्रास्तित्वमभूत् । एकन्तु दर्शनं धर्मं लक्षीकृत्यापरञ्च ब्रह्म लक्षीकृत्य गच्छतीति द्वयोरपि स्वातन्त्र्यं सिद्धम् । संक्षेपतः स्वतन्त्रशास्त्रत्वेन विकसिताया दार्शनिक-विचारधारायाः परिपोषकतया मीमांसाऽद्य परिगण्यते । तदिदं महामनसः श्रीशबरस्वामिनः प्रभावरूपेणेत्येष्टव्यम् ।

विचारधारायाः प्रवाहे शबरस्वामिनः प्रवहन्तो गतिशीलाः प्रतीयन्ते, शून्यवाद-निरालम्बनवाद-सद्दक्षाणां सिद्धान्तान् ते विमलप्रतिभाया बलेन खण्डयन्ति । तेनेदं कर्मकाण्डञ्चान्धश्रद्धातोऽपाकृत्योपयोगिताया निकषे परीक्षितवन्तः । स्वकीयभाष्यस्य प्रारम्भ एवैकस्य स्वतन्त्रविचारकसमाजपरिष्कर्तृत्वरूपेण ते कथयन्ति—

'लोके येष्वर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्य-वगन्तव्यम् ।'

एवं स्वविचारानुन्नतशिखरमारोपयन्तस्ते लौकिकेषु वैदिकेषु च वाक्येषु किमप्यन्तरं न पश्यन्ति । स्थाने स्थाने ते वैदिक-नियोगस्यापि प्रयोजनवत्तामवधार्य वेदोऽवबोधयतीति न कर्मणामनुष्ठानम् अपि तु तत्र प्रवृत्तिसिद्धये फलवत्तैव प्रयोजिका भवितुमर्हति—

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति हि न्यायः । केवलमियदेव नहि, शबरः कुत्रापि स्वान् विचारान् प्रच्छादयितुं नाचेष्टत । एकस्य वादिनो विचारकस्य च रीत्या ते दीर्घकालात्प्राप्तपरम्पराया अपि खण्डने कुत्रापि लेखन्याः सङ्कोचं नाकुर्वन् । ईश्वरस्य सर्वशक्तिशालिनः सत्ताया अनिवार्यावश्यकत्वं न ते मेनिरे । तथा तस्याः समक्षे केवलं परम्परायाः प्रामाण्य एव नतमस्तकैर्भवितव्यमित्यपि नामन्यन्त । यत्र शब्दार्थयोः सम्बन्धकर्तुः कल्पनायाः प्रश्नविषये, शबराचार्याः प्रत्यक्षं तस्य खण्डनं विधाय कस्यापि कर्तुः सम्भावनाया-अनावश्यकत्वमव्यावहारिकत्वं च साधयन्ति ।

एतेन तेषां स्पष्टता सिद्धान्तप्रियता-विचार-स्वतन्त्रता च निर्विवादं प्रमाणिता भवति।

वेदानां रक्षणे पदे-पदे ध्यानमवर्तत, अत एव तेषां सम्पूर्णं विश्लेषणं विवेचनं च कामं कस्यामपीतरस्यां दिश्येव गच्छेत् तथापि स्वभावत इतस्ततो भ्रान्त्वा यथा नदी समुद्रमापतति, तथैव स्वीयं लक्ष्य-स्थानं सम्प्राप्यैव शान्तिमधिगच्छति। जैमिनेः तृतीय-चतुर्थ-पञ्चम-सूत्रेषु तेऽतिप्रौढिम्ना प्रमाणानां निष्पक्षं निर्दोषं निर्विवादं च विवेचनं कुर्वन्ति तन्नैतदर्थं यद् मीमांसाविषये स्वस्य पृथगधिकारः प्रमाणितो भवत्विति किन्तु तदपेक्षया वेदानामौत्कृष्ट्यं प्रमाणतोऽभिव्यक्तं भवत्विति। ते शब्दस्य नित्यत्वं तदर्थस्य चाकृत्रिमत्वं साधयन्ति। केवलमेतदर्थं यत् कुत्रापि वेदे केनापि प्रकारेण पुरुषस्य प्रवेशो न भवेत्। परम्परयेयमेव स्थितिः शब्दानामाकृत्यर्थत्वसाधने विद्यते। संक्षेपत इदं वक्तुं शक्यते-यत् ज्ञानस्य यावत्यो धारा अस्माद् महापुरुषादुद्गतास्सन्ति ताः केवलमेकं लक्ष्यमधिकृत्य। इयमत्र वैशिष्ट्यम् यत् ता धाराः क्वापि नावरुध्यन्ते एतेन तेषां शक्तेर्वैभवः सुज्ञेयः।

तर्कपादस्तेषां शास्त्रीय-विवेचनस्य केन्द्रम्-- यस्मिन् वयं विचाराणां क्रमिकं विकासं प्राप्नुमः। विकासस्येयं धारा शनैः शनैः प्रवहति तथा यत्र वेदोपरि कोऽप्याघातो दृष्टिगोचरो भवति, लेखन्या गतिस्तीव्रप्रभावशालिनी तथा व्यङ्ग्य-पूर्णाऽपि भवति। वस्तुत इमं वयं ज्ञानकाण्डं कथयितुं शक्नुमः। विज्ञानवादं खण्डयन्त आचार्यशबरा मनागपि न श्राम्यन्ति ते तत्र आत्मवादं स्थापयन्ति—वेदार्थस्योपपत्तये शून्यवादस्य निरालम्बनवादस्य चापि निरासोऽस्मिन्नेव प्रसङ्गे भवति। किं बहुना? वेदस्य रक्षार्थं तथा मीमांसायाः वृद्धयेऽनेन महापुरुषेण स्वकीयं जीवनं तत्तद्-विचार-सङ्घर्षे व्ययीकृतम्। अत एव यत्र वयमेनं मीमांसाया दार्शनिकत्वस्योद्गमस्थलं मन्महे तत्र तस्या अङ्गरक्षकमपि स्वीकुर्मः। अस्य प्रत्यक्षं प्रभावं वयमग्रे समागच्छन्तीषु परम्परासु प्राप्नुमः यत्र हिमालयवदस्य विचार-वक्षःस्थलात् त्रिवेण्या उद्गमो भवति। इदमस्य श्रेयसः पराकाष्ठायाः प्रतीकमस्ति। यं वयं शङ्करसदृक्षाणामलौकिक-प्रतिभा-जुषां श्रद्धास्पदत्वेनाङ्कुरितमुपलभामहे। यस्माच्च स्वीये भाष्ये स्थाने स्थाने इमा—नुल्लिखन्तः श्रीभगवत्पादा गौरवास्पदानाविरकार्षुः। सारोऽयं यद् माननीयाः शबर-स्वामिनो मीमांसाशास्त्रस्य हिमालयाः सन्ति।

तेषां स्वतन्त्र-विचारधारायाः सम्बन्धे प्राग्वयं विस्तरेण न्यरूपयाम। शबर-स्वामिनस्त्वेके महान्तः क्रान्ति-कारिण आसन्। किञ्च समग्रे समाजे विभिन्नैः शोधनैः परिवर्तनमानेतुं ते पदे पदे सचेष्टा अभवन्। तैरीश्वरसत्तायां केवलमाक्षेपा एव न कृताः प्रत्युत तदीयफलनियामकशक्तेः प्रत्यक्षं खण्डनमपि कृतम्। अथ च तस्याः स्थानेऽपूर्वं व्यवस्थाप्य तत्कार्यं परिचालितम्—यस्य च परिणामः ईश्वरस्य कर्तव्य-

शक्तिर्विलुप्ता, तथा तस्य विभिन्न-सुखदुःखादीनां वितरणाधिकारा अप्यपहृताः। नायं कश्चन साधारण उपेक्षणीयो विषयः। इदञ्च कार्यं मनसा चिन्तयितुमप्यशक्यम्। मीमांसाशास्त्रस्य स्वतन्त्रसत्ताया अयं प्रथमः प्रतीकः। एवमेव तेषां द्वितीयः सिद्धान्तो भावना-विषयकः-यमागामिन्यः परम्पराः शिरसाऽधारयन्। वाक्यार्थनिर्णये भावनेयं मुख्योऽवलम्बः। एवं विषयाणां विवेचनेन वयं महामनसः शबरस्य स्वरूपं पूर्णरूपेण परिचिनुमः।

साहित्यिकदृष्ट्या तु वयमेनं मीमांसाया जन्मदातारमेव स्वीकर्तुं शक्नुमः। निश्चितमेव मीमांसाया अद्य यत् साहित्यिकं महत्त्वं प्राप्तमस्ति तद् शबरस्यैव कारणात्। इतः पूर्वं मीमांसाया आवश्यकत्वमासीत्, किन्तु तद् विशृङ्खलरूपेणासीत्। विषयानुसारेण सूत्राणि विभाज्य शबरस्वामी न केवलं सूत्राणि व्यवस्थापयामास प्रत्युत स्वीयभाष्यद्वारा मौलिकं पद्धतिमवलम्ब्यैतानि साहित्यिक-वेषभूषाभिः सम्भूष्य तेषां समुपस्थापने न काञ्चिन्न्यूनतां कृतवान्। रूक्षादपि रूक्षा भवन्तु विषयाः ते शबरस्वामिनं प्राप्य रसेनोतप्रोता अभवन्। सामान्यतो वयं शबरस्वामिनां कौशलं भागद्वयेन विभक्तुं शक्नुमः।

१. प्रथमस्तु वेदस्य धर्मस्य च रक्षार्थमुपयुक्तः।

२. द्वितीयस्तु मीमांसाशास्त्रस्य विकासायोपयुक्तः। तेषामनेन निरुपमेन कौशलेन सम्पादिताय महते कार्याय वयं सर्वे कृतज्ञाः स्मः।

त्रिवेणी

मीमांसाशास्त्रस्यास्माद् हिमालयात् तिस्रः स्वतन्त्रा धारा उद्गता विकसिताश्च, तासु वयं मीमांसायाः पूर्णतां पश्यामः। अस्या एवाधारभुवस्तासां जन्म भवति। तथैत एव ताभिः पोषणमुपलभ्यते। एतास्तिस्रो धारा या हि मीमांसायाः क्षेत्रं परिषिञ्चन्त्यः पल्लवितं पुष्पितं फलितञ्चाकुर्वन्। एता एव धारा मतत्रय रूपेण प्रचलिता उपलभामहे, यासु प्रथमे द्वे भूयसीभिः विचारसरणिसरिद्भिः संमिश्रणेन परिपुष्टे स्तः। अन्तिमा चैका नाममात्रेण गणनीया विद्यते। इमाश्चैवं प्रवर्तकानां नामभिः प्रसिद्धाः सन्ति—

१. भट्टमतं २. प्रभाकरमतं ३. मुरारिमतं चेति। एतेषु त्रिष्वपि मतेषु स्वतन्त्ररूपेणाग्रे विचारः करिष्यते। इमास्तिस्रः परम्पराः शबरस्वामिनो विचारधाराणां व्याख्यारूपाः सन्ति यासु प्रथमे द्वे विकसिते तथाऽन्तिमाऽस्पष्टा चास्ति। शबरस्य महत्त्वप्रतिपादने मीमांसायां शबरस्वामिनः कीदृशं स्थानमिति निर्धारणे चैतासां प्रवर्तक एकैकोऽप्याचार्यो मूर्तं निदर्शनाम्। शबरस्यैताभ्यो व्याख्याभ्यः पूर्ववर्तिनि सङ्क्रमणकाले कतिपयानामाचार्याणां स्थितेः सम्भावनाः सन्ति येषु भर्तृमित्र आचार्यः प्रमुखो वर्तते।

भर्तृमित्र आचार्यः

आसां विभिन्नानां धाराणामुदयात् पूर्वमपि वयं शबरादनन्तरमेकं स्वतन्त्रं विचारकं प्राप्नुमः—यं वयमनेकेषु स्थानेषु 'भर्तृमित्र' इति नाम्नोद्धृतं विलोकयामः। शबरं यावत् भर्तृमित्रस्य कमप्युल्लेखं वयं न प्राप्नुमः, अतएव तस्य शबरस्वामिनोऽनन्तरकालिकत्वं सङ्गतं प्रतीयते। कुमारिलभट्टस्तु तस्य मतस्य स्थाने स्थाने खण्डनं कृतवान्। केवलं भट्ट एव नहि- तस्य धाराया विशिष्टानामनुयायिनामप्यस्य महतो विचारशास्त्रिणो विचाराणां खण्डनाय भूयान् क्लेशोऽनुभवितव्योऽभवत्। एतस्मादेवास्य स्वतन्त्र-प्रतिभावैभवशालित्वमनुमातुं शक्यम्। अनेकेषु विवादेष्वस्य स्वतन्त्रा विचारधारा प्रवर्तत तथा सेयती दृढमूला स्थिरा सम्मता चाभूद् यत् तस्य अपाकरणायानेकहायनपर्यन्तमुद्यमस्यावश्यकताऽभवत्। सिद्धान्ता अस्यातीव सबला आसन् परम्परा च दुर्भेद्या। कुमारिलभट्टः स्वस्य प्रमुखग्रन्थस्य श्लोकवार्तिकस्य प्रारम्भे तान् प्रति सङ्केतयति—

> प्रायेणैव हि मीमांसा लोके लोकायतीकृता।
> तामास्तिकपथे कर्तुमयं यत्नः कृतो मया॥ (४)

अस्य व्याख्यानं कुर्वन्त आचार्याः पार्थसारथिमिश्रा अपि स्पष्टयन्ति—

"मीमांसा हि भर्तृमित्रादिभिरलोकायतैव सती लोकायती कृता। नित्यनिषिद्धयोरिष्टानिष्टफलं नास्तीत्यादिबह्वपसिद्धान्तपरिग्रहेणेति। तामास्तिकपथे कर्तुं वार्तिकारम्भे प्रयत्नः कृतो मयेति।"

एतेनेदं सिद्ध्यति यत् तस्मिन् काले भर्तृमित्रस्य सिद्धान्तानां कियान् प्रचार आसीदिति। स्थाने स्थाने प्राप्तेभ्य उदाहरणेभ्यो वयमिदमपि ज्ञातुं शक्नुमः यद् भर्तृमित्रो मीमांसायाः प्राथमिकेषु व्याख्यातृषु सर्वतोऽधिकं प्रतिष्ठित आसीत्। स्वयं पार्थसारथिमिश्र एवैतत् प्रमाणयति—

"मीमांसायाश्चिरन्तनानि भर्तृमित्रादि-रचितानि व्याख्यानानि विद्यन्ते।"
(श्लो० वा० पृ० ३-४)

न केवलं पार्थसारथिरेव, अन्येऽपि महान्तो लेखका भर्तृमित्रनाम सादरमुदधरन्। 'न्याय-मञ्जर्यां' (पृ. २६६) जयन्तभट्टः, 'सिद्धित्रये' (पृ. ६) यामुनाचार्यः, 'अभिधावृत्तिमातृकायां (पृ. १७) मुकुन्दभट्टस्तथा 'श्लोकवार्तिके' (पृ. ७६३) श्रीकुमारिलभट्टो विविध-विचाराणां प्रसङ्गेऽस्मै स्थानं दत्त्वा सत्यपि मतभेद एनं प्रति महतीं श्रद्धां प्रकटीकृतवन्तः।

इयति सत्यपि वयं भर्तृमित्रस्य व्यक्तित्वे तु विश्वसिमः, किन्तु दौर्भाग्यमेतदस्ति यद् वयं तस्य सिद्धान्तानां प्रतिपादकं कमप्येकं स्वतन्त्रं ग्रन्थं न प्राप्नुमः, किञ्च न तस्य जीवन-विषये किमपि निश्चेतुं पारयामः। तेषां विचाराणां किञ्चित् सङ्कलनमत्र क्रियते।

भर्तृमित्रस्य सिद्धान्ताः

१. सर्वतः प्रबलः सिद्धान्तस्तस्य नित्य-निषिद्धकर्मणोर्विषये विद्यते, येन चतसृषु दिक्षु डिण्डिमघोषः कृतस्तथा सर्वेषामुत्तरकालिकानां ध्यानमाकृष्टम्। एष वदति यद् नित्यानां निषिद्धकर्मणां चानुष्ठाने न कोऽप्यनुचितः परिणामो भवति न वोचितोऽपि भवति। एतेन स केवलं काम्यकर्माण्येव फलदायकान्यमन्यत। इदं परम्परया वेदोपर्याघातः प्रतीयते--यस्तं नास्तिकवादिनं साधयति, इयमेका प्रमुखा समस्या सञ्जाता--यामास्तिकतां प्रत्युन्मुखीकरणस्य श्रेयो भट्टकुमारिलस्यैव। इमे विषया अस्माभिर्भट्टपादवचनैः पार्थसारथिवचनैश्च ज्ञायन्ते कस्मादपि स्वतन्त्राद् ग्रन्थान्नैव, तथैतदाधारेणैव भर्तृमित्रो मीमांसां नास्तिकतां नयतीति तदुपर्यारोपः क्रियते।

२. श्लोकवार्तिकस्य टीकायां चित्राक्षेपपरिहारप्रकरणे (१४ कारिकायां) पार्थसारथिमिश्र इमं निर्दिशन् लिखति यत् चित्रेष्टचनुष्ठात्रा पशुरूपं फलमस्मिन्नेव जन्मनि प्राप्यते। इदं भर्तृमित्रस्य मन्तव्यम्, यत् प्रति कुमारिलोऽविश्वासं प्रकटयति।

३. श्रोत्रेन्द्रियस्य विषये भर्तृमित्रस्य मतं किञ्चिद् विलक्षणं प्रतीयते—यदनुसारं श्रोत्रेन्द्रियं नाम संस्कारमात्रमिति। कुमारिलभट्टा एव नैव, जयन्तभट्टा अप्येतद् विस्मयेन सहोट्टङ्कयन्ति।

इमानि कानिचिदङ्गुलिगण्यानि मतानि यतस्ततो विकीर्णानि प्राप्यन्ते। एतेषां यावद् विश्लेषणमावश्यकं तावन्न लभ्यते। एवमेवान्येष्वपि बहुषु विषयेष्वस्य विदुषो महत्त्वपूर्णा विचारा भवेयुरिति समुपलब्धनिदर्शनैरेतैरनुमातुं शक्यते। दुःखमस्ति यद् वयमस्मादधिकं विषयेऽस्मिन् नाज्ञासिष्म।

७. भट्ट-परम्परा

आचार्यः कुमारिलभट्टः

सामान्यः परिचयः

शबरस्वामिनोऽनन्तरं समुद्भूतेष्वाचार्येषु कुमारिलभट्टस्य नामाग्रगण्यमस्ति। शबरस्वामी यां धारां प्रावाहयत्—तस्याः विकासकार्ये यच्छ्रेयस्तद् भट्टपादानामेव विद्यत इति च निर्विवादं तथ्यम्। कुमारिलोदयात् पूर्वं वैदिकविचारधारायाः स्थितिरतीव दोलायमानाऽऽसीत्। बौद्ध-विचारका उच्छृङ्खलाः सन्तो हिन्दूसंस्कृतौ वैदिक-दर्शने च कुदृष्टय आसन्। राजकीयाश्रयेण संरक्षणेन च बौद्धविचारकाणां मस्तकमुन्नमितमभूत्। नालन्दा-विश्वविद्यालयो यो हि तत्काले समुद्भूतं विद्यामन्दिरम्, यच्चेदृशानामालोचकानां समीक्षकाणां च केन्द्रभूतमासीत्। तर्क-वितर्ककुतर्कविद्या-च्छलादिभिः सर्वैरप्युपायैरेते मस्तिष्केण भाग्यशालिनो नास्तिकदार्शनिका वैदिकानि दर्शनानि समूलमुन्मूल्य दूरतः प्रक्षेप्तुं प्रतिज्ञामेवाकुर्वन् इति वयं धर्मकीर्तेर्जीवन-दन्तकथाभ्यस्तथा तात्कालिकात् साहित्याच्च विद्मः। ईदृश्यां सङ्क्रमणशील-परिस्थितौ कुमारिलस्योदयः। निश्चितमेवायं कालो द्वयोः परस्परं विरुद्धयोर्विचारसरण्योः सङ्घर्षमय आसीत् यस्मिन् हिन्दू-संस्कृतेर्वैदिकदर्शनानां मूलोच्छेदस्य रहस्यं निगूढमवर्तत। अस्मिन् सङ्कटापन्ने काले तस्य संरक्षणं कुमारिलसदृशस्य महतः साधकस्यैव साध्यमभवत्।

देशः कालश्च

यथा हि वयं शबरस्वामिनो विषयेऽपश्याम, तथैव कुमारिलस्य देशकालयोः सम्बन्धेऽपि सैव स्थितिरस्माकं पुरत उपतिष्ठते। केचन एतान् दाक्षिणात्यान् मन्वते-अपरे चोत्तरभारतीयान्। श्रद्धेया डॉ. मिश्रमहाभागा अनेकैः प्रमाणैरेतेषां देशं मिथिलां साधयन्ति। अस्मिन् विषये सर्वतोऽधिकं ते 'शङ्करदिग्विजयं' प्रमाणयन्ति यत्रोदकदेशस्य प्रयोग उत्तरभारतार्थे विहितः। श्रीमिश्रा अनेकैरुद्धरणैरुदकदेशस्याभिप्रायं मिथिला-देशेन सम्बद्धयन्ति, यस्य मूले जलस्याधिक्यमन्तर्हितमस्ति। इदं पूर्वं कथितमेव यदनेकशताब्दीपर्यन्तं मिथिला मीमांसकानां प्रधानं स्थानमवर्तत। तस्मादेवंविधायां पुण्यभूमौ कुमारिल-सदृशस्य विदुषो जन्म स्वाभाविकं भवितुमर्हति। मण्डनमिश्रेण सह तस्य सम्बन्धोऽप्यस्याशयस्य पुष्टौ सहायको वर्तते।

परं यथा मम स्वकीया धारणा तथैवाऽयेषामालोचकानां निर्णयोऽस्ति--यदाचार्यो भट्टो दाक्षिणात्य इति कथनमधिकमुपयुक्तं प्रतीयते। दक्षिणभारतेन सह किञ्चिद्वाधिकं वा संबद्धा ये तेऽनेन तथ्येन परिचिता भवेयुः यत्तस्मिन् भागे कुमारिलभट्टस्य कियत्याराधना विद्यत इति। तत्रत्या परम्परा तान् स्कन्दस्यावतारं मत्वात्यन्तं श्रद्धया पूजयति। भट्टपदघटितनामानि दक्षिणभारत एवाधिक्येन भवन्ति, नोत्तरभारते। इदन्तु भवितुमर्हति यद् दक्षिणभारते समुत्पन्नोऽप्युत्तरभारतं तस्य प्रमुखं कार्यक्षेत्रमवर्तत यथा भगवत्पादानाम्। तथाप्याचार्यमिश्रस्य प्रतिपादनं तथा 'शङ्करदिग्विजयस्य' प्रयोग एको महत्त्वशाली विचारणीयविषयश्च वर्तते। किन्तु मीमांसकानामाधिक्येन स्थितिर्यथा मिथिलायां तथैव दक्षिणभारतेऽपि। बौद्धानामाधिक्यमुभयत्र समानम्।

कालविषयेऽपि वयं तावति प्रकाशे न स्मः, यावानावश्यकः। अनेकेषां प्रमाणानां समर्थनेन कुमारिलस्य समयः सप्तमी शताब्दी निर्धारयितुं शक्यते। एते शङ्कराचार्यस्य समकालिका आसन्निति शङ्करदिग्विजयेऽप्यस्योल्लेखः।

> **इत्यूचिवांसमथ भट्टकुमारिलं त,**
> **मीषद्विकस्वरमुखाम्बु जगाद मौनी।**
> **श्रुत्यर्थकर्मविमुखान् सुगतान् निहन्तुं,**
> **जातं गुहं भुवि भवन्तमहं नु जाने॥**

एतेन यथास्य समकालिकता प्रमाणिता भवति, तथा कार्तिकेयावतार इत्यपि सिध्यति। शङ्कराचार्यस्य कालः १८८९ कलिवर्षगतेरनन्तरं ८४५ वि. सं., ७१० शकाब्दास्तथा ए. डी. ७८८ ई० मन्यते, एतेनाप्येतस्य कालः सप्तमीशत्येव निश्चीयते। अन्येऽपीदृशा अनेक आधाराः सन्ति येऽस्य कथनस्य समर्थने सहायका भवन्ति। कन्नौजस्य राज्ञो यशोवर्मणो राज्ये—यस्य शासन-समयः सन् ७३० विद्यते—भवभूतिनामा पण्डित आसीद् य आत्मानं कुमारिलस्य शिष्यं घोषयति स्म। एवमेव तिब्बतप्रदेशस्य मठाधीशस्तारानाथो "भारतीय बौद्धधर्म का इतिहास" ग्रन्थे लिखन् कुमारिलं तिब्बतप्रदेशस्य सप्तमशत्याः शासकस्य श्रृङ्गसालस्य समकालिकमघोषयत्। धर्मकीर्तिः-यस्य च समयः सन् ६३५ निश्चितोऽस्ति – तथा कुमारिलस्य शास्त्रार्थास्तु विश्वस्येतिहासे विख्याता एव सन्ति। एवमेव प्रसिद्धो बौद्धलेखकः शान्तरक्षितः स्वीये ग्रन्थे—**'तत्त्व-सङ्ग्रहे'** कुमारिलमुद्धरति, यस्य समयोऽष्टमीशताब्दी मन्यते ? एतस्मादपि कुमारिलस्य तत्पूर्वकालिकता प्रमाणिता भवति। भर्तृहरेर्वाक्यपदीयस्य कासाञ्चित् पङ्क्तीनामुद्धरणमपि कुमारिलस्य समय-निर्धारणे साहाय्यमाचरति। भर्तृहरेः कालः षष्ठशताब्द्या उत्तरार्धस्तथा सप्तमशत्याः पूर्वार्धो निश्चितः। ब्रह्मसिद्धेः प्रस्तावनायां महामहोपाध्यायाः श्रीयुत-कुप्पुस्वामिशास्त्रिणः ६०० तः ६६० ई० मध्ये तथा डॉ० गङ्गानाथझा महोदयाः ६०० तः ६५० ई० मध्यवर्तिकालं निश्चिन्वन्ति। एतयोर्द्वयोर्महात्मनोरालोचकयोरैकमत्यमस्य विषयस्य निर्विवादतायाः साक्षी वर्तते।

सर्वतोऽधिका सहायता यस्माद्भागादस्यां दिशि अस्माभिः लभ्यते साऽस्ति शङ्कराचार्यस्य जीवनवृत्तम्। शङ्करदिग्विजयेऽनेकेषु स्थानेषु सम्मानेन सह कुमारिलस्य तथाऽऽचार्यशङ्करस्य विषये प्रकाशः पातितः। सुबह्व्यः किंवदन्त्योऽस्मिन् विषये प्रचलिताः सन्ति। कथ्यते यत् कुमारिलः प्रच्छन्नरूपेण बौद्धेभ्यो बौद्धधर्मस्य तत्त्वानां शिक्षामगृह्णात् तथा पुनस्तानेव—ये तस्य शिक्षका आसँस्तान् पराजयत्। स्वस्य गुरोरपमानकरणस्य प्रायश्चित्तरूपेण स प्रयागमायातस्तथा तत्रात्मानं तुषाग्नौ प्रविश्य पापमुक्तमकरोत्। ज्वलनस्यार्धावस्थायां तत्र जगद्गुरवः शङ्कराचार्या आगच्छन्। ते तं पुनरुज्जीवयितुमकामयन्त परं कुमारिलो न स्व्यकरोत्। एवंविधैरनेककथावृत्तैस्तथा प्रामाणिकाधारे तयोः समानकालिकतैकमसन्दिग्धं तथ्यं सम्पन्नम्। तस्मात् सप्तमीशताब्द्येव कुमारिलस्य कालो निश्चीयते।

तस्य साहित्यम् —

साहित्यस्य दृष्ट्या मीमांसानिकेतनस्यायं प्रथमः स्तम्भः-यस्मिन् स स्थिरोऽस्ति। लेखन्यां कुमारिलस्य व्यापकोऽधिकारोऽवर्तत, इदमेकं सर्वसम्मतं सत्यम्। आचार्यं शबरं तथा तदीयं भाष्यमेव श्रीभट्टपदा आधार-ग्रन्थं स्वीचक्रुः। भाष्यं व्यापकदृष्ट्या परिशील्य मीमांसाया दार्शनिकत्वप्रदानस्य धारा प्रवाहिता, येन सा पुष्पिता फलिता च। शाबरभाष्यं त्रेधा विभज्य ते व्याख्यामकुर्वन्। प्रथमाध्यायस्य प्रथमतर्कपादस्य व्याख्यानं श्लोकवार्तिक' नाम्ना प्रथमाध्यायस्य द्वितीयपादात् तृतीयं यावत् 'तन्त्र-वार्तिक' नाम्ना तथा चतुर्थाध्यायाद् भाष्यान्तं यावद् व्याख्यानं 'टुप्टीका' नाम्ना विख्यातमस्ति। एताभ्यरितसृभ्यो रचनाभ्योऽतिरिक्तं 'बृहट्टीका' या 'मध्यम-टीका' याश्च लेखकरूपेणापि कुमारिलं स्वीकुर्वन्ति श्लोकवार्तिकस्यार्थापत्ति-परिच्छेद एवमुल्लेख उपलभ्यते। वर्धमानविरचितायां गणरत्नमहोदधेर्वृत्तौ—

> **सम्पीडिताङ्गावयवा उदीयुः पद्मा न वा कण्टकितोर्ध्वदण्डाः।**
> **अन्तर्जलावासविवृद्धशीतत्रस्ता वसन्तातपकाम्ययेव॥**
>
> (न्यायमाला भूमिकायाम् ३)

इति श्लोकस्य रचयितृत्वेन कुमारिलः साधितः येन काव्यकाररूपेणापि कुमारिलस्य प्रसिद्धिः सम्भाव्यते। काव्यकारस्य वार्तिककारस्य चोभयोः कुमारिलयोरभिन्नत्वप्रतीतावधुना किमपि प्रामाणिकं वृत्तं यद्यपि नोपलब्धं तथापि तस्य श्लोकवार्तिकस्य कारिकास्तस्य कवित्वशक्तेः प्रत्यक्षसाधिकाः सन्ति। एतदतिरिक्तं कुमारिलस्यान्यासां रचनानां विषये किमपि न ज्ञायते।

एतेषु त्रिष्वपि ग्रन्थेषु श्लोकवार्तिकस्य तथा तन्त्रवार्तिकस्याकारौ विशालौ स्तः, तौ ज्ञानविज्ञानराशिना परिपूर्णौ विद्येते। अनयोर्द्वयोरपि ग्रन्थयोः शबरस्यानेकै-

रनुयायिभिः नैकविधानि शास्त्रीयाणि विवेचनानि विहितानि। श्लोकवार्तिकस्य मूलग्रन्थः सर्वप्रथमं संस्कृतपत्रिकायां 'काशी विद्यासुधानिधौ' प्रकाशितोऽभूत्। तस्य तिस्रो व्याख्याः सन्त्यधो निर्दिष्टाः––

१—उम्बेकभट्टः	तात्पर्यटीका	स्फोटवादान्ता (म. वि.)
२—पार्थसारथिमिश्रः	न्यायरत्नाकरः	पूर्णः (चौ. सं. सी.)
३—सुचरितमिश्रः	काशिका	स्फोटवादान्ता (त्रिवेन्द्रम् सं. सी.) इति।

एतासु सर्वप्रथमा व्याख्या डा. मिश्रानुसारम् 'उम्बेक-भट्टस्य तात्पर्यटीका वर्तते यस्याः प्रकाशनं सर्वासामन्ते मद्रासविश्वविद्यालयात् सञ्जातम्। इयमपूर्णाऽस्ति। इत्यमप्यनुमीयतेऽस्या अपूर्णाया व्याख्यायाः पूर्णताकार्यं कुमारिलभट्टस्य पुत्रेण श्रीजयमिश्रेण विहितम्, यस्याः पाण्डुलिपिर्मद्रासविश्वविद्यालये प्राप्ताऽस्ति।

पार्थसारथिमिश्रस्य व्याख्यैवैकेदृशी विद्यते-या च पूर्णा। इयमत्यन्तं सूक्ष्मा भावात्मिका च वर्तते। चौखम्बा-संस्कृत-सीरिजत एतस्याः प्रकाशनं सम्पन्नम्।

सुचरितमिश्रस्य 'काशिका'-एतयोरपेक्षया विस्तृता––एतस्याः प्रकाशनं 'त्रिवेन्द्रम् संस्कृत-सीरीज'-तः सञ्जातम् किन्त्वस्याः संशोधनमावश्यकम्। इयं साम्प्रतं यावदपूर्णैव।

अस्यैव श्लोकवार्तिकस्यांग्लभाषानुवादो महामहोपाध्याय-डॉ. गङ्गानाथ झा महोदयैः––'बिब्लिओथिका-इण्डिया-सीरीज-तः प्रकाशितो-यः सर्वथा सम्पन्नः।

अलवर-स्टेट-पुस्तकालय उपलब्धयैकया पाण्डुलिप्यैतदपि ज्ञातं यत् कुमारिलः श्लोकवार्तिकस्य पूर्तेः पूर्वमेव मृतः। अतो नारायणभट्टस्य प्रपौत्रेण रामकृष्णस्य पौत्रेण तथा दिनकरस्य पुत्रेण विश्वेश्वरोपनामकगागाभट्टेनात्मन आश्रयदातुर्भोसला वंशीयस्य शाहजीसूनोश्छत्रपति-श्रीशिवराजस्याज्ञयैतस्य पूर्तिर्विहिता। अत एवैनं ग्रन्थं 'शिवार्कोदय' इत्यपि कथयन्ति, किन्त्वस्यां किंवदन्त्यां विश्वासयोग्यानां प्रमाणानां सम्पन्न विद्यते।

एतदुत्तरकालिको महत्त्वपूर्णो ग्रन्थ'स्तन्त्रवार्तिक' इत्यस्ति। येन बहूनां व्याख्यातॄणां ध्यानमात्मानं प्रत्याकृष्टम्। निम्नरूपेणास्य व्याख्या विहिताः––

१—माधवस्य पुत्रः सोमेश्वरः	न्यायसुधा उपनाम-राणकः	चौ. सं. सी. वाराणसी
२––रामकृष्णस्योमायाश्च पुत्रः कमलाकर-भट्टः	भावार्थः	
३––गोपालभट्टः	मिताक्षरा	

४. परितोषमिश्रः अजिता (पाण्डुलिपिः झापुस्तकालये)

५. राघवसोमयाजिवंशस्य
तिरूमलाचार्यस्य पुत्रः सुबोधिन्यथवा
अन्नंभट्टः राणकोज्जीवनी

६. गङ्गाधरमिश्रः न्यायपारायणः

एतेषामतिरिक्तं पार्थसारथि–मण्डनमिश्र–भवदेवभट्टैरप्यस्य व्याख्या–निर्माणस्योल्लेखः प्राप्यते। पार्थसारथेः सम्बन्धे स्वीये 'तन्त्रचूडामणि' ग्रन्थे श्रीकृष्ण-देवनुल्लिखति। यदीयं श्लोकवार्तिकस्य व्याख्या 'मीमांसा न्यायरत्नाकर एव नास्ति चेदस्याः अतिरिक्तसत्ताऽवश्यकी वर्तते, या साम्प्रतं यावदप्राप्ता। मण्डनमिश्रस्य विषये 'शास्त्रदीपिका' कारः (पृ. २-२-१-१०१, निर्णयसागरप्रेस)––'विवृतं चैतन्मण्डनेने' ति कथयित्वैतद्विषये सङ्केतयति। परमधुना पर्यन्तमेतेषां पाण्डु-लिपयोऽप्यस्मान् न प्राप्ताः।

'टुप्टीका'––या ह्याचार्यभट्टस्य तृतीया कृतिरस्ति, अत्यन्तं संक्षिप्ताऽस्ति। वस्तुतोऽस्यां वयं भट्टस्य पाण्डित्य-प्रवाहं न पश्यामः। यादृशेनान्तिमेन ग्रन्थेन भवितव्यमभूत् तादृशं विकासं वयमस्मिन् नावलोयामः। तथापि भट्टस्य महनीयतायाः कारणादस्यां व्याख्यायां व्याख्यातृणां ध्यानं गतं तथाऽधिकृता व्याख्या विहिताः—यासु निम्नलिखितानां स्वरूपाण्यद्य यावदुपलब्धानि सन्ति—

१—पार्थसारथिः	तन्त्ररत्नम् (विस्तृतम्) (पूर्णम्)	सरस्वती भवने वाराणस्याम्
२—वेङ्कटेशः (१७ शती)	वार्तिकाभरणम्	अप्रकाशितम्
३—उत्तमश्लोकतीर्थः	लघुन्यायसुधा	अप्रकाशिता

एनमेव ग्रन्थं 'लघुवार्तिक' नाम्नाऽपि सम्बोधयन्ति, यतो [१] 'बृहद्-वार्तिक'' स्य कल्पनामपि कुर्वन्ति। इदं सर्वमाचार्यभट्टस्य साहित्यं तथा तदीया विवेचनाः सन्ति।

इयति वैदुष्ये प्रभावे प्रगाढतायाश्च सत्यामपि कुमारिलस्य ग्रन्थानामपेक्षिता व्याख्या नाभूवन्। अनेकेऽनुयायिनोऽस्य सञ्जातास्तेषु कैश्चनास्य ग्रन्थस्य व्याख्या अधिकाधिकरूपेण कृताः, इदमेकं सम्भवं तथ्यम्। सम्भाव्यते च तासु बह्व्यो विलुप्ताः स्युः! प्राप्ताधारेण तु पार्थसारथिमेव तस्य प्रधानं प्रचारकं तत्त्वज्ञातारं च स्वीकर्तुं शक्नुमः। तस्याध्ययनेन कुमारिलस्य साहित्यस्यावबोधने पर्याप्तं साहाय्यमस्माभिः प्राप्यते।

१. उल्लेखकाः-शान्तरक्षित-शालिकनाथ-जयनाथ-पार्थसारथिसोमेश्वरादयः।

भाषा-विशेषज्ञः

एतासु सर्वासु रचनासु कुमारिलस्य भाषा-विशेषज्ञतायाः परिचयं प्राप्नुमः। संस्कृतभाषायां तु तस्य पूर्णोऽधिकारो विद्यत एव, परं सहैव विभिन्नाभिर्भारतीय-भाषाभिरतिरिक्तमन्यासां भाषाणां विज्ञताया अपि वयमस्मिन् परिचयं प्राप्नुमः यथा हि तस्य प्रयोगैरस्माभिर्ज्ञायते।

"किमुत यानि प्रसिद्धापभ्रष्टदेशभाषाभ्योऽपि अपभ्रष्टतराणि "भिक्खवे" इत्येवमादीनि, द्वितीयाबहुवचनस्थाने ह्येकारान्तं प्राकृतं पदं दृष्टं न प्रथमाबहुवचन-स्थाने, सम्बोधनेऽपि संस्कृतशब्दस्थाने चकारद्वयसंयोगोऽनुस्वारलोपः, ऋवर्णाकारापत्तिमा-त्रमेव प्राकृतापभ्रंशेषु दृष्टं न उकारापत्तिरिति। (तन्त्रवार्तिके ७३-७४)

तन्त्रवार्तिकस्यैवंविधैरुद्धरणैर्वयं ज्ञातुं शक्नुमो यदिमे भाषाणां विषये कियद् वैज्ञानिकं वर्गीकरणं जानन्तीति।

एवमेव "जर्भरी-तुर्फरी-पर्फरीका-नैताशौ-जेमनौ-भदेरौ—प्रभृतयोऽनेके शब्दा अस्य लेखन्या प्रयुक्ताः। येषामाधारेण वयं तस्य शब्दशक्तेरनुमानं विधातुं प्रभवामः। द्रविडान्ध्रभाषयोस्तु तस्य व्यापकोऽधिकारोऽवर्ततैव। इयति सत्यपि तेषां भाषैकं स्फीतं प्राञ्जलं च रूपं नीताऽस्ति सा मिश्रतां न गता। तस्यामेकः स्वाभाविकः प्रवाहो विद्यते यस्मिन् गाम्भीर्येण सहैव सरलताया अपि पूर्णताऽस्ति।

शैली व्यक्तित्वं च

वैदिकविषयाणां लौकिकरूपप्रदानं भट्टस्यैकं प्रमुखं वैशिष्ट्यमस्ति। तस्य शैल्यां स्वाभाविकं माधुर्यं विद्यते यद् दार्शनिकविषयेभ्यः साहित्यिकतां प्रयच्छति। अहं तु पूर्वमेवालिखं यद् वयं भट्टपादे बुद्धिवैशद्यस्योद्भावनाशक्तेश्च समन्वय-मुपलभामहे। यावत्पर्यन्तं तस्य रचनानामुच्चतमस्य भावपक्षस्य प्रश्नोऽस्ति, वयं तस्मिंस्तस्य विशदबुद्धेः तथा प्रतिभाशक्तेश्च विकासं पश्यामः। लघुकाये तर्कपादेऽनेकेषां विषयाणां शास्त्रसिद्धान्तानाञ्च सङ्कलने भट्टपादैः स्ववैदुष्यस्योत्कर्षतायाः प्रदर्शनं कृतमस्ति—यत्कारणादेकं स्थिरं चिह्नं दर्शनशास्त्रे तेषां शाश्वतरूपेण संलग्नम्। विशेषतेयमस्ति यदिदं सर्वं कमप्याडम्बरं विनाऽऽयोजनं विना च सम्भवमभूत्।

केवलं 'श्लोकवार्तिक' एव न, तन्त्रवार्तिकेऽप्येवमेव पृथक्-पृथगधिकरणेषु धर्मशास्त्र-स्मृति-व्याकरण-विभिन्नदर्शनाचारशास्त्रादीनां स्वाभाविकं समावेशं विधाय कुमारिलाः स्वीयव्यापकज्ञानवैभवस्य परिचयमदुः। इदमवश्यमस्ति यद् श्लोक-वार्तिकापेक्षया तन्त्रवार्तिकस्य प्रतिपादनशैलीं वयमधिकं प्रौढामनुभवामः। विस्तारस्तूभयोः समान एव। पद्यबद्धत्वात् श्लोकवार्तिके केषुचिदंशेषु रागात्मकतायाः

समावेशः सञ्जातस्तया तन्त्रवार्तिकञ्च गद्यपद्यमयत्वेन तेन विहीनमभवत्। अनयोरुभयोर्ग्रन्थयोरेकैकस्यां पङ्क्तौ कुमारिलस्य व्यक्तित्वचिन्हं सुस्थिरं विद्यते, नात्र सन्देहः।

एकं महल्लक्ष्यम्

कुमारिलः प्रयोजनायाधिकं महत्त्वं यच्छति। तस्य प्रत्येकं वाक्यं कमपि महान्तमाशयं गृहीत्वा प्रयुक्तम्। यथा हि समग्रः संसारो वेत्ति--स वैदिकधर्मरक्षाया महल्लक्ष्यं गृहीत्वा गच्छति तथा स स्वोद्देश्यस्य प्रतिपदं ध्यानं करोति, स कदापि किञ्चिदपि स्वमार्गाद् न विचलति। जैमिनेः कार्यमासीद्—धर्मस्य जिज्ञासा किन्तु कुमारिलास्तस्या जिज्ञासाया अपेक्षयापि तस्यामापतद्भिराघातैः सुरक्षितत्वाय विशिष्य ध्यानमददात् किन्त्विदं सर्वमभूद् शास्त्रीयविवेचनाया मार्गेण। स्वकीयश्लोकवार्तिक स्योपोद्घाते—यो हि तस्य प्रथमः प्रामाणिको ग्रन्थः स स्वस्यास्य महतो लक्ष्यस्य सडिण्डिमं घोषणं करोति।

प्रायेणैव हि मीमांसा लोके लोकायतीकृता।
तामास्तिकपथे कर्तुमयं यत्नः कृतो मया॥

वस्तुत इदमेव तस्य शास्त्रस्यैव नैवापि तु जीवनस्यापि लक्ष्यमवर्तत। स स्वस्यास्य पावनोद्देश्यस्य समक्षमायान्तीनां स्थिरातिस्थिराणां दुर्भेद्यातिदुर्भेद्यानां भित्तीनामपि विचारं नाकरोत्। अस्य पूर्तये यथा ह्यपरि लिखितमस्ति स स्वस्या गभीरायास्तर्कशक्तेश्चमत्कारमदर्शयत्। एतदेव नहि, प्रत्येकं सम्भवानामसम्भवानाञ्चोपायानां शरणमगृह्णात्। इदं तस्य जीवनवृत्त-सम्बद्धाभ्यः किंवदन्तीभ्योऽथवा लोकोक्तिभ्यो ज्ञातुं शक्यते। तस्यैकैकस्मिन् वाक्ये वयं तथ्यस्यास्याक्षुण्णां मुद्रां प्राप्नुमः। आजीवनमेतदर्थमेव स बौद्धिकं शारीरिकं च सङ्घर्षं स्व्यकरोत्। विशेषतो बौद्धानुयायिनस्तस्य लेखन्या आलोचनापात्रतां गताः। कुमारिलस्तेषां पर्याप्तं समालोचनमकरोत् नास्त्यत्र तु कश्चन सन्देहः। अस्मिन् समये सहैव बुद्धिशक्त्या क्वचिदाग्रहशीलतयाऽपि ते कार्यमनैषुः। तैरेव न, तदीया अनुयायिनोऽपि यावन्तोऽभवन् तेऽस्मात् पथस्स्वल्पमपि विचलितुं साहसं नाकार्षुः यथा हि निम्नोद्धरणेभ्यो ज्ञातुं शक्यते।

बौद्धदर्शनस्य सर्वेषामपि सिद्धान्तानां ते प्रसङ्गतोऽथवा विना प्रसङ्गमपि ज्ञानपूर्वकमक्षरशः खण्डनमकार्षुः। खण्डनावसरे सदैव स्वीये वेदनिधौ गर्वमधारयन् अनेकेषु स्थलेषु सङ्केतमेव नाकुर्वन्नपितु घोषणामभ्यकुर्वन्—

आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि।
नहि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥

स्वस्यामस्यामागमप्रवणतायां ते गौरवं धारयन्ति। किञ्च तदर्थमेव स्वीयेषु विश्लेषणेषु श्रद्धाया अप्यनिवार्यतां प्रकटयन्ति--

यथाकथञ्चिदारब्धा त्रयीमार्गानुसारिणी।
वाग्वृत्तिरल्पसाराऽपि श्रद्दधानस्य शोभते॥

स्वकीयेषु विनम्रेषु किन्तु प्रभावपूर्णेषु वाक्येषु ते आत्मनः कार्ये गर्वं प्रादर्शयन्। साम्प्रतिकपरिपाट्यनुसारेण तु वयमेतेषां तां दृढतां दृढमार्गानुगामित्वमपि गदितुं पारयामः। किञ्चेदमपि स्वीकर्तुं प्रभवामो यदेतेषामाधुनिकानां लेखनीतः सङ्कुचितो मार्गो नानुच्यत। एका निश्चिता सीमा वेद एतान् नियन्त्रितवती, यतः सदा ते स्वस्याः सीमाया ध्यानं रक्षितुं सन्नद्धा अभवन्। कस्मिँश्चित् कालेऽयमेकः सर्वतो महान् गुण आसीत् परं साम्प्रतिकी स्वतन्त्रा धारेमां दृढतावादितां वदितुं प्रेरयति।

इमां दृढवादितां कथयन्त्वथवा दृढसङ्कल्पम्, परमेतैर्विचारकैर्बौद्धदर्शनस्य तु किमप्यङ्गं न त्यक्तं यस्य खण्डनं विधाय छिन्नं भिन्नं न कृतं भवेत्। एवं कुर्वतामेतेषामन्येभ्यो विविधेभ्यः शास्त्रेभ्यः साहाय्यमपि प्राप्तम्--यस्मिन्नास्तिकदर्शनानां प्राधान्यं विद्यते। परमयमपि तस्य विद्यावैभवस्यैव दायोऽस्ति। निरालम्बनवाद-शून्यवाद-केवलनिर्विकल्पकप्रत्यक्षता-विज्ञानात्मवाद-प्रभृतीनि भूयांसीदृशानि स्थलानि दर्शयामो येषु कुमारिलेन पूर्णतो बौद्धानां विपरीताः सिद्धान्ताः स्थिरीकृताः। अन्ततो गत्वा बुद्धस्य स्वयमीश्वरत्वखण्डनव्याजेनेश्वरसाधनविषय औदासीन्यमवलम्बनीयमापन्नं भट्टपादानाम्। एतत् तु प्रायः सर्व एव जानन्ति यन्मीमांसादर्शनमेकं महदास्तिकं विचारशास्त्रमिति तथैतत् प्रतिपाद्यविषयेषु केनापि रूपेण वयमीश्वरे विश्वासमपि पश्यामः--यथा हि प्राय एतेषां मङ्गलाचरणैर्ज्ञायते। किन्त्वेतस्य सर्वस्य सत्त्वेऽपि कुमारिलसदृशः सूक्ष्मः समीक्षक ईश्वरसदृक्षेऽनुपेक्षणीये विषये यदा मौनं धारयन् विलोक्यते तदा वयमेतस्मिन् कस्यचिदपि महतो रहस्यस्याशंकाया अधिकारं धारयामः। ममायमाशयो वर्तते यदीश्वरसत्ताविषये लेखनी तेषां व्याप्रियेत तदा तदाधारेण बुद्धस्यापीश्वरत्वं तदनुयायिनः साधयेयुः। अस्मादप्रियसत्यादात्मनो रक्षणाय तेषामस्यां दिशि मौनिताऽवश्यिकी अभवत्। एतेन वयं ज्ञातुं पारयामो यत् कुमारिलः स्वस्य लक्ष्यस्य पूर्तये कियान् सचेष्टोऽवर्तत इति।

ममास्याशयस्य समर्थनं तत्र गत्वा तु भूयोऽपि दृढं भवति—यत्र वयमस्य प्रियग्रन्थस्य श्लोकवार्तिकस्य प्रारम्भ एव सर्वज्ञस्य खण्डनं लभामहे। सम्भाव्यते--कुमारिलात् पूर्वम्--'अमरकोशः' प्रचारे समागतो भवेत्--यदाधारेण बुद्धस्य सर्वज्ञता तेषु दिनेषु भूयस्त्वेन स्वीकृता भवेत्?

सर्वज्ञः सुगतो बुद्धः········।

अथवा भट्टपादा एवं शङ्कमानाः प्रथममेव स्पष्टं दृढञ्च पन्थानमाविष्कर्तुं निश्चिन्वानाः कथयन्ति—यदीदृशं किमपि प्रमाणं नास्ति-यस्य साहाय्येन सर्वज्ञस्य कल्पनाऽपि क्रियेत ? यद्येवं स्यात्तर्हि तदा इदमपि भवेत् यच्चक्षुर्भ्यामपि रस आस्वाद्येत ? संसरणशीलेऽस्मिन् विशाले संसारे कोऽपि सर्वज्ञो भट्टपाददृष्टि-पथं नागतो न चेदृशं किमपि शास्त्रं ते दृष्टवन्तः यस्मिन् सर्वज्ञं प्रमाणयितुं शक्ति-र्विद्यमाना भवेत् यदीदृशं कोऽपि साहसमपि कुर्यात्, तदा कुमारिलस्तं तच्छास्त्रस्या-योग्यतामनित्यतामसारताञ्च दर्शयति ।

एकेन तु प्रमाणेन, सर्वज्ञो येन कल्प्यते ।
नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते ॥११२॥
सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ॥११६॥
न चागमेन सर्वज्ञस्तदीयोऽन्योन्यसंश्रयात् ॥११८॥
नित्यश्चेदर्थवादत्वं तत्परे स्यादनित्यता ॥११९॥

इमानि कानिचिदुद्धरणानि तेषां कुशलतायाः परिचायकानि सन्ति यान्यव-लम्ब्य ते बौद्धसिद्धान्तानां प्रवेशायापि स्थानं न दत्तवन्तः एवं तन्मूलोच्छेदे कामपि न्यूनतां न कृतवन्तः । अयमेको विचारस्य मार्गः बौद्धिक्या असहिष्णुतायाः प्रत्यक्षं निदर्शनं वा विद्यते-यस्मिंश्च प्रगाढं वैदुष्यमन्तर्हितमस्ति ।

आचारस्य महत्ता

अपरः कश्चन विशेषः तादृशः-यश्च भट्टपादेभ्यः प्रादुरभवत् यश्चाग्रे तदनुयादिनो निश्चलेन भावेनानुसृतः, सोऽस्ति—वाक्यानामाचाराणां च मान्यता-सम्बन्धी । बुद्धोऽपि सत्याहिंसाविषये दृढतरः तथा वेदोऽपि । अस्मिन् विषये वैदिकं स्थलं परिहायोभयोरप्यैकमत्यम् । न केवलमिदमेव, अन्येऽपीदृशा विषया बहवः । यथा-ब्रह्मचर्य-शम-दम-तितिक्षा-त्यागादयः । तेष्वनयोरुभयोरेवं संसारस्य समग्र दार्शनिकविचारकाणामन्येषाञ्च महतामैकमत्यमेव न केवलं किन्त्वनिवार्यत्व मप्यस्ति । एतादृशानामाचाराणां विचाराणाञ्च प्रामाण्यविषयिणी चर्चाऽऽयाति, तदा कुमारिल एकं विचित्रं सयुक्तिकञ्च पन्थानं निर्दिशति-यत् सत्यं प्रमाणमस्ति, आवश्य-कञ्च तत्, परं बुद्धोक्तत्वेन तदनुपादेयम् । सत्यं त्वेकं प्रतीकमात्रम्, इदं तथ्यमनुपरि-निर्दिष्टेषु तथाऽन्येषु सर्वेष्वपि गुणेषु प्रवर्तते । वेदद्वारा निर्दिष्टं सत्यं तथा बुद्धेन निर्दिष्टं सत्यमनयोः कुमारिलस्य मते महदन्तरं विद्यते । स कथयति—सत्यं सत्यमस्ति, परं यतो हि तस्य सम्बन्धो बुद्धेन सह सञ्जात इति कृत्वा तत् सत्यं दुष्टमभूत् । यथा लवण-समुद्रे पतितमुत्तमादुत्तमं तथाऽनुत्तमादनुत्तमं वस्त्वपि लवणं भवति, तथैव सत्ये सत्यतायां सत्यामपि बुद्धवाक्याधारेण तत् प्रामाणिकं नास्ति ।

यथा इमायां लवणाकरेषु, मेरौ यथा वोज्ज्वलरुक्मभूमौ ।
सञ्जायते तन्मयमेव तत्स्यात्.... ....इत्यादि ॥

(तन्त्रवार्तिक १३२)

इदं द्वितीयमुदाहरणमस्ति—यदाधुनिकाः इदं श्रद्धाविजृम्भितमिति । कथयेयुः, परमस्माभिस्त्विदमत्र द्रष्टव्यम् यत् तेषां बुद्धिवैशद्यं कियद्गावरूपेणास्तीति तद्धि यदा स्वविरुद्धानां प्रतिपक्षिणां स्वान्तिकागमनमेव निरुणद्धि तेषां विजयस्य का कथा । एवं स्वनिश्चितसीमातोऽपि बहिर्निष्कास्य क्षिपति । अस्यैव समर्थनं[१] न्यायमाला-कारेणापि कृतम् ।

जातीय-गौरवम्

बौद्धवचनानामप्रामाण्यसाधने तैः यादृशं कौशलं प्रदर्शितम् तत्र बुद्धः व्यक्तिगत जीवनसाहाय्येन वर्णाश्रमधर्माणामुपासकमात्मानं प्रदर्शयति, स्वस्य ब्राह्मण्यमपि सङ्केतयति । अनेनापि कारणेन तदुपदेशा न प्रामाणिकाः । यतो हि सः क्षत्रियस्सन् रक्षादीनि स्वकर्माणि परित्यज्य ब्राह्मणवृत्तिमवलम्ब्योपदेशायारब्धवान् । स्वकर्मत्यागः परधर्मपरिग्रहश्चेति महान् दोषः । प्राचीना वर्ण-व्यवस्थाऽत्रैवावलम्बिता वर्तते । एभिर्विचारैर्बुद्धेन गृह-राज्यशस्त्राणां त्यागं कृत्वैकं महत् पापमाचरितम् ! अतः यत्कारणात् कुमारिलस्तं प्रामाण्यकोटौ स्थापयितुं नानुमनुते ।

तदुक्तं तन्त्रवार्तिके 'स्वधर्म्मातिक्रमणे च येन क्षत्रियेण सता प्रवक्तृत्वप्रतिग्रहौ प्रतिपन्नौ, स धर्म्मविप्लुतमुपदेक्ष्यतीति कः समाश्वासः ।' (—तन्त्रवा० १६६)

स किल लोकहितार्थं क्षत्रियधर्म्ममतिक्रम्य ब्राह्मणवृत्तं प्रवक्तृत्वं प्रतिपद्य प्रतिषेधातिक्रमसमर्थैर्ब्राह्मणैरननुशिष्टं धर्म्मं वाह्यजनानुशासनतद्धर्मपीडामप्यात्मनोऽङ्गी-कृत्य परानुग्रहं कृतवानिति (तन्त्र० ११६)

अन्यानि बहूनीदृशानि स्थलानि सन्ति, यत्र वयमुपरि प्रतिपादितानां विचार-धाराणां समर्थनं प्राप्नुमः । बुद्धस्य वाक्यमुद्धरन् कुमारिलः—

कलिकलुषकृतानि यानि लोके,
मयि निपतन्तु विमुच्यतां तु लोकः । (११६ तं० वा०)

यद्वस्तुतो बुद्धः कलुषभाजनमिति सङ्केतयति एवमुद्धरन्नेदं चिन्तयति यदेवंविधानि विनयवाक्यानि प्रत्येकं महत आत्मनः प्रेरणया भवन्ति येश्च गुणानामेव परिचयो लभ्यते, नतु दोषाणामिति । संक्षेपत इयदेव लेखनं पर्याप्तमस्ति यत् कुमारिलभट्टा यां

१. शाक्योक्ताहिंसनं धर्मो न वा धर्म्मः श्रुतत्वतः ।
न धर्मो नहि पूतं स्याद गोक्षीरं श्वदृतौ धृतम् ॥ पृ.३० न्या०० ॥

महतीं वैदुष्यसम्पदमादाय प्रावर्तन्त--तस्यां त अशातीतं साफल्यमलभन्त, तदर्थंमास्तिकाः तेषां कृतज्ञाः स्थास्यन्ति ।

यथा तथा वा भवतु, भट्टपादा यानुपायानवलम्ब्य वैदिकज्ञानराशिं संरक्षितवन्तः तदसाधारणमित्यत्र नास्ति कश्चन सन्देहः । वैदिकसदाचारस्य—यैका महती परम्पराऽनादिकालादागच्छति तस्यां बौद्धविद्वद्भिराघातकरणे कापि न्यूनता न कृता । यदीदृशे सङ्कटावसरे कुमारिलस्याविर्भावो नाभविष्यत् तदा त्वद्य समग्रे संसारे सनातन-संस्कृतेर्नामावशेषोऽपि नास्थास्यत् । बौद्धधर्मस्य प्रचारः सम्पूर्णे जगत्य-नीश्वरवादेन सहैव क्षणिकवादं शून्य-वादञ्चापि अतनिष्यत्--येन जनानां संसारं प्रति रुचिरप्यपागमिष्यत् तथाऽत्यधिकमकर्मण्यतायाः साम्राज्यमवर्धिष्यत । ईदृशा-नार्यपरम्परातस्समाजं रक्षितवन्तः श्रीभट्टपादाः कर्मनिष्ठां प्रकाशयन्तः । इदमेकं वैज्ञानिकं तथ्यमस्ति--येन कुमारिलस्येदं महल्लक्ष्यं केवलं शास्त्रीयवादविवाद मात्रेण न पर्यवसितम्, किन्तु सर्वजनहितरूपेणापि परिणतिमगच्छत् । भट्टपादानां सुदृढवैदुष्ये विपक्षिणां पराजये च कारणं निरुपमा शक्तिरेव । तस्मात् तान् अवतार-रूपेण लोका मन्यन्ते ।

लोकस्य वेदस्य च समन्वयः

सर्वतो महान् दायो मीमांसा-दर्शनस्य सर्वस्मै संसारायायमस्ति यत् तद् लोकस्य वेदस्य च पृथक् पृथगस्तित्वं विनाश्य परस्परं समन्वयश्चकार । यथा हि वयमन्येषां दर्शनानां सिद्धान्तैरवगच्छामः, तथाद्य वयं प्रत्यक्षमपि पश्यामो-यल्लोकस्योपेक्षाकर्तृणि मन्तव्यानि कियन्त्युपेक्षणीयानि भवन्ति । जगति वर्तमाना वयं ससारं प्रत्युदासीनाः किञ्च हीनताभावनां रक्षितुं न प्रभवामः । यदि वयमेतां प्रति प्रवृत्ता अपि भवामस्तर्ह्येकस्यां दिशि स्वयमात्मनो हीनान् कुर्मः । पुरः प्रत्यक्षं दृश्यमानां भित्तिं शून्यां कथयन् मार्गः कियदवधि सामान्यजनताया हृदयं यावद् गन्तुं शक्नोति । यदा हि सा सुस्थिरोपस्थिताऽस्ति । किञ्च स्वल्पस्यापि तद-भावस्य कल्पनैव सङ्घट्टनेन शिरःस्फोटनं स्मारयति । न वयं पारिवारिकैर्बन्धनैः सामाजिकैः कर्तव्यैश्च पृथक् स्थित्वा जीवितुं शक्नुमः । एवं संसारं विमुच्य, स्वीयैः कर्तव्यैरुत्तरदायित्वैश्च वञ्चिता भूत्वा वनं गत्वा सम्पाद्यमानमात्मिकोत्थानमपि महनीयं नास्ति । अतएव मीमांसा-दर्शनेन स्वस्मै चरमलक्ष्यायात्मिकोन्नतय एकः श्रेष्ठो राजमार्गो निर्धारितः—यदनुसारं वयं लौकिकमर्यादानां रक्षणेन सहैवात्मोत्था-नस्य स्ववसरं प्राप्तुं समर्था अभूम । ईदृशान् सिद्धान्तान् निर्धारयता तेनैकं मध्यमार्गं गन्तव्यमभूत्—यस्य स्थिरत्वश्रेय आचार्यभट्टपादानामस्ति ।

भट्टद्वारा निर्धारिता मार्गाः केवलं पुस्तकानां पृष्ठानि यावदेव सीमिता नातिष्ठन् अपितु ते लोकेन शास्त्रेण चोभाभ्यां व्यावहारिकीं मान्यतामलभन्त । एतस्मादेव तु कथ्यते—**"व्यवहारे भट्टनयः"**

इयमेकोक्तिर्भट्टस्य नीतेर्मान्यतायाः प्रमाणत्वाय पर्याप्तास्ति। भट्टः स्वस्या नीतेर्निर्धारणे समन्वयभावनाया महत्त्वं प्रादात्। न स लोकमुपैक्ष न चाध्यात्मम-वाहेलयत्। एतेन तदीया लेखनी उभयोस्समानतामेव न, अपितु महत्त्वपूर्णं स्थानमपि प्रदत्तवती। यथा हि वयं निम्नोदाहरणैर्ज्ञातुं पारयामः। श्लोकवार्तिकस्य प्रारम्भे सर्वतः प्रथमम्—

"प्रयोजनं विना न मन्दोऽपि प्रवर्तते"

इति कथयित्वा प्रयोजनस्यानिवार्यतां दर्शयति। स तु पदे पदे इदं साधयति यत् कस्मिन्नपि वैदिके कर्म्मणि कस्यापि प्रवृत्तिः केवलमेतस्मादेव कदापि न भवति यत् तद्वेदेन विहितमिति किन्तु प्रवृत्तिजनके महन्निमित्तं यदि किञ्चिदिष्यते तर्हि तत् प्रयोजनमेव। वयं लोके जनेष्विमां दृष्टिमनुभवामः यद्विना किमपि प्रयोजनमल्पीयस्यपि कार्ये भागं न गृह्णातीति। इमामेव वैदिककर्मस्वपि समादाय भट्टपादाः दृष्टिं लौकिक-नियमानानुपादेयत्वं प्रकटयाञ्चक्रुः।

न केवलमिदमेव, ते तु मीमांसाध्ययनस्यापि प्रयोजनवत्वमावश्यकं मन्वते। कथयन्ति च—

मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता।
न शुश्रूषयितुं शक्या प्रागनुक्त्वा प्रयोजनम् ॥१३॥
(श्लो० वा०)

न केवलमत्रैव स्थितिरियन्, किन्त्वन्यान्यपीदृशानि स्थलानि सन्ति, यत्र व मे तत् तथ्यं प्रस्फुटितमुपलभामहे। फलविषये मीमांसा दृष्टमदृष्टञ्चेति प्रकारद्वयं प्रस्तौति। तयोःकस्योपादेयत्वमिति चिन्तायां कुमारिलः कथयति—यावद् दृष्टं (अर्थात् प्रत्यक्षं) फलं दृष्टिपथमायाति किं वा प्राप्यते तदादृष्टं (अर्थादप्रत्यक्षस्य) फलस्य तु कल्पनमपि न न्याय्यमिति—

"लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना (श्लो. वा.) तदिदं सर्वात्मना समेषां मीमांसकानां शिरोधार्यमभूत्। यदि कुमारिलस्य दृष्टौ लोकस्य किमपि महत्त्वं नाभविष्यत् तदा स सम्भवतः कदापि दृष्टफलाय प्राधान्यं नादास्यत्। तथाऽदृष्टमेव सर्वस्वमसाधयिष्यत्. परं तत्कृते लोकस्योपेक्षाऽपि सह्या नावर्तत।

अस्य सर्वस्य विवेचनस्यायमर्थो नास्ति यत् स लोकस्य पुरतो वेदस्य महत्त्वं हीन मकरोदिति, अपितु तदधिकाधिकवर्धने साहाय्यमाचरितवान्। वस्तुतो यत्र स वेदस्य स्वतः प्रामाण्यमसाधयत्, तत्रैव लोकस्यापि प्रामाण्यमदर्शयत्। समग्रस्य जगतो ज्ञान-राशिं स द्वयोर्भागयोर्व्यभजत्—एको लोकमूलकोऽपरश्च वेदमूलक इति। एतयोर्विभागयोः-

रेव सम्पूर्णो ज्ञानराशिः समाविशति, ततो नान्यः कश्चनांशोऽवशिष्यते यश्च लौकिका वश्यकव्यवहाराणां सम्बन्धी प्रश्नः। तदर्थं समुदितं साहित्यमेकेन प्रकारेण स्वतन्त्रमस्ति—यद् 'लोकदर्शनम्' इति शक्यते वक्तुम्। ततोऽवशिष्टं सकलमपि वेद-दर्शनस्य दायः भवतु वा पुनस्तदास्तिकतया सम्बद्धमथवा तत्खण्डनेन। एतदतिरिक्तं ज्ञानस्य काऽपि धारा कुमारिलस्य नास्ति मान्या, अत एव स संक्षेपेण कथयति—

"तत्र यावद्धर्ममोक्षसम्बन्धि तद्वेदप्रभवम्।
यत्त्वर्थसुखविषयं तल्लोकव्यवहारपूर्वकमिति विवेक्तव्यम्॥"
इति (तन्त्र० ७९)

स केवलमियत्कथनमात्रेणैव न शाम्यति, अपितु तस्य विवेचनमपि करोति। वर्णव्यवस्थाऽपि वेदमूलिका विद्यते, यतोहि साऽपि कर्मानुष्ठाने साहाय्यं प्रापयति अस्मादेव तस्य शास्त्राणामपि (सम्बद्धं) प्रामाण्यं निर्विवादमस्ति। ज्योतिष-सम्पूर्णाङ्गेतिहास-पुराणसामुद्रिक-वास्तुविद्या-प्रभृतीनां समेषां येन केनापि रूपेण वेदात् सम्बन्धोऽस्ति, किञ्च लोकस्य वेदस्योभयोः सम्मतिं विना ज्ञानस्योत्तमोत्तमस्यापि प्रामाण्यं वयं न स्वीकुर्मः। संक्षेपेण विहितादस्माद् विवेकाद् वयं निश्चितं ज्ञातुं समर्थाः स्मो यत् कुमारिलस्य वेद-इव लोकोऽपि प्रामाण्यकोटौ निपतति, तथा तयोः समन्वयस्य सर्वतोऽधिकं कार्यं तदीयलेखन्या साधितम्।

एतावदेव नैव, यत्र लौकिकानां वैदिकानां चार्थानां स्वीकृतेः सम्बन्धे चर्चाऽऽपतति, तत्र कुमारिलः शबरेण दर्शिते पथि चलन्नुभयोरभिन्नतां स्वीकरोति। स तु प्रारम्भिकसूत्रस्य विवेचनावसर एवैतत् सङ्केतयन् कथयति यदस्य पूर्वपदानां (अथवा धर्मजिज्ञासाया) व्याख्यां कुर्वन् कतिपयैर्वृत्तिकारैर्लौकिकार्थस्योल्लङ्घने साहसः कृतः यस्तस्य दृष्टावसह्योऽस्ति, एवं स तस्यापाकरणाय तानुपालभते—

वृत्त्यन्तरेषु केषाञ्चिल्लौकिकार्थव्यतिक्रमः।
शब्दानां दृश्यते तेषामुपालम्भोऽयमुच्यते॥
(श्लो० वा०)

ईदृशानेवान्यान् सिद्धान्तान् वयमुत्तरवर्तिषु नैकेष्वधिकरणेषु प्राप्नुमः—यैः कुमारिलस्य लोके विद्यमानोऽभिनिवेशः सुस्पष्टमवगतो भवति। सोऽस्मिन् विषये आचार्यशबरादप्यधिकां प्रगतिं कृतवानित्यत्र न कोऽपि सन्देहः।

मीमांसायामनन्यादृशी श्रद्धा

भट्टपादेषु वयमनुभवामो यत्ते मीमांसायां श्रद्धातिशयवन्त इति। अनेन वयमनुमातुं शक्नुमः यन्मीमांसायाः कियन्महत्त्वमिति। यद्येवं महत्वं च स्यात् तर्हि भट्टपादेभ्यः पूर्वं मीमांसायाः स्वरूपमेव न निश्चितमिति स्यात्। किन्तु नेयं

स्थितिः। दार्शनिकचिन्तका मीमांसासिद्धानाक्षेप्तुमारेभिरे, कुमारिलभट्टास्तु तानाक्षेपान् परिहर्तुं कटिबद्धास्सन्तः मीमांसामसाधारणीं विद्यां व्यवस्थापयन्तो विभिन्न विद्यानामाश्रयत्वं मीमांसायाः कथयन्तस्तस्या अधिगमो महता क्लेशेन भवतीति प्रतिपादयन्ति। मानवस्य वैदुष्याय कर्मपरायणतायै च मीमांसाया अध्ययनमनिवार्यं वर्तते। तत्रेतरविद्यास्वल्पीयस्यप्युपेक्षादृष्टि न सोढुं शक्यते। तथा सति महतोऽनर्थस्य स्यादवसरः अयमेको महान् न्यायमार्गः—यस्मिन् स्वल्पीयस्यप्यनभिज्ञता महतोऽन्यायस्य मानवो भाजनं भवेत्। तथा स्वल्पयाप्यसावधानतया सम्पन्नमन्यथा ज्ञानमत्यन्तं हानिकारकं स्यात्। अत एवास्या अध्ययने जागरूकैर्भवितव्यम्। भट्टपादानां वाक्यैः वयं मोमांसायास्तात्कालिक्या उपयोगिताया मान्यतायाश्च कल्पनां कर्तुं[1] शक्नुमः।

कुमारिलाभिप्रायं पार्थसारथिमिश्रः[2] स्पष्टीकुर्वन् मीमांसाया विशालतां प्रकटयति तथा तदपेक्षयाऽन्यासां विद्यानां क्षेत्रं सङ्कुचितं घोषयति।

वस्तुतः सत्यमेवेदम्। यथा हि प्रारम्भिकेषु प्रकरणेषु मीमांसाशास्त्रस्यानेकरूपेषु प्रकाशं पातयता लिखितमस्ति यदिदमेकं वाक्यशास्त्रं न्यायशास्त्रं विचारशास्त्रं च वर्तते अत एवैतेषु त्रिष्वपि तत्त्वेषु सर्वा विद्या इमामाश्रित्य तिष्ठन्ति। किञ्च वाक्यन्यायविचाराणां त्रयाणामप्याश्रयप्रश्नो यद्योदेति तदा मीमांसया तेषां स्वतः सम्बन्धस्सिध्यति सुतरां मीमांसाया विभुता स्वाभाविकरूपेण सिद्धा भवति।

स्व[3]वाण्या व्यापारं ते वेदमार्गाश्रितं मन्वते। अत एव चास्याः पवित्रतायां मानसिकं गर्वमपि कुर्वन्ति। वेदेन सह भट्टपादानामत्यन्तमात्मीयता वर्तते परं स

---

१. मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता।
न शुश्रूषयितुं शक्या प्रागनुक्त्वा प्रयोजनम्॥१३॥
विद्यान्तरेषु नास्त्येतद् यद्यभोष्टं प्रयोजनम्।
अनर्थप्रापणं तावत् तेभ्यो नाशङ्क्यते क्वचित्॥१४॥
मीमांसाया त्विहाज्ञाते दुर्ज्ञाते वा विवेकतः।
न्यायमार्गे महान् दोष इति यत्नोपचर्यता॥१५॥
(श्लो० वा०)

२. अल्प एव प्रत्यवायः तेषामल्पविषयत्वात्। (श्लो० वा०)

३. मीमांसाशास्त्रतेजोभिर्विशेषेणोज्ज्वलीकृते।
वेदार्थज्ञानरत्ने मे तृष्णातीव विजृम्भते॥
धर्मस्तुतिपरो वाच्यो व्यापारोऽयं सनातनः।
श्रद्धालोर्वेदनिष्ठस्य नापवाद्यः कदाचन॥
यथाकथञ्चिदारब्धा त्रयीमार्गानुसारिणी।
वाग्वृत्तिरल्पसारापि श्रद्दधानस्य शोभते॥

मीमांसाज्ञानेन शून्यं वेदस्य ज्ञानमपूर्णमेवेति ते स्वीकुर्वन्ति। तथा स्वस्यास्तृष्णाया अर्थात् ज्ञानपिपासायाः शान्तये तां विना पर्याप्तां नैव गणयन्ति। ते स्वस्यास्य वाणीविलासस्य सत्यतायां शाश्वततायां चाभिमन्वते। अत एव ते स्वयं यथाऽस्मिन् पक्षे श्रद्धयते तथाऽन्यानपि विधातुमभिलषन्ति।

लोकजन्यता

स्वकीयया अनया श्रद्धयाऽथवाऽस्थातिशयेन सहैव ते मीमांसामनिदंप्रथमताकात्कालाल्लोके प्रचलितां व्यवस्थापयन्ति। मीमांसा ह्येकोऽगाधो ज्ञानसागरोऽस्ति, तथा तस्य सागरस्योदयः कस्मादप्येकस्माज्जनान्न भवितुमर्हति। स सांसारिकैः शास्त्रीयैश्च विभिन्नानुभवैः परिपक्वानां न्यायानां निधिः, युक्तीनां तर्काणां च समुदायो विद्यते—यस्योद्गमः कस्मादप्येकस्मान्मानवमस्तिष्कान्न सम्भाव्यते। विशेषतो लौकिकोक्तीनां व्यवहाराणां च सङ्कलनमस्ति यत् कस्याप्येकस्य[1] समयविशेषस्य नास्ति दायः, अपितु भिन्न-भिन्नेष्ववसरेषु सहस्रशो वर्षाणां सुदीर्घे सीम्नि संसारेण यानि यानि तथ्यानि प्रस्तुतानि तेषामेव सङ्कलितं तत्त्वम्। एतेन वयं यत्र लोकमीमांसयोः सम्बन्धस्य परिचयं प्राप्नुमस्तत्रैव तस्याः सार्वकालिकतायां सार्वदेशिकतायां तदुपयोगितायां चापि निर्विवादा भवामः।

यदि केवलं शास्त्राद् वेदेभ्यो वा समुद्भूतताऽथवा केनाऽपि महामानसेन प्रवर्तितत्वं सिद्धं स्यात्तर्हि सम्भवतो मीमांसायाः किञ्चित् सङ्कुचितता समाविष्टा स्यात् परं कुमारिलसदृशेभ्यो विचारकेभ्य इदं सङ्कोचीकरणं कथं सह्यं स्यात्। ते त्विमां सम्पूर्ण-प्रमाणानां निकषपट्टिकायां कषितं हीरकं कथयन्ति। तेषां दृष्टौ त्विदमेकमीदृग्विधं नवनीतमस्ति, यद् विभिन्नसम्प्रदायानामविच्छिन्न-परम्पराणाम्, तथाऽविच्छिन्न-व्यवहाराणाञ्च मन्थनात् समुद्भूतम्। अत एवास्या लोकोद्भवाया अपि लोकशास्त्रयोरुभयोः समानमानत्वं स्वाभाविकमस्ति, यतो हि तेषां शास्त्रपरिचयवतां व्यवहारेभ्यः शास्त्रं क्वापि दूरे न गतमभूत्? अयमेको नवीनो दृष्टिकोणः स्वपूर्वजापेक्षया कुमारिलपादानां प्रतिभासम्पन्नतायास्सूचकः।

वेदान्तेऽनन्याऽऽस्था

भट्टपादानां मीमांसायामेतावत्यभिनिवेशे सत्यपि क्वचित् क्वचिदत्यन्तमाग्रहशीलतायाः परिचयं ददानानामपि वेदान्तेऽनन्यसदृशीमास्थां पश्यामः। इयमेका

१—मीमांसा तु सर्ववाक्यन्यायनिरूपणात्मिका (पार्थसारथिः श्लोकव्याख्या)

२—मीमांसा तु लोकादेव प्रत्यक्षानुमानादिभिरविच्छिन्न—सम्प्रदायपण्डितव्यवहारैः प्रवृत्ता नहि कश्चिदेतावन्तं युक्तिकलापमुपसंहर्तुं क्षमः। (तन्त्रवार्तिकम् चौ० सी०)

तेषामुदारता । शबरस्वामिनां स्वीये भाष्ये कुत्राप्येवंविधं कमपि सङ्केतं न पश्यामः, तथापि भट्टपादाः विभिन्नैर्विशेषणैर्मीमांसाया महनीयतां दर्शयन्तोऽपि यत्रात्मविवेचन-प्रकरणमायाति तत्रास्य विषयस्य दृढतायै सम्यक् प्रतीतये च स्पष्टरूपेण वेदान्त-सेवनस्य साधनरूपेण स्पष्टमुदघोषयन् । अस्य नायमर्थो यन्मीमांसाया आत्मप्रकरणं कस्यामपि दिश्यपूर्णं विद्यते किन्तु मीमांसायाः कृते नायं प्रधानो विवेचनीय–विषयः इत्यत्र तात्पर्यं तेषाम् । वेदान्तस्य (उपनिषदः) त्वेकैकं वाक्यं मीमांसामवलम्ब्यैव प्रवर्तते इति तेषामाशयः । इमां वस्तुस्थितिं परिरक्षन्तस्ते मीमांसायां सुदृढां भक्ति श्रद्धाञ्चाविष्कुर्वन्तो वेदान्तेऽप्यनन्यादृशीमास्थां प्रकटयन्ति, तेन तेषां विशालं हृदयं मूर्तरूपेणानुभवामः । मीमांसाविरोधेन वेदान्तिनां मतं नेतुं तत्र तत्र तन्मतं खण्डयन्तश्च पक्षपातरहितां दृष्टिमाविष्कुर्वन्ति ।

> इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
> दृढत्वमेतद्विषयश्च बोधः, प्रयाति वेदान्तनिषेवणेन ॥

एवमनेकेषु स्थलेषु भट्टपादानां रीतिमवधारयन्तो वेदान्तिनः स्वशास्त्रे प्रवेशसिद्धये मीमांसामाधारशिलामङ्गीकृतवन्तः ।

सामाजिक्यो मान्यताः

महान्तो विचारकाः सुदृढाः समीक्षकाश्च सन्तोऽपि श्रीभट्टपादाः सामाजिकीषु मान्यतासु स्वल्पमपि आघातं नान्वमन्यन्त, अपि तु तासां विशिष्टं स्थानं कल्पयामासुः यत्रापि सामाजिकीनां परम्पराणामौचित्यानौचित्य विचार उपस्थितस्तत्र कुमारिलाः प्रायो मौनमधारयन्नथवा तासां सम्भवोपायैः प्रमाण्यसाधनाय प्रायतन्त । ईदृशान्यने-कान्युदाहरणानि वयं तेषां रचनासु विलोकयितुं प्रभवामः ।

यत्राचारस्य प्रामाण्यविषयकः प्रश्न आगच्छति, तत्र ते शास्त्रीय-विवेचनेन सह स्वयमग्रेसरा भूत्वा समाजस्य माननीयपुरुषाणां वाक्यानि चरित्राणि चैव नियाम-कानि दर्शयन्ति, न तु शास्त्रम् । यतो हि सामाजिकाचाराणामतिविस्तृतरूपेण सर्वतः प्रसृतानां शास्त्रमूलत्वगवेषणं प्रायेण दुष्करमित्यस्यां स्थितौ कुमारिला-स्तेषामाचाराणामप्रामाणिकत्वसाधनापेक्षया सामाजिकमानवपरम्पराधारेण प्रामाण्यं विरुद्धप्रमाणोपलम्भं यावदङ्गीकुर्वन्ति । किञ्च लोकः समाजो वा यान् धार्मिकानथवा शिष्टान् गणयति, तेषां [1]चरितान्यनुकरणीयानीति घोषयन्ति ।

---

१. एवं च विद्वद्वचनाद्विनिर्गतं प्रसिद्धरूपं कविभिर्निरूपितम् । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
'प्रत्यक्षवेदविहितधर्मक्रियाया हि लब्धशिष्टत्वव्यपदेशा यत्परम्परा-प्राप्तमन्यदपि धर्मबुद्ध्या

एवं ते होलाधिकरणन्यायेन तान् सर्वानाचारानावश्यकाननिवार्यानुपादेयांश्च प्रकटयन्ति, ये विभिन्नेषु प्रदेशेषु सामाजिकमान्यतारूपेणादृताः सन्ति। एतेन तेषां सामाजिकपरम्परायां कियान् विश्वास इति विज्ञातुं शक्यते।

निष्पक्षसमीक्षकाः

एवं वर्णयतो मे नायमाशयो यत् भट्टपादा विना-चिन्तन-ज्ञानाभ्यामेवान्धानुकरण-दृष्ट्या सर्वेषां प्रामाण्यं व्यवस्थापयन्तीति। एवं प्रामाण्यव्यवस्थापनसमये ते केषामाचाराणां समाजे ग्राह्यता, केषाञ्चाग्राह्यतेति सततं चिन्तयन्तो येषां ग्राह्यता नास्ति येषाञ्च समाजे नोपयोगः तान् दूरे प्रक्षिपन्ति। ईदृशेषु स्थानेषु वयं तान् योग्य-समीक्षकरूपेण पश्यामः ये हि स्वकर्तव्यपालनाय सततं सचेष्टास्तथाऽवश्यक-योग्यताभिरनुभवैश्च सम्पन्ना दृश्यन्ते। आचारणां समीक्षावसरे वयं तानाचारशास्त्र-विशेषज्ञानिवावधारयामः ये च प्रायः सर्वेषां प्रदेशानां निन्दितानाचारान् निष्पक्षरूपेण हेयानुलिलखन्ति।

[1]मथुरानिवासिब्राह्मणीनां सुरापानम्, भार्याऽपत्य-मित्रादिभिः सहभोजनं खरोष्ट्रादीनां क्रय-विक्रय उदीच्यानाम्, मातुलसुताविवाहस्तथाऽऽसन्दीस्थभोजन प्रभृतीन् दाक्षिणात्यानाम् गर्हणीयाचारान् तेऽतीवाप्रियानमन्यन्त। स्वयं[2] दाक्षिणात्ये सत्यपि ते दाक्षिणात्यानामाचारे बहु घृणां कुर्वते, अत एव ते तं भूयो भूयस्त्याज्य-दृष्ट्याऽऽक्रोडयन्ति। एतत्सर्वं तेषामधिकृत-समीक्षादृष्टेः साक्ष्यस्ति। तथाऽस्यैव प्रकरणस्येतरभागेषु वयं तन्मस्तिष्कस्य चमत्कारं पश्यामः यत्र ते पौराणिकाख्यानानां समाधानं कुर्वन्ति। (तन्त्रावार्तिकस्याचाराधिरणे)

कुर्वन्ति, तदपि स्वर्ग्यत्वाद् धर्मरूपमेव। (१३१ पृ० त० वा०)
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः।
तथाचारातितुष्ट्यादि धर्म्यं धर्मभयात्मनाम्।
वेदोक्तमिति निश्चित्य ग्राह्यं धर्मबुभुत्सुभिः। (११३ पृ० तं० व०)
स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते।

१. अद्यत्वेऽहिच्छत्रमथुरानिवासिब्राह्मणीनां सुरापानम्, केसर्यश्वाश्वतरखरोष्ट्रोभयतोददानप्रतिग्रह-विक्रयव्यवहारभार्यापत्यमित्रसहभोजनादीन्युदीच्यानाम्। मातुलदुहितृद्वाहासन्दीस्थभोजनादीनि दाक्षिणात्यानाम्। (१२८)

२. स्वमातुलसुतां प्राप्य दाक्षिणात्यस्तु तुष्यति। (१२७)

न ह्येतदेव अन्यान्यपि[3] बहूनीदृशानि स्थलानि सन्ति, यत्र ते समीक्षाया आवश्यकतां प्राकाशयन्। जैमिनेस्तृतीयं सूत्रं त्वेतस्योद्भवस्रोत एव, परं कुमारिलभट्टैरपि समये समये पर्याप्ताः सङ्केताः प्रदत्ताः। ते कथयन्ति--कस्यापि पदार्थस्य पूर्णता विवेचनातोऽथवा निश्चितप्रतिपत्तेः पूर्वं तत्पक्षाणामथवोपपत्तीनां विस्खलितरूपेण प्रदर्शनमनिवार्यं विद्यते। केवलमेकस्य पक्षस्योपस्थापनमात्रेण विषयस्य निश्चितायाः प्रतीतेः स्वीकरणं न समुचितम्। सर्वविधतर्काणां विस्तरेणोपस्थापनानन्तरमेव निर्णयस्य मार्गः स्पष्टो भवति। तस्मिन्नेव समये एकस्य त्यागस्य परस्यात्मसात्करणस्यावसरो भवति। इयमेव समीक्षायाः स्वाभाविकी प्रणाल्यस्ति यस्याः प्रकाशनं कुमारिलाः समये समयेऽकुर्वन्।

वेदान्तस्य महत्ताया विषये लिखितः सम्पूर्णः स्तम्भोऽप्यस्या एव परिचायकः। विशेषतो चास्या वार्ताया अस्ति यत् तेन सर्वासामासां परीक्षाणां समये दृष्टान्ततया लौकिकानि तथ्यान्युपस्थाप्य तानि रोचकानि लोकप्रियाणि सरलानि च विहितानि। अधिकाधिकस्थलेषु तु व्यङ्ग्यमर्यादां स्वीकृत्य सा मनोरञ्जनस्याप्येकं साधनं साधिता। भषायां पूर्णेन प्रमुत्वेन तथा तस्याः प्रभुत्वेन तस्य समीक्षा अपि महत्यः प्रभावशालिन्यः सिद्धाः, नास्त्यस्मिन् कोऽपि संशयः।

स्त्रीणां मान्यता

महर्षि-जैमिनेः प्रकरणेऽस्माभिर्दर्शितमस्ति यत् स्त्रीणां समानताया विषये मीमांसा-दर्शनस्य किं मन्तव्यमिति? आचार्यभट्टोऽपि सिद्धान्तं तं समर्थयति। पुरुषाणामिव कुमारिलस्य लेखनी स्त्रीभ्योऽपि समानाधिकारं मान्यताञ्च प्रददाति। उदाहरणार्थं तन्त्रवार्तिकस्याचारप्रकरणमेव गृह्यताम्--तत्र चर्चा चलति यद् "न ब्राह्मणं हन्यात्" इति प्रतिषेधोऽयं ब्राह्मणविषयकः, अतो ब्राह्मण्या मारणे केनापि पाप-विशेषेण न भवितव्यम् तथा ब्राह्मणस्य कृते सुरापानस्य यो निषेधोऽस्ति तेनापि ब्राह्मण्या विषये न प्रवर्तितव्यम्, यतो ह्युभयत्र पुंलिङ्गस्य स्पष्टो निर्देशो विद्यते। ईदृश्याः समस्याया उपस्थितौ सत्यां कुमारिलस्तां खण्डयति तथा स्त्रीपुरुषयोः कस्यापि प्रकारकस्य भेद-भावस्य कल्पनामशास्त्रीयां साधयति एतस्माद् वयं तस्य मान्यतया सुपरिचिता भवामः।

---

३. स्वलक्षणविविक्तैस्तैः प्रत्यक्षादिभिरञ्जसा।
परीक्षकार्पितैः शक्या, प्रविवेक्तुं न तु स्वतः॥ (८०, तं० वा०)
विशेषतो द्रष्टव्यम् (८१ पृ० तं० वा०)
प्रतिभान्त्यः स्वयं पुंसामपूर्वा ह्युपपत्तयः। भ्रान्तिं बहुमताः सत्यः कुपुरज्ञानबोधनात्॥ सर्वासु तु प्रदर्शितासु स्वातन्त्र्येण विशोधयन्तः काश्चिदुत्सृज्यान्याः प्रमाणीकरिष्यन्ति। (८१)

ब्राह्मणस्त्रीवधे को वा ब्रह्महत्यां निषेधति ।

(तं० वा० १४२)

अत एव वधः सुरापानं चोभावपि पापमूलकौ स्तः। संक्षेपत उपर्युक्तैः सर्वैरपि स्तम्भैर्वयं कुमारिलस्य तथा तदीय-विचाराणां विषय एकं निश्चितं मार्गं यावद् उपगच्छामः। तस्य प्रगाढ-विद्वत्ताया विस्तृताध्ययनस्य विषये तु यावान् लिख्येत तावानल्प एव। इदमेव कारणमस्ति यत् शतशः संख्यायां तस्य परम्पराया अनुयायिन आसँस्तथाऽध्ययावदागमस्य विभिन्नाः प्रणाल्यस्तस्यर्णं न विस्मृतवत्यः। साम्प्रतमस्माभि-रतस्यानुयायिषु दृष्टिपातः कर्तव्यः।

१–मण्डनमिश्रः

भट्ट-कुमारिलस्यानुयायिषु मण्डनमिश्रस्यैकमैतिहासिकं स्थानमस्ति । स्वजीवनस्यानेकासां विशेषतानां महत्त्वपूर्णानां घटनानां च कारणान्मण्डनमिश्रेण भारतीयसंस्कृतौ वाङ्मयेतिहासे चैकं गणनीयं स्थानं प्राप्तम् । इतिहासस्य प्रत्येकं छात्र एतस्य विषये यत् किञ्चिद्रूपेणावश्यं वेत्ति तथाऽस्याभिधानं महतादरेण गृह्णाति । अस्य विद्वत्तायां लोकाः शास्त्राणि च मुग्धान्यवर्तन्त विशेषतो मीमांसादर्शनेन तथा भट्ट-परम्परयेदृशादाचार्याद् गौरवं प्रतिष्ठा च प्राप्ते—इदमेकं निर्विवादं तथ्यं विद्यते । दन्तकथाभिस्तात्कालिकैतिहासिकग्रन्थैश्चेदं प्रमाणितं भवति यदयं स्वस्य युगस्य सर्वश्रेष्ठो मीमांसक आसीत्—यो हि ब्रह्मणोऽपेक्षया कर्मकाण्डेऽधिकं विश्वसिति स्म । कुमारिलस्य सिद्धान्तानां ग्रहणेनाथ च समुचितरूपेण परिवर्तन-परिवर्द्धनाभ्यामयं स्वकीयवैदुष्यस्येयतीं गहनां मुद्रां तदानीन्तने समाजेऽङ्कयत्—यतः शङ्कराचार्यसदृशेन महताऽवतारेणापि स्वस्याचार्यतोपपत्तयेऽस्य शरण आगमनमावश्यकमभूत् तथा ते निश्चितमेवैनं शास्त्रार्थे पराजित्यैव स्वस्य निखिलजगदाचार्यत्वं प्राप्तुं क्षमा अभूवन् । अयमेको लोक प्रसिद्धो वृत्तान्तो मण्डनमिश्रस्य महत्वप्रतिपादनेऽलं भवति ।

आम्, यथा ह्युपरि लिखितमस्ति—श्रीमिश्रस्य कर्मकाण्डेऽनन्याऽऽस्थाऽवर्तत तथा शङ्करस्य ब्रह्मणि । शङ्कराचार्यस्य ब्रह्मण इदं कर्म बाधकं प्रतीतम्, अत एव तस्मै स्वब्रह्मणः सर्वोत्कृष्टता-विषये सम्मतिग्रहणमावश्यकमभूत् । स्वदिग्विजय यात्रायां शङ्करो मण्डनादुत्कृष्टं कमपि विद्वांसं न प्राप्तवान् । अयमेवैक ईदृशो विद्वानासीद्—यस्य विजयप्राप्तिसमये स किञ्चित् सङ्कोचमन्वभवत् । इमानि सर्वाणि तथ्यानि सडिण्डिमघोषमिदं प्रकटयन्ति यन्मण्डनः स्वकालस्य सर्वश्रेष्ठो मीमांसक आसीत् । तस्मादेव तस्मिन् विजिते सर्वोऽपि विजित इति सिद्धं भवति तदानीन्तनः विद्वत्समाजः ।

जीवनं कालश्च

मण्डनमिश्रस्य जीवनकालसन्दर्भे भगवत्पादैस्सह यश्शास्त्रार्थस्संवृत्तः स एव निर्णायकत्वेन स्वीकर्तव्यो भवति । सर्व एवेतिहासग्रन्थप्रणेतारः माधवानन्दगिरिप्रभृतिभिर्विरचितशङ्करदिग्विजयानुसारेण मण्डनमिश्रशङ्कराचार्ययोस्सम्पन्नां शास्त्रचर्चामेव निर्दिशन्ति । शास्त्रचर्चायाः परिणामः परस्परं गुरुशिष्यभावस्वीकार एव पर्यवस्यति । शास्त्रार्थस्य निर्णायिका मण्डनमिश्रस्य धर्मपत्नी भगवती भारत्येवासीत् ।

भगवत्पादैः पराजिते मण्डनमिश्रे पूर्वक्तसमयानुसारेण मण्डनमिश्रो भगवत्पादशिष्यत्व-मङ्गीकृत्य महान् मीमांसकोऽपि सन् परिनिष्ठितो वेदान्ताभिज्ञो जातः। इत आरभ्य मण्डनमिश्रः सुरेश्वराचार्य इति नाम्ना प्रसिद्धिमवाप्य मीमांसायामिव वेदान्तेऽपि नैक-विधान् सारिष्ठान् ग्रन्थान् प्रणिनाय, येषां गणनाग्रे करिष्यते। पूर्वोत्तरमीमांसयोरु-भयत्रोच्चकोटिकग्रन्थप्रणेता मण्डनमिश्र एक एव परिगण्यते। विरुद्धमार्गगामिनोरण्य-नयोश्शास्त्रयोः सङ्गमस्थलरूपेण मण्डनमिश्रः प्रथते। तदीयजीवनपरिवर्तनस्यैवेदं वैशिष्ट्यमनुभवामः—यद् ब्रह्मणो धर्मस्य चातिनिकटस्सम्बन्ध इति मण्डनमिश्रद्वाराऽ-वगच्छामः।

परं मण्डनमिश्रसुरेश्वराचार्ययोरनन्यत्वान्यत्वविषये विद्वांसो विवदन्ते। उभयोर-नन्यत्वं सत्यं नास्तीति[1] पी० वि० काणे महोदयः एवं डा०[2] गङ्गानाथ झा महोदयश्चानन्यत्वमनयोर्न विश्वसितः। वस्तुतोऽनयोरैतिहासिकप्रसिद्धिविशेषेणा-भिन्नत्वं सम्पन्नम्, यावच्च स्थूलसूक्ष्मप्रमाणोपलब्धिरस्मिन् विषये न स्यात्तावदन-न्यत्वमसम्भवम्। नैष्कर्म्यसिद्धेः प्राक्कथने सम्पादकः श्री जी० ए० जैकबमहोदयोऽ-नेकैः प्रमाणैरनयोरैक्यं साधयति। अस्तु यथा तथा वा। भगवत्पादसमकालिको मण्डनमिश्र इति तावदङ्गीकर्तव्यम्।

भट्टकुमारिलेन सम्बन्धः

ज्ञानावाप्तिदृष्ट्या मण्डनमिश्रो भट्टपादानां शिष्य इति लोका वदन्ति। एवमेव प्रसिद्धिरप्यस्ति। डा० झा० महोदयः स्वीये मीमांसानुक्रमणिकाप्राक्कथने एवमेव प्रत्यपादयत्। परमानन्दगिरिमतानुसारेण भट्टपादानां भागिनेयो मण्डनमिश्र इति प्रतीयते। अस्मिन् विषये प्रबलतरं प्रमाणं नोपलभ्यत इति केचनाशेरते। भट्टपादानां शिष्योऽपि सन् मण्डनमिश्रः स्वीये विधिविवेके तत्र तत्र भट्टपादमतं समालोचयन् प्रतिभाति-यद्भट्टपादे नान्धश्रद्धां निक्षिपतीति। एवं मतभेदे सत्यपि भट्टपादेषु पूज्यत्वबुद्धिमादधाति।[3] आभ्यां प्रदर्शितसन्दर्भाभ्यामिदन्तु निश्चितं भवति—यच्छङ्कर-भगवत्पादानां कुमारिलभट्टानाञ्च समकाले मण्डनमिश्रोऽवर्तत इति। तत्रापि भगव-त्पादैस्सह शास्त्रचर्चासमये मण्डनमिश्रो वयोवृद्धः भगवत्पादाश्च युवावस्थायामासन्। अत्र म० म० श्रीकुप्पुस्वामिशास्त्रिणः ई० ६१५ त आरभ्य ६९५ पर्यन्तं मण्डनमिश्राव-

---

१. धर्मशास्त्रेतिहासः (पृ० ४८०)

२. तत्त्वबिन्दोः प्राक्कथनं द्रष्टव्यम् पृ० ४० अण्णामलै यूनिवर्सिटी।

३. 'अलं वा गुरुभिर्विवादेन' इत्यादि। (वि० वि० पृ० २८५)

स्थितिं निर्द्धारयन्ति । पी० वि० काणे महोदयस्तु ई० ६२० तः ७१० पर्यन्तमिति[१] प्रतिपादयति । उभयोर्मध्येऽन्तरमीषदेव । अतो मण्डनमिश्रकालविषये नातीव सन्देहः ।

अनेकैः प्रमाणैर्मण्डनमिश्रं मिथिलाभिजनं प्रतीमः । अद्यैव न, किन्त्वितिहासे मिश्रपरम्पराया वैदुष्यं स्वर्णाक्षरैरङ्कितमस्ति । एकस्समयो मिथिलायामासीत् यत्र गणनीयानां विदुषां समवायः केन्द्ररूपेणाभवत् । डा० श्री उमेशमिश्रः भागलपुर-मण्डलान्तर्गतमाहिष्मती (महिषी) जनपदं मण्डनमिश्रो जन्मनालञ्चकारेति व्यवस्थापयति । मण्डनमिश्रजीवनविषये ·विशेषतस्तथ्यमिदमवबुध्यते–यत्तद्धर्मपत्न्याः श्रीमत्या भारत्या वैदुष्यातिशय इति । श्रीमती भारती स्त्रैणे स्त्रीशिक्षायाञ्च प्रतिष्ठिताभवत् । अद्यतने युगे स्त्रीशिक्षामधिकृत्य कोलाहलं कुर्वतां प्राचीनेतिहासमाक्षेप्तॄणां समाधानरूपेण श्रीमती भारती देदीप्यमानासीत् । न केवलं वैदुष्य एव, स्त्रीणां शिक्षायां सम्माने च प्रसिद्धोदाहरणरूपेण श्रीमतीं भारतीं वयमुपस्थापयितुं शक्नुमः, या च प्रौढविदुषोः भगवत्पादमण्डनमिश्रयोर्मिथः प्रवृत्तायां गभीरशास्त्रचर्चायां जयापजयनिर्णायिका सती एकविंशतिदिनानि शास्त्रचर्चां परिचालितवती । अनेन प्राचीनैतिहासिकवृत्तान्तेन न केवलं स्त्रीणां वैदुष्यमपितु तासां समाजे कीदृशं सन्मानमासीदित्यवगच्छामः । विश्वविख्याता आध्यात्मिकशक्तिसम्पन्नाः भगवत्पादाः जगति विश्रुतो विद्वान् मण्डनमिश्रः । अनयोः प्रतिपाद्यो विषयः ब्रह्मकर्म चेत्यत्यन्तं दुरूहमथ च विरुद्धम् । अस्मिन् वादविवादे निर्णायकपदमधितिष्ठन्ती श्रीमती भारती प्राचीनभारते स्त्रीणां कियत्सम्मानमासीदित्यभिव्यनक्ति । वादविवादे प्रवृत्ताभ्यामुभाभ्यामप्यधिकयोग्यता सत्त्व एव निर्णायकपदं भूषयितुं शक्यमिति लोकसिद्धः पन्थाः । एवं भारत्या उदाहरणेन स्त्रैणस्य मस्तकानि सदैव समुन्नतानि भवेयुरित्यत्र कस्सन्देहः ?

मण्डनमिश्रस्य ग्रन्थाः

अनेन प्रणीतेषु ग्रन्थेषु अप्रतिहतप्रसरं वैदुष्यं प्रस्फुरति । मीमांसायां विधिविवेकः, विभ्रमविवेकः भावनाविवेकः, मीमांसानुक्रमणिका चेति, वेदान्ते स्फोटसिद्धिः, ब्रह्मसिद्धिः, नैष्कर्म्यसिद्धिः, तैत्तिरीयबृहदारण्यकोपनिषद्भाष्यवार्तिकमित्येवमादयो ग्रन्थाः प्रकाशपथमानीताः । इमे भाट्टमतप्रकाशकाः प्राचीना ग्रन्थाः । अत्र मण्डनमिश्रस्य सुरेश्वराचार्याणाञ्च नामनी समुपलभ्येते । मण्डनमिश्रेण तन्त्रवार्तिकस्यापि व्याख्या रचितेति पार्थसारथिमिश्रस्य शास्त्रदीपिकातः (२. १. १.) अवगच्छामः । किन्तु सा व्याख्यानुपलम्भदोषदूषिता । विधिविवेके लिङादिविध्यर्थ विचारः कृतः । अत्र मण्डनमिश्रः कुमारिलमतानुयायी सन्नपि स्वीयं स्वतन्त्रं मतं प्रति

१. हिस्ट्री आफ् धर्मशास्त्र' (Val १. P. २५२–३४.)

पादयतीति प्रागबोचम्। सर्वतन्त्रस्वतन्त्रवाचस्पतिमिश्रकृतन्यायकणिकाव्याख्यया सह प्रकाशितोऽयं विधिविवेकः। विभ्रमविवेके पञ्च प्रकाराः ख्यातयो विचारिताः, म॰ म॰ कुप्पुस्वामिशास्त्रिभिः 'मद्रास ओरियेण्टल रिसर्च' इति संस्थायास्तत्त्वावधाने सम्पादितः। भावनाविवेकसम्पादनं डा॰ म॰ म॰ झामहादयेनोम्वेकटीकया सह कृतम्। भावनाविवेके प्राधान्येन भावनास्वरूपं सविशेषं निरूपितम्। भट्टनारायणस्यापि व्याख्या काचनास्तीति ज्ञायते। मण्डनमिश्रः स्वीये मङ्गलपद्ये एव निर्दिशति—तेषां पुरतो भावनास्वरूपं स्पष्टतया प्रकटयितुमिच्छामि ये[१] संसर्गमोहेन मोहिता भ्रान्ताश्च वर्तन्ते। मण्डनमिश्रः परतत्त्ववद् भावनां वन्दनीयां मन्यते। एवं तत्काले भावनाविषये दार्शनिकानां यो भ्रम आसीत् तमपाकृतवान्। मीमांसानुक्रमणिका कश्चन प्रकरणग्रन्थः, यश्च मण्डनमिश्रस्य मीमांसायां विद्यमानमगाधं वैदुष्यं प्रकटयति। डा॰ झा महोदयः मीमांसा-मण्डननाम्न्या व्याख्यया सह ग्रन्थमिमं सर्वजनसुलभं विदधे। ग्रन्थोऽयमतिप्रौढो गभरीश्च। अत्र मण्डनमिश्रस्येयं विशेषता—यदेकैकेन पादेन तत्तदधिकरणसिद्धान्त-प्रदर्शनम्। डा॰ झा महोदयस्येयं कुशलता यत्स्वीयव्याख्यया ग्रन्थस्य सुसम्बद्धतया सुसङ्गततया च योजनम्। तत्तदधिकरणपरतया मूलं विभज्य यथा हि ग्रन्थस्सुगमस्स्या-त्तथा विधाने डा॰ झा महोदयस्य परिश्रमः प्रशंसार्हः। उद्भिन्नाम, गुणो नैव' 'नाम चित्रापदं तथा' 'अग्निहोत्रपदं नाम' 'नामत्वेन पदं पुनः, इमे चत्वारः पादाः चतुर्णा-मधिकरणानां बोधकाः। यस्मिन्नधिकरणे विषयबाहुल्यं तत्राप्ययमेव सङ्ग्रहो मण्डनमिश्रस्य। यथा 'राजा क्षत्रिय उच्यते' (२. ३. ३.) इति। अनुष्टुप् छन्द एव सर्वत्र परिगृह्यत इत्यपि न, क्वचित् 'शब्दान्तरे विधियुते खलु कर्म भेदः' (२. २, १) 'भूयः श्रुतिश्च समिदादियजीन् भिनत्ति' (२. २. २.) इति छन्दोऽन्तराण्यपि शब्दा-न्तराभ्यासाद्यधिकरणेषु परिगृहीतानि। तत्तत्पादसमाप्तावन्ते 'न्यायास्तु पादे दशसप्तचात्र' इति निर्दिशन् तत्तत्पादगताधिकरणानां सङ्ख्यामपि गणयति। द्वादशस्वध्यायेषु विद्य-मानान् न्यायान् अतिसंक्षेपेण प्रदर्शयता मण्डनमिश्रेण मीमांसासागरः सत्यमेव पल्वलीकृतः।

एवं मीमांसामत्युन्नतशिखरं प्रापयन्नयं मण्डनमिश्रः ब्रह्मसिद्धिनैष्कर्म्यसिध्यादि ग्रन्थप्रणयनावसरे नाम्ना सुरेश्वराचार्य इति प्रथितो वेदान्ती जातः, विविधश्रौतस्मार्त-कर्मानुष्ठातापि परिणतो ब्रह्मोपासकस्सञ्जात इति प्रतीयते। ब्रह्मसिद्धिस्तु प्रथमो ग्रन्थोऽस्य वेदान्तित्वप्रख्यापकः। इत आरभ्य तदीया ग्रन्थास्सर्व एवोत्तरमीमांसा-सम्बन्धिनोऽजायन्त। भगवत्पादेषु निरतिशयां श्रद्धामादधानः वेदान्तिनां क्षेत्रेऽवतीर्णः।

---

१. संसर्गमोहितधियो विविक्तं धातुगोचरात्।

भावात्मानं न पश्यन्ति ये तेभ्यस्स विविच्यते॥ भा॰ वि॰ १

अस्यैव निदर्शनरूपेण नैष्कर्म्यसिद्धिं पश्यामः। अयं ग्रन्थः[१] ज्ञानोत्तमकृतव्याख्यया सह प्रकाशितः। नैष्कर्म्यसिद्धिमवेत्य न वयं परिज्ञातुं शक्नुमः--किं स एवायं मण्डनमिश्र इति। सुरेश्वर इति नाम धारणानन्तरमल्पीयस्येव रूपपरिवर्तनमपि जातम्। अस्यैव परिणामः—तैत्तिरीयबृहदारण्यकोपनिषद्भाष्यवार्तिकमिति।

शैली--

पूर्वमसकृदभिहितम्—यन्मण्डनमिश्रस्य लेखा असाधारण्यावद्योतका इति। गद्य पद्ययोरुभयत्रापि तस्य शैली अनितरसाधारणी। यद्यपि तदीयलेखेषु प्राचीनाशशब्दा उपलभ्यन्ते, यैश्च भगवत्पादापेक्षया प्राचीनत्वं तस्यानुमातुं शक्यते, यद्यपि च तदीया लेखा अतिशयितगाम्भीर्यावद्योतकाः, तथापि ते प्रसादगुणभरिताः स्फुटतया विषय प्रतिपादका इत्यवश्यं स्वीकर्तव्यं भवति। भाषायां विषयप्रतिपादनशैल्याञ्च विद्यमानः प्रौढिमा ग्रन्थगतकाठिन्यस्वभावतां बोधयति, परन्तु सौभाग्यमिदम्—यत्तदीय ग्रन्थानां विवरणाय प्रवृत्ताभिर्व्याख्याभिः यथावन्मूलमवगन्तुं साहाय्यमाचरित-मिति। तदीयरचनासु विचारास्सिद्धान्ताश्च स्पष्टाः। तेषु क्वापि सङ्कोचस्य सन्देहस्या-स्पष्टताया वा नास्त्यवसरः। तत्र तत्र समये समये श्रद्धास्पदानां भगवत्पादानां नाम सिद्धान्तञ्च गृह्णन् स्वस्य गौरवं प्रतिष्ठाञ्चावद्योतयति। तदीयाध्ययने व्यवहारे चैकतामनुभवामः। इदमेव कारणम्—यतः जीवनस्याधिकांशे विशुद्धकर्मयोगी सन् परिणते वयसि ब्रह्मोपासको ज्ञानयोगी सञ्जातः। संक्षेपेण वक्तुं शक्यते—यत् तदीय-स्सिद्धान्तः न केवलं ग्रन्थेषु, अपितु नित्यजीवनचर्यायां सम्बद्ध आसीत्। तदीय प्रारम्भिकग्रन्थेषु भाषया शैल्या च यावत्काठिन्यमनुभवामः, तावदेव माधुर्यं प्रसादश्चान्तिमग्रन्थेष्वनुभवामः। गद्यापेक्षया पद्यमयेषु सन्दर्भेषु माधुर्यं स्वाभाविकम्, यच्च मीमांनुक्रमणिकायां विधिविवेकभावनाविवेकयोः कारिकासु च स्पष्टम्, नैष्कर्म्यसिद्धिमागत्य गद्यसन्दर्भेऽपि सुगमत्वं सारल्यञ्चानुभूयते। नैष्कर्म्य सिद्धिरात्मज्ञानमार्गप्रदर्शनपराऽपि सुगमा सरला च। शैल्यां भाषायाञ्च परिवर्तनमिदं मण्डनमिश्रसुरेश्वराचार्ययोर्भेदापादकमिव प्रतीयते।

'इदमित्येव बाह्येऽर्थे ह्ययमित्येव बोद्धरि।
द्वयं दृष्टं यतो गेहे तेनायं मुह्यते जनः'॥

(नै० सि० ४.६)

---

१. 'चोलेषु मङ्गलमिति प्रथितार्थं नाम्नि ग्रामे वसन् पितृगुरोरभिधां दधानः। ज्ञानोत्तमस्सकल-दर्शनपारदृश्वा नैष्कर्म्यसिद्धिविवृतिं कुरुते यथावत्'॥ नै० सि० १

'नेहात्मविदन्योऽस्ति न मत्तोऽज्ञोऽस्ति कश्चन।
इत्यजानन् विजानाति यस्स ब्रह्मविदुत्तमः'॥

(७.५३)

प्रतिपाद्यविषये दुरूहेऽपि प्रतिपादनशैली तु सुगमेत्यत्र निदर्शनमिदम्।

एवं भाषाशैल्योः परिवर्तने परिपक्वावस्थापि कारणमिति सम्भावयितुं शक्यते, अथवा मण्डनमिश्रस्य जीवन एवेयत्परिवर्तनं यथा जातं तथैव तदीयभाषायां शैल्याञ्च परिवर्तनमभूदिति सम्भावना नानुचिता। जीवने क्रान्तिकारिपरिवर्तनं यथा तथैव भाषाशैल्योरपीति साधनं न दुष्करम्।

'भगवत्पूज्यपादैश्च, उदाहार्यैवमेव तु।
सुविस्पष्टोऽस्मदुक्तोऽर्थः सर्वभूतहितैषिभिः'॥

(नै० सि० ४.१९)

इत्याद्युक्तिर्मण्डनमिश्रादन्यत्रेतिहासे नानुभूयते।

उम्बेकः

मण्डनमिश्रग्रन्थव्याख्यातृषु उम्बेकस्य प्रतिष्ठितं स्थानमस्तीति प्रसिद्धिः। उम्बेकेन भावनाविवेकस्य भट्टपादानां श्लोकवार्तिकस्य च व्याख्या कृता। श्लोकवार्तिकटीका स्फोटवादान्तैव समुपलभ्यते। तावान् भागः मद्रासविश्वविद्यालयेन प्रकाशितश्च।

संक्षिप्तापि सतीयं व्याख्या विवेचनात्मिका सरला च। आवश्यकतानुसारेण क्वचिद्विस्तृता गभीरविषयाणां सारल्यसम्पादिका। अत्र बहुषु-स्थलेषु चिरन्तन विदुषां सिद्धान्ता अपि प्रकाशिताः।

भावनाविवेको निबन्धात्मको ग्रन्थः उम्बेकव्याख्यया सरलस्सुगमश्च जात इति निश्चयेन वक्तुं शक्यते। अस्य प्रकाशनं डा० झामहोदयेन 'प्रिंसेस आफ वेल्स सरस्वती भवन टेक्स्ट सीरीज्' द्वारा कृतम्। अस्मिन् ग्रन्थे भट्टपादानां भूयसीः[१] कारिका उद्धृत्य स्वसिद्धान्तपरिपोषणं कृतं भट्टोम्बेकेन। व्याख्याद्वयस्याध्ययनेनावधारयितुं शक्यते-यदुम्बेकः सफलो व्याख्याकार इति।

---

१. भावनाविवेक (पृ. २७, ८५)

उम्बेकविषये नैकविधानि विरुद्धानि मतान्युपलभ्यन्ते।[१] क्वचिन्मण्डनमिश्र एवोम्बेक इति निर्दिष्टमस्ति। क्वचिच्च[२] भवभूतिरेवोम्बेक इति कथितमस्ति। इदं द्वयमपि विश्वसनीयं न प्रतिभाति। माधवशङ्करदिग्विजयेऽनेकत्रातिरञ्जितं वर्णनं काव्यदृशा कृतमुपलभामहे। अतो माधवीयशङ्करदिग्विजयः प्रामाणिकग्रन्थकोटौ विमर्शकैः न परिगण्यते। भावनाविवेकस्य प्रणेता मण्डनमिश्र इत्यत्र न कश्चन संशयः। तद्व्याख्यायां मूलासम्मतानि[३] बहूनि मतानि निर्दिष्टानि सन्ति। मूलविरुद्धानि मतानि स्वयमेव व्याख्यायां प्रकाशयतीति न क्वापि प्रसिद्धम्। अतोऽनयोर्भेद इत्येव प्रतीयते। भवभूत्युम्बेकयोरैक्यानैक्यविषयोऽपि सन्दिग्ध एव। पं० श्रीरामस्वामिशास्त्रिणा स्वीये न्यायरत्नमालाप्राक्कथनेऽनयोरैक्यं प्रतिपादितम्। परमेकस्मिन्नेव स्थाने चित्सुखाचार्यः 'न हि पुराऽऽप्त एव सन्नाटकादिप्रबन्धविरचनमात्रेणानाप्तो भवति भवभूतिः, उक्तञ्चैतदुम्बेकेन' (चित्सुखी २६५) इत्युभयोरप्युल्लेखं करोति। अयमुल्लेखो द्वयोः पार्थक्यावबोधने साहाय्यमाचरति। परम्पराप्राप्तमेकं गुरुमुखादश्रृणवम्—

उम्बेकः कारिकां वेत्ति चम्पूं वेत्ति प्रभाकरः।
मण्डनस्तूभयं वेत्ति नोभयं वेत्ति रेवणः॥ इति।

अनेनापि उम्बेकमण्डनमिश्रयोः पार्थक्यं सिध्यति। अतश्चोम्बेकमण्डनमिश्रयोः उम्बेकभवभूत्योश्च पार्थक्यस्वीकारो नायुक्तियुक्त इति प्रतिभाति।

वाचस्पतिमिश्रः

संस्कृतवाङ्मये वाचस्पतिमिश्रः प्रथमगणनीयः। विशेषतश्च मीमांसकसम्प्रदाये वरिष्ठः। क्वचिद्वेदान्ते, क्वचिच्च साङ्ख्ययोगयोः परिनिष्ठितं स्वीयं वैदुष्यं प्रकाशयन्नयं सर्वतन्त्रस्वतन्त्र इति प्रसिद्धः। विभिन्नै रूपैरात्मानं प्रकाशयन्नयं सर्वत्र दर्शनेऽप्रतिहतप्रसरं पाण्डित्यमाविष्करोति। अस्य गवेषणात्मिका शक्तिः, विचारसरणिः, तर्कप्रणाली चानितरसाधारणी। सर्वेषु तन्त्रेष्वस्य स्वतन्त्रा गतिः। विदुषां समवायेऽस्यास्ति प्रतिष्ठितं स्थानम्।

वाचस्पतिमिश्रस्य जीवनविषये तदीयग्रन्थेष्वारूढाः कतिपये सङ्केता उपलभ्यन्ते। संस्कृतवाङ्मयेऽत्युत्तमतया परिगणितस्य शाङ्करभाष्यव्याख्यारूपस्य नाम्ना 'भामती' इति ग्रन्थस्यान्ते नृपान्तरापेक्षया नृगस्य महीपालस्य प्रभावातिशयं वर्णयन् स्वीयं निबन्धं भामत्यभिधं तस्मा अर्पयति—

---

१. माधवकृतशङ्करदिग्विजये ७-११ तः ११७ पर्यन्तं द्रष्टव्यम्।
२. चित्सुखीव्याख्या द्रष्टव्या (पृ० २५६ नि. सा. सं.)
३. भावनाविवेकस्य १७, २८, ६३, ७७, ८१, ८२ पृष्ठानि द्रष्टव्यानि।

'तस्मिन् महीपे महनीयकीर्तौ श्रीमन्नृगेऽकारि मया निबन्धः' इति। अनेनेदं प्रत्यक्षम्—यद् इतिहासप्रसिद्धो मिथिलायाः शासको नृगः स्वाश्रयप्रदाता, श्रद्धास्पदो महापुरुष इति। ऐतिहासिकाः 'नान्यदेव' नृपतेः पूर्वं मिथिलाधिपतित्वेन नृगं साधयन्तो नान्यदेवस्य १०१९ ई० शासनं व्यवस्थापयन्ति। एवमेव प्रख्यातो बौद्ध-तार्किको 'रत्नकीर्तिः' अपोहसिद्धि-क्षणभङ्गसिध्यादिलेखकः स्वीये क्षणभङ्गसिद्धौ वाचस्पतिमिश्रमुल्लिखति।[१] रत्नकीर्तेस्समयः ९८३ ई० इति म० म० हरप्रसाद-शास्त्रिणा इतिहासमर्मज्ञेन साधितः। अनेन ज्ञायते यदुत कीर्तेः समये वाचस्पतिमिश्रः विद्वत्समाजे प्रसिद्धिमवापेति। अतो वाचस्पतिमिश्रो नवमशताब्द्यामासीदिति निर्णेतुं शक्यते। किञ्च स्वीये न्यायसूचीनिबन्धे वाचस्पतिमिश्रः ८४१ ई० कालं स्पष्टतयो-ल्लिखति। एतेन वाचस्पतिमिश्रस्य मैथिलत्वं नवमशताब्दीकालिकत्वञ्च सिद्धं भवति। अस्य परिपुष्टयेऽन्यान्यपि साधनानि समुपलभ्यन्ते। तत्त्वचिन्तामणौ गङ्गेशो-पाध्यायः वाचस्पतिमिश्रं स्मरति। श्रीहर्षेण स्वीये खण्डनखण्डखाद्ये प्रतिपादित-दूषणानि निरसितुकामो वाचस्पतिमिश्रः नाम्ना 'खण्डनोद्धारं' प्रणीतवान् इति किं-वदन्त्या ज्ञायते यदयं श्रीहर्षादर्वाचीन इति।

व्यक्तिगतजीवनसम्बन्ध इदमेव ज्ञायते-यदस्य सन्ततिभाग्यं नासीत्। अतः स्वपत्न्याः चिरस्मरणाय पत्नीनाम्ना 'भामतीं' शाङ्करभाष्यव्याख्यां विरचयामास। न्यायकणिका साङ्ख्यतत्त्वकौमुदी भामतीतत्त्वबिन्दुरितीमे ग्रन्थाः वाचस्पतिमिश्रस्य प्रसिद्धाः। भामत्यां स्वयमेवेमान् निर्दिशति--

'यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः।
यन्न्यायसाङ्ख्ययोगानां वेदान्तानां निबन्धनैः॥' इति।

तत्र न्यायकणिका मण्डनमिश्रकृतविधिविवेकस्य व्याख्यारूपा वैदुष्यप्रकर्षा-वद्योतिका। वाचस्पतिमिश्रेण प्रायो व्याख्यारूपा एव ग्रन्था विरचिताः, तत्त्वबिन्दुः परं मौलिको ग्रन्थः। व्याख्यारूपेष्वपि ग्रन्थेष्वधीयमानेषु ग्रन्थकर्तुः विचारस्वातन्त्र्यस्य दर्शनं भवति। वाचस्पतिमिश्रस्य भाषा प्रौढापि प्रसन्ना प्रभावशालिनी। प्रतिपादन-शैल्यां दार्ढ्यं शास्त्रीयसम्पत्समृद्धिश्चानुभूयते। यत्रैव तल्लेखनी प्रवर्तते तत्र फलवती देवता नतमस्तका तिष्ठति। वेदान्ती सन् यल्लिखति तत्र मीमांसामतनिरसने न सङ्कोचमञ्चति। साङ्ख्यमतविवरणावसरे मतान्तरनिराकरणे दार्ढ्यं प्रदर्शयति। एतेनेदमभ्यूहितुं शक्यते-यत् तत्तद्दार्शनिकपदार्थविचारप्रसङ्गे तत्तदाचार्येषु दर्शनं प्रवर्तकेषु श्रद्धातिशयं धत्त इति। अत एव संस्कृतवाङ्मयेतिहासे विशेषतो दर्शनसन्दर्भे वाचस्पतेर्नाम स्वर्णाक्षरैः खचितं पश्यामः।

---

१. क्षणभङ्गसिद्धौ पृ० ५८ द्रष्टव्यम्।

देवस्वामी

अयं दक्षिणभारताभिजन इति बहवोऽभिप्रयन्ति। प्रपञ्चहृदयेऽयं शाबरभाष्यव्याख्यानृत्वेन निर्दिष्टः। सङ्कर्षकाण्डस्याप्यनेन व्याख्या कृतेति प्रतीयते। प्रपञ्चहृदयस्य काल एकादश शताब्दीति इतिहासविदः कथयन्ति। अतस्तत्पूर्ववर्तीति निश्चेतव्यं भवति। एतद्विषये नाधिकं किञ्चिदुपलभामहे।

सुचरितमिश्रः

मिथिलाभिजनोऽयं विद्वान् श्लोकवार्तिकस्य काशिकाभिधां टीकां प्रणीतवान्। श्लोकवार्तिकेन सह टीकायाः कियानंशः 'तिरुवनन्दपुर संस्कृत सीरीज्' इत्यत्र प्रकाशित उपलभ्यते। टीकाया हस्तलिखितमातृका वाराणसेयसरस्वतीभवनग्रन्थालये वर्तते, यस्याश्च मातृकालेखनसमयः सं. १५०० अर्थात् ई. १४५० उल्लिखितः। [१]शास्त्रदीपिकाव्याख्यात्रा श्रीरामकृष्णेन सुचरितमिश्रो निर्दिष्टः। तेनेदमनुमातुंशक्यते यत्सुचरितमिश्रः एकादशीशताब्द्या अन्ते अथवा द्वादशशताब्द्या आदाववर्तत इति।

काशिका सरला सुगमा विवेचनात्मिका च। क्वचित्तु पार्थसारथिमिश्रकृतन्यायरत्नाकरव्याख्यातः सुविशदा विस्तृता सुग्राह्या चानुभूयते। सुचरितमिश्रेण कुमारिलमतमवम्ब्य विधिविचाराभिधो ग्रन्थो विरचित इति शृणुमः किन्तु नाद्यावधि तन्मातृका समुपलब्धा।

पार्थसारथिमिश्रः

मीमांसादर्शनेतिहासे पार्थसारथिमिश्रस्य विशिष्टतमं स्थानम्। विशेषतो भट्टपरम्परायाः प्रतिष्ठा महत्त्वं स्थायित्वं तर्कबाहुल्येन दृढतरत्वमित्यादीनां सम्पादने पार्थसारथिमिश्रस्योद्यम एव कारणमिति निस्सङ्कोचं वक्तुं शक्यते। यद्यपि प्रभाकरो महान् विचक्षणः, विलक्षणप्रतिभावान्, तस्य युक्तयो नूनमभेद्याः, विचाराणां गतिश्चाप्रतिहतप्रसरा, तलस्पर्शिवैदुष्यं तस्य शास्त्रेषु, पदार्थोद्भावनाशक्तिस्त्वनितरसाधारणी, गवेषणाशक्तिरनन्यादृशी तस्य सिद्धान्ता दृढाभिः स्थूणाभिरवलम्बिताः, तथापि भट्टपरम्परायास्सम्मुखं प्रभावहीना एव ते कुतस्सञ्जाता इति महतः प्रश्नस्य समाधानं पार्थसारथिमिश्रस्योद्यम एव। भट्टपादानामनुयायी तादृशशक्तिसम्पन्न आसीत् येन भट्टपरम्परा दृढबद्धमूलाऽक्रियत। भट्परम्परायाः पार्थसारथिमिश्र आधारशिलारूप इति कथनं नायुक्तियुक्तं प्रतिभाति मे। अनया दृष्ट्या विचारे कृते पार्थसारथेर्दर्शनेऽस्मिन् कियन्महत्त्वम् कीदृशञ्च स्थानमिति ज्ञातुं शक्यते।

१, शा. दी. पृ. ४७ नि. सा. सं.।

यद्यपि पार्थसारथेः पूर्वं मण्डनमिश्रवाचस्पतिमिश्रप्रभृतय उद्भटा मीमांसका अभूवन्, तथापि पार्थसारथेः पदार्पणं विलक्षणं महत्त्वमादाय सम्पन्नमिति वक्तव्यं भवति। वाचस्पतिमिश्रस्सर्वेषु तन्त्रेष्वप्रतिहतगतिमान् प्रौढश्चासीदिति प्राक्प्रतिपादितम्, एवं मण्डनमिश्रोऽपि मीमांसकसमाजेऽनन्यसदृशं वैदुष्यं स्थापयामास परं पार्थसारथिमिश्रो न केवलमिमौ द्वौ, अपितु भट्टपरम्परागतान् सर्वानेवातिशय्य नूतनं नेतृत्वं स्वीचकार। इत आरभ्य भट्टपादानां यावन्तस्सिद्धान्तास्तेषां संरक्षणभारं स्कन्धयोरारोप्य निरतिशयेन वैदुष्येण पार्थसारथिर्वहति स्मेति सत्यमेव मीमांसकसमाजस्य गौरवविषयः। अस्मिन् कर्मणि पार्थसारथिराशातीतं साफल्यमवाप नूतनमीमांसाधारायाः प्रवर्तकोऽप्यभवत्। सूत्र-भाष्य-वर्तिकारूढान् विषयान् सङ्कलय्य स्वतन्त्राधिकरणरूपेण प्रवर्तनाख्यं यत्कार्यं तदस्यैवेति कथने न कश्चन संशयः।

व्यापकमध्ययनं वैदुष्यञ्च

दार्शनिकसमाजे पार्थसारथिः क्रान्तिकारी लेखकः, भट्टपादीयान् सिद्धान्तान् याथातथ्येन विदुषां सम्मुखं प्रादर्शयत्, स्वोत्तरकालिकमीमांसकानां मार्गप्रदर्शकश्चाभूत्। तदीयग्रन्थाध्ययनेन स्पष्टमिदं प्रतिभाति स्वकुलपरम्पराप्राप्ताया विद्यायास्संरक्षणं यथावदयमकरोदिति। अस्य जनको नाम्ना यज्ञात्मा विद्वत्कुले लब्धप्रतिष्ठः, स एवास्य गुरुरपि। तदानीन्तने समाजे कुलपरम्परागतविद्यायास्संरक्षणं नाम लोकानां प्रधानं कर्तव्यमासीत्। विद्याग्रहणाय नान्यत्र तदानीं गन्तव्यं लोकैः। विषयोऽयं तदीयग्रन्थाध्ययनेन परिज्ञायते। तदीयग्रन्थेषु नानाशास्त्राध्ययनजन्यं वैदुष्यं परिपूर्णमुपलभ्यते। वाचस्पतिमिश्र इवायमपि सर्वतन्त्रस्वतन्त्र इत्याख्यातुं शक्यते। इयांतूभयोर्भेदः—वाचस्पतिमिश्रः सर्वेषु दर्शनेषु ग्रन्थान् प्रणीतवान्, अयन्तु मीमांसातिरिक्त दर्शनेषु ग्रन्थान् न प्रणीतवान्, किन्तु मीमांसाग्रन्थेष्वेव खण्डनाय मण्डनाय वान्यदार्शनिक पदार्थानां विचारं सविशेषं प्रवर्तितवान्। भट्टपादप्रतिज्ञानुसारेण मीमांसाया बहुविद्यान्तराश्रितत्वसाधने स्वीयं वैदुष्यं प्रकटीकृत्य दर्शनेषु मीमांसायाः प्रतिष्ठितं स्थानं कल्पयामास पार्थसारथिः। शास्त्रदीपिकायास्तर्कपादे बौद्धसम्प्रदायानां प्रभाकरस्य, अद्वैतवादिनाञ्च मतानि समुपपाद्य तत्तद्गतदौर्बल्यप्रकाशने स्वीयामतुलां शक्तिं प्रदर्शयामास। भट्टपाददर्शनस्य तत्त्वज्ञोऽयम्, यथायं भट्टपादहृदयं जानाति स्म तथा नान्यः। कुमारिलदर्शनेऽस्य रुचिः श्रद्धा चात्यधिका। अस्यायं नाभिप्रायः, यत्प्रभाकरमतनिरसनावसरे तन्मतग्रन्थिमनवगत्य भट्टपादेषु श्रद्धातिशयेनैव किञ्चिल्लिखतीति। शास्त्रदीपिकाया आरम्भ एव निर्दिशति यदहं मतद्वयमपि सम्यक्परिचिनोमीति। प्रभाकरमतं सुपरिचिन्वन्नेव तत्र तत्र प्राप्ते प्रसङ्गे इतरदार्शनिक पदार्थवत् प्रभाकरसम्मतं सिद्धान्तं खण्डयति। अनेन न्यायरत्नमाला तु तन्मत निरसनायैव प्रणीतेत्यभिधातुं शक्यते।

स्वर्णयुगशीर्षके प्रकरणे प्रागहमवोचम्—यद्भाष्यकारश्शबरस्वामी, वेदवाक्यार्थं-निरूपणायैव मीमांसा न प्रवृत्ता, किन्तु तस्या दार्शनिकत्वमप्यस्तीति प्रदर्शनाय तदनुकूलं परिपुष्टं बीजमवाप्सीदिति। एवमुप्तं बीजं संवर्द्धयितुं भट्टपादोऽसिञ्चत्, पार्थसारथिस्तु तत्पल्लवितं पुष्पितं फलितञ्च द्रष्टुं सौभाग्यशाली जातः। न केवलं दर्शनज्ञानमात्रेण तृप्तः, किन्तु दर्शनान्तरे विद्यमानदार्शनिकत्वेन सह मीमांसायां विद्यमानं दार्शनिकत्वमतूतुलत्। पार्थसारथेरिमानि स्थलान्यधीयाना वयं स्पष्टमवगन्तुं शक्नुमः-यदस्य दर्शनान्तरे कियज्ज्ञानमस्तीति। आत्मवादप्रसङ्गे नास्तिकमतसिद्धान्तानां मूलोच्छेदेन विना तृप्तिं न प्राप्नोत्ययम्। तथैव जगतो मिथ्यात्वं प्रतिपादयतामद्वैतिनां मतं विमृशन् तन्मतसिद्धव्यावहारिकसत्यत्वमनुमन्यमान इव जगतः प्रवाहनित्यत्वं साधयति। एवमनेकेषु स्थलेषु नैयायिकानामद्वैतिनाञ्चाभिमता ये पदार्थाः, तद्विपरीततया पदार्थस्वरूपं प्रदर्शयति। एवं प्रदर्शने यद्यपि मूलं शाबरं भाष्यं भट्टपादानां वार्तिकञ्चास्ति, किन्तु मूलं क्वचिदस्पष्टं क्वचिच्च संक्षिप्तं क्वचिद-निश्चितमित्यनुभूय तद्विशदयितुं पार्थसारथेरयं प्रयासः। पार्थसरथेरयं प्रयासो न निष्प्रयोजनः, भट्टपादेभ्योऽनन्तरं सम्भूतैर्ग्रन्थकृद्भिः कृतानामाक्षेपाणां तर्काणाञ्च समाधानाय प्रयासोऽयं सफल एव। भट्टपादीयान् सिद्धान्तान् द्रढयितुं भारमिमं वोढुं पार्थसारथेरावश्यकता समभूत्। अनेन पार्थसारथेः प्रतिभाप्रकर्षः सुव्यक्त-स्सिध्यति।

पार्थसारथेर्ग्रन्थाः

मीमांसादर्शन एव पार्थसारथेश्चत्वारो ग्रन्था उपलभ्यन्ते। द्वौ ग्रन्थौ भट्टपाद-व्याख्यारूपौ द्वौ मौलिकौ स्वतन्त्रौ च। न्यायरत्नाकरः तन्त्ररत्नञ्चेति श्लोकवार्तिक-टुप्टीकयोर्व्याख्यारूपौ, न्यायरत्नमाला शास्त्रदीपिका चेति स्वतन्त्रौ। न्यायरत्नमाला पार्थसारथेः प्रथमो ग्रन्थः, अत्रशिष्टेषु त्रिष्वस्योल्लेखोपलम्भनात्। अयं ग्रन्थो भट्टप्रभाकर-योर्विवादास्पदानां विषयाणां प्राधान्येन निरूपणपरः। तत्रापि प्रभाकरमतावलम्बिना शालिकनाथेन भाट्टमते कृतानामाक्षेपाणामुद्धाराय ग्रन्थोऽयं प्रणीत इति प्रतिभाति। अध्ययनविधिविचारः ज्ञानानां स्वतःप्रामाण्यसाधनम्, विध्यर्थनिर्णयः, नित्यकाम्य विवेक इत्यादयो विषया अस्मिन् ग्रन्थे विवेचिताः। अस्य ग्रन्थस्य श्रीरामानुजा चार्येण 'नायकरत्न' नाम्ना व्याख्या कृता। व्याख्येयं ग्रन्थकृदाशयं स्फुटमुद्घाटयन्तीं अध्येतॄणां नितान्तमुपकरोति। न्यायरत्नमाला मूलमात्रं वाराणसेयचौखम्बामुद्रणालयेन व्याख्यासहितं बड़ोदा ओरियण्टल संस्थया च प्रकाशितमुपलभ्यते।

द्वितीयो ग्रन्थः 'तन्त्ररत्नम्'। टुप्टीका च शाबरभाष्यस्यान्तिमनवाध्यायानां व्याख्यारूपा भट्टपादानाम्। भट्टपादैस्संक्षेपेण लिखितानां विषयाणां विस्तरेण प्रति-पादकोऽयं तन्त्ररत्नाभिधो ग्रन्थः। अस्य प्रकाशनं षड्भिर्भागैरधुना सम्पन्नं सरस्वती

भवनद्वारा। सम्पादकाः स्वर्गीय डा० झा महोदयाः, शास्त्ररत्नाकराः पं० रामचन्द्र दीक्षिताश्च चतुर्णां भागानामासन्। अन्तिमभागद्वयस्य विद्यासागराः पं० पट्टाभिराम शास्त्रिणस्सम्पादकाः। एवं षड्भिर्भागैरयं प्रकाशितः। अस्मिन् ग्रन्थे पार्थसारथिमिश्रः टुप्टीकापेक्षया शाबरभाष्यस्यैव विवरणं कृतवान्, टुप्टीकाया अतिसंक्षिप्तत्वात्। 'इति न्यायरत्नमालायां दर्शितम्' इत्येवं तन्त्ररत्ने ९ पृष्ठे उल्लेखान्न्यायरत्नमालानन्तरं तन्त्ररत्नं लिखितवान् पार्थसारथिरिति प्रतीयते। एवमेव श्रीरामस्वामी स्वीये तत्त्वबिन्दुप्राक्कथनेऽभिप्रैति। पार्थसारथिस्तन्त्ररत्नेऽपि प्राभाकरसम्मतान् पदार्थान् तत्र तत्र खण्डयति। मीमांसाध्येतॄणां तन्त्ररत्नाध्ययनमावश्यकम्।

तृतीयो ग्रन्थः शास्त्रदीपिका। अस्य ग्रन्थस्य प्रणयनानन्तरं पार्थसारथिः मीमांसाकेसरीति प्रथितोऽभवत्। अनेनैव ग्रन्थेन शास्त्रेऽस्मिन् अमरकीर्तिमवाप। भारतवर्षस्य सर्वेषु प्रान्तेष्वस्याध्ययनाध्यापनं प्रचलति। जैमिनिसूत्राणां तद्भाष्यस्य चाध्ययनेनाध्येतॄणामधिकरणन्यायज्ञानं निष्कृष्टं न भवतीति हेतोः पार्थसारथिः सूत्रतद्भाष्यतद्वार्तिकगतान् विषयान् क्रोडीकृत्येदम्प्रथमतया ग्रन्थमिमं निर्मितवान्। अयञ्चाग्रेतनानां ग्रन्थकृतां मार्गप्रदर्शक इति वक्तुं शक्यते। भट्टपरपरायास्सिद्धान्तावबोधकः क्रमबद्धोऽयमेव ग्रन्थः प्रथमः। एकादशशताब्दीतः पूर्वं मीमांसाया यन्महत्त्वं प्राप्तं तस्यायं जन्मदातेति लोकाः कथयन्ति।[1] पञ्चावयवोपेतमधिकरणस्वरूपमध्येतृभिर्यथावबुद्धं स्यात्तथायं ग्रन्थो निमितः। तत्रापि विषयवाक्येषु जायमानसंशयविवरणावसरे पार्थसारथिस्तदर्थसंशयान् प्रदर्श्य पूर्वोत्तरपक्षयोः प्रवेशाय मसृणं पन्थानं विशेषतया कल्पयति।

शास्त्रदीपिकागतगाम्भीर्यमनुभूयानेके ग्रन्थकृतो विभिन्नप्रान्तीया व्याख्यां चक्रुः। तत्र सोमनाथाप्पय्यदीक्षित-शङ्करभट्ट-राजचूडामणि-वैद्यनाथ-रामकृष्ण-प्रभृतयो विशेषेणोल्लेखनीयाः। मिथिलायाः प्रसूतोऽयं ग्रन्थः दक्षिणभारते विकसित इति प्रतीयते, यतो हि व्याख्यातारः प्रायो दक्षिणभारतीयाः। इमं ग्रन्थमवलम्ब्यैव खण्डदेवप्रभृतयो दाक्षिणात्यास्स्वातन्त्र्येणाधिकरणग्रन्थान् रचितवन्तः। रचनावसरे पार्थसारथिगतन्यूनताञ्च परिहृतवन्तः, तत्र तत्र तद्गतगाम्भीर्यञ्चोद्घाटितवन्तः। अस्यैकस्य ग्रन्थस्याध्ययनेनैव मीमांसाशास्त्रस्य समग्राः पदार्था अधिगता भवन्ति।

शबरस्वामिना भट्टपादेन च मीमांसाया विस्तारे कृतेऽपि पार्थसारथेरत्र प्रवृत्तिं प्रति लक्ष्यद्वयमासीत् एकन्तु प्रभाकरमतसमालोचनम्, अपरन्तु भाष्यवार्तिकयोर्हृद-

---

१. 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः।
प्रयोजनञ्च पञ्चाङ्गं प्राञ्चोऽधिकरणं विदुः'॥

योद्घाटनम्। लक्ष्यद्वयमिदं सम्पादयितुं भावपक्षरूपेण वैदुष्यं कलापक्षरूपेण कुशलतां च सः प्रदर्शयामास। अधिकरणपद्धत्या शास्त्रमिदं व्यवस्थापयामासेति। इमां पद्धतिं तदुत्तरवर्तिनो ग्रन्थकृतोऽनुसस्रुरित्यपि पूर्वमवोचम्। यद्यप्यस्याः पद्धतेस्सूत्रकालादेवोद्गमः, किन्तु पार्थसारथेः क्रमो विलक्षण एव। एषा पद्धतिर्लोकप्रिया-भवत्। विचारशीला दार्शनिका इमां पद्धतिं श्लाघयामासुः, तदनुसारेण ग्रन्थप्रणयने प्रवृत्ता अभवन्। भाषया शैल्या प्रतिपादनचातुर्येण परमतसमालोचनविधया च शास्त्रदीपिका पार्थसारथेरत्युत्तमो ग्रन्थः। शास्त्रदीपिकायास्तर्कपादे विचारिता विषया नान्यत्रोपलभ्यन्ते। पार्थसारथेरनन्तरवर्तिभिस्तत्तदधिकरणविषयाः कामं विशेषेण चर्चिताः किन्तु तर्कपादविषयाणां मीमांसादार्शनिकपदार्थानाञ्च परिज्ञानाय पार्थसारथेस्तर्कपाद एवावलम्बः। अत्रञ्चेदं कारणं प्रतिभाति–यन्मिश्रोत्तरसमयवर्तिनो यावन्तो व्याख्यातारः ते शास्त्रदीपिकाया अधिकरणप्रस्थानमेव व्याचख्युः, न तर्कपाद मिति। अत्रेमा व्याख्यास्समुपलभ्यते—

सोमनाथः–मयूखमालिकां, अप्पय्यदीक्षितः–मयूखावलिं राजचूडामणिः–कर्पूर-वर्तिकां, दिनकरभट्टः–दिनकरीव्याख्यां यज्ञनारायणः प्रभामण्डलम्, अनुभवानन्दयतिः–प्रभामण्डलम् चम्पकनाथः-प्रकाशं वैद्यनाथः प्रभां, रामकृष्णः सिद्धान्तचन्द्रिकां (तर्कपादस्य) शङ्करभट्टः प्रकाशं कमलाकरभट्टः आलोकं नारायणभट्टः व्याख्यां, सुदर्शनाचार्यः प्रकाशं (तर्कपादस्य) एवमनेका व्याख्याः प्रणीतवन्तः। एतासु—

'न शास्त्रदीपिका व्याख्या कृता केनापि सूरिणा।
तदपूर्वाध्वसञ्चारी नोपहास्यः स्खलन्नपि'॥

इति रामकृष्णनिर्देशेन तदीया व्याख्या प्राचीनेति गम्यते, मयूखमालिका–सिद्धान्तचन्द्रिका प्रभा-प्रकाशादिव्याख्याभिः शास्त्रदीपिका प्रकाशितास्ति। मूल-मात्रमपि प्रकाशितमुपलभ्यते।

चतुर्थो ग्रन्थो न्यायरत्नाकरः श्लोकवार्तिकटीकारूपः। अतिसंक्षिप्तापीयं टीका सर्वलोकप्रिया सरला सुगमा भट्टपादहृदयोद्घाटने क्षमा च। पार्थसारथेर्वैदुष्यस्य विचारविषयमौलिकतायाश्चावद्योतकोऽयं ग्रन्थः। सुचरितमिश्रादीनां व्याख्यापेक्षयात्र गाम्भीर्यमनुभूयते।

अनेन ग्रन्थेन भट्टपादेभ्यः पूर्ववर्तिनां कतिपयानां भर्तृमित्रादीनां परिचयो-ऽवाप्यते। यद्यप्ययं परिचयो भट्टपादग्रन्थादेव भवति, तथापि पार्थसारथेर्विश्लेषणेन भर्तृमित्रादेराशयः स्फुटोऽवगतो भवति। भट्टपादानां 'बृहट्टीका' इति ग्रन्थस्यैव संक्षिप्तं रूपं श्लोकवार्तिकमिति पार्थसारथेर्विवरणेन ज्ञायते। मीमांसासिद्धान्ता-

क्षेपका ये बौद्धमतावलम्बिनस्तेषां परिचयोऽपि ज्ञायते। पार्थसारथिस्तु मीमांसारूपिणि नभसि भास्कर इव भासते, अस्यैव भासा मीमांसादर्शनस्य सर्वोऽपि विषयोऽवभासते।

पार्थसारथेः शैली

अयमधिकरणप्रस्थानस्य नवीनमार्गस्याविष्कारक इति निरूपितं प्राक्। अस्मिन् पथि सञ्चरन्नयं विविधलोकोक्तीनां किंवदन्तीनाञ्च योजनेन गहनं मीमांसा-विषयं रुचिकरं विधातुं तत्र तत्र यतते। पूर्वपक्षाणां निरसनावसरे व्यङ्ग्य विधयोपहासोक्तिरस्य विशेषरूपेणाकर्षिका भवति। शास्त्रसम्मततर्केषु वाङ्मुद्रणेऽयं पटुः। अस्य ग्रन्थेषु गद्यपद्यात्मिका शैली समुपलभ्यते। पार्थसारथे रचनाशैलीविषये श्री रामस्वामिशास्त्रिणोऽभिप्रयन्ति-यन्मण्डनोदयनविमुक्तात्मनां शैलीव न जटिला, नापि वाचस्पतिमिश्र-जयन्तभट्टादीनामिव रुचिरा सरला वा। अत एवाध्येत्तारः विना व्याख्यासाहय्येन विषयानवगन्तुं क्लिश्यन्तीति। मम तु प्रतिभाति-यदस्य शैली कामं रुचिरा मा भवतु किन्तु प्रौढा वर्तते। प्रत्येकमस्य वाक्यं महत्त्वमावहति। अस्यैव परिणामः—यत्पूर्वपक्षिणस्तत्र तत्र नतमस्तका भवन्ति। गम्भीरविषयाणां विवेचनावसरे काठिन्यन्तु सहजम्। विषयाणां भाषायाश्चैकरूपता नूनं गुण एव न दोषः। विषयानुरूप्यं वहन्ती शैली गच्छति। पूर्वपक्षिभिः कृतानामाक्षेपाणां निरासावसरे ओजोगुणे समापतिते शैली गङ्गाप्रवाहमपि निर्जित्याग्रे गच्छति। अत्र नेयं स्थितिरापतति-यद्विषया अन्यत्र शैली चान्यत्रेति। अतो मे प्रतिभाति-यत्पार्थसारथेः साफल्यप्राप्तौ न तद्गतवैदुष्यातिरेकेण तदीयशैली कारणम्। तथाऽन्यविशेषाणां पुरतः सा शैली कुत्रापि न न्यून-तामवाप्नोदिति।

पार्थसारथेर्जीवनं कालश्च

पार्थसारथेस्सिद्धान्ता यथा सुस्पष्टाः न तथा तदीयजीवनकालयोः स्पष्टमितिवृत्तं प्रमाणञ्चोपलभामहे। तेन स्वीयग्रन्थेषु प्रत्यक्षेण परोक्षेण वा जीवनविषये न कोऽप्युल्लेखः कृतः यमवलम्ब्य निश्चितं जीवनतत्त्वं कालञ्च प्रदर्शयितुं शक्नुमः। स केवलं पितृत्वेन शिक्षकत्वेन च यज्ञात्मानं निर्दिशति। प्रागयं विषयो निर्दिष्टः। 'मिश्रः' इत्युपनाम्ना स मिथिलाभिजन इत्यनुमातुं शक्यते। तस्य निश्चितः कालस्तु चिरादेव सन्दिग्धो वर्तते। एतत्पूर्ववर्तिनां नामानि यान्युल्लिखितानि ग्रन्थेषु तान्याश्रित्यैवा-नुमातव्य इति स्थितिरस्ति। एवमेतत्परवर्तिभिरस्य नाम गृहीतं तदादाय निश्चेतव्यं भवति। तत्र विद्यारण्य-चिदानन्द-प्रत्यग्रूपप्रभृतयः स्वीयग्रन्थेषु पार्थसारथिं स्मरन्ति। विद्यारण्याश्च विजयनगर (हम्पी) शासकस्य बुक्कमहीपालस्य सभायामासन्निति स्फुटं तेषामुल्लेखेन प्रतीयते। बुक्कमहीपतेः शासनकालः ई० चतुर्दश शताब्दीति

इतिहासविदां निश्चयः। केरलाभिजनेन चिदानन्दपण्डितेन स्वीये[1] नीतितत्त्वाविर्भावे ग्रन्थे पार्थसारथिः स्मर्यते। चिदानन्दश्च[2] त्रयोदशशताब्द्यामवर्तत इति श्री रामस्वामिशास्त्री निर्दिशति। भगवत्प्रत्यग्रूपस्यापि कालः चतुर्दश शताब्दी। एवञ्चेतः पूर्वं पार्थसारथेः काल इत्येष्टव्यम्। एवं[3] मीमांसाशास्त्रसर्वस्वकारो हलायुधः पदे पदे पार्थसारथेर्न केवलं नाम गृह्णाति, किन्तु पार्थसारथेर्वाक्यैः स्वीयं ग्रन्थं पूरयति। हलायुधः स्वयं वैष्णवसर्वस्व-शैवसर्वस्व-पण्डितसर्वस्वादिग्रन्थप्रणेतृत्वेनात्मानं[4] निर्दिशति। इदन्तु निश्चितं प्रतीयते-यद्धलायुधः पार्थसारथिं सुपरिचिनोतीति। मीमांसाशास्त्रसर्वस्वं मीमांसासर्वस्वञ्चैक एव ग्रन्थः। अस्य लेखकोऽप्येक एव हलायुधः। डा० उमेशमिश्राणामपीदमेव मतम्। किन्तु[6] पी. वी काणेमहोदयः एकादशद्वादशशताब्द्योः त्रीन् हलायुधान् परिगणयति। तत्र प्रकृतहलायुधः वङ्ग-शासकस्य[5] लक्ष्मणसेनस्य राज्ञो राज्ये धर्माध्यक्ष आसीत्, 'श्रीमान् लक्ष्मणसेनदेव नृपतिर्धर्माधिकारं ददौ' (ब्र. सं. श्लो. १२.) इत्युल्लेखात्। लक्ष्मणसेनः ११५० ईसवीतः १२०० ईसवीमध्ये वङ्गदेशाधिपतिरासीत्। अत्रैव राज्ये हलायुधः प्रथमं सभापण्डितस्तदनन्तरञ्च धर्माध्यक्षश्चाभवत्। अतो हलायुधस्य समयो लक्ष्मणसेन समानकालिक इति पर्यवस्यति। अतः पार्थसारथिरन्ततः ततः पञ्चाशद्वर्षेभ्यः पूर्वमासीदिति स्वीकर्तव्यमापतति। एभिः प्रमाणैः पार्थसारथेः कालः ई. ११०० न्यूनतमरूपेण सिध्यति। किन्तु पं. श्रीरामस्वामिशास्त्री अनेनापरितुष्टः सूक्ष्मेक्षिकया सुविचार्य पार्थसारथेः कालं ९०० ई. तः ११०० ई. पर्यन्तं निर्णीतवान् स्वीये न्यायरत्नमालायाः प्राक्कथने।

न केवलमिदमेव, अन्यदपि प्रमाणमुपस्थापयितुं शक्यते येन सङ्कुचितं परिधिं प्रत्येतुं शक्नुमः। पार्थसारथिस्तर्कपादे विभिन्नमतानां समालोचनावसरे श्रीभाष्यकृतं रामानुजं कुसुमाञ्जलिकारमुदयनञ्च सत्यपि प्रसङ्गे खण्डनाय मण्डनाय वा न स्मरति। श्रीरामानुजाचार्यस्य १०२७ ई. इति, उदयनाचार्यस्य दशमशताब्द्या अन्तिमो भागः समय इतीतिहासविदां निर्णयः। अनयोर्मतेन यद्ययं परिचितस्तर्ह्यवश्यं

---

१. अस्य पाण्डुलिपिः मद्रासराजकीयमातृका पुस्तकालये द्रष्टव्या।

२. तत्त्वबिन्दोः प्राक्कथने। (अण्णमलै विश्वविद्यालयप्रकाशनम्।

३. तृतीयाध्यायतः चतुर्थाध्यायान्तो भागः प्रकाशितः। अस्य ग्रन्थस्य पाण्डुलिपिर्बङ्गदेशे एशियाटिकसोसाईटी ग्रन्थागारे विद्यते।

४. मीमांसासर्वस्वं वैष्णवसर्वस्वमकृत शैवसर्वस्वम्।
पण्डितसर्वस्वमसौ सर्वस्वं सर्वधीराणाम्'॥ (ब्रह्मसर्वस्वं १९)

५. 'जर्नलवेङ्गाल रिसर्च सोसाइटी Val २० प्राक्कथनं द्रष्टव्यम्।

६. ध. शा. इ. २०० पृ.।

तदपि निर्दिशेत्। प्रभाकरमतानुयायिनं भवनाथं क्वचित्स्मरति[१]। अतो भवनाथः प्राक्तनः। एभिः कारणैरयमत्र निष्कर्षः प्रतीयते—यत्पार्थसारथिः दशमशताब्द्या मध्यकाल आसीत्। उदयनरामानुजाचार्याविनं दशमशताब्दीमध्यभागादूर्द्ध्वं नेतुं न शक्नुतश्चेत्, हलायूध एव स्वप्राक्तनं विधातुं प्रतिबध्नाति। अत्रेतिहासविद एव प्रमाणम्।

भवदेवः

सप्तमशताब्दीप्रभृति सप्तदशशताब्दीपर्यन्तं भारते दार्शनिकग्रन्थकृतां शृङ्खलारूपेण सर्वेषु दर्शनेषु लेखका नैरन्तर्येण समजायन्तेति तत्तद्ग्रन्थावलोकनेन परिज्ञायते। तत्रापि विशेषतो मीमांसायां लेखनधारामनुभवामः। पार्थसारथेरनन्तरमथवा तत्समकाल एव भवदेव उदियाय महान् मीमांसकः। अनयोरुभयोरयं विशेषः—पार्थसारथिः भट्टपादानां श्लोकवार्तिकस्य टुप्टीकायाश्च व्याख्याकारः, भवदेवस्तु तन्त्रवार्तिकस्य। पार्थसारथिः प्रभाकरमतनिरसने मतिं चकार। भवदेवस्तु तन्त्रवार्तिकव्याख्यानव्याजेनाधिकरणप्रस्थाने प्रभाकरकुमारिलमतवैलक्षण्यप्रदर्शने। अत एव स्वीये तौतातितमततिलके प्रत्यधिकरणं वार्तिककारमतेनाधिकरणस्वरूपं प्रदर्श्य ततः प्रभाकरमतेनाधिकरणस्वरूपं दर्शयति। भाष्यवार्तिकानन्तरं तदवलम्बनेन पार्थसारथिः तत्तदधिकरणप्रदर्शनपरं स्वतन्त्रं शास्त्रदीपिकाग्रन्थं प्रणीय तत्र प्रभाकरमतं समालोचयति, तथा भवदेवः भाष्यतन्त्रवार्तिकमवलम्ब्य तर्कपादं विहाया तृतीयाध्यायायान्तमधिकरणात्मना तन्त्रवार्तिकाशयमाविष्कृत्य प्रभाकरमतमपि प्रदर्शयति, न समालोचयति। पार्थसारथिर्मिथिलायाम् प्रौढ आसीद् भवदेवस्तु वङ्गे। पार्थसारथिस्तु दर्शनान्तरपरिज्ञाताऽवर्तत, भवदेवस्तु धर्मशास्त्राभिज्ञः। दर्शनेषु मीमांसायाः कीदृशः प्रौढिमेति पार्थसारथिरवद्योतयति, धर्मशास्त्रेण मोमांसायाः कीदृशस्सम्बन्ध इति भवदेवो विशदयति। पार्थसारथिरध्ययनावसरे गम्भीर आसीत्, भवदेवस्तु चञ्चल आसीदिति प्रतीयते। अतएव स्वीये तौतातितमततिलके बालवलभीभुजङ्गापरनामानमात्मानं स्वयं निर्दिशति। पुरा वङ्गेषु वलभीषु 'टोल्' पदवाच्येषु छात्राणामध्यापनं प्रसिद्धमासीत्। अध्ययनावसरे भवेदेवोऽतीव चञ्चलस्सन् सहाध्यायिनो बाधते स्म। तेन बालवलभीष्वयं भुजङ्गवदाचरितवानिति तादृशं नामावाप्तवान्।

बाल्ये चाञ्चल्ये सत्यपि प्रौढावस्थायां ग्रन्थलेखनावसरे समन्वयदृष्टिरभवत्। स्वग्रन्थाध्येतारः भाट्टमतस्य प्रभाकरमतस्य चेत्युभयोर्विद्यमानं वैषम्यं प्रबलदुर्बलभावञ्चाधीत्य स्वयमेव निश्चिन्वन्त्विति धिया भवदेवो ग्रन्थं प्रणिनाय। स्वयं वाचा न

१. न्यायरत्नाकरो द्रष्टव्यः। (पृ. ३२७.)

कस्याप्युत्कर्षमपकर्षं वा वदति। प्रभाकरमतस्याध्ययनाध्यापने विद्यमानं मालिन्यं किञ्चिदिवापाकर्तुं 'तौताततिमत' लेखने प्रवृत्त इवाभाति।

भवदेवस्य जीवनं कालश्च

वङ्गदेशे प्रसिद्धासु राढासु 'सिद्धल:' इत्याख्यया प्रसिद्धो[1] ग्रामोऽद्यापि विलसति यश्च नैकविधैः श्रोत्रियैः ब्रह्मनिष्ठैस्सामवेदीयकौथुमशाखिभिस्सावर्णगोत्रतिलकैर-ध्युषितः। तस्मिन् 'गोवर्द्धन' संज्ञकाद् द्विजवराद्[2] वन्द्यघटीकुलप्रसूतायां 'साङ्गोकायाम्' सर्वलक्षणोपेतस्समुदभूद् 'भवदेवः'। बाल्ये वयसि गोवर्द्धनः सुतमेनमुपनीय स्वकुल परम्परागतं सामवेदं साङ्गं सरहस्यञ्चाध्याप्य शास्त्राध्ययनाय कस्याञ्चन वलभ्यां प्रवेश-यामास। तत्र यथाश्रमं पूर्वोत्तरमीमांसयोः धर्मशास्त्रे ज्योतिषेऽर्थशास्त्रे चानुपमं वैदुष्यमवाप्य 'श्रीहरिवर्मदेवस्य' राज्यसभायां प्रधानामात्यपदमध्यतिष्ठत्। तस्मिन्नेव समये राढायां श्रान्तपथिकानां प्राणाशयप्रीणनं कञ्चनानल्पं जलाशयं निर्माय तत्परिसरे पथिकानां विश्रामाय स्वस्य च निवासाय महतीं शालां मनोहरञ्च प्रासादं परिकल्प्य श्रीमन्नारायणस्य नृसिंहस्य च मन्दिरं निर्माय नन्दनोपममुद्यानञ्चैकं निर्मितवान्। अयमुदन्तः वाचस्पतिकृतप्रशस्तिपत्रादवगच्छामः। प्रशस्तिपत्रमिदं तौताततिमततिलकस्य मदाचार्यैस्सम्पादितस्य तृतीयभागे भूमिकायां प्रकाशितमस्ति। इदञ्च प्रशस्तिपत्रं भुवनेश्वरस्थानन्तवासुदेवमन्दिरे शिलायां खचितमद्याप्युपलभ्यते। तत्र भवदेवस्य वंशवृक्षोऽपि वर्णितः मूलपुरुषो **भवदेवः**। तस्य रथाङ्गादयोऽष्टौ सुताः। रथाङ्गस्य '**अत्यङ्ग**' इति, तस्य स्फुरितापरनामा **बुध** इति, तस्य श्री **आदिदेव** इति, (अयं सरस्वतीजानिः वङ्गदेशाधिपस्यामात्यः) तस्य **गोवर्द्धनः** साङ्गोकाजानिः, तस्य **भवदेवः** बालवलभीभुजङ्गापरनामा हरिवर्मदेवस्यामात्य इति सुताः। भवदेववंश-वृक्षस्य सप्तमः पुरुषोऽयं मीमांसकः। मीमांसया सहास्य धर्मशास्त्रेऽप्यतितरां वैदुष्य-मासीदिति गम्यते। राढासु सामवेदिनां कुटुम्बेष्वेतद्विरचित '**दशकर्मपद्ध**' त्यनुसारेणैव सर्वेऽप्युपनयनादयस्संस्काराः प्रचलन्तीति शृणुमः। अयं ज्योतिषशास्त्रेऽपि पाण्डित्य-भावहति।

एतद्विरचिता ग्रन्थाः

तौताततिमततिलकम्, प्रायश्चित्तनिरूपणम्, कर्मानुष्ठानपद्धतिः, दशकर्म-पद्धतिरिति नामान्तरम्) नवीनहोराशास्त्रम् इत्यादयो ग्रन्था अनेन विरचिताः। सर्वेष्वेषु ग्रन्थेष्वन्ते 'बालवलभी भुजङ्ग' इति नामोल्लिखितमुपलभामहे।

---

१. ग्रामोऽयं वङ्गेषु गंगाया दक्षिणदिग्भागे, हुग्ली नद्याः पश्चिम दिग्भागे च वर्तते।

२. बङ्गेषु भट्टनारायण' वंशस्य वन्द्यघटीति संज्ञा। एतद्वंशोद्भवा एव 'वन्द्योपाध्याया इति व्यपदिश्यन्ते।

भवदेवस्य समयः

स्वीये तौतातितमततिलके प्रभाकरान्तेवासिनं शालिकनाथं, तन्त्रवार्तिक-व्याख्याया अजितायाः कर्तारं श्रीपरितोषमिश्रञ्चायं स्मरति। शालिकनाथोऽष्टम शतकमध्यवर्तीति[१] मत्परमाचार्या अन्ये चेतिहासविद आशेरते। एवं याज्ञवल्क्य-स्मृतेष्टीकाया बालक्रीडायाः कर्तारं श्रीविश्वरूपं भवदेवः स्वीये प्रायश्चित्तप्रकरणे[२] स्मरति। विश्वरूपश्च नवमशतकेऽवर्तत इति स्वीये धर्मशास्त्रेतिहासे पी० वि० काणे महोदयोऽभिप्रैति। अतश्शालिकनाथविश्वरूपयोरर्वाचीनो भवदेव इति सिध्यति। किञ्च वङ्गदेशेषु बल्लालसेनदेवो राजा स्वगुरुरनिरुद्धभट्ट इति स्वीये दानसागरे

निखिलभूप-चक्रतिलक-श्रीमद्बल्लाल-सेनदेवेन।
पूर्णे शशिनवदशमिते दानसागरो रचितः॥ इति

शकवर्षे लिखन् स्वस्य द्वादशशताब्दीवर्तित्वं सूचयति। अनिरुद्धभट्टस्यापि स एव कालः। स च स्वीये कर्मोपदेशिनीपद्धतौ भवदेवं[३] स्मरति। अतोऽनिरुद्ध भट्टात्पूर्ववर्ती भवदेव इति सिध्यति। अनिरुद्धो यथा स्वग्रन्थे भवदेवं स्मरति, तथा कृत्यकल्पतरुकारं लक्ष्मीधरभट्टमपि स्मरति। लक्ष्मीधरभट्टसमयश्च कृत्य-कल्पतरुदानकाण्डस्य भूमिकायां श्रीमद्भिः K. V. रङ्गस्वाम्यार्यमहोदयैः १११० ई० इति सप्रमाणं[४] निर्णीतः। अतोऽनिरुद्धभट्टस्य समयः द्वादशशताब्द्या द्वितीयार्धमित्य-भ्युपगन्तव्यम् ततः पूर्ववर्ती भवेदेव इत्यायाति। किञ्च भवदेवस्य पितामहः श्री आदि-देवः ज्योतीवर्मणो राज्ये साचिव्यमकरोदिति गौ[५]डराजमालतोऽवगम्यते। भवदेव जनको गोवर्द्धनो ज्योतीवर्मतनयस्य हरिवर्मदेवस्य यौवराज्यावसरेऽमात्य आसीदिति इतिहासाध्ययनेन ज्ञायते। वाचस्पतिप्रशास्तिपत्रे च गोवर्द्धनादनन्तरं भवदेवः श्री हरिवर्मदेवेन तत्स्थाने नियुक्त इत्यपीतिहासतः प्रतीमः। प्रशस्तिपत्रादप्ययं विषयः स्पष्टं ज्ञायत एव। एभिः प्रमाणैः भवदेव एकादशशताब्द्यास्तृतीये द्वादशशताब्द्या आद्ये वा भागेऽवर्तत इत्यनुमीयते।

भट्टसोमेश्वरः

मीमांसायां न्यायसुधाकारनाम्नायं प्रसिद्धः। तन्त्रवार्तिकस्य व्याख्येयं न्याय-सुधा। टीकेयमतिविस्तृता गभीरा च। एतदनन्तरकालवर्तिभिः स्थाने स्थानेऽग्रं

१. पं० म० म० चिन्नस्वामिशास्त्रिणां 'भट्टकुमारिलः प्रभाकरश्च' इति लेखो द्रष्टव्यः।

२. विश्वरूप श्रीकरादिभिरलिखितत्वाद्धे'यमेव' इति। ३ पृ० २६३ द्रष्टव्यम्।

३. मङ्गलप्रस्तावे लिखति। See India Office Catalogue P. 475

४. See P. 40 Krityakalpatru Vol. 5 Baroda edn.

५. See गौडराजमाला P.59 Varendra Research Society, Bengal.

स्मर्यते, सत्यवसरे मतमस्य साधु समालोच्यते च। पार्थसारथिमिश्रमतापेक्षया तत्र तत्र विरुद्धमतप्रकाशने नायं सङ्कोचमवाप्नोति। न्यायसुधा समग्रा चौखम्बा-मुद्रणालयात्प्रकाशिता समुपलभ्यते। न्यायसुधाया 'राणक' इति नामान्तरम्। अस्य द्वितीयो ग्रन्थस्तन्त्रसार इति प्रसिद्धिः किन्तु नाद्यावधि स प्रकाशितः। अयं माधवभट्टस्य सुतः द्वादशशताब्द्यामसीदिति पुरावृत्तविदो वदन्ति। सप्तदशशताब्दीकालिकः कमलाकरभट्टादय एनं स्वग्रन्थेषु निर्दिशन्ति। कमलाकरभट्टः तन्त्रवार्तिकव्याख्याता आत्मानं 'राणकचोर' इति स्वयं निर्दिशति।

परितोषमिश्रः

तन्त्रवार्तिकस्यैवान्यो व्याख्याता परितोषमिमिश्रो मिथिलाभिजनः त्रयोदश-शताब्द्यामासीत्। अस्य व्याख्याऽजिता नाम्नी सरला विवेचनात्मिका च व्याख्येयं साहाय्यमाचरति। किन्तु दुर्भाग्यवशेनाद्यावधि न प्रकाशपथमानीता। व्याख्याया मातृकाः भण्डारकरपुस्तकालये, तत्प्रतिलिपिः अडयार ग्रन्थालये च सन्ति सुरक्षिताः। अस्या व्याख्याया व्याख्याता चतुर्दशशताब्द्यां वर्तमानः सूर्यविष्णुमिश्रात्मजो मिथिलाभिजनोऽनन्तनारायणमिश्र इति श्रूयते। एतेनाजिताकर्तुः परितोषमिश्रस्य प्रसिद्धिरनुमातुं शक्यते।

हलायुधः

पार्थसारथिमिश्रविचारावसरे हलायुधविषये किञ्चिदवोचाम। अयं वात्स्यायन-गोत्रस्य धनञ्जयस्य पुत्रः वङ्गेषु प्रसिद्ध एकादशशताब्द्यामासीदिति निर्णीतमितिहासविद्भिः। अयं मीमांसाशास्त्रसर्वस्वमिति ग्रन्थं विरचयामास। पार्थसारथिमिश्रप्रणाल्याऽधिकरणरूपेणायं ग्रन्थो वर्तते। डा० म० म० उमेशमिश्रेण प्रथमाध्यायचतुर्थ-पादस्य तृतीयाधिकरणपर्यन्तो ग्रन्थः प्रकाशितः। अग्रेतनो भागो नोपलब्ध इत्याभाति। एतद्विषये यद्वक्तव्यं तद् प्रागेवाभिहितम्।

चिदानन्दः

चिदानन्दो 'नीतितत्त्वाविर्भावः' इति ग्रन्थस्य निर्माता। अयं दक्षिणभारताभिजनः। भट्टपादमतावलम्बिनां विषयाणां कतिपयानां विवेचनमस्मिन् ग्रन्थे समुपलभ्यते। अस्य ग्रन्थस्य व्याख्यापि परमेश्वरेण लिखितेति श्रूयते। अयमद्याप्यप्रकाशितो ग्रन्थः।

गङ्गाधरमिश्रः

अयं भट्टसोमेश्वरात्मजो मिथिलाभिजनः 'सींभारि' संज्ञकग्रामवास्तव्य इति[१] तदीयपद्येनावगम्यते। तन्त्रवार्तिकव्याख्यारूपो नाम्ना 'न्यायपरायण' इति ग्रन्थोऽनेन रचितः। त्रयोदशशताब्द्यामयं जात इति निश्चितमितिहासविद्भिः।

---

१. शाल्यलिग्रामसम्भूतः भट्टसोमेश्वरात्मजः।
गंगाधरोऽतिगम्भीरं व्यावृणोत्तान्त्रवार्तिकम्' ॥

वेदान्तदेशिकः

विशिष्टाद्वैतमतावलम्बी विख्यातोऽयं विद्वान् दक्षिणभारताभिजनः तत्रापि पृथिवीदेव्याः काञ्चीरूपेण विख्यातायां काञ्चीपुर्यामस्य जन्मेत्यवगम्यते। त्रयोदशशताब्द्येवास्यापि कालः। मीमांसापादुका सेश्वरमीमांसेति ग्रन्थद्वयमनेन मीमांसायां विरचितम्। विशिष्टाद्वैतवेदान्तेऽस्य पारङ्गत आचार्यः। विद्वत्समाजेऽस्य महानादरः। मीमांसाशास्त्रे ईश्वरस्य क्वापि स्पष्टतश्चर्चा नास्तीत्यस्य शास्त्रस्य निरीश्वरकोटौ प्रवेशस्स्यादिति हेतोः 'सेश्वरमीमांसा' ग्रन्थो रचित इति भाति।

माधवाचार्यः

पार्थसारथिमिश्रादनन्तरं प्रवृत्तेषु मीमांसकेषु माधवाचार्यस्य शास्त्रेऽस्मिन् विशिष्टं स्थानं परिगण्यते। नानाशास्त्रेष्वयं बैदुष्यमावहन् स्वयं स्वजीवनविषये तत्र तत्रोल्लिखति। अस्य माता सुकीर्तिः पिता च मायणः। याजुषी तैत्तिरीयशाखा, सूत्रञ्च बौधायनम् भारद्वाजगोत्रञ्चेति पराशरमाधवीयग्रन्थादवगम्यते। स्वकुलपरम्परातो वीरबुक्कभूपतेः विजयनगरशासकस्यायममात्यः[1] कुलगुरुश्चासीत्। माधवाचार्यः सायणाचार्यो भोगनाथश्चेति त्रयो भ्रातरः। तेषु माधवो ज्येष्ठः। क्वचिन्माधवशब्दस्थाने सायणशब्दोऽपि प्रयुज्यते, क्वचिच्च सायणमाधव इत्यपि प्रयोगः। तत्र सायणशब्दः तत्कुलपरम्परावाचक इति केचनाभिप्रयन्ति। यथा तथा वा भवतु! सायण इति कनिष्ठस्य नामेति स्वीकृत्येदं वक्तुमभिलषामि—यद्वैदिकसाहित्यस्यामरत्वमुभाभ्यामपि स्वव्याख्यया सम्पादितमिति।

माधवस्य कालः

विजयनगरशासकस्य बुक्कभूपतेरमात्यो माधवाचार्य इति निर्णये जाते माधवस्य कालनिर्णये न काठिन्यं किमपि। बुक्कभूपतेरनन्तरं हरिहरेश्वरश्शासकोऽभवत्। तदनन्तरं तदात्मजः श्रीविजयभूपती राज्यं शशासेतीतिहासविदां मतम्। श्रीविजयभूपतिः १३३८ शके (१५१६ ई०) राज्यं चकारेति निश्चितं बहुभिरितिहासविद्भिः। एवं तर्हि १२३८ शके (१३६६ A. D.) श्री बुक्कभूपतिरित्यनुमातुं शक्नुमः। पाश्चात्यविद्वान् लेसन् महोदय एवमेवाभिप्रैति[2]।

माधवाचार्यवैदुष्यं ग्रन्थाश्च

चिरन्तनेषु कालेषु शासकानां जिज्ञासानुसारेण संस्कृतवाङ्मयस्य विशेषतो वैदिकसाहित्यस्य च परिवर्द्धने विदुषां प्रवृत्तिरासीत्। तत्र बुक्कभूपतिः न केवलं

---

१. 'इन्द्रस्याङ्गिरसो नलस्य सुमतिः''''''''''यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः' (न्यायमाला भूमिका)।

२. द्रष्टव्य एण्टिक्वेटी पृ० १६२

वैदिकसाहित्यस्य वेत्ताऽभवत् किन्तु जिज्ञासुरप्यासीदिति तदीयजीवनवृत्तान्तेन ज्ञायते। अतएव माधवसदृशं शास्त्रेषु वेदेषु राजनीतौ च पारङ्गतं पण्डितममात्यं विधाय यथाविधि राज्यं शशास। शासनसम्बन्धिषु विषयेष्वेवामात्यानां साहाय्यं नाभवत् किन्तु शैक्षणिककार्येषु वेदसंस्कृतसाहित्यपरिवर्द्धनप्रसारणादिष्वपि तेषां साहाय्यं राजभिरपेक्ष्यते स्म। अतएव माधवः 'आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने' इति लिखति। तदादेशमवाप्यातिसङ्कटानि राजकीयकार्याणि निर्वहन् पराशरमाधव-काल निर्णयादिधर्मग्रन्थान् संहिताब्राह्मणात्मकवेदचतुष्टयभाष्यादिवैदिकग्रन्थान् वैयासिक-जैमिनीयन्यायमालेति सर्वदर्शनसंग्रह इति च दार्शनिकग्रन्थान्, माधवी-यधातुवृत्तिरिति व्याकरणसम्बन्धिनं ग्रन्थम् अन्यांश्च बहून् ग्रन्थान् प्रणीय स्वीयमनुपमं वैदुष्यं प्रकाशयति स्म। एतादृशं वैदुष्यं स्वगुरोः सर्वज्ञविष्णोः कृपयावाप्तमिति 'सर्वज्ञ-विष्णुगुरुमन्वहमाश्रयेऽहम्' इति[१] कथयन् सूचयति।

स्वप्रणीतेषु सर्वेषु ग्रन्थेषु ग्रन्थरचनाया उद्देश्यं स्वपरिचयञ्च ददानः तथा लिखति यथा हि लोकैरल्पपरिश्रमेणैव शास्त्रेषु वेदेषु च ज्ञानमवाप्येत। यावदेवाध्या-त्मिकसम्पदवाप्तिः तावदेव लौकिकसम्पदवाप्तिर्भवतीति लक्ष्यं मनसिकृत्य ग्रन्थनिर्माणेऽस्य प्रवृत्तिरिति ज्ञायते। प्रथमं वर्णाश्रमधर्मपरिपालनौपयिकदिनचर्याप्रदर्शनम्, तदनु द्विजसाधारणश्रौतकर्मणां स्वरूपप्रदर्शनमिति स्वीयग्रन्थरचनाक्रमं[२] प्रतिजानाति। परेषामुपदेशायैव न ग्रन्थानां प्रणयनं कृतं माधवाचार्येण, अपि तु कर्मानुष्ठानपरः श्रुतिस्मृतिसदाचारसम्पन्नश्चासीत्।

वैदिकसाहित्ये परां भक्तिमादधानोऽयं विना मीमांसाशास्त्रेण वेदवाक्यार्था-वबोधो दुष्कर इति मत्वा मीमांसासागरं पल्वलं विधाय पद्यात्मिकां जैमिनिन्यायमालां विरच्य तस्या विस्तारमपि सुखावबोधाय प्रणीतवान्। स्वीयेषु वेदभाष्येषु तत्र तत्र 'अथ व्याकरणम्' अथ मीमांसा' 'तथाच कल्पः' इत्येवं निर्दिशन् अवद्योतयति यदमीभिस्सामग्रीभिर्विना वेदार्थावगमो निष्फल इति। दुस्साध्येन साम्राज्यशासन भारवहनेन सहातिगहनानां शास्त्राणां संग्रहणे निबन्धने प्रवृत्तिर्माधवस्य नितरां स्तुत्या। तत्रापि बुक्कभूपते रुच्यनुसारेण शैक्षणिकेषु व्यापारेष्वमात्यस्य प्रवृत्तिर्दुर्लभैव। भारतीयवैदिकसंस्कृतेस्तस्मिन् काले कीदृशः प्रचार इति सुखेनानुमातुं शक्यते माधव प्रणीतग्रन्थानामध्ययनेन। सत्यमेवायं वैदिकसंस्कृतेर्महान् स्तम्भः।

---

१. सर्वदर्शनसंग्रहो द्रष्टव्यः।

२. श्रुतिस्मृतिसदाचारपालको माधवो बुधः।
स्मार्तं व्याख्याय सर्वार्थं, द्विजार्थं श्रौत उद्यतः' ॥ जै. न्याः

इन्द्रपतिठक्कुरः

नाम्नाऽस्य जनको रुचिपत्युपाध्यायः, गोपालभट्टान्तेवासी च। मिथिलाशासकस्य भैरवसिंहस्य सभापण्डितोऽयमासीत्। मीमांसादर्शने 'मीमांसापल्वल' इति ग्रन्थोऽनेन प्रणीतः। भैरवसिंहस्य शासनकालः पञ्चदशशताब्दीति ज्ञायते। अत इन्द्रपतेरपि स एव काल इतीतिहासविदो वदन्ति।

गोविन्दठक्कुरः

अयमपि मिथिलायां भदोंराग्रामनिवासी केशवठक्कुरात्सोनीदेव्यामुत्पन्नः बुधवादासवंशजः। मीमांसायां नाम्ना 'अधिकरणमाला' ग्रन्थं प्रणीतवान्। अस्यापि कालः पञ्चदशशताब्दीति प्रतीयते।

देवनाथठक्कुरः

श्रीगोविन्दठक्कुरस्यैव सुतो देवनाथः। अस्य सप्त सहोदरा आसन्। सर्वेऽपि वैदुष्यभरिताः प्रसिद्धा अभवन्। श्रीदेवनाथेन नाम्ना 'अधिकरणकौमुदी' इति ग्रन्थो मीमांसायां रचितः, यश्च सर्वत्र भारते प्रचलितः। अनेन देवनाथेन मीमांसाया धर्मशास्त्रस्य च यत्सम्बन्धनैकथ्यं

'धर्मशास्त्रेऽधिकरणं विचारेषूपकारकम्।
विदुषा देवनाथेन निर्बन्धेन निबध्यते'॥

इति कथयतावद्योतितम्। भट्टपादप्रभृतिभिर्मीमांसायां विस्तारं नीतायामपि लोकानां तत्र सारल्येन प्रवेशसिध्यर्थं माधवाचार्यप्रभृतिभिः मनीषिभिस्संग्रहेण मीमांसाविषयमवगमयितुं यत्नः कृत इति प्रतीयते। अतएव देवनाथठक्कुरेणादिष्टः पक्षधरमिश्रः 'आलोक' नामकं ग्रन्थं प्रणीतवान् अस्य च कालः षोडशशताब्दीति ज्ञायते।

रामकृष्णभट्टः

मालवेषु पाराशरगोत्रोद्भवः श्रीमाधवभट्टः सकुटुम्बः काशीमागत्य विद्याध्ययने निरत उवास। तस्यात्मजः काश्यां प्रभावत्यां समुत्पन्नः श्री रामकृष्णः। पितृपरम्पराप्राप्तां विद्यामधीयानः स्वजनकापेक्षयाप्यधिकं वैदुष्यमवाप्नोत्। अस्य कुले सर्वेऽपि रामभक्ता आसन्, वेदान्ते मीमांसायाञ्च कृतपरिश्रमा अभवन्। अधीतपरम्पराप्राप्तविद्यः कथयति—'तत्तद्ग्रन्थनिर्माणात्स्वविद्या प्रकटीकृता' इति। पार्थसारथिमिश्रविरचितशास्त्रदीपिकायाः प्रथमा टीका रामकृष्णभट्टस्येति तदीय[1] पद्यादवगच्छामः।

---

१. 'न शास्त्रदीपिका टीका कृता केनापि सूरिणा।
तदपूर्वाध्वसञ्चारी नोपहास्यः स्खलन्नपि'॥

सिद्धान्तचन्द्रिकेति टीकाया नाम। तर्कपादान्तैवेयं टीका मुद्रिता समुपलभ्यते। पूर्णा प्रौढा चेयं टीका समग्रशास्त्रदीपिकाया नोपलभ्यते। अस्याः टीकायाः तज्जीवद-वस्थायामेव महान् प्रचारोऽभवत्। तात्कालिकैर्विद्वद्भिरस्याः टीकाया अवलम्बेन 'भट्टः 'पण्डितशिरोमणिः' इत्युपाधिभिरयं विभूषितः। स्वग्रन्थस्योपादेयताविषये स्वयं ब्रवीति-

'नानाग्रन्थस्थितं सर्वं प्रमेयं फक्किकाश्च ताः।
संवीक्ष्य लिखिता नात्र कल्पितं लिखितं मया'॥

इति। अस्यान्ये ग्रन्था अन्वेषणीयाः।

रघुनाथभट्टाचार्यः

अयं वङ्गदेशनिवासीति नाम्ना प्रतीयते। मीमांसायां 'मीमांसारत्नम्' इति ग्रन्थोऽनेन विरचितः। अस्मिन् ग्रन्थे प्रमाणानां प्रमेयाणां विधेश्च स्वरूप विवेचितम्। अद्ययावदयं ग्रन्थो न मुद्रितः, पाण्डुलिपिस्तु वाराणस्यां क्वचित्पुस्तकालयेऽस्तीति शृणुमः। षोडशशताब्द्यामयमासीत्।

अन्नम्भट्टः

तर्कसंग्रहकारोऽन्नं भट्टो तिरुमलाचार्यस्य विदुषः पुत्रः काश्यामुवास। अनेन तन्त्रवार्तिकस्य सुबोधिनी नाम्ना व्याख्या कृता। एवं सोमेश्वरभट्टन्यायसुधाया 'राणकोज्जीविनी' तिं व्याख्या निर्मिता। मीमांसायां प्रगाढवैदुष्ये सत्यपि तर्क संग्रहमवलम्ब्यैवायं लोकप्रियो जातः। पञ्चदशशताब्द्यामयमासीदिति प्रतीयते।

अप्पय्यदीक्षिताः

दक्षिणभारते काञ्चीमण्डले 'अडयप्पलम्' इति ग्रामे श्रीमभ्द्यो रङ्गराजाध्व-रिभ्यो लब्धजन्मान इमे लोकविश्रुताः संस्कृतवाङ्मये सर्वेषु प्रस्थानेष्वप्रतिहत गतिप्रसराः चतुरधिकशतग्रन्थनिर्मातारः पुण्यश्लोका आसन्। वाजपेयान्तक्रत्वनुष्ठा तारः इमे नैकविधै राजभिः सन्मानिता आसन्। वेदान्तेऽलङ्कारशास्त्रे वा ये ग्रन्था एभिः प्रणीताः तेषु भूयसां मीमांसान्यायसञ्चारप्रदर्शनेन विना तृप्तिं न लभन्ते स्म। एभी रचितेषु कुवलयानन्द-चित्रमीमांसा-परिमल-वादनक्षत्रमालादिषु ग्रन्थेष्वधीयमानेषु सुस्पष्टं वयमनुभवामः यन्मीमांसान्यायाधिगमनेन विना ते ग्रन्था दुरधिगमा एवेति। कविताकलायामपि दीक्षिता नैपुण्यं प्रदर्शयन्तः वरदराजस्तवादिस्तुतिग्रन्थेष्वपि तत्र तत्र मीमांसान्यायान् सञ्चारयन्त इमे कर्मनिष्ठा अपि निरतिशयभक्तिज्ञान-समन्विताः। अद्वैतसिद्धान्ते परमां निष्ठामावहन्ति। स्वीय उन्मत्तशतके तमिमं

विषयमवद्योतयन्ति । दीक्षितेन्द्रैः प्रणीतानां समेषां ग्रन्थानां 'अप्पय्यदीक्षित-ग्रन्थावलिः' इति नाम्ना प्रकाशयितुं मत्परमाचार्यैरुपक्रमः कृतः, सोऽयमिदानीं श्रीकाञ्चीकामकोटि पीठाधीश्वराणां श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणानामादेशेनान्ध्रप्रदेशसर्वकारेण ग्रन्थानां प्रकाशनं समारब्धमिति नितरां प्रसीदामः ।

मीमांसायां 'विधिरसायनम्' 'उपक्रमपराक्रमः' 'वादनक्षत्रमाला' 'मयूखावलिः' (शास्त्रदीपिकाव्याख्या) इत्यादयोऽनेके ग्रन्था एभिः प्रणीताः । एतेषां समयः षोडशशताब्दीति विद्वद्भिर्निश्चितः ।

विजयीन्द्रतीर्थः

अप्पय्यदीक्षितसमकालिकोऽयं सुरेन्द्रतीर्थस्य शिष्यः । 'न्यायाध्वदीपिका' 'मीमांसान्यायकौमुदी' 'उपसंहारविजयः' इति ग्रन्था अनेन रचिताः । इमेऽद्ययावदप्रकाशिताः ।

वेङ्कटेश्वरदीक्षितः

अयमपि दीक्षितेन्द्राणां समकालिकः । श्रीगोविन्द दीक्षितात् श्रीभव्यां नागमाम्बायां जातः । वार्तिकाभरणम्' इति टुप्टिकाव्याख्यारूपः प्रसिद्धो ग्रन्थोऽनेन प्रणीतः । 'सर्वतन्त्रस्वतन्त्र' 'अद्वैताचार्यः' इति चायं प्रसिद्धः । अस्य शिष्यः श्रीराजचूडामणिदीक्षितः स्वीये तन्त्ररक्षामणिग्रन्थे निर्दिशति—

'अस्ति गोविन्दयज्वेन्द्र नागमाम्बातपःफलम् ।
श्रीवेङ्कटेश्वरमखी सर्वतन्त्रस्वतन्त्रधीः ॥
व्यतानि शुल्बमीमांसा तथा 'कर्मान्तवार्तिकम्' ।
टुप्टीकायाः कृता टीका 'वार्तिकाभरणाभिधा' ॥

इति । वार्तिकाभरणादन्यः शुल्बमीमांसेति ग्रन्थोऽप्यनेन रचित इति प्रतीयते ।

नारायणभट्टः प्रथमः

मानमेयोदयकर्ता नारायणभट्टः मीमांसकेषु प्रसिद्धनामा । अयं मातृदत्तात्मजः । तन्त्रवार्तिकनिबन्धनम्, मानमेयोदय इति ग्रन्थद्वयं प्रणीतमनेन । मीमांसासम्मतप्रमाणप्रमेयाणां निरूपणपरोऽयं मानमेयोदयः पद्यमयः, तस्य व्याख्यापि स्वयं रचिता नारायणेन । अयमपि षोऽशशताब्द्यामासीत् ।

लौगाक्षिभास्करः

अर्थसंग्रहरचयितायम् । मीमांसान्यायप्रकाशसंग्रहरूपोऽयं मीमांसायां प्रवेश-सिध्यर्थं लौगाक्षिभास्करेण लिखितः। न्यायप्रकाशकार आयदेवः, स एव भास्कर नाम्नापि प्रथित इति केचनाशेरते । अपरे च आयदेवानन्तरं तस्माद् भिन्नोऽयं भास्कर-स्तदनन्तरवर्ती न्यायप्रकाशस्यैव संग्रहं कृतवानित्यभिप्रयन्ति । अस्तु यथा तथावा । अध्ययनाध्यापने प्रचलितोऽयं ग्रन्थः । अयमपि षोडशशताब्द्यामासीदिति ज्ञायते ।

भट्टकेशवः

अस्मिन्नेव वंशे एतत्समकाल एव भट्टकेशवः प्रादुर्बभूव, अनेन मीमांसायां 'मीमांसार्थप्रकाश' इति ग्रन्थः प्रणीतः। अयं ग्रन्थः विशाखपत्तनग्रन्थमालायाम् आन्ध्रप्रदेशे प्रकाशितः मीमांसापदार्थसङ्कलनरूपः ।

नारायणभट्टः द्वितीयः

मोमांसाया विशेषरूपेण कृतपरिश्रमा ग्रन्थलेखकाश्च मिश्रवंशीया भट्ट वंशीयाश्चोपलभ्यन्ते । तत्र मिश्राः प्रायो मैथिलाः भट्टाश्च दक्षिणभारतीयाः। तत्र भट्टवंशीया दक्षिणभारतात् काशीमागत्य वैदिकसाहित्यस्य मीमासादर्शनस्य च प्रचारे प्रसारे च विशेषतस्संलग्नाः। द्वितीयनाराणभट्टोऽपि भट्टवंशस्य रत्नम् । अस्य पिता नाम्ना रामेश्वर भट्टः, माता च नाम्नोमा। रामेश्वरभट्ट एव शङ्कर भट्टनामा, तदिदमग्रे निरूपयिष्यते। अस्यैव पुत्रो द्वितीयनारायणभट्टः पदवाक्य प्रमाणपारावारधुरीण इति मीमांसाद्वैतसाम्राज्यधुरन्धर इति चोपाधिना विभूषितः मीमांसकेष्वग्रगण्य आसीत् इति ज्ञायते, किन्त्वतिशयोक्तिरेवेयमिति प्रतिभाति, यतश्चास्य शास्त्रदीपिकाया अष्टमाध्यायस्यैव व्याख्या समुपलभ्यते । एतद्विहाय नान्यः कश्चन ग्रन्थ उपलभ्यते । अयं वृत्तरत्नाकरस्य व्याख्यां प्रणीतवान्, तस्याः पाण्डुलिप्यां सन् १५४६ काल उल्लिखितो दृश्यते। विशेषेणानुशील्यमानेऽयं सन् १५१३ ई० वत्सरे समुत्पन्न इति ज्ञायते। अस्तु यथा-तथा वा, षोडशशताब्दी अस्य कालस्सिध्यति। अस्य जीवने काचन घटनोल्लेखनीया वर्तते यद् मोहमदीयैःकाश्यां विध्वंसितस्य विश्वनाथमन्दिरस्यानेन पुनरुद्धारः कृत इति ।

> 'काश्यां पातकिविद्रुतं भगवतो विश्वेरस्याचलम् ।
> लिङ्गं भाग्यवशात् सुखाय जगतां संस्थायमामास सः' ॥

इति पद्यं प्रमाणम् ।

शङ्करभट्टः प्रथमः

मीमांसादर्शनेऽयमग्रगण्यो लेखकः। अनेन मीमांसायामनेके ग्रन्थाः प्रणीताः। शास्त्रदीपिकायाः 'प्रकाशः' इति व्याख्या 'मीमांसाबालप्रकाशः' चौखम्बामालायां प्रकाशितः, 'मीमांसासंग्रह' इति तृतीयो ग्रन्थः पद्यमयः। अस्मित् ग्रन्थे 'आचार्यैरधिकरणानि सहस्रसख्यानि तत्सिद्धान्तान् पादैस्तत्संख्यैर्भट्टशङ्करोऽबध्नात्' इति निर्दिशति। सार्धद्विशतपद्येषु सहस्रमधिकरणानि सङ्कलितानि। अयमनेन ग्रन्थेन भाषायाः शक्तेश्च परिचयं ददाति। कलिकाताराजकीयसंस्कृतमहाविद्यालयीय पाण्डुलिप्यां १८२२ इत्युल्लेखोऽस्य कालं सूचयति। अयं गोविन्दभट्टस्य[१] प्रपौत्रः रामेश्वरभट्टस्य च पौत्रः, द्वितीयनारायणभट्टस्य पुत्रः। अतः सप्तदशशताब्द्यामासीदिति स्वीकर्तव्यं भवति।

नीलकण्ठदीक्षितः

भट्टवंशीयोऽयं रामेश्वरभट्टस्य प्रपौत्रः नारायणभट्टस्य पौत्रः शङ्करभट्टस्य च पुत्रः। धर्मशास्त्रे मीमांसायाश्च तलस्पर्शि वैदुष्यमधत्ते स्म। मयूखविचारधाराया अयं प्रवर्तकः, धर्मशास्त्रे द्वादशमयूखान् प्रणीय प्रतिष्ठामबाप्तवान्। उत्तरभारते कमलाकरभट्टस्य निर्णयसिन्धुः, दक्षिणभारते च मयूखग्रन्थो विशेषेण प्रसिद्धः। अस्य ग्रन्थस्याध्ययनेन मीमांसायां प्रगाढं पाण्डित्यमस्य प्रतीयते। अनेन मीमांसान्याय संग्रहोऽपि प्रणीतः। तस्य पाण्डुलिपिः ज्ञामहोदरपुस्तकालये सुरक्षिता दृश्यते। अस्यापि सप्तदशशताब्दी कालः।

शङ्करभट्टो द्वितीयः

अयं नीलकण्ठदीक्षितस्य पुत्रः, प्रथमशङ्करभट्टस्य प्रपौत्रः। भट्ट-भास्करग्रन्थ प्रणेता। जैमिनिसूत्राणां व्याख्यारूपोऽयं ग्रन्थः अद्ययावदप्रकाशितः।

दिनकरभट्टः

अयं रामकृष्णभट्टस्य पुत्रः प्रथमशङ्करभट्टस्य ज्येष्ठभ्राता च। कमलाकर भट्टोऽस्य कनिष्ठो भ्राता। इमे त्रयोऽपि भट्टपरम्परायास्संरक्षका आसन्। छत्रपति शिवाजी महाराजस्याश्रयेऽयं तिष्ठन् मीमांसायां वैशेषिकदर्शने च प्रथितयशा अभवत्। अनेन विरचितेषु सर्वेषु ग्रन्थेष्वस्य नामोट्टङ्कनमुपलभामहे। शिवाजीमहाराजस्यादेशेन तन्नाम्नैव 'शिवद्युतिमणिदीपिका' इति ग्रन्थः प्रणीत इति ज्ञायते। किन्तु ग्रन्थोऽपूर्णः स्वपुत्रेण गागाभट्टेन पूरित इत्यपि श्रूयते। शास्त्रदीपिकाव्याख्या भाट्टदिनकरीति

---

१. पी० वि० काणे धर्मशास्त्रेतिहासो द्रष्टव्यः।

विद्यते। सिद्धान्तमुक्तावल्या दिनकरी व्याख्या तु प्रसिद्धैव। शिवाजी शासनकालः १६२७ तः १६८० ई० पर्यन्तमैतिहासिकैः स्वीकृत इत्यस्यापि कालः सप्तदशशताब्द्याः पूर्वार्द्ध इति निर्णये न किमपि काठिन्यं पश्यामः।

नारायणपण्डितः

अयं नीलकण्ठ[1] शिष्यः पं० विश्वनाथसूरिणः पुत्रः 'पिष्टपशुमीमांसा' इति ग्रन्थस्य रचयिता। गद्यपद्यात्मकोऽयं ग्रन्थः। स्वीये मानमेयोदये मेयभागे स्वगुरू सुब्रह्मण्यं रामञ्च निर्दिशति। अयं मेयभागः केरलेषु कालीकट् महाराजस्याश्रये वर्तमानेनानेन रचितः। कलिकातासंस्कृतमहाविद्यालयेऽस्य पाण्डुलिपिः सुरक्षिता। लेखकः १८२२ ई० इति समयं लिखति। अनेनायमत्यन्तार्वाचीन इति सिध्यति।

कमलाकरभट्टः

अयं संस्कृतसमाजे बहुग्रन्थलेखकत्वेन लब्धप्रतिष्ठः। अस्य[2] स्ववैदुष्ये महानभिमानः। अस्य वंशे परम्परया मीमांसाशास्त्रसम्प्रदायोऽविच्छेदेन चलति स्म। अस्य पिता रामकृष्णभट्टः। पूर्वमस्य विवेचनं मयाऽकारि। कमलाकरभट्टस्य भाट्टप्राभाकरमतयोः समानं वैदुष्यमासीत्। स्वपितुर्वैदुष्ये निरतिशयं भावमाबिभर्ति। अस्योपनाम दादूभट् इति प्रसिद्धम्। अयं प्रतिभाशाली निर्भीको लेखकः। सप्तदशशताब्द्यां ये लेखका आसन् तेष्वयमुच्चं स्थानमारूढ आसीत्। मीमांसायामयं 'मीमांसाकुतूहलम्' (स्वतन्त्रमत्युत्तमञ्च) 'तन्त्रवार्तिकटीकां' भावार्थनाम्नीं 'शास्त्रदीपिका टीकामालोकनाम्नीं' 'तत्त्वकमलाकरं' इत्यादीननेकान् ग्रन्थान् प्रणिनाय। सर्वेऽप्यप्रकाशिताः। जैमिनिसूत्रव्याख्याप्यनेन रचितेति शृणुमः। धर्मशास्त्रे निर्णयसिन्धुरस्य वैदुष्यावद्योतकत्वेन प्रसिद्धः। क्वापि धर्मविचिकित्सायां जातायां निर्णयसिन्धोरेव पक्षः परिगृह्यतेऽधुनापि। अस्य ग्रन्थस्यान्ते सं० १६६८ सन् १६१२ इति उट्टङ्कितं दृश्यते। अतोऽयं सप्तदश शताब्द्यां उत्तरार्द्धे आसीदिति निर्णयः कर्तुं शक्यते।

अनन्तभट्टः

कमलाकरभट्टस्यैवात्मजोऽयमनन्तभट्टः। अयं स्वपितुः शास्त्रमालाग्रन्थास्य व्याख्यां रचितवान्। अस्याः नाम ज्योत्स्ना इति प्रथिता। जैमिनेः सूत्राणामपि

---

१. प्रणमन् गुरू नीलकण्ठभट्टं बुधनारायणदेववित्सहस्रम्।
वरजैमिनिशास्त्रपूर्वपक्षानपरानप्यनुवक्ति कारिकाभिः॥

२. तर्के दुस्तर्कमेधः फणिपतिभणितिः पाणिनीये प्रपञ्चे, न्याये प्रायः प्रगल्भप्रकटितपटिमा भट्टशास्त्रप्रघट्टे। प्रायः प्राभाकरीये पथि प्रथितदुरूहान्तवेदान्तसिन्धुः श्रौते साहित्यकाव्ये प्रचुरतरगतिः धर्मशास्त्रेषु यश्च'।

न्यायरहस्यनाम्ना व्याख्याऽनेन कृता। इयं व्याख्याऽतिसंक्षिप्ता मनोहरा च। अन्नम्भट्टः स्वयं स्वीकरोति यत् ज्योत्स्नाव्याख्यां समाप्य तां नीलकण्ठदीक्षिताय प्रदर्शितवानिति। अतोऽयमपि सप्तदशशताब्द्यामासीदिति सिद्धं भवति।

विश्वेश्वरोपनामकः गागाभट्टः

अयं विश्वेश्वर इति ख्यातोऽपि नाम्ना गागाभट्ट इति विख्यातोऽभूत्। रामकृष्ण भट्टस्य पौत्रः दिनकरभट्टस्य पुत्रश्चासीत्। पितुः लालनेनायं गागा नाम्ना आहूत आसीत्। तदिदं स्वयं लिखति—"गागाभट्ट इति प्रथां दिनकरात् प्राप्तः पितुर्लालनात्" इति। अतोऽनेनैव नाम्ना विख्यात आसीत्। अयं छत्रपतिमहाराजस्य गुरुरासीत्। यदा शिवाजी महाराजः १६७४ तमे ईसवीये वर्षे राजसिंहासनमध्यरोहत्, तदा धार्मिकक्रियाः सर्वा अपि अस्यैव तत्वावधाने सम्पन्ना अभूवन्। तदिदं गागाभट्टः स्वयं कथयति। श्रेष्ठोऽयं विद्वान् मीमांसासूत्राणामुपरि भाट्टचिन्तामणि नाम्ना ग्रन्थं रचयामास। यस्य ग्रन्थस्य तर्कपादान्तो भागः चौखम्भा-संस्कृत-ग्रन्थ मालायां प्रकाशितः। कुमारिलभट्टानुयायी अयं तदनुसारेण दार्शनिकपदार्थान् विवेचयन् सत्यवसरे प्रसङ्गेन न्यायस्य व्याकरणस्य च विषयान् स्पष्टीकरोति। अर्थापत्तिः ज्ञानप्रामाण्यं ईश्वरवादः, शक्तिवादः, सृष्टिप्रलयौ, अनुमानं, अभावः, विधिभेदाः, धात्वर्थः, आख्यातार्थः, लकारार्थः इत्यादिषु गभीरविषयेषु स्वीयां लेखनीं व्यापारयामास। एतावदस्य वैदुष्यस्य परिचयदाने पर्याप्तमिति मन्ये। मीमांसाशास्त्रे प्रविविक्षूणां बालकानां कृते विषयान् सरलान् उपपादयति। स्थाने स्थाने सोमेश्वरं मुरारिमिश्रं, उदयनाचार्यं, पक्षधरमिश्रञ्च स्मरति। स्वपितुः सिद्धान्तान् पूर्णरूपेणानुसरति। जैमिनिसूत्राणां कुसुमाञ्जलिनाम्ना वृत्तिरप्यनेन विरचिता दृश्यते। अयं ग्रन्थः अस्यानुसन्धानात्मक इति प्रतीयते। अत्र मतमतान्तराणां खण्डनमण्डनान्यपि दृश्यन्ते। शिवार्कोदय इति अस्य तृतीयो ग्रन्थः, यश्च छत्रपतिना शिवाजीमहोदयेनादिष्टो लिखितः। श्लोकवार्तिककारेण कुमारिलभट्टेन ये विषयाः अर्चिताः तेषां प्रकाशनाय ग्रन्थोऽयं प्रणीतः। तदिदं स्वयं लिखति—

यत्तर्कपादे बहुनाग्रहेण श्लोकैः कृतं वार्तिकमार्यवर्यैः।
गागाभिधेनाऽयमपूरि शेषः तस्याज्ञया-छत्रपतेः शिवस्य॥ इति

अयं ग्रन्थः अलवर-राजकीय-पाण्डुलिपिपुस्तकालये समुपलभ्यते। पाण्डुलिपि ग्रन्थस्यान्ते—

प्रारम्भि यत्न इह यः खलु कारिकाभिः,
रुद्धाप्रतिप्रतिमधाम विदूषणाय।

दुःखं सतां तदसामप्तिकृतं शिवेन,
छत्राधिपेन सुविचिन्त्य समापितः सः ॥ इति

शिवाजी सदृशस्य महाराजस्य राजसभायामस्य विदुष आदरः आश्रयश्च लब्ध इत्ययं विषयः सुमहद्गौरवाधायक इत्यत्र कोऽपि न संशयः। अत्रेयं कि वदन्ती श्रूयते–यदेनं पण्डितं साधारणजीविनं शिवाजी महोदयः विलोक्य विभव वैभवपूर्णं चकार। अतएव शिवाजी समकालीनोऽयं सप्तदशशताब्द्याः मध्यकाले सुप्रतिष्ठित आसीदिति ज्ञायते। मीमांसायामेवायं केवलं वैदुष्यं नावहति स्म, किन्तु शास्त्रान्तरेष्वपि वैदुष्यमेनं सुशोभयति स्म।

द्वितीय आपदेवः

अर्थसंग्रहप्रसङ्गे आपदेवविषये संक्षेपेण चर्चा कृता। अयं मीमांसान्याय प्रकाशप्रणेता। दक्षिणभारताभिजनोऽयं काश्यां निवसति स्म। अनन्तदेवस्य सुतः प्रथमापदेवस्य पौत्रः, धर्मसिन्धुप्रणेतुः एकनाथस्य प्रपौत्र इति प्रतीयते। किन्तु एवं परम्परायां प्रो० एर्टन महोदयो न विश्वसिति। सप्तदशशताब्द्याः पूर्वभागोऽस्य समय इति प्रमाणैर्निश्चेतुं शक्यते। मीमांसान्यायप्रकाशोऽस्य मीमांसादर्शने विद्यमानं सर्वतोमुखं वैदुष्यमवद्योतयति। सर्वेषु दर्शनेषु एकस्तादृशो ग्रन्थः प्रणीतो ग्रन्थकारैः यस्याध्ययनेन तत्तच्छास्त्रे प्रवेशस्सुगभो भवति। तथाविधोऽयं मीमांसाग्रन्थः। विनास्याध्ययनेन मीमांसायां प्रवेश एव दुष्करः। किञ्चिन्न्यूनसहस्रसंख्याकानां न्यायानां निरूपणेनाऽयं न्यायप्रकाशाध्येतॄन् तथाविधान् करोति, ये च मीमांसाया अर्धाधिकभागे व्युत्पत्तिं लभेरन्। अतएव सर्वेषु विद्यालयेषु विश्वविद्यालयेषु च मीमांसापाठ्यक्रमेऽस्य ग्रन्थस्य निवेशो दृश्यते। प्रौढ्या सरलया च भाषया सम्बद्धान् न्यायान् सञ्चारयन् स्वीयं सामर्थ्यं प्रदर्शयति। ग्रन्थस्य प्रौढिम्ना समाकृष्टा अनेके विद्वांसः ग्रन्थमेनं व्याचख्युः। ग्रन्थकर्तुंस्सुतेन द्वितीयानन्तदेवेन भाट्टालङ्कारनाम्ना व्याख्या कृता, कृष्णनाथन्यायपञ्चाननेन काचन व्याख्या, म० म० चिन्नस्वामिशास्त्रिभिस्सार विवेचनीति व्याख्याऽकारि। डा० एडगर्टन महोदयो ग्रन्थमेनमाङ्गलभाषयानूदितवान्। पं० पट्टाभिरामशास्त्रिभिरस्य हिन्दीभाषानुवादः लिखितः। उत्तमूरु वीरराघवाचार्यस्य काचन व्याख्या। आसु व्याख्यासु म० म० चिन्नस्वामिशास्त्रिणां व्याख्या सर्वोत्तमत्वेन परिगण्यते। आपदेवस्य नाम्ना 'अधिकरणचन्द्रिका' इति ग्रन्थान्तरमप्यस्ति।

आपदेवः महान् आस्तिकः गोविन्दस्य स्वपितुश्च महाभक्तः। स्वीये मङ्गलपद्ये 'अनन्तरूपिणं' इति विशेषणं प्रयुञ्जानः स्वपितरं गुरुं निर्दिशति। स्वपितरं गोविन्दाभिन्नं निर्दिशन् पितरि भक्त्यतिशयं प्रकटयति। डा० कीथ महोदयो

गोविन्दनामाऽस्य पितेति भ्रान्तः। भाट्टमतेऽस्य महती श्रद्धा। एवं भाट्टमतसम्पोषकेष्वयमग्रगण्य इति निर्द्धार्यते।

प्रथमोऽनन्तदेवः

द्वितीयापदेवस्य पिता विद्यागुरुश्चानन्तदेवः। अस्य स्वतन्त्रग्रन्थाभावेऽपि पण्डितसमाजे तात्कालिके मीमांसायां वेदान्ते चायं विख्यातनामाऽभवत्।

द्वितीयोऽनन्तदेवः—

द्वितीयापदेवस्यात्मजोऽयं स्वपितुर्न्यायप्रकाशव्याख्यातेति पूर्वमवोचम्। फलसाङ्कर्यखण्डनं स्मृतिकौस्तुभश्चेति ग्रन्थद्वयमस्य। स्मृतिकौस्तुभग्रन्थेनास्य विद्वत्समाजे महती प्रतिष्ठाऽभवत्। भाट्टालङ्कारव्याख्यां खण्डदेवाचार्योऽपि समालोचयति। अस्याश्रयदाता बाजबहादुरचन्द्रः, तदादेशेनैव स्मृतिकौस्तुभं प्रणिनायेति ज्ञायते। बाजबहादुरचन्द्रस्य शासनसमयः १६४५ ई० इति इतिहासमर्मज्ञैर्निर्णीतः। अतोऽयमपि सप्तदशशताब्दीकालिकः। सन्दिग्धधर्मशास्त्रविषये निर्णायकत्वेन स्मृतिकौस्तुभः परिगण्यते।

जीवदेवः—

अयं द्वितीयानन्तदेवस्य कनिष्ठभ्राता शिष्यश्चासीत्। अस्यापि सप्तदशशताब्द्या मध्यः कालः। 'भट्टभास्कर' निर्माताऽयम्। स्वीये ग्रन्थे कमलाकरभट्टं स्मरति, खण्डदेवाचार्योऽस्य मतं समालोचयति। एतद्विषय एतावदेवोपलभ्यते।

कौण्डदेवः—

द्वितीयानन्तदेवस्यान्तेवास्ययं वैयाकरणभूषणसारतर्कदीपिका-भाट्टमत प्रदीपिकेत्यादिग्रन्थनिर्माता वैयाकरणसमाजे सुप्रतिष्ठित आसीत्। अस्य पिता नाम्ना रङ्गोजी भट्टः, भट्टोजीदीक्षितश्चास्य पितृव्यः। मीमांसायां कृतपरिश्रमोऽप्ययं व्याकरणे लब्धप्रतिष्ठो विद्वत्समाज आदरभाजनमभूत्। वैयाकरणभूषणसारोऽस्य वैदुष्यप्रकाशकः। व्याकरणसम्बन्धिनस्सिद्धान्तान् सरलया शैल्या निरूपयन्नयं महतीं प्रतिष्ठामवाप। अस्मिन्नेव ग्रन्थे मीमांसासिद्धान्तान् पूर्वपक्षरूपेणोपस्थापयन् मीमांसादर्शनपारदृश्वानमात्मानमवद्योतयति। सप्तदशशतककालिक एवायमपि।

आचार्यः खण्डदेवः—

मीमांसादर्शननिकेतनस्य स्तम्भभूतोऽयम्। पण्डितश्रीजगन्नाथः स्वपितुः पेरुभट्टस्य मीमांसागुरुत्वेन खण्डदेवं निर्दिशति। 'देवादेवाध्यगीष्ट' इति रसगङ्गाधरनिर्देशं

नागेशभट्टः खण्डदेव इति व्याख्याति। पण्डितराजजगन्नाथस्य आश्रयदाता शाहजहाँ महाराजः तत्पुत्रः दाराशिकोहश्च। अनेनेदं ज्ञातुं शक्यते यत् खण्डदेवाचार्यः सप्तदशशताब्द्या मध्यकाले आसीदिति। खण्डदेवस्य नामान्तरं श्रीधरेन्द्र इति तत्साक्षात् शिष्यः शम्भुभट्टः भाट्टदीपिकाव्याख्यायां लिखति। अयं खण्डदेवाचार्यः काश्यां ब्रह्मनाले निवसति स्म। अन्तिमः समयोऽपि अत्रैवासीत्।

काश्यां श्रीब्रह्मनाले निरुपमसरितः खण्डदेवाभिधानः।
प्राप्तश्रीः ब्रह्मभावं विबुधवरगुरुर्ब्रह्मचर्यो यतीन्द्रः॥

इति पद्यानुसारेण सम्बत् १७७२ तथा १६६५ ईसवीयसमयः इतिहासमर्मज्ञैः परिगणितः। खण्डदेवः स्वीये ग्रन्थे द्वितीयमापदेवं द्वितीयमनन्तदेवं तथा जीवदेवञ्च उल्लिखति। अनेनाऽपि ज्ञायते सप्तदशशताब्द्यामयमासीदिति।

अस्य ग्रन्थाः शैली च

खण्डदेवः स्वीये काले महान् लेखक आसीत्। दक्षिणभारते एतन्निर्मित साहित्यस्य महानादरोऽभवत्। अस्य लेखः सरलातिसरलः गभीरतरविषयोपपादकः प्रौढतरविचारप्रतिपादकश्च आसीत्। मीमांसाविषये तत्रापि श्रौतकर्मकाण्डे चास्य व्यापकोऽधिकरोऽभूत्। भाट्टदीपिका, मीमांसाकौस्तुभः, भाट्टरहस्यञ्चेति त्रयो ग्रन्था अनेन प्रणीताः। भाट्टदीपिका द्वादशाध्यायान्ताऽधिकरणरूपेण विरचिता प्रकाशिता च। मीमांसाकौस्तुभः जैमिनिसूत्रव्याख्यानरूपः तृतीयाध्यायबल-बलाधिकरणान्तः प्रकाशितश्च। भाट्टरहस्यञ्च मीमांसासम्मतशाब्दबोधात्मको ग्रन्थः। त्रयाणामेतेषां ग्रन्थानां दक्षिणभारतेऽध्यनाध्यायनपरिपाट्यां उपादेयतमत्वं दृश्यते। भाट्टदीपिकाया एव नाम्ना **प्रभावली** शम्भुभट्टेन लिखिता। नाम्ना कल्पद्रुम इति भाट्टकल्पद्रुमः पण्डितश्रीरामसुब्बाशास्त्रिभिः व्याख्या लिखिता। तृतीया व्याख्या नाम्ना **चन्द्रोदयः** महमानीषिणा भास्कररायेण विरचिता। चतुर्थी व्याख्या भाट्टचिन्तामणिनाम्ना श्री वङ्केश्वरविरचिता समुपलभ्यते। इमे सर्वेपि व्याख्यातारः दक्षिणभारतीया इति हेतोः तस्मिन् प्रदेशे खण्डदेवसाहित्यस्य महान् प्रचार इति विज्ञायते। भाट्ट-रहस्ये नैयायिक-वैय्याकरणादिपक्षं निराकुर्वाणः मीमांसामतसिद्धशाब्दबोधप्रकारः खण्डदेवेन प्रदर्शितः। ग्रन्थस्याकारः अतिसङ्क्षिप्तोऽपि विषयोऽतिगभीरः। अनेन विचारेण तदीया शैली सम्यगवगता भवति। अयं महान् आस्तिकः देवताधिकरणे नवमाध्यायीये मीमांसकसम्मतदेवतास्वरूपमुल्लिखन्नन्ते लिखति, 'यदेवमपि वदतो मे वाणी दुष्यतीति हरिस्मरणमेव शरणमिति'। मीसांसाशास्त्रस्य परिष्कर्तृष्वयं प्रौढ आसीत्, श्रौत कर्मकाण्डविरुद्धं कस्यापि पक्षं नानुमन्यते। उपपादनावसरे अस्य तर्काः युक्तयश्च अखण्डनीया भवन्ति।

शम्भुभट्टः

अयं खण्डदेवस्य साक्षात् शिष्यः, अस्य पितुर्नाम बालकृष्णभट्ट इति। भाट्ट दीपिकायाः प्रभावलीनाम्ना व्याख्याऽनेन लिखिता। व्याख्यया साकं निर्णयसागर मुद्रणालये मुम्बानगर्यां निवीतान्तो भागः प्रकाशितः। अनन्तरं मद्रास वि० वि० द्वारा समग्रः प्रकाशितः। ग्रन्थस्यान्ते शम्भुभट्टः सम्वत् १७६४ (अर्थात्) १७६० इति समयं स्वयं लिखति। भाट्टदीपिकायाः बह्वीषु व्याख्यासु विद्यमानास्वपि तासु **प्रभावली** उत्कृष्टतमा परिगण्यते। शम्भुभट्टः स्वीयव्याख्यायां सोमनाथदीक्षितं निर्दिशति। शम्भुभट्टस्य कविमण्डन इति उपाधिरपि तत्र तत्रोपलभ्यते।

राजचूडामणिदीक्षितः

श्री श्रीनिवासदीक्षितस्य सुतः श्रीवेङ्कटेश्वरदीक्षितान्तेवासी यज्ञनारायणोप नामा। एतद्विषये किंवदन्तीयं वर्तते बाल्य एव जनन्या जनकेन च विहीनः अर्ध नारीश्वरदीक्षितस्य स्वभ्रातुर्लालनपोषणेऽवर्तत। जन्मतः षष्ठे वर्षे एव 'कमलिनी कलहंस' नाम्न्या नाटिकाया अयं रचयितेति। मीमांसादर्शनेऽयं ग्रन्थत्रयं प्रणीतवान्। वेङ्कटेश्वरगुरोराज्ञया प्रथमं जैमिनिसूत्राणां व्याख्यां तन्त्ररक्षामण्यभिधां कृतवान्। द्वितीयो ग्रन्थः शास्त्रदीपिकाव्याख्या नाम्ना कर्पूरवर्तिका। ऐतिहासिका अनुमिन्वन्ति यदस्य जैमिनिसङ्कर्षकाण्डस्यन्यायमुक्तावलिनाम्ना काचन व्याख्यास्तीति। किन्तु पाण्डुलिपिः क्वापि नोपलभ्यते।

श्रीवेङ्कटाध्वरी

सप्तदशशताब्दीलेखकेषु वेङ्कटाध्वर्यपि स्थानमावहति। रघुनाथदीक्षितस्य पुत्रः, माता चास्य सीताम्बा। अयं अप्पय्यदीक्षितकनिष्ठभ्रातुः श्री रङ्गराजाध्वरिणः पुत्रस्य नीलकण्ठदीक्षितस्य समकालिक आसीत्। विधित्रयपरित्राणम् मीमांसामकरन्द-श्चेति ग्रन्थद्वयस्य निर्माताऽयम्।

गोपालभट्टः द्वितीयः

कृष्णंभट्टस्य पौत्रः मङ्गनाथभट्टस्य पुत्रोऽयं गोपालभट्टः सप्तदशशताब्द्या-मेवासीत्। विधिभूषणम्' इति ग्रन्थस्यायं प्रणेता। भट्टपादीयविधिलक्षण विचारोऽत्र कृतः।

राघवेन्द्रयतिः

गोपालभट्टसमकालिक एवायं राघवेन्द्रः। पितृर्नाम तिम्मन्नभट्ट इति माता गोपाम्बानाम्नी। कनकाचलस्य पौत्रः कृष्णंभट्टस्य च प्रपौत्र इति इतिहा-साध्ययनेन ज्ञायते। भाट्टसंग्रहनाम्ना जैमिनिसूत्रव्याख्यानेन रचिता।

रामकृष्णदीक्षितः

सप्तदशशताब्द्यामेव रामकृष्णदीक्षितोऽपि प्रादुर्बभूव । जैमिनिसूत्राणां व्याख्या 'मीमांसान्यायदर्पणनाम्नाऽनेन रचिता । अयं वेदान्तपरिभाषानिर्मातुः धर्मराजाध्वरेन्द्रस्य प्रसिद्धलेखकस्य पौत्रः श्री वेङ्कटनाथस्य पुत्रश्चासीत् ।

सोमनाथदीक्षितः

ईसवीय सप्तदशशताब्द्या मध्यभागे एकोऽतिप्रौढो व्याख्याकारः सोमनाथ दीक्षितनाम्ना ख्यातो बभूव यश्च मिट्ठालकुले तद्गोत्रे वा समजायत । अयं च सूर भट्टस्य पुत्रः वेंकटगिरियज्वनश्च कनिष्ठो भ्राताऽऽसीत् । स्वस्य जेष्ठाद् भ्रातुरेवानेन सर्वविधा विद्याऽधीता । शास्त्रदीपिकायास्तर्कपादादन्यत्र भागे 'मयूखमालिका' नाम्नी व्याख्याऽनेनातिवितता लिखिता या च निर्णयसागर मुद्रणालयाद् बम्बईस्थात् प्रकाशिता बभूव । इयमेवैकाधिकृता प्रामाणिकी व्याख्याऽस्मिन् ग्रन्थेऽस्ति । अतएवेयं पठनपाठनविधौ बहुप्रचाराऽपि वर्तते । अस्य ग्रन्थस्य प्रारम्भेऽन्ते च सोमनाथ आत्मानं सर्वतोमुखयाजीति विशेषणेन विशिनष्टि । अनेनास्य कर्मकाण्डज्ञानविशेषः सूच्यते । टीकया चानया व्यापकं वैदुष्यं ज्ञाप्यते । व्याख्येयं शास्त्रदीपिकाविषयस्फुटीकरणे नितरां साफल्यमधिगतवती । यथाप्रसङ्गमत्र भवनाथ-वरदराजाप्पयदीक्षितादीनां विदुषामुल्लेखो व्याख्याकारेण कृतः । अतो व्याख्येयं तेभ्योऽर्वाचीनेत्यपि सिद्धयति । भाट्टदीपिकायाः व्याख्याकर्त्रा शम्भुभट्टेनास्या उल्लेखः स्वप्रभावल्यां कृतइति तत एषा प्राचीनेति निर्विवादम् । इत्थं पूर्वोक्तात्पूर्वोत्तरकालद्वयसूचकादुल्लेख-द्वयाज्ज्ञायते—अस्य कालोऽप्पय्यदीक्षितशम्भुभट्टयोर्मध्यवर्तीति । अतस्सप्तदशशताब्दी मध्यमो भागोऽस्य काल इति निश्चेतुं शक्यते । यदीयं व्याख्या नाभविष्यत् तर्हि शास्त्रदीपिकानिष्ठगम्भीरविषयो महता काठिन्येनैवावगतोऽभविष्यत् ।

यज्ञनारायणदीक्षितः

अयं यज्ञेशस्य सर्वतोऽम्बिकाया वा पौत्रः तिरुमलयज्वनः प्रपौत्रः कोदण्ड-भट्टार्कस्याथवा भट्टोपाध्यायस्य तथा गङ्गाम्बिकायाः पुत्र आसीत् । अस्य ज्येष्ठ भ्रातुर्नाम तिरुमलयज्वा एवासीत् । अयं ऋक्शाखाध्यायी गोत्रेण काश्यपश्चासीत् । तर्कपादस्यातिरिक्तांशेऽनेन प्रभामण्डल नाम्नी व्याख्याऽलेखि या हि स्तुत्या स्वच्छा, किन्त्वप्रकाशिता चास्ति । अस्यापि समयः ख्रिष्टस्य सप्तदश शताब्द्या मध्यमो भाग एव ।

गदाधरभट्टाचार्यः

अयं बङ्गनिवासी । मीमांसाग्रन्थलेखेन नायं तथा प्रतिष्ठामुपार्जयत् यथा न्यायग्रन्थानां लेखेन । अस्य व्युत्पत्तिवाद उच्चतमो ग्रन्थः । एतस्मादतिरि-

क्तान्यनेकान् ग्रन्थान् न्यायदर्शनविषयकानसौ लिलेख। चिरं लेखका अस्य शैली-मनुकृत्य स्वग्रन्थान् रचितवन्तः। अयं हि नितरामप्रतिमप्रतिभः सर्वतोमुखबुद्धिविभवो: बुध आसीत्। अयं च जीवाचार्यस्य पुत्रो नवद्वीपस्य हरिरामतर्कवागीशस्य शिष्यः जगदीशभट्टाचार्यस्य कनिष्ठो भ्राता तत्तुल्यकालो विद्वानासीत्। जगदीशभट्टाचार्य समकालत्वादस्य कालः सप्तदशशताब्द्या मध्यमो भागः सिद्धयति। मोमांसा माश्रित्यानेन "विधिस्वरूपविचारः" इति ग्रन्थो लिखितः। स च कलकत्ता बड़ौदा नगराभ्यां प्राकाश्यं नीत इति।

वैद्यनाथतत्सत्

तत्सत् कुले अनेके प्रसिद्धा विद्वांसो बभूवुः। अयं तस्यैव पदवाक्यप्रमाणपारा-वारीणस्य रामभट्टस्य रामचन्द्रसूरिणो वा पुत्रः। मोमांसादर्शनस्य तत्रापि विशेषतो भट्टमतस्यायं प्रौढो विद्वानासीत्। शास्त्रदीपिकाया अनेन प्रभानाम्नो व्याख्या लिखिता। इयं व्याख्या यथा सरलार्था प्रसादगुणसम्पन्ना तथैव विषयप्रतिपादन विधौ सफला चास्ति। अस्याः प्रकाशनं शास्त्रदीपिकामूलग्रन्थेन सहाचार्य पट्टाभिरामशास्त्री स्वस्मिन्नाहितसम्पादकत्वभारः प्रथमभागस्याकरोत्। जयपुरस्थराज-पूतानाविश्वविद्यालयस्य प्रकाशनविभागश्चास्य प्रकाशकः। साम्प्रतमस्य टीका सहितस्य समग्रस्य प्रकाशनं मूलग्रन्थेन सह श्रीलालबहादुरशास्त्रि-केन्द्रिय सं० विद्यापीठेन दिल्लीस्थेन सम्पादितम्। सम्पादकाश्चास्य मीमांसारहस्यज्ञाः श्रीपट्टाभिरामशास्त्रिणः। सम्पादकाः प्रकाशकाश्चास्य सम्पादनप्रकाशनाभ्यां संस्कृतजगत् विशेषतो मीमांसादर्शनजगन्महदुपाकार्षुः।

जैमिनोयसूत्राण्यधिकृत्यानेनाधिकरणक्रमेण 'न्यायबिन्दु' नाम्नी व्याख्या कृता यस्याः प्रकाशनं वाराणसेय-संस्कृत-कालेज-प्राध्यापकस्य मदनमोहनपाठकस्य टिप्पण्या सह बम्बईस्थाद् गुजरातीमुद्रणालयाद् अभवत्। अयं साहित्यस्यापि प्रौढो विद्वानभूत्। कुवलयानन्दस्यालंकारचन्द्रिकाकाव्यप्रदीपस्योदाहरणचन्द्रिका टीका चास्य तद्विषयकं वैदुष्यं प्रकटयति। उदाहरणचन्द्रिकायाः समयः १७४० तमो वैक्रमः सम्वत्सरः यश्च ईसवीय १६४३ वत्सर इति तत्र लिखितोऽस्ति। तेन वैद्यनाथस्यास्य समयः ख्रिष्टस्य सप्तदशशताब्द्या उत्तरार्धः सिद्धयति। अस्य विषयेऽधिकं जिज्ञासुभिः प्रभासहितायाः शास्त्रदीपिकाया भूमिका द्रष्टव्येति।

मुरारिमिश्रः (तृतीयः)

अयं खण्डदेवेनातितरां प्रभावितो वर्तते। मीमांसायामङ्गत्वनिरुक्तिनामकोऽस्य प्रसिद्धो ग्रन्थः। अस्य प्रकाशनमानन्दाश्रमसंस्कृतग्रन्थमालायाः पूनास्थायाः सम्पन्नमेव।

अत्र यज्ञस्य विविधानामङ्गानां तथा तेषां फलानां च वर्णनमस्ति। स्वकीये ग्रन्थेऽसौ तन्त्ररत्न-शास्त्रदीपिका-विधिरसायन-भाट्टदीपिकानां तथा खण्डदेवस्य मीमांसा-कौस्तुभस्योल्लेखं करोति। अनेकेषु प्रखण्डेषु तु खण्डदेवस्य साक्षादनुसरणमप्यनेन कृतम्। अतः पूर्वोक्तग्रन्थकृद्भ्यः सर्वेभ्योऽर्वाचीनत्वादस्य कालः सप्तदशशताब्द्याश्चरमौ भागोऽष्टादशशताब्द्या आदिमो वा चरणो मन्तव्यः। एतत्सम्बद्धाधिकज्ञानेच्छुकैः लाहोरनगरे सम्पन्ने प्राच्यविद्यासम्मेलने पठितः डा० उमेशमिश्रस्य लेखो द्रष्टव्यः।

भास्कररायः

भासुरानन्दनाथ इत्युपनामकोऽय गम्भीररायस्य कोणाम्बिकायाश्च द्वितीयः पुत्र आसीत्। काश्यां श्रीनृसिंहयाज्यस्य गुरुरभवत्। अयं संस्कृतवाङ्मयस्य विविधा-नामङ्गानां प्रौढो विद्वान् श्रीविद्याया उपासकश्चासीत्। मीमांसादर्शनेतरस्मिन् तन्त्र शास्त्रेऽप्यनेनानेके ग्रन्था लिखिताः। तन्त्रशास्त्रीया अस्य ग्रन्था विषयनिष्ठं पूर्णाधिकारं प्रकटयन्ति। अनेन नित्याषोडशिकार्णवतन्त्रस्य सेतुबन्धनाम्नी व्याख्या कृता यस्या लेखनकालः १७८९ तमो वैक्रमसम्वत्सरः अथवा १७३२ तमः खिष्टाब्दः इति तत्राङ्कितोऽस्ति।

पूनास्थानन्दाश्रम-संस्कृत (सीरीज) ग्रन्थमालातः अस्य प्रकाशनमपि सम्पन्नम्। द्वितीया व्याख्या सौभाग्यभास्करनाम्नी तन्त्रपरिका ललितासहस्रनामान्यधि-कृत्य कृताऽस्ति या च काश्यां १७८५ तमे वैक्रमेऽथवा १७२८ तमे खिष्टीये सम्वत्सरे लिखिता। अस्मिन् टीकाद्वये लिखितेन कालेनास्य कालः अष्टादश शताब्द्याः प्रारम्भः सिद्धो भवति। मीमांसादर्शनमधिकृत्यास्य ग्रन्थत्रयमुपलभ्यते—वादकुतूहलम् तत्र प्रथमो ग्रन्थः। अत्र हि मत्वर्थलक्षणाविषयको विचारः प्राप्यते। तथा सोमेन यजेत इत्यादिविधिवाक्येषु तत्संगमनं विहितमुपलभ्यते। द्वितीयो ग्रन्थः चन्द्रिका। अत्र जैमिनीयसंकर्षकाण्डस्य चत्वारोऽध्याया विवेचनविषयीकृताः सन्ति। अस्य च प्रकाशनं काश्याः 'पण्डितन्यू सिरीज" इत्याख्यग्रन्थमालायाः चतुर्दशे पञ्चदशे च भागे सम्पन्नमेव। तृतीयो ग्रन्थः खण्डदेवकृतभाट्टदीपिकायाश्चन्द्रोदय नाम्नी व्याख्याऽस्ति। इमे सर्वे ग्रन्था लेखकस्य तत्र तत्र विषये पूर्णाधिकारं द्योतयन्ति।

वासुदेवदीक्षितः

अस्य पिता महादेवो वाजपेयी माता चान्नपूर्णास्ताम्। खिष्टस्य १७११–३५ तमे सम्वत्सरे विद्यमानतञ्जोरस्थमहाराष्ट्रीयनृपयोः सरभोजी तुकोजी भोसले इति नामधेययोर्मन्त्रिण आनन्दरायस्यायमध्वर्युरासीत्। एतेनास्य कालः सारल्येनैवाष्टा-दश शताब्द्याः पूर्वार्धो निश्चितो भवति। जैमिनीयसूत्राण्यधिकृत्यानेनाध्वरमीमांसा-कुतूहलवृत्तिरिति नाम्नी वितता व्याख्याऽकारि। अस्याः कतिपये भागा महामहोपाध्याय

कुप्पुस्वामिशास्त्रिणां सम्पादकत्वे मद्रासवाणी विलासमुद्रणालयात् प्राकाश्यं गताः। ग्रन्थोऽयं पठनीयः सर्वेषां मीमांसादर्शनस्य वैशिष्ट्यज्ञानेच्छुकानां विदुषामपि। अयं व्याकरणशास्त्रस्यापि ख्यातनामा गम्भीरो विद्वानासीत्। भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुद्या बालमनोरमाव्याख्यास्य महती कृतिः या सरला वितता विषयावबोधनपटीयसी वर्तते। अनया सिद्धान्तकौमुदीविषयः यथा स्फुटो भवति न तथान्यया टीकया। अतएवेयं रामबाणवत् परमसफला मन्यते। कुतूहलवृत्तिश्च भाग चतुष्टयेन श्रीलालबहादुरशास्त्रि केन्द्रियविद्यापीठेन प्रकाशिता।

वैद्यनाथः पायगुण्डे

अयं बालम्भट्टनाम्ना प्रसिद्धः। अयं च महादेव भट्टस्य वेण्याश्च पुत्रः। व्याकरणसाहित्ययोः प्रख्यातो विद्वान् महावैयाकरणस्य नागेशभट्टस्य च प्रमुखः शिष्यः। अनेन व्याकरणे साहित्ये चानेके प्रामाणिका ग्रन्था लिखिताः। अप्पय्यदीक्षितस्य कुवलयानन्दमलंकारशास्त्रमधिकृत्यानेनैका व्याख्यालंकारचन्द्रिका नाम्नी लिखिता। मीमांसाविषयकोऽस्य ग्रन्थः 'पिष्टपशुनिर्णयः' वर्तते। अस्य गुरुं नागेशभट्टं विद्वत्प्रियोऽथ च स्वयं विद्वान् जयपुरमहाराजो जयसिंहः ससम्मानमामन्त्रयाञ्चकार। एतां घटनां प्रमाणीकृत्यास्य कालोऽष्टादश शताब्द्या मध्यभाग इति निश्चेतुं शक्यते।

रामानुजाचार्यः

एषोऽपि अष्टादशशताब्द्या मध्यमे भागे मीमांसायाः प्रणालीद्वयस्यैको विख्यातो विद्वानभवत्। मीमांसाया द्वे अपि प्रणाल्यावधिकृत्यानेन ग्रन्था विरचिताः। प्रमाण-प्रमेययोरुभयोः पक्षयोः सुष्ठु शास्त्रीयविवेचनविधायकोऽस्य 'तन्त्ररहस्य' नामा ग्रन्थः प्राभाकरपद्धतिमनुसरति। अस्य च प्रकाशनं वटोदर (बड़ौदास्थगायकवाड़ संस्कृत (सीरीज) ग्रन्थमालातोऽभूत्। भाट्टपरम्परामाश्रित्यानेन पार्थसारथिमिश्रस्य न्यायरत्नमालाख्यस्य प्रसिद्धस्य ग्रन्थस्य 'नायकरत्ननाम्नी' व्याख्या लिखिता। न्यायरत्नमालाग्रन्थस्यैकैवेयं व्याख्योपलभ्यते। एषा ग्रन्थस्य रहस्यावबोधनविधौ पाठकेभ्योऽतिरामुपकरोति। अस्य निवासस्थानं गोदावरीतटमासीत्। अनेन स्वीयरचनासु खण्डदेबो नाम्नोद्धृतः। अतोऽस्य कालः सारल्येन निर्णेतुं शक्यते। नायकरत्नस्य प्रकाशनं मूलग्रन्थेन सह बड़ौदातः श्रीरामस्वामिशास्त्रिणः सम्पादकत्वे समपद्यत। अस्य विषये सविशेषं ज्ञातुकामेन श्रीरामस्वामिशास्त्रिलिखितं प्राक्कथनम् द्रष्टव्यम्।

नारायणतीर्थः

असौ पूर्वोत्तरोभयमीमांसादर्शनयोः ख्यातनामा विद्वानभवत्। प्रथममयं गृहस्थः पश्चाच्च सन्यासमङ्गीचकार। अस्य गृहस्थाश्रमे गोविन्द स्वामीति नामासीत्।

शिवरामतीर्थादयं दीक्षामवाप। तेनैव च दीक्षागुरुणास्य नाम नारायणतीर्थ इति चक्रे। मीमांसां वेदान्तञ्चाश्रित्यानेन ग्रन्थाः प्रणीताः। मीमांसायां 'भाट्टपरिभाषा' नामा ग्रन्थोऽनेन भट्टसिद्धान्तप्रवेशाय लिखितः प्रकाशितश्चायं ग्रन्थः गायकवाड़ संस्कृत (सीरीज) ग्रन्थमालातो बड़ोदा नगरस्थायाः। भट्टभाषाभाष्यप्रकाशोदाहरणैरयं काशीनिवासिनो नीलकण्ठसूरिणस्तनय आसीदित्यपि[१] ज्ञायते।

अस्यैव ग्रन्थस्यान्ते स स्वकीय सन्यास दीक्षा ग्रहणमपि प्रमाणयति।[२] एष च स्वकाले ख्यातनामा प्रतिभावान् विद्वानासीत्। अत एव ब्रह्मानन्दसदृशो विद्वान् स्वकीयायां लघुचन्द्रिकायां रचनायामिमं सादरं नाम्नोद्धरति। भाट्टपरिभाषायां जैमिनीयानां द्वादशनांमध्यायानां सारांशः संकलितो वर्तते। अयं ग्रन्थस्तेन संन्यास ग्रहणात्प्राग् लिखितः। अतएव चास्य नाम गोविन्द इति उपलभ्यते। प्रायोऽस्य वैदान्तगुरुः वासुदेवदीक्षित[३] आसीत्। एतत्तेन स्वकीय वेदान्तग्रन्थ मधुसूदनसरस्वती रचितसिद्धान्तबिन्दुव्याख्यात्मके लिखितम्। अयं मधुसुदनसरस्वतीनाम्ना ख्यातो विद्वान् सप्तदशशताब्दयामभवत्। एतेनाधारेणास्य कालः अष्टादशशताब्द्याः प्रारम्भो भाग इति वक्तुं शक्यते।

ब्रह्मानन्दसरस्वती

अयं स्वकीयायां सिद्धान्तबिन्दुव्याख्यायामद्वैतसिद्धिव्याख्यायाञ्चादावात्मानं[४] नारायणतीर्थस्य शिष्य लिखति[५]। अस्य च द्वितीयो गुरुः परमानन्दसरस्वती आसीत्। न्यायरत्नावलि-लघुचन्द्रिकोभयग्रन्थयोरुल्लेखेनास्य स्वयं कृतेनैतज् ज्ञायते स्वगुरुरिवायमपि मीमांसावेदान्तदर्शनयोः लब्धख्यातिर्विद्वानासीत्। संन्यास ग्रहणात् प्रागयं गौडो ब्राह्मण आसीदिति प्रतीयते। वेदान्तमधिकृत्यानेनानेके ग्रन्था लिखितास्तेषु अद्वैतसिद्धेर्व्याख्या लघुचन्द्रिका मधुसूदमसरस्वतीकृतसिद्धान्त बिन्दोश्च व्याख्या न्यायरत्नावलिरतितमां प्रसिद्धे स्तः। जैमिनीयसूत्राणां मीमांसा-चन्द्रिकानाम्नी व्याख्याप्यस्य वर्तते। स्वगुरोरिवायमपि भाट्टसम्प्रदायानुयायी तथा शङ्कराचार्यस्य व्यवहारे भट्टनय इति सिद्धान्तस्य भक्तश्चासीत्। एष

१. इति नीलकण्ठ सूरिसूनु गोविन्द विरचिते भाट्टभाषा प्रकाशे प्रथमोध्यायः—पृ० १३

२. भगवच्छिवरामतीर्थशिष्यो मुनिनारायणतीर्थनामधेयः। व्यतनोदधिकाशि भाट्भाषा ग्रथं भाट्टनयप्रकाशहेतोः पृ० ?

३. श्रीनारायणतीर्थानां षट्शास्त्रोपारमीयुषाम्। पृ० ?
वासुदेवतीर्थविद्यशिष्य श्री नारायणतीर्थविरचिता सिद्धान्तलघुव्याख्या। पृ० ?

४. श्री नारायणतीर्थानां गुरूणां चरणाम्बुज। पृ० ?
श्री नारायणतीर्थानां गुरूणां चरणस्मृतिः। पृ० ?

५. भजे परमानन्दसरस्वत्यङ्घ्रिपङ्कजम्॥ पृ० ?

चाष्टादशशताब्द्याः पूर्वभागे विद्यमान आसीत् ।

राधवानन्दसरस्वती

राघवेन्द्रसरस्वतीनाम्ना प्राप्तप्रसिद्धिरयं विख्यातः सन्यासी अभूत् । जैमिनीय सूत्राणां व्याख्यासु मीमांसासूत्रदीधितिः न्यायलीलावती वा ग्रन्थः मीमांसानिकाये नितरां प्रसिद्धा । अस्य द्वितीया रचना मीमांसास्तवकोऽपि सुतरां स्तुत्यः : अस्यापि कालः अष्टादशशताब्दी वर्तते ।

बालकृष्णानन्दः

श्री राघवेन्द्रसरस्वतीशिष्योऽयं बालकृष्णेन्द्रसरस्वतीनाम्ना विख्यातः । मीमांसा-दर्शनमधिकृत्यैतेन न्यायामोदनामा ग्रन्थोऽलेखि । अस्य विवरणं तञ्जोरपुस्तकालय उपलभ्यते । अयमप्यष्टाशशताब्द्यां विद्यमान आसीदिति ।

उत्तमश्लोकतीर्थः

अनेन कुमारिलभट्टस्य लघुवार्तिके लघुन्यायसुधा व्याख्यालेखीति श्रूयते । प्राय इयं व्याख्या टुप्टीकारूपिणीति सभाव्यते । अस्य ग्रन्थस्य यत्र तत्रोल्लेखमात्रं प्राप्यते मूलग्रन्थश्चाधुनापि नोपलभ्यते । यथा किलास्यैकस्मिन् पद्ये उल्लेखो वर्तते तेन ज्ञायतेऽयं शताब्द्यामष्टादश्यां काशोमधिवसति[१] स्म ।

कृष्णयज्वा

मीमांसापरिभाषानामकमतिसंक्षिप्तं सरलं च पुस्तकमस्य विख्यातिहेतुः । मीमांसाया लघुतममिदं पुस्तकं वर्तते । अत्र च मीमांसादर्शनस्य मुख्यो-मुख्यो विषयः संकलितो वर्तते । मीमांसायाः साधारणज्ञानमवाप्तुं विद्यार्थिभिरिदं पुस्तक मधीयते । अत एवास्यानेकानि संस्करणानि निःसृतानि । कलकत्तातोऽस्य स्मृतितीर्थकृत टिप्पण्या सह मुद्रणं संजातम् । काशीतोऽप्यस्य संस्करणानि प्रकाशितानि । इदं चातितरामुपयोगितां बिभर्ति । एतावन्मात्रमेवास्य लेखकस्य विषये विदितमस्ति ।

रामेश्वरः

रामेश्वरस्य विषयेऽनेकानि मतानि समालोचकानां समवाये प्रचलितानि सन्ति । एको रामेश्वरः अर्थसंग्रहस्य लौगाक्षिभास्कर व्याख्यायाः कर्ता बभूव । अन्यश्च मीमांसासूत्राण्याश्रित्य विहारवापी नाम्नीं वृत्ति लिलेख अन्यश्च सुबोधिनी नाम्नीम् । कतिपये विद्वांसो डा० उमेशमिश्रादयस्त्रयाणां रामेश्वराणामैक्यं साधयितुं प्रायतिषत । रमेश्वरस्य पिता सुब्रह्मण्यो काशीनिवासीति प्रसिद्धम् । सुबोधिन्याः लेखकोऽपि

काशीनिवासी क्षितिकण्ठनामा विद्वान् । अयमेव यदा सन्यासं गृहीतवान् तदा नाम्ना रामेश्वरो बभूव। सुबोधिन्याः प्रकाशनं काश्यामभूत् । अयं रामेश्वरः भूतपूर्वक्षिति-कण्ठनामा दण्डी सन्यासी आसीत् । वाराणसेयो गोविन्द दासः स्वर्गीयो लिखति—"अयमेव सन्यासी अर्थसंग्रहटीकाया अपि लेखको यो हि ममोद्यानस्य पृष्ठभागस्थिते एकस्मिन् मठे न्यवात्सीत् यत्र च मम गुरुः श्री हरिशास्त्री स्वजीवनस्यान्तिमं समयं व्यतियन्नुवास । क्षितिकण्ठस्तस्य पूर्वाश्रमवर्तिनो नामासीत् रामेश्वर इति च सन्यासाश्रमस्येति । अयं लेखस्त्रयाणाममेदबुद्धिं द्रढयति ।

रामेश्वरेण "विहारवापी" माधवसर्वज्ञस्य मोमांसाज्ञानस्य प्रस्तावनारूपेण कृता यथा किल तेन वाप्याः प्रारम्भेऽलेखि[१] । तस्य च ग्रन्थपुष्पिकया ज्ञायते—अर्थ-संग्रहस्य व्याख्याने कौमुद्या रचना तेन जनहिताय कृतेति [२] ।

अयं गोपालेन्द्रसरस्वतीनाम्नो विदुषः शिष्यस्य सदाशिवेन्द्रसरस्वतीति नामधेयस्य शिष्यः। सुबोधिन्या रचना १७६१ तमे शाकसम्वत्सरे (१८३६ तमे ख्रिष्टाब्दे) समजायत । अत्र प्रमाणं ग्रन्थस्यान्तिमं पद्यमेव[३] ।

दशमाध्यायस्यान्तिमे पद्ये च स लिखति —पुस्तकमिद १७५८ तमे शताब्दे (१८३६ तमे) समाप्तिं गतमिति [४] ।

एवमेव दशमाध्यायस्यान्ते लिखितमेकं पद्यमपि तमेव कालं पुनः प्रमाण-यति । अयमेव कालो विहारवापिकाया वर्तते । उपर्युक्तं विवरणसाम्यं विहारवापी-सुबोधिनी-कौमुदीति त्रयाणामपि ग्रन्थानां लेखकः एक एवेति प्रतिपादनायालम् ।

---

१. श्रीमाधवः सर्वज्ञो मीमांसाब्धिं सरश्चकारालम्
तत्राक्षमा विहारे वाप्यामस्यां विहृत्य दृढयत्नाः ।।
पश्चात्सागरविहरणशीला लोके भवन्तु निश्शङ्कम् ।
एवं जातमतिः काश्यां श्रीगुरोः कृपया मुदा ।
रामेश्वरः प्रयत्नेन वापीं रचितुमारभे ।।

२. या काशी निखिल गुरोर्महेश्वरस्य प्राणान्ते सकलशिवप्रदा प्रसिद्धा ।
तत्राहं सकलसुरेशलब्धतत्त्वस्तत्रेयं सुजनहितप्रदा निबद्धा ।।

३. क्ष्मर्त्वद्रिक्ष्मामिते शालिवाहनशाकेऽविमुक्तके ।
सहस्यसितपक्षेऽथ द्वितीयायां रवौ निशि ।।

४. नन्दबाणादि भूशाके शुच्यां भूते सिते रवौ ।
रचितो ग्रन्थसन्दर्भो विश्वेशचरणेऽर्पितः ।।

सुबोधिनी नितरां सरला कमनीया च रचना स्वीयं नाम सार्थयति। अस्या अन्तिमं पद्यं प्रमाणयति-पितुरेवाधीतमनेन सर्वशास्त्रमिति।[१]

केचित्तु त्रयो रामेश्वरा भिन्ना इति स्वपक्षं साधयितुं इमान् तर्कान् प्रस्तुवन्ति-(१) यदीमेऽभिन्नाः स्युः तदा एकमेव विषयमधिकृत्य कथङ्कारं सुबोधिनी-विहारवापीतिटीकाद्वयं कुर्युः? (२) अथचार्थसंग्रहस्य व्याख्याता स्वगुरोर्नाम सुरेश इति लिखति सुबोधिनीकारस्तु स्वपितरमेव गुरुमाम्नाति। एतद्वाक्यानुसारेण तु तस्य गुरुणा सुब्रह्मण्येन भाव्यम्। अतः एकस्मिन्नेव काले अर्थात् एकोनविंशतितमशताब्द्यां वर्तमाना इमे त्रयोऽपि रामेश्वरास्तिस्त्र रचनाः कृतवन्तः। इमे त्रयश्च विभिन्नव्यक्तयः इत्येव संभाव्यत इति।

वस्तुतस्तु पूर्वोक्तैस्तर्कैरतिनिर्बलत्वात्साधारणैर्न त्रयाणामेकत्वं खण्डयितुं शक्यते न वा मण्डयितुम्। एतस्मिन् विषये शोधनिपुणैरितिहासमर्मज्ञैरिदानीं बहु गवेषणीयमस्ति तेषां तर्कपूर्णं सम्मतिं विना विनिगमनाभाव एव वर्तते इदमित्त्थमिदमित्थं नेति कथने।

पप्पूरवंशः

पूर्वोक्तैर्लेखकैर्यथा मीमांसासम्प्रदायः संवर्धितस्तथानेके वंशाः अनेकपुरुषानूकं सम्प्रदायोऽयं पोषितः। ये लेखका अत्र मया व्यक्तिगतपरिचयेन सहोपरि चर्चिताः तेष्वपि बहव एतादृशाः सन्ति येषां वंशपरम्परया पारम्परीणविद्यारूपत्वादियं मीमांसा स्वाध्यायविषयीकृता स्वग्रन्थरचनया च संपोषिता साधु समेधिता च। एवंभूतेषु कुलेषु भट्टानां ठक्कुराणां च कुलानि विशेषतो महनीयानि। व्यापकदृष्ट्या विचार्यते-चेदिदमपि ज्ञातं भवति यत् मिश्राणां दीक्षितानां च वंशा अपि परम्परामिमां नाल्पमसेवन्त। यद्यपि मिश्रदीक्षितसेवा नानेकपूरुषपर्यन्तिका तथापि बहुभिः मिश्रैर्दीक्षितैश्चेयं विद्या महता प्रयत्नेन कृतबहुमूल्यग्रन्थरचनैर्यथा संसेविता यथा चास्या विचारः प्रवर्धितस्तथेयं तेषां समुपकारं स्वीकुर्यादेव। मिश्राणां तु प्रायः संस्कृत-साहित्यस्य प्रत्येकस्मिन्नङ्गे एकाधिपत्यमिव विलोक्यते। एतस्य सविस्तरं विश्लेषणं चिरकालसाध्यम्। अतः संक्षिप्यैतावदेव कथनं पर्याप्तं मत्वा कथ्यते—दर्शनमिदं पल्लवितं पुष्पितं फलितं च विधातुं न केवला व्यक्तयोऽपि तु अनेके वंशा अपि स्वकीयं सर्वस्वं समर्पितवन्त इति। अनेन दृष्टिपातेन वयं सारल्येन तत्र काले व्याप्तस्य मीमांसादर्शनस्य महत्त्वमनुमातुं शक्नुमः। एवंविधेषु भाग्यशालिषु मीमांसारसिकसेवकवंशेषु पप्पूर भट्टवंशस्यापि महत्वपूर्णमेकं स्थानं वर्तते।

---

१. गुरूत्वंच पितृत्वञ्च यत्रैकत्र स्थितं मम।

परमेश्वरः द्वितीयः

अयं वंशः केरलेषु बभूव। इदानीं तु प्रायोऽनेन वंशेन संस्कृतसाहित्यस्य विद्यार्थी सुपरिचितोऽवर्तत। अस्य वंशस्यानेकेषां लेखकानां रचना अधुना तु प्रायो मुद्रिताः प्रकाशिताः सन्ति। अस्यैव वंशस्य प्ररोहेण परमेश्वरेण कृते मण्डनमिश्रीयस्फोटसिद्धे र्वाचस्पतिमिश्रीयतत्त्वबिन्दोर्व्याख्ये गोपालिकेति तत्त्वविभावनेति नाम्ना मद्रपुरीय अन्नामलै विश्वविद्यालयस्य च संस्कृत सीरीजेति ग्रन्थमालातः प्रकाशिते बभूवतुः। एताभ्यां व्याख्याभ्यामितरे अपि द्वे टीके अनेन मण्डनमिश्रस्य विभ्रमविवेकं तथा चिदानन्दपण्डितस्य नीतितत्वाविर्भावं ग्रन्थमधिकृत्य लिखिते। अयं परमेश्वरऋषेः पितुर्गोपालिकाया मातुश्च पुत्र आसीत्।

परमेश्वरः प्रथमः

अस्यापि प्रपितुः (पितामहस्य) नामापि परमेश्वर इत्येवासीत् यश्च गौर्याः ऋषेश्च मातापितृभ्यामजायत। अनेन मीमांसासूत्राणां व्याख्या कृता। सुचरितमिश्रस्य काशिकामाश्रित्य च व्याख्याग्रन्थोऽकारि। अस्य वंशस्य षट्सन्तानपरम्परया मीमांसादर्शनस्य महती सेवा चक्रे। यद्यप्येषु बहुभिर्मीमांसामाश्रित्य ग्रत्थो नालेखि तथापि शास्त्रीयवैदुष्यदृष्ट्या ते महाविद्वांस आसन् नात्र कश्चन संदेहः। अनेन परमेश्वरेण मीमांसातिरिक्तग्रन्थस्य मेघदूतस्य सुमनोरमणी नाम्नी टीकाऽलेखि, यस्या उल्लेखः अडियार पुस्तकालयस्य १९४४ तम वर्षस्य फरवरी मासीय प्रचारप्रसारपत्रे (बुलेटिने) दृष्टिगतो भवति। मीमांसाया विशेषतो मण्डनमिश्रसिद्धान्तानां त्वेष नितरामधिकृत विद्वानासीत्। अस्य वंशस्य प्रत्येकं वंशजोऽत्र पैत्रिकावदाने स्वाभिमानं बिभर्ति स्म। अतएव परमेश्वरो द्वितीयः स्वपरिचयं ददानोऽलिखत्—

मण्डनाचार्यकृतयो येष्वतिस्ठन्त कृत्स्नशः
तद्वंश्येन मया…… … ……इत्यादि।

समालोचकाः विशेषतो डा० श्री कुञ्जनराजा चकोरसंदेशकाव्यम् येनास्य वंशस्य परिचयः सविशेषं प्राकाश्यमेति, अस्यैव वंशस्य कस्यापि विदुषो रचनां साधयामासुः।

निवासस्थानं नामकरणञ्च

प्रथमं पप्पूर भट्टानामेषां निवासस्थानं जन्मस्थानमेवासीत्। तच्च कालीकटादुत्तरेण ततो नातिदूरं तिरुवेलंगाद आसीत् ततश्च पश्चात्ते स्यवर्तमाननिवासस्थान-

मागताः। त्रिचूरादुत्तरतो विद्यमानम् उरगम् इत्याख्यस्य पत्तनस्य वलयनाम्ना विख्यातं मन्दिरं तिरुलंगादनामदेव्यै समर्पितमस्ति। तच्च कालीकट् निकटे वर्तते। तत आगत्यैव सम्भवतः पप्पूरभट्टः ततो दक्षिणतः स्वीयनिवासस्थानं कृतवान् भवेदित्यपि संभाव्यते। इयं गोपालिकास्य कुलदेवी आसीत्। एतच्च तन्निर्मित सन्देशकाव्यादवगम्यते।

पप्यूरेति नामकरणमपि तस्यैतस्या एव कुलदेव्या आधारेण कृतमस्ति। पप्यूरस्यार्थो गवां ग्रामो भवति।[१] स च गोपालिकेति नाम्ना संवदते। मलावारे कोट्टायननृपो मीमांसकानां सर्वप्रथममाश्रयदाताऽऽसीत्। तेनापि तेषां निवासस्थानं तदेव पूर्वनिर्दिष्टं प्रमाणितं भवति। तत एवेमे वर्तमाननिवासस्थानं यच्च तलपिलीप्रदेशे वर्तते, समागताः। तलपिलीप्रदेशस्य राजाऽपि विदुषां महानाश्रयदाता भवति स्म।

कालः

चकोरसन्देशकाव्यस्य समय इतिहासज्ञैः ख्रिष्टीयैकादशशताब्द्याः पश्चान्निर्धार्यते। एतेनास्य वंशस्य समयोऽप्यनुमातुं शक्यते। पन्नीयूरग्रामस्य ब्राह्मणैः कृतस्य बराहमूर्तिभिस्मकरणापराधस्य चर्चास्माभिः ख्रिष्टीयद्वादशत्रयोदशशताब्दीपर्यन्तं-रचितमलयालम् ग्रन्थेषु प्राप्यते किन्तु सन्देशकाव्येऽस्य महत्त्वपूर्णघटनाया उल्लेखो नोपलभ्यते। अनेनैतत्स्पष्टं सिद्धचति काव्यमिदं ततः प्रागेव लिखितमिति। स च समयः स एव भवितुमर्हति यस्य निर्देशोऽनुपदमेव कृत इति। समयः कोऽपि भवतु एतत्तु निश्चप्रचम्—मीमांसावाङ्मयसंरक्षणसंवर्धनाधीतिबोधाचरण प्रचारणादिकार्यात्मकावदानमस्य वंशस्य नितरां विततं गम्भीरं स्तुत्यं चास्तीति। विषयेऽस्मिन् विस्तृतज्ञानाय मद्रपुरीतः प्रकाशिते[२] प्राच्य विद्याशोधपत्रिकाया १९४५ तमवर्षस्य सितम्बरमासीयाङ्के पय्यूरभट्टा इति विषयको डा० श्री कुन्जन राजाख्य महाविदुषो विद्वत्तापूर्णो लेखोऽध्येतव्य इति मे विज्ञप्तिः। न केवलं एतावन्त एव विद्वांसः, किञ्चान्येऽप्येतादृशा बहवो महनीययशसः साधका एतां परम्परामसेवन्त।

१. गवर्नमेण्ट ओरियण्टल मैनुस्क्रिप्ट लाइब्रेरी मद्रास नं० R. 3607

२. जनरल आफ ओरियण्टल रिसर्च, मद्रास, सितम्बर १९४५—पय्यूर भट्टास्

—डा० श्री कुञ्जन राजा।

मीमांसादर्शनेतिहासे भट्टपरम्पराया यदुच्चैस्तमं स्थानमङ्गीकृतमस्ति तत्तेषां सर्वेषां विदुषां तपसोऽवदानमस्ति यैः स्वीयं सकलं जीवनमेतत्प्रशस्तकार्याय समर्पितम्। केचित् परिगणिताः प्रमुखा एव लेखका विवरणमात्रदानेनात्र मया चर्चिताः। परस्सहस्रं एतादृशा अपि वस्तुतः साधका अत्र बभूवुर्येषां कीर्तिमात्रशेषाणां नामान्यपि न ज्ञायन्ते। अत्र प्रसङ्गे तेऽप्रत्यक्षसाधकाः पूर्वोक्तेभ्यः प्रसिद्ध-विद्वद्भ्योऽधिकं नः कार्तज्ञ्यप्रकटनास्पदा येषामज्ञातनामधेयानां कीर्त्यादिलोभविरसानां तपोभिर्मीमांसासिद्धान्ताः साम्प्रतमवाप्यन्ते। इदं तदीयमुत्कृष्टमवदानं कं नाधमर्णं करोति? अग्रिमेऽध्याये प्रभाकर परम्परानामधये केचनोत्कृष्टा मीमांसकाः दिग्-दर्शनीकरिष्यन्ते।

प्रभाकरपरम्परा

कुमारिलभट्टानन्तरं मीमांसादर्शनस्य प्रभावशाली लेखकः प्रभाकरमिश्रो बभूव। एतत्तु पूर्वमेव मया लिखितम्–सोऽपि कुमारिल इव शबरस्वामिकृतभाष्यं व्याचख्यौ। व्याख्यायां प्रतिपादितः सिद्धान्तश्च तथा प्रभावपूर्ण आकर्षक श्चाभूताम् यथा तन्नाम्ना स्वतन्त्रः सम्प्रदाय एव प्राचलत्। स सम्प्रदायोऽत्र प्रभाकर परम्परेति नाम्नोच्यते। दार्शनिकदृष्ट्या शास्त्रीयाधारेण च सम्पन्नत्वादियं परम्परा भारतीयवाङ्मये प्राप्तोच्चैस्तमस्थाना वर्तते। अस्या निरतिशयमहात्म्यस्य परिचायकं स्पष्टं स्थूलञ्चोदाहरणम् (प्रमाणं) एतदेवास्ति यदियं परम्परा भाट्टसदृक्षसम्पन्न सशक्तसम्प्रदायस्य समकक्षतया न केवलं जीवातुरभवत् किन्तु स्वकीयसम्मानित स्थानमपि चकार। अग्रिमप्रकरणे मयास्यैतयोरेव वैशिष्टयर्योविवेचनं करिष्यते।

प्रभाकरमिश्रः

यावदधिकः प्रभावः प्रभाकरस्यास्मासु वर्तते, तद्विषयकज्ञानं तावदेव न्यून-मस्मानधिशेते। तस्य विचारा अवश्यं प्रभाकरस्येव प्रकाशमानाः सन्ति तानेवा-धिकृत्य वयं तं श्रद्धातिशयेन सततं स्मरामः। व्यक्तिगतजीवनपरिचायकसाधना-नुपलब्धेस्तद्विषये वयं सर्वथा ध्वान्तावृतनयनाः स्मः। निम्नलिखितं विवेचनं यथा-कथञ्चित् प्रकाशकं भवेदिति सम्भाव्यते।

कुमारिलप्रभाकरौ

कुमारिलप्रभाकरयोर्विचारपरं प्रकरणं तु पृथगध्याये लेखमर्हति। प्रसङ्गे तु वयं द्वयोरेतयोर्महामनीषिणोः सम्बन्धविषये प्रचलितानां किम्वदन्तीनामाधाराणाञ्च दिग्दर्शनं कर्तुकामाः स्मः।

प्रभाकरो कुमारिलभट्टस्य शिष्य इति सर्वविदितं तथ्यम्। अयमतितरां प्रभावशाली स्वतन्त्रविचारधार इत्यपि प्रसिद्धमेव। स्वीयबाल्यकाले एव सः स्वकुशाग्रबुद्धितां परिचाययति स्म स्वगुरुम्। श्रूयते–एकदा मृत्युसंस्कारविषये गुरुशिष्ययोर्वैमत्यमजायत। विविधतर्कपरायणशिष्यस्य शङ्कायाः समाधानं कर्तुमसमर्थो

गुरुः सर्वतः प्रचारपथमानीतवान्—स (कुमारिलः) मृत इति। यदा जना अन्तिमसंस्कारा येकत्रिताः संस्कारविधिविषयकश्च प्रश्नश्चोदतिष्ठत, तदा श्रुतसर्वचर्चः प्रभाकर उवाच—अत्र विषये कुमारिलेन यत् प्रतिपादितं तदेव वस्तुतः संगतम् मया तु यद्यत्कथितं तत्सर्वं विवादायैव, न व्यवहारायेति। स्वाभीष्टवाक्यं श्रुत्वा कुमारिलः सुप्तजन इवोत्थितः प्रभाकरं चोक्तवान्—अहं विजयी, त्वमात्मनः पराजयं स्वीकुर्विति। एतच्छ्रुत्वा प्रभाकरः प्रत्यवोचत्—भवतां सिद्धान्तमहमवश्यं स्वीकृतवानस्मि परन्तु सा स्वीकृतिर्भवतां जीवनकालिकी नासीदिति।

द्वितीया जनश्रुतिरेवमस्ति-एकदा प्रभाकरं पाठयन् कुमारिलः 'अत्रतुनोक्तम् तत्रापिनोक्तम् इति द्विरुक्तम्" इति पङ्क्तिं विलोक्य तुष्णीं बभूव। स बहु प्रयत्यापि तस्या आशयं स्पष्टयितुमसमर्थोऽभूत् "अत्र तु नोक्तम् तत्रापि नोक्तम्" यदि तर्हि सकृदपि नोक्तं द्विरुक्तस्य तु काऽत्र संभावनेति विप्रतिपत्तिबाधितो गुरुः पङ्क्तेराशयं कथकारं विवृणुयादिति काठिन्यमनुबभूव। शिष्यः प्रभाकारस्तत्क्षणमेव च्छेदविशेषं कुर्वन्नुवाच-अत्र तुना (तुपदेन) उक्तम् तत्र अपिना (अपि पदेन) उक्तम् इति एकस्यैव तात्पर्यस्य तुपदापिपदाभ्यां वचनाद् द्विरुक्तं तु स्पष्टमेवास्तीति। तस्य तां प्रत्युत्पन्नमतिं कुशाग्रवत्तीक्ष्णबुद्धिं च स्तुवन् गुरुः तत्कालमेव तं गुरुरित्युपाधिनालंचकार। एतेनैव कारणेनाद्ययापि प्रभाकरमतं गुरुमतमिति व्यवह्रियते।

अनयोर्गुरुशिष्यभावस्तथा विख्यातो बभूव यथा खण्डनायानेकेषु समालोचनात्मकतर्केषूपस्थापितेष्वपि जनमानसात् स नापहृतः। अनयोर्गुरुशिष्य भावो न बहिरेव चर्चितोऽस्ति किन्तु विद्वद्भिः स्वरचनासु[१] स्वपि लिखित्वा स्वीकृतः। अतोऽयं सर्वजनीनमान्यतामधिगतो दृढो बभूव। तर्कादपि समुत्कृष्टं वस्तु समुन्नतं च विश्वासो नाम, यत्र हि तर्को न गन्तुं प्रभुः। अयं विषयोऽपि तर्कसीमामतिक्रम्य कृतस्वस्थानो विजयतेतराम्।

पौर्वापर्यम्

यद्यपि लोकैः सर्वमिदं स्वीकृतमस्ति तथापि समालोचकैरितिहासज्ञैश्च नात्र विषये मौनमवालम्ब्यत। विविधप्रकारान् तर्कान् निकषपाषाणीकृत्य कुमारिल-प्रभाकरयोः सम्बन्धः परीक्षितो ऽभवत्। तर्केषु समुपस्थापितेषु किम्वदन्तीनां महत्वं

---

१. अस्यां सूत्रं जैमिनीयं शाबरं भाष्यमस्य तु
मीमांसा वार्तिकं भाट्टं भट्टाचार्यकृतं हि तत्।
तच्छिष्योऽप्यल्पभेदेन शाबरस्य मतान्तरम्
प्रभाकरगुरुश्चक्रे तद्धि प्रभाकरं मतम्॥

शेष—सर्व सिद्धान्त—रहस्यम्

मूल्यं च यत्क्षीणं भवति तदपि नास्वाभाविकम्। एतादृशस्थितावागतायां लोकतः प्राप्तानामाधाराणां प्रामाण्यं शिथिलीभवति। अत्रापि स एव सामान्यनियमः प्रावर्तत। अतः किम्वदन्त्या सिद्धे पूर्वोक्ते गुरुशिष्यत्वे सन्देहोऽजागरीत्। समालोचकैरत्र सम्बन्धे संदिहानैरनेके विपरीतास्तर्का उपस्थापिताः। प्रो० कीथः डा० गङ्गनाथ झा च न केवलमनयोः गुरुशिष्यभावं न स्वीचक्रतुः किन्तु प्रभाकरं कुमारिलभट्टान्नितरां पूर्ववर्तिनं साधयाञ्चक्रतुः। प्रो० कीथः कथयति–प्रभाकरः खिष्टस्य ६०० तमाद् वर्षादनन्तरं ६५० तमाद् वर्षाच्च प्राग् बभूव कुमारिलश्च ततः पश्चादिति। डा० झा लिखति–प्रभाकरः कुमारिलाद् वयसा वृद्धतरः अथवा स तस्य तुल्यकालवर्तीति। अत्र मुख्यं कारणमिदं प्रस्तूयते प्रभाकरं कुमारिलाज्ज्यायांसं साधयद्भिः—प्रभाकरेण शाबरभाष्यमधिकृत्य या बृहतीनाम्नी व्याख्या लिखिता तत्र कुत्रापि कस्यापि मतस्य समालोचना तेन न कृता किन्तु शाबरभाष्यस्य मतान्येव स्वकीयदृष्ट्या विवृतानि। एतादृशं स्थलमल्पीय एव वर्तते यत्र तेनान्यदीयमतानि समालोचितानि। एतस्माद्-विपरीतं वस्तु दृश्यते कुमारिलकृतटीकायाम्। तत्र हि अनेकेषु स्थलेषु भाष्यकारमतान्यालोचितानि, अनेकत्र च तानि खण्डितान्यपि।[१] कतिचित्स्थलानि त्वेवंभूतानि सन्ति यत्र कुमारिलः तानि भाष्यमतानि खण्डितानि, प्रभाकरेण यान्यङ्गीकृतानि। ऋजुविमलाऽवश्यं भाष्यं समर्थयन्ती कुमारिलमतविपरीतमलिखत् परन्तु प्रभाकरः किमपि नाचकथत्। यदि वस्तुतः प्रभाकरः कुमारिलभट्टात्परवर्ती भवेत् तदावश्यं स कुमारिलमतं समालोचयेत्। नैतदेव अपरं च किमपि कुमारिलं प्रभाकर परवर्तिनं साधयितुं प्रमाणमुपलभ्यते-तथाहि कुमारिलेन कृतं प्राभाकरमतखण्डनं तत्रोपलभ्यते। एषु बहूनि स्थलानि प्राभाकरबृहत्या सम्बद्धानि दृश्यन्ते।[२]

कुमारिलेनाधिकरणस्य सम्बन्धे मन्त्राणां नैरर्थक्यमाशङ्कितम् यासां शङ्कानामुपयोगोऽविकलं बृहत्यां कृतो विलोक्यते। प्रभाकरः वदति-यत्र कुत्रापि स्मृतीनां प्रामाण्यं स्थापयितुमिष्यते तत्र सर्वत्र वेदास्तदनुकूला विलोकनीया इति। कुमारिलेनात्र विषये शङ्का प्रकटीकृता—अन्वेषणपरा एतादृशान्यन्यान्यप्युदाहरणानि प्राप्तुमर्हन्ति।

प्राभाकरे ग्रन्थे केवलमेकमेव प्रसङ्गं वयं प्राप्नुमो यत्र कौमारिलमतखण्डनमस्ति किन्तु तत्रापि तत्त्वमिदं ध्यातव्यमस्ति-तत्खण्डने या भाषा शब्दावली शैली चाश्रितास्ताः कुमारिलाङ्गीकृता न सन्तीति ४.१.२ सूत्रप्रसङ्गे कुमारिलोऽभिधत्ते—क्रत्वर्थे

१. तन्त्रवार्तिकानुवादः पृ० ३२-१-२-१, १२६ पृ०, १७८ पृ०, २०७ पृ०, २२७ पृ०, ३४७ पृ०, ३७३

२. तन्त्रवार्तिकानुवादः पृ० ५९०-१-२-३०, शावरस्वामी अ. पृ० १०-९-१ तन्त्रवा० अनु० ११२

द्रव्यार्जने क्रतुविधानं स्यादिति। अत्रैव प्रभाकरो लिखति—क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संवर्तते। अस्य खण्डनकाले तु भाषाधिकं रूक्षत्वमाश्रयति। स कथयति—'प्रलपितमिदं केनाप्यर्जनं स्वत्वं नापादयतीति प्रतिषिद्धम्'' इति। शब्दानामेष व्युत्क्रमः ''केनापि' इति शब्देन यो विद्वान् परामृष्टः स न कुमारिलोऽपितु कश्चिदन्य इति। शैलीदृष्ट्याऽपि विचार्यते चेत्प्रभाकरः कुमारिलात्प्राक्तनः प्रतीयते। प्रभाकरस्य भाषा भाष्यभाषानुगुणत्वात्तन्निकटवर्तिनी वर्तते तत्र भाष्यवत् स्वाभाविकः प्रवाहः सारल्यं स्पष्टत्वं च दृश्यन्ते। कुमारिलस्य च भाषाऽपेक्षाकृतमधिकसाहित्यगुण सम्पन्ना पाण्डित्यपूर्णा तथा शंकराचार्यभाषासदृशी विलोक्यते। बृहत्यान्तु नानाविधा लोकोक्तयः सूक्तयोऽपि प्रयुक्ता दृश्यन्ते।

किञ्च कानिचिदेतादृशानि सूत्राण्यप्यत्रागतानि यानि भाष्ये बृहत्यां च न प्राप्यन्ते। किन्तु कुमारिलेन तन्त्र[1] वार्तिके तानि सन्त्युल्लिखितानि। कुमारिलेन भाष्ये तेषामविद्यमानतया बहूनि कारणानि लिखितानि—(१) भाष्यकर्ता सूत्राणामेषां व्याख्याविधिं विस्मृतवान्। (२) अथवा एतेषां तत्कृता व्याख्या कालकवलिता बभूव। (३) अनावश्यकत्वाज्जानताऽपि तेनैतानि न व्याकृतानि। (४) तेनैतेषां प्रामाण्यं नाङ्गीकृतम्। अतो नवमादारभ्य षोडशपर्यन्तं समागतानि शृङ्खलाबद्धानि न भूतानि। प्रभाकरेणापि सूत्राण्येतानि परित्यक्तानीति परवर्तिनोऽनेके[2] लेखका अपि लिखन्ति।

बृहत्यां व्याख्यायामपि नेदृशः कोऽपि संकेत उदलभ्यते कुमारिलेन कथंकारमेतानि सूत्राणि न व्याख्यातानि' इति। कुमारिलस्तु व्याख्यातृभिरन्यैरिमानि सूत्राणि न व्याख्यातानीति वस्तुज्ञ आसीत् परन्तु प्रभाकरो नैतज्जानाति स्म। प्रभाकरो यदि कुमारिलात्पश्चादभविष्यत्तर्ह्यवश्यमेतदुदलिखिष्यत्। प्रभाकरो वृद्धतरः कुमारिलादित्यनेन प्रमाणितं भवति। श्रीपशुपतिशास्त्रिणेऽप्येतदेव मतं रोचते।

महामहोपाध्यायैः श्री कुप्पुस्वामिशास्त्रिभिः १९२४ तमवर्षस्य तृतीये प्राच्यविद्यासम्मेलने पठितस्वलेखेन प्रभाकरः कुमारिलादनन्तरकालिकलेखक इति प्रमाणितम्। नयविवेकोल्लिखितो वार्तिककारः कुमारिल एवेति। स च प्रभाराज्जायानिति च तन्मतम्। तन्मतं दूषयन् पशपतिनाथशास्त्री प्राह—नयविवेकस्य वार्तिककारः दशपक्षी प्रतीयते किन्तु 'लोक' इत्यादि भाष्यस्य षडर्थान् संप्रचक्षते इति स्पष्टं घोषयन् कुमारिलः षट्पक्षी सिद्ध्यति, न दशपक्षीति। अयमेव भेदः नयविवेकस्य वार्तिककारकुमारिलयोः पार्थक्यसाधनाय दृढप्रमाणायते। एतत्खण्डयन्तः

१. तन्त्रवा० अनुवादः, १२७५ पृ०।

२. विद्यार्णवकृतः विवरणप्रमेयसंग्रहः पृ० ४।

श्री कुप्पूस्पास्त्रिणो व्याहरन्ति–अयमेव कुमारिलः दशपक्षी वार्तिककारोऽस्ति यस्यावशिष्टानां चतुर्ष्णां पक्षाणां विवरणं तदीयाभ्यामप्राप्ताभ्यां वृहट्टीका-माध्यमटीकेति द्वाभ्यां रचनाभ्यां ज्ञातव्यमिति। श्री कुप्पुस्वामिशास्त्रिणां मतस्य पूर्णं समर्थकं नयकोशस्य नयविवेकव्याख्यात्मकस्य निम्नलिखितमुद्धरणमस्त्येव-लोके येष्वर्थेषु इत्यादेः भाष्यस्य वार्तिककारैरेकत्र दशार्थाः सम्भावितत्वेनाक्ताः--तत्र दशमोऽर्थ औचित्यानुभाषणम्। तथा अन्यत्र षडर्थाः[१] इत्यादि।

किञ्च श्रीशास्त्रिणः टीकाद्वयस्य नष्टत्वसूचनाद्वारा स्वमतं समर्थयन्ति। तच्च समर्थनमपि सप्रमाणम्। स्वयं सर्वदर्शनकौमुदीकृदस्योल्लेखं करोति। प्रभाकरेण वृहत्यां[२] भारवेर्भर्तृहरेश्च[३] वाक्योल्लखोऽपि तस्य पश्चाद्भवत्वं प्रमाणयति। शैली तु न कमपि परवर्तिनं कञ्चन परवर्तिनं साधयितुं प्रभवति। प्रभाकरस्य शैली चापि यथास्थानं साहित्यानुगुणप्रवाहपूर्णाऽस्त्येव। तत्त्वसंग्रहस्य बौद्धो लेखकः शान्तरक्षितः, यो शताब्द्यैकमात्रपरवर्ती बभूव, कुमारिलस्य श्लोकवार्तिकीयानंशांस्तु अनेकत्रोद्धृत्य खण्डयामास, न किल प्रभाकरस्य ग्रन्थांशान्। इदमपि कुमारिलस्य प्रभाकरात्प्राचीनत्वसाधकम्। इत्थं श्री कुप्पुस्वामिशास्त्रिभिः स्वदृढतरतर्कैः प्रभाकरः कुभारिलात्पश्चाद्वर्तीत्यसाधि। यद्यपि श्री पशुपतिनाथशास्त्री अन्यश्च तन्मतं खण्डयितुं तर्कानुपस्थापयामासेतस्ततो लेखेषु तथापि प्रभाकरस्य कुमारिलात्पश्चाद्भवत्वं सर्वसम्मतमिव संस्कारायितमिव जनमानसस्थितं ते लेखा नोत्खातयितुं प्राभूवन्। अनेकत्र वयं प्रभाकरात् भट्टकुमारिलं प्राक्तनमनुभवामः। प्रभाकरस्य विचारोऽपि कुमारिलीयविचारादतिविकसितः प्रगतिशीलः सूक्ष्मोऽग्रेसृतश्च प्रतीयते। इदमेकमेव साक्ष्यं प्रभाकरं कुभारिलात्परवर्तिनं साधयितुमलम्। अत्र विषये सविशेषं ज्ञातुमिष्यते चेद् डां० श्रीझा-पशुपतिनाथशास्त्रि-डा०कुप्पूस्वामिशास्त्रिणां तत्तल्लेखाः पठनीयाः त एवास्मान् निर्णयविशेषं प्रापयितुं प्रभवेयुः।

कालः

कुभारिलं प्रभाकरात् पूर्ववर्तिनं संसाधयद्भिः डा. श्रीकुप्पूस्वामिभिः प्रभाकरस्य कालः ख्रिष्टस्य ६१० तम वर्षादारभ्य ६९० तम वर्ष पर्यन्तं भवितु मर्हतीति कथितम् कुमारिलश्च ६०० तः ६६० पर्यन्तवर्त्तीति तन्मतम्। डा० गङ्गानाथझा-पशुपतिनाथ

१. मीमांसानयकोशः (मद्रास पुस्तकालयमैनिस्क्रिट) पृ० १०।

२. अविवेकः परमापदां पदम्—वृहती पृ० २४५।

३. ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् वृहती पृ० ?

शास्त्रिणौ चैकमतौ भूत्वाऽस्य कालं ६०० तम वर्षत आरभ्य ६५० तम वर्षपर्यन्तं निर्धारितवन्तौ । मद्रास विश्व विद्यालय गवेषणया संसाधितम्-प्रभाकर कुमारिलमण्डन मिश्राणां काले किञ्चिदधिकं व्यवधानं नास्तीति । इत्थमयं कालः षष्ठ्याः शताब्द्याः सप्तम्या वा मध्यभागः संभाव्यते । प्रभाकरकुमारिलयोः पौर्वापर्यविषये यदि वयं कमप्येकं निष्कर्ष स्वीकुर्याम चेत्तर्हि अनयोः कालनिर्णयवैमत्यमवश्यं लुम्पत् । अयं प्रश्नो यथा यथा समाधातुं प्रयत्यते तथा तथा नवा नवाः समस्या उपतिष्ठन्ते । संक्षेप शारीरकस्यैकत्र प्रघट्टके प्रभाकरमतमुल्लिखितमुपलभ्यते । एतस्य लेखकः शंकराचार्य शिष्यसूरेश्वराचार्यस्य शिष्योऽस्ति । स सूरेश्वराचार्य एव मण्डनमिश्रोऽस्ति तथा मीमांसाक्षेत्रे कूमारिलस्य शिष्योऽस्ति । इदं सर्व कथनं सत्यं मन्येत चेत्तदा प्रभाकरो मण्डनात्प्राचीनः सिध्यति स्वतश्च तश्य कुमारिलात्प्राक्तनत्वं निष्पद्यते । परन्तु सर्व मेतद् गल्पायते । इमकाश्चर्चा दुर्बलत्वान्नास्मान् कृतकालनिर्णयान् विचालयितुं प्रभवन्ति । अतो वयं सर्वसम्मतं ख्रिष्टस्य सप्तमषष्ठशताब्दयोरन्यतस्याँ मध्यभागमेत दीयकालं स्वीकर्तुं शक्नुमः ।

रचना

कुमारिलवत् प्रभाकरोऽपि शबरस्वामिभाष्यस्य व्याख्याकृद् बभूव । वयमेतत्तु पूर्वमेवोदलिखाम यत् शबरस्वामिकृतभाष्यमेव मीमांसाया आसां तिसृणां विचारधारणामुद्गमस्थानम् । कुमारिल इमां व्याख्यां विभागपञ्चकेनापूरयत् प्रभाकरस्तु केवलेन भागद्वयेन । इमौ भागौ विवरणेति लघ्वीति नामान्तरेण[१] वृहतीति निबन्धनेति नामान्तरेण च प्रसिद्धौ स्तः । अनयोर्व्याख्ययोर्विवरणं[२] लघ्वी वा संक्षिप्तास्ति निबन्धनं वृहतीवा नितरां वितताऽस्ति । एतच्च तयोर्नाम्नापि गम्यते । यथा माधवसरस्वती स्वकोय सर्वदर्शनकौमुद्यां लिखति तथा ज्ञायते-विवरणे षट् सहस्राणि निबन्धने द्वादशसहस्राणि पद्यानामासन्निति । प्रभाकरस्य पट्ट शिष्येण श्री शालिकनाथमिश्रेण विवरणमाश्रित्य दीपशिखा निबन्धनं चाश्रित्य ऋजुविमला व्याख्ये लिखिते । अनयोर्वृहती षष्ठाध्यायस्य मध्यभागान्तैव प्राप्यते । अदसीयतर्कपादो मद्रासतो वाराणसीतश्च चिन्नस्वामिपट्टाभिरामशास्त्रिणोः सम्पादकत्वे ऋजुविमलासहितः प्राकाश्यं गतोऽस्ति । एतस्मादतिरिक्तो भागोऽस्यास्तथा ग्रन्थश्चाप्राप्यौ स्तः । अतएव कारणं येन वृहत्या निबन्धनस्य वा विषये विवरणस्य च विषयेऽनेके विवादा विद्वन्मण्डलीमाध्यासते । काश्चिदितस्ततं उपात्ता युक्तीर्विहाय किमपि प्रबलं प्रमाणं दृढो वा

---

१. जनरल आफ ओरियण्टल रिसर्च मद्रास पृ० २४१-९१ सन् १९२९ ई०

२. ए द्रष्टव्यम्-डा० गङ्गानाथ झा-पूर्व मीमांसा (अंग्रेजी)
   ब विवरणं नाम गुरुणा प्रणीता लघ्वीति तत्संप्रदायः । निबन्धनं नाम पश्चाद्गुरुणा प्रणीता वृहट्टीका (नायकरत्न पृ० २५३)

कोऽप्याधारस्तथाविधोऽस्ति यदाश्रयणेन वयमेतं विवादं निर्णेतुं शक्नुमः । एतस्यावबोधवान् तस्य स्वरूपं निर्दिश्यते—प्रभाकरस्य वृहत्या अपरं नाम निबन्ध इति निबन्धनमासीदिति भयानुपदमेवोक्तम् किन्तु बंगस्थे एशियाटिक सोसाइटी पुस्तकालये उपलब्धायां पाण्डुलिपौ द्वितीयाध्यायस्य द्वितीयपादस्यान्ते लिखितमस्ति इति प्रभाकरमिश्रकृतौ मीमांसाभाष्यविवरणे इति । अस्यैव तृतीयाध्यायान्ते 'इति वृहत्यामित्युल्लेखः प्राप्यते । उभयोः मिथःसंगतिसिद्धचर्थमेतदेव स्वीकार्यं भवति यत् विवरणं बृहती चैकस्या एव रचनाया नामद्वयं वर्तते । महामहोपाध्यायगङ्गानाथझामहोदयेन निबन्धवृहत्योरभेदः प्रमाणीकृतः । तस्य च खण्डनं म० म० कुप्पुस्वामिभिः फर्दलाइन आन दि प्रभाकर प्राब्लम् शीर्षकेन लेखेन विहितम्[१] तेन विवरणं वृहत्या एव नामेति लिखितम् तथा निबन्धनमिति प्रभाकरस्य द्वितीयो ग्रन्थ इति । यस्य च व्याख्या दीपशिखानाम्नी शालिकनाथेन कृता । स्वकीयस्यास्य मतस्य पुष्टये उपर्युक्तादुद्धरणादतिरिक्तं सर्वदर्शनकौमुद्याः पाण्डुलिपौ दृश्यमानं निम्नलिखितं वक्तव्यमपि सहायकत्वेन प्रतीयते- 'प्रभाकरप्रस्थानन्तु भाष्यस्य प्रभाकरकृतं व्याख्याद्वयम् । एकं विवरणं षट्सहस्ररूपम् अपरं निबन्धनसंज्ञकं द्वादशसहस्रम् । विवरणस्य ऋजुविमला, निबन्धनस्य दीपशिखेति टीकाद्वयं शालिकनाथकृतमिति । एतेन विवरणनिबन्धनकृतोरभेदः सिद्धः । उभयोःकर्ता कश्चिदेक एव इति । कतिपये समालोचका अनयोरैक्येऽपि विश्वासरहिताः । अस्यापि सन्ति केचनाधाराः । विधिविवेकस्य व्याख्यां कुर्वाणो वाचस्पतिमिश्रः स्वीयाया न्यायकणिकाया एकस्मिन्नेव प्रसंगे विवरणलेखकं निबन्धनकारं च भिन्नं भिन्नं मतमुपस्थापयन्तं प्रस्तुतवान् । मिश्रेणपार्थ[२] सारथिनाऽपि न्यायरत्नमालायामनयोर्द्वयोर्भेदः प्रादर्शि । शालिकनाथेऽपि भेदभावनेयमुपलभ्यते । यत्र स विवरणकर्तारमुल्लिखति तत्र स[३] बहुवचनं प्रयुङ्क्ते तत्रादरद्योतनाय, यत्र च निबन्धनकारमुल्लिखति तत्र चैकवचनं प्रयुङ्क्ते । यदीमौ द्वावभिन्नौ भवेताम् तदा स इमं भेदभावमवश्यमेव नादर्शयत् । इमानि सन्ति कानिचित् कारणानि यान्यनयोरुभयोरैक्ये यद्यपि न बाधां तथापि संशयं त्ववश्यमेव जनयन्ति । अस्य याथातथ्यन्तु भविष्यकालगवेषणैव करिष्यति । आस्तामेतत् सर्वम्—प्रभाकरस्य यावत्साहित्यमुपलब्धं तावदेवास्य महामनीषिणो सरस्वत्याः वरदपुत्रं संसाधयितुमलम् ।

---

१. पृ० ४७७

२. "तस्मात् सर्व एव तार्तीयः पाश्चमिकस्च क्रमो न विधेय इति विवरणकारः । निबन्धनकारस्त्वाह भवतु तार्तीयक्रमस्य संख्यायाश्चैकादशादिकाया अभिानासंभवात् विध्येदमर्थे सति विध्यशिप्रानुष्ठान तया विधेयत्वम् नत्वेवं पाश्चमिकस्य क्रमस्य सभवति, नहि तस्य किञ्चिद्भिधान मस्तीति पृ० १५४

३. विवरणकारा इच्छन्तीति । स हि विनियोज्यो विधेयश्चेति निबन्धनकार पृ० ?

शैली

प्रभाकरकुमारिलयोर्मिथः सम्बन्धवर्णनप्रसंगे मयास्य शैलीविषये संक्षिप्य सर्वं कथनीयं तत्त्वमुद्घाटितम्। इदानीं तदुपरि प्रोक्तकथनमेवोदाहरणैः प्रमाणयितुं प्रयत्यते। प्रभाकरः कुमारिलवत् साहित्यानुरूपभाषाशैली न प्रस्तौति किन्तु तस्य शैली पर्याप्तव्यङ्ग्यमर्यादांविलसितेति कथने नाल्पोऽपि संकोचावसरः। एतेन तस्य रसिकता प्रमाणितीभवति। सर्वैः प्रभाकरस्य शैली प्रचुरसूक्ति-लोकोक्ति-लाक्षणिक प्रयोगसम्पन्नेति स्वीक्रियते समालोचकैः। मया तु तदीयशैली विलोक्यानुभूयते तस्य भाषागता प्रौढिः। भाषागतपूर्णप्रभुत्वस्य निदर्शनस्वरूपा तस्य भाषेति। सैव भाषा प्रशस्यते साहित्यिकैर्यत्र प्रसंगानुगुणभाषानुसारि परिवर्तनं स्वाभाविकप्रवाहः लोकोक्तिसूक्तीनां यथास्थानं प्रयोगश्चोपलभ्यन्ते। प्रभाकरोऽत्र कलायां प्रवीणो दृश्यते। स प्रतिपाद्यं प्रतिपादन् विना ऽऽयासं वदति--

१. अग्रन्थज्ञो देवानांप्रियः [३५] २. मूर्धामिषिक्तं प्रामाण्यम् [३२ बी] ३. अहो! अनवस्थितनयनीतिज्ञो भवान् [३२ बी] ४. अज्ञानकातर्यमायुष्मता प्रदर्शितम् [३० बी] ५. बालिशभाषितमेतत् (वृहती १२०) ६. वस्तुस्वभावानभिज्ञो भवान् (२४३) ७. तस्माद्विवेके यत्न आस्थीयताम् (२४५) इति।

एवंभूतानि परश्शतान्युदाहरणानि बृहत्यां प्राप्यन्ते। इमान्युदाहरणानि तस्य शैलीं पुरातनीं प्रतिषिध्य नितरां नवीनां साधयन्ति। यद्यप्यस्य शैली गभीरार्थपदा तथापि तं सोऽतिप्राचीनलेखक इति न कथयितुं शक्यते। गम्भीरार्थपदाऽपि तस्य शैली प्रसादगुणेन सारल्येन च विभूषितेति तस्य भाषाप्रभुत्वं सूचयति। इमे गुणास्तस्य व्यक्तित्वमपि द्योतयन्ति। तस्य विद्यावैभवाभिव्यक्तौ तदीयेयं शैली क्वाप्यशक्ति न स्पृशति। इदमेव तच्छैल्याः साफल्यस्य निदर्शनम् भवति। इदमप्यवश्यावध्यातव्य मस्ति तत्र शैल्यां यत् काव्यस्य कोऽपि तथा प्रसिद्धौ घटाटोपो न तस्य दृश्यते न वा कृत्रिमाडम्बरोऽपि तत्र विलोक्यते।

महान् विचारकः

प्रभाकरस्य महाप्रतिभत्वं प्रतिपादितमेव। स प्रतिपाद्यनिरूपणे पटीयान् विरोधिमतखण्डने स्वसिद्धान्तस्य मण्डने चातितरां दक्षः, परमगूढविषयाणां बोध्याहींकरणेऽतिचतुरो विषयविवेचने चाप्रतिहतगतिरासीत्। एतादृशे गुणे सत्यपि तस्य सम्प्रदायस्याल्पीयान् प्रचारः कथमभूदित्यस्य विचारस्त्वग्रिमेऽध्याये करिष्यते। अत्र प्रसंगे त्वेतावदेव कथनं पर्याप्तमस्ति—तस्य पूर्वोक्तान् गुणान् तदीयाः प्रबला विरोधिनोऽपि शिरोधार्यीकृतवन्त इति। यत्र ते तस्य मतं खण्डयितुमपि प्रवृत्ता-

स्तत्रापि बहिरङ्गखण्डनमेव जातम्। खण्डनकालेऽपि प्रभाकरप्रतिभायाः पूर्णः प्रभावः खण्डयितॄणां मनस्सु वर्तमान इव विलोक्यते। अद्यापि मीमांसादर्शनस्याध्येतृणां प्रत्येकं तस्य वैभवमवदानं च विचार्य नतमस्तकमस्ति। ते चानेकत्र स्थलेषु तं कुमारिलात्प्रशस्ततरमवगच्छन्ति। प्रभाकरं कुमारिलात्परवर्तिनं साधयता मयाऽनुपदमेवोक्तम्—तस्य विचारो भट्टकुमारिलात्प्रगतिशील इति। विचारान् प्रवाहयन् स स्वगुरोरप्यग्रेसरायते। अतएव भट्टोऽपि तं गुरुरिति संम्मानसूचकोपाधिना विभूषयाञ्चकार। तस्य विचारप्रवाहानप्रतिहतगतीन् विलोक्यैव स सर्वतन्त्रस्वतन्त्र इत्युच्यते स्म। तदीयांस्तर्कान् इतस्ततः संगृहीता युक्तयो न विजेतुं प्रभवन्ति। वयमस्य महत्यै विचारशक्तिये नमोवाकं प्रशास्महे। स स्वविचारविपक्षमद्वैतपक्षमपि यत्र तत्र खण्डयति। कुमारिलभट्टोऽद्वैतवादानुयायीव दृश्यते किन्तु प्रभाकरो यथावकाशं तदपि निरस्यति निश्शङ्कम्। स सशक्त[१] तर्कसम्पन्नां शैलीमवलम्ब्य तन्मतं तथा निरस्यति यथा तस्य निस्सारत्वमुद्भवति हेयत्वं च स्पृशति। एतत्खण्डनं तेन व्यक्तिगतद्वेषेण न क्रियते। व्यासाचार्यस्य विलक्षणव्यक्तित्वे तस्य महती श्रद्धास्ति। अतएव स "भगवान् व्यास इत्यादि समादरसूचकविशेषणविशिष्टं पदं प्रयुङ्क्ते।

तस्यावदानम्

स्वकीययाऽमोघविचारशक्त्या तेन मीमांसा-दर्शनं विचारशास्त्रीकर्तुं यो योगः कर्मकौशलापरपर्यायो दत्तः स सर्वथाऽनिर्वनीयोऽस्ति। मीमांसादर्शननिष्ठं चिरन्तन कालागतं कुमारिलैकाधिपत्यं विच्छिद्य प्रतिभावतानेन दर्शनमिदं प्रगतिशीलविचार सम्पृक्तं विधाय विकासोन्मुखविज्ञानशास्त्रतां नीतम्। इदं सर्वं तस्य विचाराणां विस्तृतव्याख्यया स्पष्टं भविष्यति। विविधप्रसंगेषु कुमारिलसिद्धान्तादतिरिक्तो यो नूतनो युक्तिशास्त्रानुमतः सिद्धान्तः स्थिरीकृतःस सर्वस्तस्य सर्वतन्त्रस्वतन्त्रत्वस्य साक्षाद्दर्शक इवास्ति। कुमारिलो यत्र प्रथमेऽध्याये धर्म-प्रामाण्यं निरूपयति तत्रैव प्रभाकरो विधिवाक्यप्रामाण्यं विवृणोति। द्वितीयेऽध्याये भट्टः कर्मभेदं प्रभाकरश्च शास्त्रभेदं वर्णयति। तृतीयाध्यायस्य विषयैक्यमङ्गीकृत्यापि प्रभाकरोऽवान्तरप्रकरणं नानुमनुते। चतुर्थेऽध्याये प्रयोज्यप्रयोजकभावेन सहाधिकारमुत्पत्तिश्चापि विषयीकृत्य तौ प्रत्यपि महाद्दतो दृश्यते। पञ्चमे भट्टोऽनुष्ठानक्रमं यथा विधेयं साधयति, प्रभाकरस्तु न तथा करोति। षष्ठसप्तमाष्टमनवमाध्यायेषूभयोः विषयाः समानमेव पन्थानमवलम्बन्ते। दशमेऽयाये निरूपितस्यातिदेशविषयस्य निरूपणमुभयोर्विपरीतमतसूचकम्। एकादशद्वादशयोर्विषयावुभयोः समानौ। एष्वध्यायेषु निरूपित

---

१. यत्तु ब्रह्मविदामेष निश्चयो यदुपलभ्यते तदतथ्यमिति। यन्नोपलभ्यते तत्तथ्यमिति। नमस्तेभ्यः, त्रिदुषां नोत्तरं वाच्यम् बृहती—पृ० ?

विषयेभ्योऽतिरिक्ता विषयाः--प्रमाणस्वरूपाणि अनेकदार्शनिकप्रसंगाश्चाश्रिताः प्रस्तुतस्वोद्भावितविचाराः प्रभाकरेणात्र विवृताः । कुमारिलेन प्रत्यक्षानुमान-शब्दोपमानार्थापत्त्यनुपलब्धय इति षट् प्रमाणानि स्वीकृतानि प्रभाकरस्त्वेतेष्वनुप-लब्धिं प्रमाणं न स्वीकरोति । कुमारिलः संयोगसंयुक्ततादात्म्य-संयुक्ततादात्म्य-तादात्म्येति त्रीन् संनिकर्षानङ्गीकरोति प्रभाकरस्त्वेतानस्वीकृत्य तत्स्थानापन्नान् संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवायान् स्वीकरोति । वाक्यार्थबोधप्रसङ्गे कुमारिलोऽभिहितान्वयवादं प्रभाकरश्चान्विताभिधानवादमङ्गीकरोति । भट्ट इव शब्दस्य विधाद्वयमङ्गीकुर्वन्नपि प्रभाकर उभयोः समानमानतां नाङ्गीकरोति । भट्टो दशस्वपि लकारेषु आख्यातस्यार्थमार्थीभावनां स्वीकरोति प्रभाकरस्तु केवलं लिङ् लकारे । भट्टमतेन लिङ्गर्थः कोऽप्यलौकिको व्यापारोऽस्ति प्रभाकरमतेन तु नियोगः । भट्टोऽर्थापत्तेः प्रकारद्वयं मन्यते—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च । प्रभाकरस्तु दृष्टामर्थापत्तिमेवाङ्गीकरोति । भट्टो द्रव्यगुणकर्मसामान्याभावा इति पञ्चैव पदार्थानाचष्टे । प्रभाकरस्तु अष्टौ पदार्थान् स्वीकरोति द्रव्यगुणकर्मसामान्य-शक्तिसादृश्यसंख्यासामान्यानीति । भट्टमतेन द्रव्यस्यैकादश भेदाः-भवन्ति-पृथ्वीजलतेजोवाय्वाकाशकालदिगात्मशब्दतमोमनांसीति । प्रभाकरस्तु शब्दतमसी इति द्रव्यस्य भेदद्वयंनैवाह । कुमारिलो वायुं स्पार्शप्रत्यक्षमङ्गीकरोति प्रभाकरस्तु तमनुमेयमेव स्वीकरोति । प्रथममतेनाकाशकालदिशः प्रत्यक्षविषयाः द्वितीय मतेनानुमेया एव । भट्टेनात्मा मानसप्रत्यक्षविषयः प्रभाकरेण स्वयंप्रकाशः स्वीक्रियते । मनस्तूभयमतेनाणु स्वीकृतम् । प्रथममतानुसारेण शब्दस्तमश्च स्वतन्त्रद्रव्ये स्तः द्वितीयस्त्वनयोरन्यतरं शब्दं नभोगुणं कथयति । तमसश्च सत्तामपि नाङ्गीकरोति । कुमारिलभट्टेन गुणस्य चतुर्विंशतिर्भेदा मन्यन्ते–रूपरसगन्धस्पर्शसंख्या-परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कार -ध्वनि प्राकट्य शक्तयश्चतुर्विंशतिर्गुणा इति । प्रभाकरस्तु शक्तिसंख्ययोर्गुणत्वं न स्वीकरोति । ज्ञानं कुमारिलमतेनानुमानवेद्यं प्रभाकरमतेन च स्वयंप्रकाशम् । सृष्टिविषये अन्यथाख्यातिपक्षपाती कुमारिलः प्रभाकरस्तु अख्यातिपक्षपाती भवति । प्रथमः कर्म प्रत्यक्षं स्वीकरोति द्वितीयोऽनुमेयम् । भट्टः सामान्यस्य (जातेः) भेदद्वयं परमपरञ्चेति मन्यते प्रभाकरस्तस्य परनामकं भेदं नाङ्गीकरोति । कुमारिलेन ब्राह्मणत्वादिकां जातिं स्वीकरोति प्रभाकरस्तु न । कुमारिलोऽन्यदर्शनानुमतान्—प्रागभावप्रध्वंसाभावान्योन्याभावरूपानभावस्य चतुरः प्रकारानङ्गीकृतवान् प्रभाकरस्तु स्वतन्त्रपदार्थमेव नाङ्गीचकार ।

इत्थमुपरिनिर्दिष्टेन संक्षिप्तेन विवरणेन प्रभाकरस्यावदानमनुमातुं शक्यते सारल्येन । तादृशदृढाभेद्यकौमारिलसम्प्रदायविरुद्धानां तत्तत्स्वसिद्धान्तानां स्वतन्त्राणां प्रतिष्ठापनं कियत्कठिनं महत्त्वपूर्णञ्चेति नाविदितं तद्ग्रन्थाध्ययनपराणां विचार-

धीधनानाम्। यदि प्रभाकरो नामविष्यत्तर्हि मीमांसादर्शने दृश्यमानप्रगतिशील-विचारसंसारो नितरामविकसितोऽप्रौढ एव चाभविष्यदिति पूर्वोक्तविवेचनेन स्पष्टमुद्घोष्यते। तस्य विचारा अस्मान् नूतनचिन्तनदृष्टिभिर्वस्तुतत्त्वं परीक्षितुं प्रैरिरन्। अतएव वयमाधुनिकचिन्तका इव किमपि वीक्षितुं तत्पराः स्वतन्त्रविचारा-लोकालोकितं पन्थानमाश्रित्य गन्तुं किमपि च नूतनं चिन्तनं प्रस्तोतुं सन्नद्धाः स्मः। अनेन बहुतिथा वैज्ञानिकसिद्धान्ता उपस्थापिताः। ब्राह्मणत्वादिजातिखण्डन-परेणैतेन साधिताः—मीमांसादर्शनं नान्धविश्वासग्रस्तमिति। अस्माभिः सततमस्य महतो विचारकस्याधमर्णैर्भवितव्यमिति।

शालिकनाथमिश्रः

प्रभाकरपरम्परायाः सर्वोत्तमो लेखकः प्रतिपादकश्च शालिकनाथमिश्रोऽभूत्। प्रभाकरसिद्धान्तानां यथास्वच्छं निरूपणमनेन कृतं न तथान्येन केनापि। प्रभाकर-सिद्धान्तनिरूपणेऽस्य व्यापकोऽधिकारोऽगाधश्रद्धा चास्ति। अतएव समालोचकैरयं प्रभाकरस्य पट्टशिष्यत्वेन स्वीक्रियते। स्वयमप्यनेन 'प्रभाकर गुरो' रिति शब्दः प्रयुज्यते। सर्वाधिकवैदुष्यात् तस्य सिद्धान्तस्य ज्ञाननैपुण्याच्च हेतोः प्रभाकरस्य पट्टशिष्यरूपेणास्य प्रसिद्धिः सुसंगता सुसंभवा च। स ततो वस्तुतः साक्षादधीतविद्योऽ-भून्न वेति निर्णयाभावस्थितावपि स्वकीयगुणगौरववाक्चातुर्यविद्यावैभवैरवश्यमेव तस्य मूर्धाभिषिक्तशिष्यत्वास्पदं प्राप्तुमधिकुरत इत्यत्र नास्ति संशयः।

समीक्षकाः तस्य पट्टशिष्यतां विश्वसनीयां न मन्यन्ते पुष्कलप्रमाणाभावात्। प्रभाकरगुरोरिति पदप्रयोगः तस्य तत्पट्टशिष्यत्वसाधनाय नालम् प्रभाकरस्यान्येषामपि शिष्याणामपि तत्कृते तादृशादरसूचकशब्दप्रयोगोपलब्धेः। गुरुशब्दस्तु तस्योपाधितया तन्नाम्ना सह प्रयुज्यते स्म। शालिकनाथेन स्वकीयऋजुविमलायां टीकायां यत्र स प्राणभ्यत तत्र नेदृशगौरवसम्मानश्रद्धासूचकं किमपि विशेषणं प्रायुज्यतेति तस्य तत्पट्टशिष्यत्वसंदेहं पुष्णाति तथापि कुमारिलप्रभाकरयोरिव प्रभाकरशालिकनाथयोः सम्बन्धः स्थिर इवाभूत्। विशेषतः शालिकनाथस्य प्रभाकरवद् योग्यता प्रभाकरमतज्ञानं तत्प्रतिपादनतत्समर्थनपरता च तं सम्बन्धं द्रढीयांसं विदधाति। शालिकनाथः प्रभाकरं प्रति तामेव भक्तिं दर्शयति यां कोऽपि प्रधानशिष्यो दर्शयति। शालिकनाथ एव सा शक्तिरस्ति या प्रभाकरेण प्रतिपादितानां सिद्धान्तानां रूपरेखाणां च न केवलं पुष्टिं समपादयत् किन्तु तस्य पूर्वपक्षिपरिपन्थिनां झञ्झावातप्रबलाक्षेपात् पर्यत्रायत। शालिकनाथो नाभविष्यच्चेत्प्राभाकरसिद्धान्तानामवबोधस्तेषां स्वरूपश्चास्पष्टे एवास्था-स्यताम्। ईदृशं तत्कृतं कार्यमेव तत्सम्बन्धं द्रढयति।

देशकालौ

प्रसिद्धो दार्शनिक उदयनाचार्यः[१] स्वकीय कुमाञ्जलौ कमप्येकं गौडं मीमांसकमुद्धृतवान्—तस्य च बाधिन्यां स्वव्याख्यायां वरदराज मिश्रः "एष गौडो मीमांसकः शालिकनाथ मिश्र एवेति स्पष्टमुक्तवान्। यद्येदं कथनं तथ्यं तर्हि तस्य देशो गौड देशः साम्प्रतिकबंगप्रान्तबंगलादेशाभ्यामपि विस्तृतसीम एव संभावयितुं शक्यते। श्रीरामस्वामिश्रीकुप्पू[२] स्वामिशास्त्रिणावस्य कालं ख्रिष्टस्य नवमशताब्दीपूर्वं स्वीचक्रतुः ऋजविमलापञ्जिकातोऽनेकेषांमुद्धरणानां वाचस्पतिग्रन्थेषूपलब्धेः शालिकनाथ[३] कृत प्रकरणपञ्जिकायां च मण्डनमिश्रकृतविधिविवेकोद्धरणोपलब्धेः। एतेनास्य शालिकानाथस्य कालः वाचस्पतिमिश्रसमयात् प्राङ् मण्डनमिश्रसमयाच्च पश्चात् सिद्ध्यति। अयं कालो नवमशताब्द्याः प्राक्तन एव भवितुमर्हति। महामहोपाध्यायः श्रीगोपीनाथ[४] कविराजः शालिकनाथमुदयनाचार्य समकालस्थं प्रमाणीचकार। तच्चोपर्युक्तसप्रमाणविवेचननविरुद्धमिति भाति।

रचनाः शैली च

प्रभाकरस्य लघ्वीं वृहतीञ्च रचनाद्वयीमाश्रित्यानेन प्रथमाया दीपशिखानाम्नी द्वितीयायाश्च ऋजुविमलेतिपञ्जिकाख्यव्याख्ये द्वे लिखिते। स्वयं तेनेमे व्याख्ये पञ्जिकेत्यभिधानेन समलंकृते। अस्य तृतीयरचना प्रकरणपञ्जिकाऽस्ते। सर्वासां रचनानां पञ्जिकापदापन्ननामत्वादयं पञ्चिकाकार इति प्रसिद्धः। एतासु दीपशिखा सर्वथाऽमुद्रिता वर्तते। ऋजुविमलायाः कतिचिदंशा वृहत्या सह मद्रासवाराणसीभ्यां प्रकाशिताः सन्ति। प्रकरणपञ्जिका प्राभाकरसम्प्रदायस्य प्रसिद्धो ग्रन्थो वर्तते। अत्र न केवलं प्राभाकराः सर्वे सिद्धान्ता निरूपिताः प्राप्ताः किन्तु अन्यदीयसिद्धान्तेभ्यस्तेषां श्रेष्ठत्वमपि प्रतिपादितमस्ति। अत्र ग्रन्थे पुण्यपत्तन (पूना) स्थस्य पं० किञ्जुवाडेकरस्य व्याख्याऽपि वर्तते यस्याः कतिपयेंऽशा मुद्रिसा अपि सन्ति। तत्त्वबिन्दुप्राक्कथनेनास्य मीमांसापरिशिष्टनामकस्य कस्याप्यन्यस्य ग्रन्थस्य कर्तृत्वमपि सिद्ध्यति किन्तु स ग्रन्थः साम्प्रतमप्राप्य एवास्ति।

मिश्रशालिकनाथस्य शैली नितरां विवेचनात्मिकाऽस्ति। अतितरां गाम्भीर्यं गतस्यापि विषयस्य प्रसन्नसरलरोचकभाषया सुगमसुबोधार्हीकरणमस्य शैल्या वैशिष्ट्य-

१. कुसुमाञ्जलि-प्रकरण पृ० ४६६ (बेब्लियो (एडीशन) संस्करणम्)

२. (आग्ल) तत्त्व बिन्दु प्राक्कथन पृ० ४

३. द्रष्टव्यम् प्रकरण पञ्जिकायाः १७८ पृष्ठं विधिविवेकस्य २४३ पृष्ठे ४०२ पृष्ठे चोद्धृतं पद्यद्वयम्।

४. सरस्वतीभवन सिरीज वाल्यूम ६ पृ० १६७-१६८

मस्ति । अस्य सर्वेषु ग्रन्थेषु गुणोऽयं परिपक्वो दृश्यते । ऋजविमला न भवेच्चेद् वृहत्या स्तत्त्वानि बहुनि रहस्यानि चास्माकमबोध्यान्येव स्युरिति सर्वैः स्वीक्रियते । यदि प्रकरणपञ्चिका प्रकरणपञ्जिका वा न भवेत्तर्हि प्राभाकरसिद्धान्तानां साम्प्रतिकी प्रतिष्ठा तस्याः स्वरूपरक्षा च संशयापन्नैव स्यात् । प्रभाकरसंप्रदायस्यायं द्रढीयान् स्तम्भ इति कथनं नात्युक्तिः ।

ब्राह्मणत्वादेर्जातित्व[1] निरासप्रसङ्गे शालिकनाथो निजसिद्धान्तस्थापनायां तथा कटिबद्धः प्रमाणयुक्तिबाहुल्योपस्थापने व्यग्रो दृश्यते यथात्र किमपि दुर्बलत्वं पाठकैर्नानुभूयते । स आह-ब्राह्मणत्वादयो जातयोऽमान्याः, विभिन्न स्त्रीपुंसयोः पुरुषत्वातिरिक्ता काप्याकृतिरनेकानुगतैकबुद्धिर्न दृश्यते । इत्थं तेनाद्यतने युगे वर्ण-व्यवस्थामस्वीकुर्वतां जनानां मतप्रसारायैकः पन्था निरमीयतेव । सर्वस्मिन् तत्र तत्र प्रसंगे तस्य मन्तव्यमेतावदेव स्पष्टं रोचकं चास्ति । प्रभाकरसम्प्रदाये कोऽप्यन्यः नैतादृशः सशक्तो लेखकः ।

भवनाथमिश्रः

शालिकनाथादनन्तरं भवनाथ एव प्राभाकरसम्प्रदायस्याधिकृतो विद्वान् स्वीक्रियते । नयविवेकनामैक एव ग्रन्थो मीमांसादर्शनविषयकोऽस्योपलभ्यते । अयं च ग्रन्थो जैमिनीयसूत्राणां व्याख्यात्मकः । भवनाथो भवदेव इत्यपि कथ्यते । वरदराजः स्वव्याख्याया[2]मेतन्नामोल्लिखति । नयविवेकः प्रौढो ग्रन्थ इत्यत्र न कोऽपि संशेते । अतएवानेन स्वव्याख्यां विधातुमनेके व्याख्यातार आकृष्टाः । शुकनदी तटवर्तिप्रणतार्तिहर-प्रपौत्र-देवनाथ-पौत्र-रङ्गनाथपुत्रवरदराजेन ग्रन्थमिम-माश्रित्य दीपिका नाम्नी सर्वप्रथमाधिकृतव्याख्या लिखिता । त्रिपादीपर्यन्तैवेयं प्राप्यते अस्याश्च कतिपयैरंशैः सह नयविवेकस्य प्रकाशनं मद्रासविश्वविद्यालयेन कृतम् । द्वितीयाऽस्य व्याख्या 'शङ्कादीपिका' वर्तते गोविन्दोपाध्यायशिष्येण चेयं विरचिता । तृतीया व्याख्यालंकारनाम्नी माधवयोगिन आत्मजेन दामोदरसूरिणा कृता । सा च वाराणसेयसंस्कृतकालेजस्य (सम्प्रति वाराणसेय संस्कृत विश्व-विद्यालयस्य पुस्तकालये स्थापित पाण्डुलिपिषूपलभ्यते । चतुर्थी व्याख्या ख्रिष्टीय-चतुर्दशशताव्दीकालकेन श्री रविदेवेन विवेकरत्ननाम्ना कृता वर्तते । व्याख्याना-मिदं प्राचुर्यं बाहुल्यं चैवास्य ग्रन्थस्य गाम्भीर्यमुपयोगित्वं च प्रमाणयतः ।

नयविवेको लेखकस्यैकैव रचनाऽस्तीत्यनुपदमेवोक्तम् । अयमेक एव ग्रन्थो लेखकस्याप्रतिमप्रतिभाया विचारशक्तेश्च परिचयायालम् । अयं ग्रन्थो यद्यप्यतितरां

---

१. द्रष्टव्यम—प्रकरणपञ्चिकाया जातिनिरूपणं प्रकरणमम्
२. दीपिका श्लो० ।

विस्तृतोऽस्ति तथापि नितरां सरलार्थो नास्ति। बहूनां दुर्बोधस्थलानामर्थस्फोटाय व्याख्या एव शरणीकर्तव्या भवन्ति। ग्रन्थमिमं रचयन् लेखकः सर्वथा स्वाभाविकीं प्रणालीमेवाश्रितवान् कमप्याडम्बरं[1] दर्शयितुं स न क्वापि प्रायतत। इदं तस्य प्रतिज्ञावाक्येन सूच्यते। शालिकनाथस्तस्य पूर्ववर्ती आसीत् अतएवैतेन तेन तस्य विचारा महताऽऽदरेण[2] सहाङ्गीकृताः। परवर्तिनी परम्परामियं लेखक द्वयी नितरां प्रभावितां चक्रे।

भवनाथमिश्रः स्वीये नयविवेके यत्र तत्र शालिकनाथवाचस्पति[3] मिश्रा वुद्धृतवानस्ति। ख्रीष्टीय द्वादश शताब्दीस्थेन मुरारिमिश्रेण द्वितीयेन ख्रिष्टीयचतुर्दश शताब्दीवर्तिना प्रत्यगूप[4] भगवदादिना च भवनाथस्य तत्कृत न्याय विवेकस्य स्वीय ग्रन्थे समुल्लेखो विहितः। केचिद् विद्वांस इमं ख्रिष्टीय पञ्चदश शताब्दीस्य शङ्करमिश्र पितरंचाभिन्नं मन्यन्ते तत्तूपर्यक्त प्रामाणिकविवेचन विरुद्धत्वादुपेक्ष्य मेय पुष्कल प्रमाण शून्यत्वात्। अतः संक्षेण किन्तु दृढेन पूर्वोक्त विवेचनेनास्य कालः पार्थसारथि कालादनन्तरं ख्रिष्टस्यैकादशशताब्दयाश्च प्राङ् निर्णेतुं शक्यते। अयं च मिथिला-निवासीत्यपि मन्यते। इतोऽधिकमस्य विषये वयं न किमपि जानीमहे।

गुरुमाताचार्यः "चन्द्रः"

महामहोपाध्यायश्चन्द्रोऽपि प्राभाकरसम्प्रदायानुयायी, मिथिलानिवासिनो महामहोपाध्यायस्य गुणपतेस्तनय आसीत्। अनन्तरकालवर्तिभिर्लेखकैरेषोऽति संयानेन सह स्मृतः। ख्रिष्टीय द्वादश शताब्दीस्थो मुरारिमिश्रो द्वितीयः स्वीयग्रन्थे "त्रिपाद नीतिनयम्" इत्याख्येऽस्योल्लेखं करोति। ख्रिष्टीयचतुर्दशशताब्दया महता मैथिल निबन्धकारेण श्रीचन्द्रशेखरठक्कुरेणायं 'गुरुमताचार्य" इति नाम्नाभिहितः। गुरु-मताचार्य इत्यस्योपाधिरिव बभूव। ख्रिष्टस्य पञ्चदशशताब्दयां वर्तमानेन श्रीशङ्कर मिश्रेण स्वग्रन्थे[5] वादविनोदे', 'प्रभाकरैकदेशीय" इत्युक्त्वाऽयमाख्यातः। जयराम-भट्टाचार्येणापि स्वीयायां न्यायमालायामेषको निर्दिष्टः। एतेन विवेचनेनास्य कालः सारल्येनैव ख्रिष्टीयैकादशशताब्दयाः प्राङ् निश्चितो जायते।

---

१. विहाय विस्तरं शब्द सौन्दर्यं परनिन्दने। व्यज्यते भवनाथेन. तत्त्वं नय विवेकतः॥

२. महता प्रणिधानेन शालिकोक्तं प्रसाध्यते। पञ्चिकाद्वयतन्त्रार्थं संमोह विनिवृत्तये॥
न्याय विवेक ३।

३. झा-अभिनन्दन ग्रन्थ पृ० २४५-२४६।

४. एनेलेस आमल्स आफ भण्डारकर रिसर्च इंस्टीट्युट बाल्यूम १०-१९२४ ई० पृ० २३५-३७
डा० मिश्र लेखः।

५. पृ० ५३।

मीमांसादर्शनमाश्रित्यानेनानेके ग्रन्था लिखिताः। न्यायरत्नाकरनाम्नी सरल स्वतन्त्रव्याख्या जैमिनीयसूत्राश्रिताऽनेन लिखिता। अस्याश्च पाण्डुलिपिः श्री डा० मिश्रस्य सविधे विद्यमानाऽस्ति। अस्य रचना 'अमृत बिन्दुरस्ति। मीमांसाया स्वतन्त्रस्यास्य पाण्डुलिपिः अडैय्यारपुस्तकालये डा० मिश्रस्य प्रकोष्ठे च सुरक्षितास्ते। अस्य ग्रन्थे श्रीकरः विवेकविवरणपञ्चिका अन्ये च बहवो लेखकाः स्मृताः। प्रभाकरस्यान्येऽनुयायिन इवायमपि प्राभाकरं द्रव्यगुणकर्मसामान्यसंख्यासादृश्यादिनिरूपणं सविश्वासमनुगच्छति। बहुषु च विषयेषु ततोऽतिरेक्तेषु स्वतन्त्रविचाराद्भावनायापि विख्यातोऽयम्। एतद्विषयेऽधिकं ज्ञातुकामेन डा० झाऽभिनन्दनग्रन्थे प्रकाशितो डा० श्रीमदुमेशलिखितो लेखः पठनीयः।

नन्दीश्वरः

'प्रभाकरविजय' ग्रन्थस्य लेखको नन्दीश्वरोऽपि विख्यातेषु प्राभाकरमत-लेखकेष्वन्यतमोऽस्ति। प्राभाकरसम्प्रदायस्याधिकसंख्यकानां ग्रन्थानां पाण्डुलिपयो मद्रपुरीय संस्कृत पुस्तकालये प्राचुर्येणोपलब्धा भवन्ति सुरक्षिताश्च वर्तन्ते। तत्रापि बहुसंख्यकाः केरलदेशादवाप्ता विद्यन्ते। एतेन दक्षिणे प्रभाकरीयसिद्धान्तानामाधिक्येन प्रचारोऽनुमीयते। तस्मिन्नेव वातावरणे ख्रिष्टस्य शताब्दयाः प्राक् केरलप्रान्ते नन्दीश्वरोऽभूत्। स च ब्राह्मण आसीत्। "प्रभाकरविजयः" प्राभाकरसिद्धान्तानां सुष्ठु संकलनमस्ति। अस्य प्रमुखानि एकविंशतिप्रकरणानि साम्प्रतमुपलभ्यन्ते। ग्रन्थकारः स्वयं शालिकनाथभवनाथौ प्रति नितरां श्रद्धां प्रकटीकरोति। अतएव स स्वग्रन्थस्य प्रारम्भे लिखति—'नाथद्वयात्तसंसारेऽस्मिन्, शास्त्रे मम परिश्रमः इति। अस्यानयोक्त्या नाथद्वयस्य प्राभाकरदर्शनसम्बद्धपरम्परायां यन्महत्वपूर्णमास्पदमासीत् तत्स्पष्टं भवति। एतस्यैतत्तात्पर्यं कदापि न मन्तव्यम्—अनेन तयोरन्धानुकरणं कृतमिति। अयं तु ज्ञानविवेचनप्रकरणे प्रकरणपञ्चिकामतविरुद्धं स्वमतमपि निर्भयं प्रतिपादयामास। ईश्वरनिरूपणप्रकरणेऽनेन तस्यानुमेयस्वरूपं निरस्य स्वकीयं महाबुद्धि वैभवं परिचाययति। अस्यायं ग्रन्थोऽतितरामुपयोगी वर्तते मीमांसाशास्त्राध्येतृणाम्। संस्कृतसाहित्यपरिषदाऽस्य प्रकाशनं कृतं महामहोपाध्यायाऽनन्तकृष्णशास्त्रिभिः।

भट्टविष्णुः

ख्रिष्टस्य च चतुर्दश्याः शताब्दचा अन्तिमे पदे।
वर्तमानो भट्टविष्णुस्तर्कपादस्य टीकनम्॥
प्राभाकरसम्प्रदायं पालयन् यच्चकार तत्।
नयतत्त्वसंग्रहाख्यो ग्रन्थोऽस्त्येष न मुद्रितः॥
इतोऽन्यन्नैव किञ्चिन्नो ज्ञातमस्ति हि साम्प्रतम्।

वरदराजः

यथा किलात्रैव प्रकरणेऽनुपदमेवोक्तम्-वरदराजः प्रणतार्तिहरस्य प्रपौत्रो देवनाथस्य पौत्रो रङ्गनाथस्य च पुत्र आसीत् शुकाया नद्यास्तटेऽस्य निवास आसीत्। सुदर्शनोऽस्य गुरुरासीत्। अनेन भवनाथकृतनयविवेकमाश्रित्य दीपिकाऽथवार्थ-दीपिका वरदराजीयायाः प्रौढा टीका लिखिता। इयं टीकाऽत्यन्तं सरला सुग्राह्या कठिनस्थलीयरहस्यस्फोटिका। अतएव सफला टीकाऽस्ति। अयं ज्यौतिषायुर्वेद[1] व्याकरण शास्त्रानामपि विद्वानासीदित्यस्य स्वयं कृतोल्लेखेन ज्ञायते। अयं स्वकृतौ चन्द्र-मुल्लिलेख। खिष्टस्य सप्तदशशताब्द्यां वर्तमानः श्रीसोमनाथ इमं स्वग्रन्थे समुद्धरति। अतोऽस्य कालोऽनयोर्द्वयोर्मध्यवर्ती निश्चीयते। स च षोडशशताब्दीस्वरूपः। भवभूति रिवायमपि व्यङ्ग्येन स्वाभिमानप्रतिपादकमेकं[2] पद्यं लिखति। एतेन समालोचकैः कतिपयैरस्य व्याख्या कट्वालोचितेति सम्भाव्यते।

इत्थमनैकैरेभिर्महात्मभिः प्रभाकरपरम्परैषा संपोषिता। इतोऽन्यैरपि बहुभि-र्विद्वद्भिर्विचारकैरेतत्परम्परासंपोषणं व्यधायि किन्तु दौर्भाग्यादस्माभिः तद्विषये न किमपि ज्ञायते। अस्य सम्प्रदायस्य बहुतिथं वाङ्मयं लुप्तमभूत् केवलमिमे एव केचन परिगणिता लेखका अस्माभिरवाप्ताः। मीमांसोपासकैरत्र विषये पूर्णानुसन्धानपरै-र्भवितव्यमिति।

मुरारिपरम्परा

भाट्टप्राभाकरसम्प्रदायातिरिक्तो यः सम्प्रदायो मीमांसादर्शने प्रचलितस्तस्य प्रवर्तकः मुरारिमिश्रो बभूव। अतोऽयं सम्प्रदायो मुरारिपरम्परेति मिश्रपरम्परेति मीमांसकैरभिधीयते। संस्कृतवाङ्मयेतिहासेऽनेके मुरारिमिश्राः प्रसिद्धाः सन्ति। तेष्वेकोऽनर्घराघवस्य नाटकस्य लेखकः। 'मुरारेस्तृतीयः पन्थाः' इति प्रसिद्धमाभाणकं तद्विषयकमेवेति साहित्यशास्त्रिणां विचारः। अयं च मीमांसादर्शने नूतनपरम्परा प्रवर्तको मुरारिस्ततोऽन्यो मुरारिः। आसु तिसृषु परम्परासु भाट्टपरम्परायाः सर्वाधिक-प्रचारोऽभूत् प्राभाकरपरम्परायास्ततोऽल्पीयान् प्रचारो जातः। इयं तृतीया मुरारि-परम्परा तु नाममात्रावशिष्टेव दृश्यते। अस्य कारणं वर्तते-एतत्परम्परालिखित-साहित्यस्य प्रायो लोपः। तथाप्येतस्याः परम्परायाः शास्त्रीयं स्वरूपं यत्र तत्र स्थानेऽ-

१. गुरुणि गुरुमते ज्यौतिषे शास्त्रकेऽपि। प्रथितविमलकीर्तिर्वैद्यके शब्दशास्त्रे॥

२. अवज्ञां येऽस्माकं विदधति जनाः केचिदपि ते
विजानन्ते प्रायः स्वमतिपरिणामावधि कियत्।
न तानुद्दिश्येयं कृतिरपि तु मत्तुल्यमहिमा
जनिष्यत्येकोऽपि स्वकृतगुरुसेवाहृततमाः॥ दीपिका

स्माभिः प्राप्यते। अवश्यमेवायं मुरारिमिश्रः प्रतिभासम्पन्नो महान् विद्वानासीत्। मीमांसकानां मतेन "मुरारेस्तृतीयः पन्था" इत्याभाणकमत्यन्तं प्रसिद्धमेतद्-विषयकमेव वर्तते। अयं तृतीयः पन्थाः अनेन प्रवर्तितो मीमांसादर्शनस्यैषा भाट्ट-प्रभाकरपरम्पराद्वयभिन्नः तृतीया परम्परैवास्तीति निश्चप्रचम्। अस्याः परम्पराया विवेचनमत्र प्रसंगे क्रियते।

रचनाः

एतस्य रचनाविषयकस्रोतः किम्वदन्तीमात्रम्। किञ्चित्कालपूर्वमस्य रचनाया कतिपयांशो डा० श्रीमदुमेशमिश्रेण प्राप्त इति महतः सौभाग्यस्य विषयः। अत्र प्रथमा रचना त्रिपादनीतिनयमिति वर्तते द्वितीया च 'एकादशन्यायाधिकरणमस्ति। प्रथमायां जैमिनीयसूत्राणां प्रारम्भिकपादचतुष्टयी व्याख्याताऽस्ति द्वितीयायां च जैमिनीयसूत्राणामेकादशस्याध्यायस्य कतिचिदंशा विवृता वर्तन्ते। इमे द्वे अपि प्रकाशिते स्तः।

कालः

डा० गङ्गानाथ झा डा० श्रीमदुमेशमिश्रयोः प्रयत्नेनास्य कालोऽपि विज्ञातो बभूव। स्वयं मुरारिमिश्रः स्वकीयरचनाया विवरण-विवेक-पञ्जिका-परिभाषाणां चन्द्र-श्रीकर-नन्दनादीनां च नामोल्लेखं करोति। इमे ग्रन्था लेखकाश्च तेनोल्लिखिताः। चन्द्रस्य मीमासंकस्य पञ्जिकायाश्चोल्लेखादयमवश्यं शालिकनाथात्परवर्ती सिद्धयति। अतो मुरारिरेतेभ्यः पश्चात् बभूवेति सिद्धयति। गङ्गेशोपाध्यायतनयेन खिष्टीयत्रयोदश-शताब्दीस्थेन वर्धमानेन स्वीयन्यायकुसुमाञ्जलिव्याख्याग्रन्थे मुरारिस्तृतीयपरम्पराया लेखकत्वेनोद्धृतः। अतोऽस्य कालस्ततः प्राक्तनः। इत्थमस्य समयः खिष्टीयैकादशद्वादश-शताब्दयोर्मध्यस्थ इति निर्णेतुं शक्यते।

एतदीया विचाराः

दौर्भाग्यादस्य सकलो विचारविशेषो नोपलभ्यतेऽस्माभिस्तथापि यावन्तो विचारा उपलभ्यन्ते त एवास्य विचाराणां महिमानं गरिमाणं स्पष्टतामुपयोगिता मेतस्य वैदुष्यं च दर्शयितुं प्रत्यक्षप्रमाणायन्ते। विशेषतः प्रामाण्यवादसम्बद्धा इमकस्य विचाराः सर्वतोभावेन स्वतन्त्रस्थितिका नूतनाश्च प्रतीयन्ते। अयं हि विख्यातो नैयायिकोऽप्यासीत्। अतोऽनेन मीमांसकैः—कुमारिलभट्टेन विशेषतो गुरुप्रभाकरेण च संस्थापितः स्वतःप्रामाण्यवादो न हि संपोषितः। तस्यैतद्विषयको विचारो द्वयोरपि तयोर्विचाराद्भिन्नो न्यायदर्शनविचारप्रभावापन्नश्च दृश्यते।

विद्वत्कृतादरः

विवशतावशंवदा वयमस्य विषये नाधिकं वक्तुं प्रभवामस्तथापि तैस्तैर्विद्वत्तल्लजै र्यत्र एनमुद्धृत्यास्य सिद्धान्तं प्रति या काप्यगाधा श्रद्धा महानादरश्च प्रदर्शितौ तेनास्य वैदुष्यं स्पष्टमेवानुमातुं शक्यते। यत्र क्वापि विद्वांसः "मिश्रास्तु" इत्येवं बहुवचनेनास्योद्धरणं प्रस्तूयैतस्य मतं खण्डयन्ति यद्यपि, तथापि बहुवचनेन तं प्रति सम्मानमेव तत्र दर्शितं भवति। किञ्च खण्डनाय यन्मतमादीयते विद्वद्भिस्तत्तुच्छं न भवति अपितु महत्वं तत्र दृष्ट्वैव तस्य खण्डनाय तैरवधानं दीयत इति नाविदितं विपश्चिताम्। स्वयं गागाभट्टेन कुमारिलो यथा सम्मानेन सह स्मर्यते तथायमपि। गङ्गेशोपाध्यायस्य तनयेन वर्धमानेन स्वकुसुमाञ्जलिव्याख्यायामेष यथा स्मृतस्तथानुपदमेवोक्तम्। इत्थं स्थाने स्थाने विद्वत्प्रदत्तसम्मानमस्य तात्कालिकं महिमानं ख्यापयति। भवतु नाम तस्य साहित्यं तदीयविचारद्योतकं विलुप्तं किन्तु तत्र तत्रोद्धरणेन तदीयवैदुष्यपरिमलो मीमांसादर्शनमामोदयत्येव। अस्य महतो विचारकस्य ये येऽनुयायिनस्तेषामन्वेषणं कर्तुमशक्नुवतो मम महद्दुःखसंकोचौ स्तः। यद्यस्य साहित्यं प्राप्तं भवेत् तदा मीमांसादर्शनवाङ्मयं किमप्यालोकविशेषमवाप्नुयादिति निश्चप्रचम्।

समीक्षा

पूर्वोक्तस्तम्भेषु प्रतिपादिता मीमांसादर्शनस्य तिस्रोऽपि परम्पराः दर्शनमिदं समधिकसम्पुष्टं चक्रुरित्यत्र न कोऽपि संशयः। त्रयाणामप्येतेषां सम्प्रदायानां प्रवर्तका विद्वांसो विलक्षणप्रतिभाविलसिताः सूक्ष्मातिसूक्ष्मवस्तुतत्त्वविचारकाश्चासन्नित्यत्र न कश्चन संशयावकाशः। यद्यप्येषु तृतीयस्य महामनीषिणो विचारेण वयमपरिचिताः स्मः तथापि प्रथमद्वितीययोर्विचारेण वयं पूर्णरूपेण परिचिताः स्म एव। कुमारिल प्रभाकरौ गुरुशिष्यावास्तां न वाप्यास्तां तथापि द्वयोरेतयोः कोऽपीतरस्मादल्पीयान् न प्रतीयते। प्रभाकरस्य विचाराः कुमारिलविचारादधिकप्रौढाः भवन्तु वा न वा ते तस्य तेभ्योऽधिकगभीरास्तथापि कौमारिली शैली साहित्यिकत्वात्प्राभाकरीं तामतिशेते। मन्ये, प्रभाकरस्य सिद्धान्तस्तदीयतर्कभेद्यकपाटावृतस्तथापि कुमारिलस्य विचक्षणैः तत्रापि मिथोविलक्षणैरनुयायिभिः प्रयुक्तानां युक्तिहेतिबाणततीनामाघातैस्सश्छिन्न-भिन्नोऽभूदेव। यावन्तो योग्याः प्रखरवैदुष्या अनुयायिनः कुमारिलेनावाप्तास्तावन्तो न प्रभाकरेण। सर्वविधवैशिष्ट्ये सत्यपि प्राभाकाराः सिद्धान्तास्तथाधिकप्रचारं यन्नाधिगतास्तत्रेदमेव मुख्यं कारणम्। योग्यानुयायिसम्पत्तिदृष्ट्या विचार्यते चेत् कुमारिलो नितरां भाग्यवान् प्रतीयते। तस्य प्रत्येकं भक्तानां शिष्याणाञ्चेतिहासे प्राप्तमहत्वपूर्णं स्थानं वर्तते। मण्डनमिश्रवाचस्पतिमिश्रपार्थसारथिमिश्रसदृशास्तर्क-प्रवीणा महान्तो विद्वांसोऽत्र परम्परायां बभूवुः। अतः कापि परम्परा तत्तुल्या यदि नाभूत्, नात्र किमपि चित्रम्। यदि कुमारिलपरम्परोक्तमिश्रत्रयसदृशाः पञ्च दश वा महामनीषिणः प्राभाकरसम्प्रदायः प्राप्स्यत्तर्हि सोऽपि प्राप्तात्युन्नतस्थानोऽभविष्यदित्यत्र न काप्याशङ्का। प्रतिवादिभयंकरेषु तादृशेषु प्रतिद्वन्द्विषु सत्स्वपि स तस्य सिद्धान्तश्च तथाकथितसमादरेण सह यज्जीवति स्म तदेव तस्य तत्संप्रदायप्रवर्तकस्य वैदुष्यं तस्य सम्प्रदायस्य च मौलिकत्वं प्रमाणयति।

अतिरिक्तान्यपि भाट्टपरम्पराप्रगत्याधिक्यस्यानेकानि कारणानि सन्ति। भगवता शंकराचार्येण स्वकीययुगस्यैकमात्रसार्वदैशिकप्रतिनिधिना न केवलमस्माकं विचारा एव प्रभाविताः किन्त्वस्माकं नेतृत्वं कुर्वता तेनास्मदीयजीवनपद्धतिरपि परिवर्तिता। तस्य सिद्धान्तानामेकाधिपत्यमखिलदेशव्याप्यासीत्। तस्यैकैकं वाक्यं विद्वद्भिर्वेदवाक्यसदृशं मत्वा समादरः समर्पितः। तेन स्वजीवनप्रक्रियायां स्वीयासु रचनासु च मीमांसादर्शनप्रतिपादितं सिद्धान्तमात्मसाद् विधाय तस्मै

महत्वपूर्णं स्थानं प्रदत्तमिति सर्वविदितमेव। एतत्सर्वं प्रकुर्वता तेन स्वकीयाऽऽस्था भाट्टपरम्परां प्रत्येव प्रदर्शिता नान्यविद्यापरम्परां प्रति। तस्य विचारपर्यालोचनेन स्पष्टं ज्ञायते—'मीमांसाया अन्यविद्यापरम्परा विवादसामग्रीमेव प्रस्तौति। व्यवहार दृष्ट्या विचार्यते चेत् भाट्टपरम्परैव सर्वोच्चसत्कारमर्हति नान्येति''। आचार्यशङ्क-रस्यायमुद्घोषः साधारणजनोक्तिरपि नासीत् अयं तु कस्यापि सम्प्रदायस्य मान्यतायाः प्रमाणपत्रमासीत्। शाङ्करविचारेणानेन प्रभाविताः प्रायो वेदान्तस्य सर्वे समुपासका एतत्परम्पराध्ययनमनिवार्यं मत्वैनामधिजगुः ततोऽतिरिक्ता परश्शता अपि जनास्तद्वचनप्रेरिता एतस्या अध्ययने दत्तचित्ता बभूवुः। 'व्यवहारे भट्टनय' इत्युक्तिः शास्त्रेषु सर्वसम्मता लोकोक्तिरिव संजाता। भाट्टपरम्पराया बहवोऽनुयायिनो यद्बभूवुस्तस्येदं सर्वमहन्निमित्तम्। देशस्याखिलः कर्मकाण्डोऽप्यनया भाट्टपरम्परया यथातितरां प्रभावितस्तथा नान्यः। अन्यपरम्परा कर्मकाण्डस्य मार्गप्रदर्शनं तथा न कृतवती यथासौ। अन्ये परम्परे अपि चैतत्परम्परातः प्रत्यक्षमप्रत्यक्षं वा प्रेरणां जगृहतुः। चतुर्दश्यां पञ्चदश्यां शताब्द्यामागतायां सत्यान्तु अस्या अनुयायिनां संख्या सहस्रेभ्योऽपि पारंगता। दक्षिणभारतं मिथिला चैतेषां केन्द्रस्थानभास्ताम्। आतत्कालं मथिलायान्तु पूर्वमीमांसाया अध्ययनाध्यापने चरमसीमां भेजाते। ख्रिष्टस्य पञ्चदशशताब्द्यां विद्यमानस्य विद्यापतिठक्कुरस्य कवेराश्रयदातृ राज्ञः शिवसिंहस्य कनिष्ठभ्रातृ राज्ञ्या विश्वासदेव्याः काले एकस्य पुष्करस्य (ह्रदस्य) चतुश्चरणयागावसरे मीमांसकचतुर्दशशती आमन्त्रिता तत्र समवेता आभूत्। डा० श्रीमदुमेशमिश्रस्य लेखानुसारेणैषां मीमांसकानां विदुषां सूची मैथिलपण्डितस्यैकस्य सविधे सुर-क्षिताऽऽस्त इति।

अनेन संक्षिप्तविवेचनेन सिद्धमेव—संख्ययाऽल्पिष्ठेऽपि मीमांसालेखके तदनुयायि नामध्ययनापनरतानां विदुषां संख्या भूयसी। देशे तस्मिन्नाध्यात्मिके काले लेखका अस्य दर्शनस्य न भूयांस आसन्निति विचारोऽपि न मह्यं रोचते, दौर्भाग्यात्प्राभाकरपरम्परायाः कृत्स्नसाहित्यानुपलब्धेः, योग्यानुयायिनां सम्प्राप्तेरभावात् प्राभाकरग्रन्थानां तत्सम्प्र-दायस्य लेखकानां परिपूर्णज्ञानाभावात्, मुरारिमिश्रीयपरम्परापरकाणां पुस्तकानां स्वकीयायोग्यतावशात्संरक्षणे अस्माकमसामर्थ्यात्। एतत्सर्वमेतदीयपराग्रन्थाद्यनु-पलब्धेः कारणं न भवेच्चेतद्दर्शनमद्याधिकं समुन्नतमवश्यं दृश्येत।

आधुनिकः कालः

सामान्यपरिचयः

संस्कृतसाहित्यमत्रान्तरालकाले विविधविपद्ग्रस्तमभूत् विविधशासनतीव्र-क्रूरकुदृष्टेरिदं लक्ष्यश्चाभूत् तथापि तस्य सा महती शक्तिरद्य प्रशंसार्हा यया तादृशं संघर्षसमयं विजित्य तज्जीवितुमशकत्। भारतस्य सुपुत्राः साधकतपस्विवद्व्यतीत-जीवनाः सर्वविधं भौतिकं कष्टं सहमाना देशस्यैतममूल्यनिधिमरक्षन् विशेषतो निजत्याग-कष्टसहिष्णुत्वादिगुणैर्विख्याता अत्रत्यविप्रवर्गाः स्वसर्वसुखसौविध्यं तृणीकृत्य संस्कृताध्ययनाध्यापनयोः संलग्ना इमं निधिं प्राणपणेनायासिषुः। विभिन्नैः प्रलोभनैरपि ते स्वाध्यायान्न प्रच्याविताः। भुवनं संस्कृतं यदेकां सर्वगुणसम्पन्नां भाषामङ्गीकरोति तत्र तादृशस्त्याग एव कारणम्। भारतवर्षस्य सविधे तु संस्कृतान्महती कापि पैतृक-सम्पत्तिर्नास्त्येव। संस्कृतसाहित्यं तदीयमवदानानि च यदि कोऽपि पृथक्कुर्यात् तर्हि भारतीयता नामैकं किमपि नात्रावशिष्येतेति मम विचारः।

अस्तु, कालस्य परिस्थितीनामयं वज्रपातः संस्कृतसाहित्यस्येतरेष्वङ्गेष्विव मीमांसादर्शनेऽप्यभवत्। विशेषतो ब्रिटिशशासनसमये एवंभूताध्यात्मिकविचारधारा विलुप्तप्राया इवाभूवन्। भारतीयमानवानां जीवनलक्ष्यमेव विपर्यस्तं बभूव। येषां भारतीयानां संस्कृतिपरम्परासिद्धं जीवनलक्ष्यमाध्यात्मिकमुत्थानमासीत् ते साम्प्रतं भौतिकसमुत्थानमेव जीवनसर्वस्वं स्वचरमलक्ष्यं च स्वीचक्रुः। संसारस्य बाह्यं चाकचक्यं तेभ्यस्तथा रुचिरं सुचिरस्थायिसत्यं च प्रतीतमभवद् यथा ते कस्याप्य-दृष्टस्य फलस्य प्राप्तिसाधकोपासनातो दृष्टफलदायिनीमुपासनां वरीयसीममन्यन्त। समयस्य प्रवाहोऽपि कोऽपि प्रबलवेगो नद्याइव भवति यं कोऽपि सहसा रोद्धुं न शक्नोति। लोकानां मानसे यदाप्रभृतीदृशं मौलिकं परिवर्तनमभवत्तदा प्रभृति संस्कृतसाहित्यस्य ह्रासः प्रारभत। संस्कृतसाहित्येन कदापि लौकिकचाकचिक्यामरुत्तरयान-गगनचुम्बि-प्रासादादिभौतिकवैभवं प्रति नास्था दर्शिता न वा तज्जीवनस्य परमपुरुषार्थतया स्वीकृतम्। संस्कृतसाहित्यस्य समुन्नतिकाले स्थिता राजानो महाराजाः सम्राजश्च तपोवनं गत्वा तत्र निवसन्तो जीवनस्य नियतकालं यापयन्ति स्म। किञ्च तादृशशिक्षा-धिष्ठातॄणां ते सादरचरणसेविनो भवन्ति स्म। अत्रत्यः प्रधानमन्त्री जीवनयापनसाधन-प्रक्रियया कीदृशः साधारणः विचारेण मानसेन व्यवहारेण च कीदृश उच्चैस्तम आसीदित्यस्य निदर्शनं चाणक्यो वर्तते। स हि स्वकीयशिष्यैर्निर्मितगोमयानुलिप्ते कुटीरे निवसन् विशालं साम्राज्यं सम्यक् साधु चाशासत्। क्व तत् स्वर्णवर्णं प्रभातम्

क्व चेयं ध्वान्ता सन्ध्या ? एतावद्भूय उच्चैस्तनेभ्य आदर्शेभ्योऽधो निपत्य केवलं मरुत्तरयानशोभनप्रासादादिसदृक्षेतरभौतिकसमुन्नयनमेव जीवनसर्वस्वमिति कथं कथयेत् ? प्रमाणयेच्च संस्कृतसाहित्यसदृशमुन्नतं साहित्यम् । एतादृशपरिस्थितौ प्रथममुर्दूभाषा ततश्चाङ्लभाषा च राजकीयसम्मानमवाप्ते । अनयोर्ज्ञातारोऽध्येतारोऽध्यापयितारश्चोच्चपदैः प्रतिष्ठाभिश्चालंकृता बभुवुः । अतो लोकानां विचारे परिवर्तनेन प्रारब्धम् । एतदेव संस्कृतसाहित्यास्याध्ययनाध्यापनादिगतह्रासस्य कारणम् ।

एतादृशे भौतिकवादयुगे कर्मकाण्डस्य जनजीवने किमास्पदमवशिष्टं भवितुमर्हति ? प्राङ्मानवजीवने प्राप्तानिवार्यस्थानः स साम्प्रतं शास्त्रीयसम्पत्तिमात्रमभवत् । तस्यानुष्ठानप्रवृत्तेः का कथा पाश्चात्यविचारप्रवहद्भावना जनास्तस्य भ्रान्तिपूर्णाः समालोचना अपि कर्तुं प्रवृत्ताः । ईदृशकुत्सितविपरीतस्थितौ मीमांसासदृशदर्शनस्य प्रचाराल्पत्वं तु स्वाभाविकमेव । लोकाः क्षीणचिन्तनशक्तित्वाद् गम्भीरचिन्तनसाध्यं मीमांसादर्शनसदृशं शास्त्रं विहाय सरलातिसरलं रोचकं साहित्यकाव्यसदृशं विषयं पठितुं प्रारेभिरे । प्रायः सर्वेषां दर्शनानां विशेषतो वैदिकवाङ्मयानां परम्पराप्रवाहो यद्यपि न शुष्कस्तथापि मन्दस्त्ववश्यमभूत् ।

इमानि सर्वाणि ह्रासनिमित्तानि सर्ववेद्यत्वात्तथा प्रसिद्धानि यथास्य विस्तरेणाकलनं नावश्यकम् । ईदृशे महाभयावहे संक्रमणकालेऽपि पण्डितैः साहित्यमिदमरक्षीत्यनुपदमेव मयोक्तम् । अप्राप्तराजकीयाश्रयसंरक्षणैर्भौतिकलाभसंभावनारहितैर्बुभुक्षितोदरैः स्वकर्तव्यबुद्ध्या स्वकीयं कृत्स्नं जीवनमेतस्मै समर्पयाञ्चक्रे । एतादृशेषु तपस्विष्वेव मीमांसादर्शनसेवका अपि गण्यन्ते तादृशविपरीतपरिस्थिकदेशकालावपेक्ष्य विचार्यते चेन्मीमांसादर्शनोपासकानां संख्याऽपि नातिस्वल्पा प्रतीयते । ख्रिष्टीयायां विंश्यां शताब्द्यामपि बहुभिर्विद्वद्भिर्मीमांसादर्शनं सर्वतोभावेनासेवि साम्प्रतमपि चैतत्सेव्यते । अद्याप्यस्माकं देशे परश्शता मीमांसकोत्तमा दर्शनमिदं सेवमाना जीवन्ति किन्तु तेषां सेवा मूकसेवाः सन्ति । परम्पराणां बन्धनमिदानीं पूर्णतो विच्छिन्नम् । व्यापकधियाऽध्ययनमध्यापनञ्च प्रचलतः । तेष्वेतेष्वल्पिष्ठा एव स्वविचारं लिखितवन्तः । अत्रोऽत्र प्रकरणे येषां ग्रन्था लेखा वा मयोपलब्धास्तेषामेव निरूपणं मम विषयो भविष्यति । तथापि सर्वदावधीयते मया तेऽनिबद्धस्वविचारा मीमांसका मूकसेवकाः स्वाध्यायरता अपि दर्शनस्यास्य विकासे नाल्पं महत्त्वं बिभ्रतीति ।

धाराद्वयी

विंश्याः शताब्द्या मीमांसका अत्र दर्शने विचारं कार्यं च कुर्वाणा धाराद्वयं दिशाद्वयं वाऽवलम्बमाना दृश्यन्ते । तेषु केचित्परम्परीणपरोवरीणोभयमालोचनात्मक

प्रणाल्या समधीतमीमांसादर्शना विवादास्पदविषयानधिकृत्य स्वीयानुसन्धानोपलब्ध निर्णयान् प्रास्तौषुः। एवंविधानां विदुषां कार्यक्षेत्रं प्रायः पठनमननलेखात्मकमेवाभूत् तेऽध्यापनेऽल्पमेव प्रावर्तन्त। संस्कृतमहाविद्यालये स्वाध्यापनेन जनितमीमांसा-शास्त्राचार्यविद्वांसोऽपि ते विद्वांसः स्वकीयमौलिकावदानेनैतद्दर्शनेतिहासे प्राप्तप्रतिष्ठित-स्थाना भूरि भूरि प्रशस्याः। तेऽध्यापनात् सशपथं दूरीकृतात्मानोऽभूवन्। न च तेषां कोऽपि शिष्योऽभूदिति तात्पर्यं मम पूर्वोक्तकथनस्य नास्ति किन्तु तेषां प्रमुखकार्य माश्रित्य ते मया लेखधाराया विद्वांसः स्वीकृता इति।

द्वितीयस्यां धारायां मया ते, विद्वांसः परिगणिता ये मुख्यतयाऽध्यापनकार्य-निरताः परश्शतानां मीमांसकानां निर्मातारोऽभूवन्। मौलिकान् लेखकाँश्छात्रानध्या-पयन्तो लिलिखुः। एतस्यां धाराद्वय्यामेव प्रायो विंश्यां शताब्द्यां लिखितं सर्वं मीमांसादर्शनसाहित्यं वयं विभक्तं पश्यामः। अनयोः प्रथमायाः स्रोतो महामहोपाध्यायः श्री गङ्गानाथ झा वर्तते, द्वितीयस्याश्च महामहोपाध्यायाः श्री कुप्पुस्वामिनो विद्यन्ते।

श्री गङ्गानाथ झा

बिहारप्रान्तस्य दरभंगा (साम्प्रतं) मधुबनीमण्डलस्थितगन्धवारिग्रामे १८७१ ख्रिष्टीयवर्षस्य सितम्बरमासीय २५ तमतारिकायां लब्धजनिरसौ रामकाशीदेवी तीर्थनाथझानाम्नोः मातापित्रोस्तृतीयः पुत्र आसीत्। अंग्रेजी संस्कृत हिन्दीति भाषात्रये प्राप्तसमानाधिकारस्तत्तच्छास्त्रनिष्णातेभ्यो गुरुभ्यो विधिवदधीतपूर्वोक्त-भाषात्रयसाहित्यः प्रख्यातनामा विद्वानभूत्। एतस्य गुरुषु श्री चित्रधरमिश्रजयदेव मिश्रौ विशेषेणोल्लेखनीयौ स्तः। वाराणसीमेत्यासावन्येषामपि वेदाङ्गानामध्ययनं महामहोपाध्यायश्रीशिवकुमारमिश्रगङ्गाधरशास्त्रिप्रभृतिभ्यो विद्वत्तल्लजेभ्यः सम्पन्नं चकार। अस्य ह्यध्ययनेऽन्यलेखादिकार्ये च वर्तमानयुगस्य प्रभाव आसीत्। अतोऽस्य कृत्स्नं ज्ञानं परम्परीणपरोवरीणोभयविद्याध्ययनफलत्वादुभयविधसमालोचना-प्रणालीमशिश्रयत्। संभवतोऽनेन मीमांसादर्शनं श्रीचित्रधरमिश्रादधीतम्। मीमांसा-दर्शनस्य प्रणालीद्वयेन नितरां परिचितोऽसावुभयीं परम्परामाश्रित्य ग्रन्थानरचयत्। ख्रिष्टीये १९०१ तमे वर्षे प्रभाकरपरम्परामाश्रित्यानेन यो मौलिको ग्रन्थः शोधप्रबन्धोऽ-लेखि तेनैव च इलाहबाद (प्रयाग) विश्वविद्यालयादसौ "डाक्टर आफ लेटर्स) (D. L. TT.) इत्युपाधिमवाप्तवान्। प्राभाकरपरम्परातोऽधिकं कार्यं तेन कुमारिलपरम्परामधिकृत्य कृतम्। कुमारिलभट्टीयतन्त्रवार्तिकश्लोकवार्तिकयोराङ्ग्ल-भाषानुवादौ शाबरभाष्यस्य चानुवादोऽस्य ग्रन्थाः। मण्डनमिश्रकृताया मीमांसानुक्रमणिकायाः सरलसंस्कृतलिखिता मीमांसामण्डननाम्नी व्याख्याऽप्यनेन व्यधायि। पूर्वमीमांसाविषयिणी एतदीया श्रेष्ठा रचना "पूर्वमीमांसा इट्स् सोर्सेज" नाम्नी वर्तते। एतस्याश्च प्रकाशनम् वाराणसेयहिन्दूविश्वविद्यालयेन

कारितम् । तस्याः सामान्यसम्पादकः डा० श्री एस् राधाकृष्णन् महोदयः विशेष सम्पादकश्च प्रो० रानाडे आस्ताम् । अस्मिन् ग्रन्थे मीमांसादर्शनस्य सर्वासां परम्पराणां तदीयानां सिद्धान्तानां प्रवर्तकानाञ्च विततो व्यापकश्च परिचय उपलभ्यते । अयमेक एव ग्रन्थो मीमांसायाः सामान्य ज्ञानायालमस्ति । अस्यैव ग्रन्थस्यान्ते महामहोपाध्यायेन डा० श्रीमदुमेशमिश्रेण लिखितं मीमांसाया एकं संक्षिप्तमितिवृत्तमपि प्रस्तुतमस्ति । तेन चायं ग्रन्थः आत्मना परिपूर्णोऽभूत् । आभ्यो मौलिककृतिभ्योऽतिरिक्ता न केवलं मीमांसादर्शनम् किन्तु संस्कृतवाङ्मयस्यान्यान्यप्यङ्गान्याश्रित्य बहु लिखितम् । पञ्चाशदधिका ग्रन्थास्तेन सम्पादिताः । १९४१ ई० वर्षे नवमनवम्बरे स प्रयागे दिवंगतोऽभूत् । एतस्य सुपुत्रेषु अमरनाथ झा, आदित्यनाथ झा नामानौ शिक्षाप्रशासन क्षेत्रे सुविख्यातावास्ताम् । अमरनाथ झा महोदयः प्रयागविश्वविद्यालये प्राध्यापकपदमध्यतिष्ठत् । डा० गंगानाथ झाः स्वजीवनकालेऽनेकासां शिक्षणसंस्थानां प्रधानपदमलंचकार । स इलाहाबाद सेण्ट्रलकालेज (महाविद्यायस्य) प्रोफेसरः (प्राध्यापकः) आसीत् वाराणसेयस्य संस्कृतकालेजस्य साम्प्रतं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतां गतस्य प्राचार्यपदं नवनिर्मितस्य इलाहाबादीयविश्वविद्यालयस्य नववर्षपर्यन्तमुपकुलपतिपदं च शोभयाम्बभूव । तदीयकृत्स्नं जीवनं विविधक्रियाकलापैर्यद्यपि सततं नितरामाकण्ठमग्नमासीत् तथापि स तादृक्षस्वकीयसमयाभावसंकुलेऽपि जीवने मीमांसादर्शनं कदापि न व्यस्मार्षीत् आजीवनमन्तिमक्षणं चैतदुपासाञ्चक्रे । तत्कृतं कार्यं महदास्पदमधितिष्ठति ।

एतस्यानुयायिनोऽतिविततसंख्यकाः सन्ति । अनेन परमा योग्या अधिकृताश्च शिष्या उपार्जिताः । एतस्य कार्यं प्रशंसत एनं प्रति श्रद्धाञ्जलिसमर्पणसमये भावनाभिव्यक्ति कुर्वतः प्रो० आर० डी० रानाडे महोदयस्य प्रशस्तिवाक्यमुद्धरणीय मिहोध्रियते मया—"विरल एव कश्चिदेतादृशो विद्वान् भारते संभूतो भवेत्प्रायः येन मीमांसादर्शनविषयकमीदृशममूल्यं प्रशस्तं महच्च कार्यं कृतं भवेत् तेन श्लोकवार्तिक तन्त्रवार्तिकशाबरभाष्याण्यनूदितानि । पुनर्जन्मवादविश्वस्ता वयं श्री गङ्गानाथं कुमारिलावतारं मन्यामहे चेदत्र न काप्यत्युक्तिः यद्यपि तस्य शोधप्रबन्धः प्रभाकरविषयकः परन्तु तेषामितराणि सर्वाणि कार्याणि कुमारिलाश्रितानि कुमारिलवच्च प्रयागगङ्गातटे शरीरं विससर्ज । जीवनान्तिमसमये मासैकावधिपण्डितप्रवरमहं योगासनाधिष्ठितमद्राक्षम् । दिवंगमनकालाद्धोराषट्कपूर्वंमहमुमेशमिश्रश्च तं प्रणमितुमगमाव । इदमेव च तदीयमन्तिमं दर्शनमभूत् । स दर्शनकेसरी आसीत् ।

प्रो० रानाडे लिखितमिदं वाक्यकदम्बकं तदीयव्यक्तिगतजीवनं सेवाञ्च प्रकाशयितुं पर्याप्तमस्ति । झा नाभविष्यच्चेद् आंग्लभाषामाध्यमेनैव पठनलेखनज्ञानार्जनप्रवृत्तिकं साम्प्रतिकविद्वद्वर्गं मीमांसादर्शनं को हि नामानेष्यत् । संस्कृतान-

भिज्ञोऽपि मीमांसादर्शनपरिचितो यदद्य भवति तद्धि तदीयप्रतापविटपस्यैव फलम्। समालोचनायाः वर्तमानेऽत्र संक्रमणकाले मीमांसादर्शनेन यदाधुनिकप्रतिष्ठिताधिष्ठान प्रापणमेव तस्याक्षय्यं स्मारकम्।

महामहोपाध्याय श्रीकुप्पुस्वामिशास्त्रिणः

अध्ययनाध्यापनानुसंधानादिसर्वविधविद्याविकासोपायैः मीमांसाशास्त्रं सार्वदेशिकविश्वजनीनप्रगत्या संयोजयितुं प्रगतिपथस्य सत्वरपथिकं च विधातुं श्रीशास्त्रिभिःसर्वाधिकं प्रयतितमत्र न कोऽपि संदेहः। दक्षिणे मीमांसादर्शनस्य द्वे परम्परे महामहोपाध्यायश्रीकुप्पुस्वामिशास्त्रिणः प्राक् प्रचलिते आस्ताम्। तत्रैका मन्नारगुडीनामनगरनिवासिनः श्री राजूशास्त्रिणआसीत् द्वितीया च कावेरीतट (तञ्जोरप्रान्त) वर्तितिरूवसनल्लूरनिवासिनां श्रीरामसुब्बाशास्त्रिणाम्। इमौ द्वावपि विद्वत्तल्लजावास्ताम् इमे परम्परे अपि नितरां दीर्घे अभूताम्। अनयोर्द्वयोः शिष्याणां संख्यापि भूयसी बभूव। अयमनयोः प्रथमपरम्परावंश्य आसीत्। मद्रासप्रान्ते कावेरीतटवर्ति 'गणपति अग्रहारम्' एतस्य जन्मभूः। अयं पूर्वोत्तरमीमांसयोरप्रतिभटः प्रौढतमः संस्कृताङ्ग्लभाषाद्वये च प्राप्तसमानाधिकारो विद्वानासीत्। तिरुवैय्यार-संस्कृत-कालेजाध्यक्षः मैलापुरसंस्कृतकालेजप्राचार्यो मद्रासप्रेसीडेंसीकालेज प्राध्यापकश्चायं मीमांसादर्शनप्रवीणाननेकान् विदुषः शिष्यानजीजनत्। इमे विद्वांसोऽस्य दर्शनस्यामूल्यरत्नान्यभवन्। मीमांसादर्शने चैषामाधिपत्यमेवासीत्।

श्री कुप्पुस्वामिभिरध्यापनातिरिक्तसूक्ष्मगवेषणा-वैदुष्यसम्पन्ना अनेके लेखा लिखिता बहवो ग्रन्थाश्च सम्पादिताः। ते चाद्यापि विद्वद्भिरतितरामादरणीयाः सन्ति। इलाहाबादकलकत्तादिनगरेषु समायोजिते तत्तत्प्राच्यविद्यासम्मेलने (ओरियण्टल कान्फ्रेंसे) प्रभाकरकुमारिलभट्टयोः कालं तदीयान्यविवादास्पदं च विषयमवलम्ब्य स्वनिर्णयः सिद्धान्तपक्षतयोपस्थापितः। स्वतन्त्रचिन्तनव्यक्तित्वतया कतिपय विषयेषु डॉ० गङ्गानाथ-कुप्पुस्वामिनोर्वैमत्यमप्यासीत्, यदीयं दिग्दर्शनं यथास्थानं कृतमस्ति। इदं वैमत्यमपि वैदुष्यसम्पन्नं शास्त्रस्यास्य भूषणमेवाभवत्। न केवलं भारतस्य दक्षिणे भागे किन्तु कृत्स्ने परिसरे सुयोग्यान् विबुधान् पठनीयमननीयांश्च ग्रन्थाँश्च जनयन्तोऽस्य शिष्या मीमांसादर्शनोत्कर्षं सडिड्डिमनादमुद्घोषयामासुः। तत्र महामहोपाध्यायोऽनन्तकृष्णशास्त्री कलकत्ताविश्वविद्यालये, महामहोपाध्यायश्चिन्न स्वामिशास्त्री वाराणसेयहिन्दूविश्वविद्यालये, श्री टी०आर०चिन्तामणिर्मद्रासे च प्रतिष्ठित पदमध्यासीनास्तदवशेषकार्यविशेषं विशेषेण पूरयन्ति स्म। एभ्योऽन्येऽपि तदीयाश्छात्रा उच्चादुच्चतमेषु शिक्षाप्रशासनादिपदेषु समासीना देशं स्वीयैः स्वीकृतकर्तव्यैः सेवन्ते। एतेषां शिष्याणामेव सत्प्रयत्नैस्तदीयस्मारकरूपेण महामहोपाध्याय श्रीकुप्पूस्वामिशास्त्रिरिसर्चइन्स्टीट्यूट 'नाम्नी संस्थैका स्थापिताऽभूत्। इयं

संस्था वैदिकवाङ्मयस्य द्रढीयसीं सेवां करोति। अद्य देशस्य प्रतिकोणं यत्र यत्र मीमांसालोकः चकास्ति तत्सर्वमस्यैव महामनसोऽवदानम्। विश्वविद्यालयादिप्रणालीषु मीमांसादर्शनस्य यन्महत्वपूर्णं स्थानं विभिन्नस्थाने दत्तमस्ति तदेषामेव सेवाया मूर्तं स्वरूपमस्ति। एतेषां शताब्दी-समारोहः अस्मिन् वर्षे महता समारोहेण योजितः। एतेषां स्मृतौ श्रीकुप्पूस्वामिशास्त्रिशोधसंस्थानं मद्रपुर्यां संप्रतिष्ठितम्।

पण्डित सुदर्शनाचार्यः

पूर्वोक्तां परम्पराद्वयीमतिरिच्य वर्तमाना अपि ये केचन मीमांसका बभूवुस्तेष्वन्यतमः सुदर्शनाचार्यो भवति। अनेन ख्रिष्टीय १६०७ तमे वर्षे शास्त्रदीपिकास्तर्कपादमाश्रित्यैका व्याख्या लिखिता। तर्कपादावबोधायेतः सरलतमा विततमा च व्याख्या काप्यन्या नास्ति। रामानुजमतानुयायिनाऽनेन महामहोपाध्यायपण्डितगङ्गाधर शास्त्रिणः संस्कृतशास्त्राण्यधीतानि। यद्यपि विद्वन्मण्डल्या व्याख्येयं तथा न समादृता तथापि सरलसुगमपद्धत्या विषयावबोधीकरणसफलेयं व्याख्या छात्रैर्ग्रन्थावबोधेच्छुभिः सर्वत्र साभिनिवेशमङ्गीकृताऽस्ति। प्रारम्भे विवरणं ददानेनानेन कौमारिलप्राभाकर सिद्धान्तपार्थक्यमपि निरूपितम्। वारणसीतो मुद्रितप्रकाशिता चेयमिति।

कृष्णनाथो न्यायपञ्चाननः

सरलव्याख्याकृत्तया कृष्णनाथो मीमांसादर्शनेतिहासे सफलोऽतिप्रसिद्धश्च टीकाकारोऽमन्यत। नवद्वीपनिकटवर्ती भागीरथीतटवर्ती 'पूवस्थला' नामको ग्रामोऽस्य निवासभूमिः। मीमांसादर्शनस्यायं श्रेष्ठो विद्वानभूत्। आपदेवरचितन्यायप्रकाशाश्रिता 'अर्थदर्शनी' नाम्नी व्याख्याऽनेन लिखिता अर्थसंग्रहश्चानेन व्याख्यातः। अनयोर्ग्रन्थयो मूलग्रन्थसहितयोः प्रकाशनं कलकत्तातः सम्पन्नमस्ति। १८९९ ई० वर्षेऽनेन 'स्वीयार्थ दर्शनी' व्याख्या समापिता। एतेनैवैतस्य समयः निश्चित इति।

वामनशास्त्री किंजवडेकरः

पुण्यपत्तने (पूना नगरे) निवसताऽनेन मीमांसादर्शनस्य महती सेवा कृता किन्तु दौर्भाग्यादेवासावकालमृत्युग्रस्तो बभूव। पुण्यपत्तने मीमांसापुस्तकप्रकाशनायाधुनैका संस्था स्थापिता। अस्य च 'पश्वालम्भनमीमांसा' नामको ग्रन्थ आनन्दाश्रमसंस्कृतसीरीज (ग्रन्थमाला) तः पुण्यपत्तनात् प्रकाशितोऽस्ति। जीवनस्यान्तिमासु घटीषु प्रकरणपञ्चिकायाः कस्या अपि एकस्याः पुरातनव्याख्यायाः प्रकाशनकार्ये स संलग्न आसीत् यदिदानीमपि पूर्णतां नागमत्।

महामहोपाध्यायः पं० गोपीनाथकविराजः

वाराणस्याः गवर्नमेण्टसंस्कृतकालेजस्य य इदानीं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयो जातः, प्राचार्यो गोपीनाथकविराजः भारतीयदर्शनानां विशेषतश्च तन्त्र-

शास्त्रस्य प्रौढपण्डित आसीत्। पाश्चात्य-भारतीयदर्शनयोः रम्यं संमिश्रणमस्य वैशिष्ट्यमासीत्। परम्परीणपरोवरीणचिन्तनद्वयसमावेशादस्य पाण्डित्यमुभयविधानां विपश्चितामाकर्षणकेन्द्रमभवत्। डा० झाकृतस्य तन्त्रवार्तिकाङ्ग्लभाषानुवादस्य प्राक्कथनलेखो मीमांसादर्शनमाश्रितोऽस्य तद्दर्शनविषयकज्ञानगाम्भीर्यमभिव्यनक्ति। विलक्षणवैदुष्यसम्पन्नेनाप्यनेनाल्पमेव लिखितम् किन्तु यल्लिखितं तदस्य प्रतिभा-प्रसूतत्वाद्विलक्षणवैचक्षण्यज्ञापकम्। मीमांसा (मनुस्क्रिप्ट्स कैटलाग) पाण्डुलिपि सूची चाप्यनेन प्रस्तुता किञ्चिद्वर्षपूर्वमयं दिवगतोऽभूदिति।

महामहोपाध्यायः पी० वी० काणे

यद्यपि हिन्दूधर्मशास्त्रं काणेमहोदयस्य मुख्यो विषय आसीत्। स च तदेवावलम्ब्य मौलिकं कार्यं कृतवान् तथापि तस्य धर्मशास्त्रविषयकग्रन्थेषु पूर्वमीमांसासम्बद्धं तदीयमध्ययनगाम्भीर्यं स्पष्टमालोक्यते। मीमांसामधिकृत्याप्यनेनैका संक्षिप्तपरिचय-दायिनी पुस्तिका लिखिता। सा मीमांसा जगति नितरामुपादेया मन्यते। अयं बम्बईनगरप्रसिद्धप्राड्विवाककृतया लब्धप्रतिष्ठ आसीत्। पठनपाठनातिरिक्तव्यवसाय-व्यापृतजीवनोऽप्येष संस्कृतसाहित्यस्य यां सेवां चकार सा वस्तुतो महनीया विद्वद्भिर्भूरि स्तवनीया चास्ति। भारतप्रशासनेन सम्मानितोऽसौ 'भारतरत्न" इति सर्वोच्चसम्मानेन।

पं० पशुपतिनाथशास्त्री

बङ्गभूमेः प्रसिद्धो विद्वान् कलकत्ताविश्वविद्यालये मीमांसादर्शनस्य व्याख्या-तृपदमलंकुर्वाणोऽसौ पूर्वमीमांसाभूमिकाख्यं गहनसूक्ष्मविवेचनात्मकमेकं पुस्तकं प्रणिनाय। पुस्तकमिदं १९२३ ई० वर्षे प्रकाशितमासीत्। अत्र इतिहासदृष्ट्याऽनेकानि तथ्यानि व्याख्यातानि सन्ति। अल्पीयस्येव वयसि परलोकमयंगतः। अतोऽस्य प्रचुरसाहित्यिकावदानेन संस्कृतजगन्नितरां लाभान्वितं नाभवत्।

डा० ए० बी० कीथः

भारतीयदर्शनस्य सरुच्युपासकोऽयं पाश्चात्यो विद्वान् एडिनवराविश्वविद्यालये संस्कृतस्य प्राध्यापक आसीत्। अनेन प्रायः प्रत्येकं दर्शनमाश्रित्य लिखितम्। मीमांसा दर्शनविषयकोऽस्य 'कर्ममीमांसा' नामा ग्रन्थः १९२१ ईश्वीये वर्षे प्रकाशितो बभूव। अस्मिन् ग्रन्थे मीमांसायाः सर्वाण्यङ्गानि लब्धप्रकाशानि बभूवुः।

कर्नल जी० ए० जैकबः

संस्कृतवाङ्मयसेवारतो द्वितीय आङ्ग्लजनो जैकबोऽस्ति। अयं पदेन कार्येण च सेनाध्यक्ष आसीत्। एतादृशे कठोर-विविधव्यस्ततापरिपूर्णकार्यरतजीवनेनाप्यनेन

भारतीयदर्शन-संस्कृतवाङ्मये या निष्ठा यश्च प्रेमा प्रकटीकृतौ तत्सर्वं नितरां स्तुत्यमादरणीयं चास्ति। एषोऽतिपरिश्रमेण शाबरभाष्यस्य यत्सूचीपत्रं निर्ममे तस्य च प्रकाशनं वाराणसेयसरस्वतीभवनपुस्तकालयेन संजातमस्ति। अस्य रचना "लौकिकन्यायाञ्जलिः" त्रिषु भागेषु प्रकाशितादसीयमध्ययनगाम्भीर्यं दयोतयति। अस्मिन् ग्रन्थे मीमांसान्यायानां ससंग्रहं विवेचनं सोदाहरणमुपयोगश्च द्रष्टुं शक्यते। इदमतितरां मौलिकं कार्यमस्ति। अस्य देहावसानसमयः १९११ ईश्वीय वर्षोऽस्ति।

महामहोपाध्यायो वेंकटसुब्बाशास्त्री

श्री कुप्पूस्वामिशास्त्रिपरिचयप्रसंगे दाक्षिणात्या या मीमांसकपरम्पराद्वयी निर्दिष्टा तत्रैव महामहोपाध्यायरामसुब्बाशास्त्रिण एकस्यां परम्परायां श्री वेंकटसुब्बाशास्त्री बभूव। मैसूरप्रान्तनिवासिनानेनैव श्री कुप्पूस्वामिशास्त्रिणः पश्चान्मैलापुरसंस्कृत कालेज (महाविद्याल) स्याध्यक्षपदमलञ्चक्रे। महाविदुषोऽदसीयगुरो रामसुब्बा-शास्त्रिणो गतिर्मीमांसाशास्त्रे वेदान्तदर्शने च तुल्यप्रशस्याऽऽसीत्। दिग्विजयाय विविधस्थानेष्वसौ शास्त्रार्थमकृतेति किम्वदन्तीदानीमपि विख्याताऽस्ति। वाराणस्या ज्ञानवाप्यां समायोजिते शास्त्रार्थसंरम्भे शास्त्राद्वैताद्वैतविशिष्टाद्वैतत्रिविधवेदान्तविषय शास्त्रार्थासिनमधितिष्ठितोऽसौ पण्डितान् विजिग्ये। दक्षिणेऽस्य परश्शताश्छात्रा बभूवुः। तेष्वस्य श्री वेङ्कटसुब्बाशास्त्रिणः मुख्यतमं स्थानमासीत्। मीमांसादर्शनविषयका 'भाट्टकल्पतरु' प्रभृतयोऽनेके वैदुष्यपरिलसिता ग्रन्था अनेन लिखिता इति।

१२. महामहोपाध्यायः श्रीचिन्नस्वामिशास्त्री

मीमांसादर्शनस्य या दाक्षिणात्या परम्पराद्वयी मया प्राङ्निर्दिष्टा तस्याः परम्पराद्वय्या एव वस्तुतः प्रतिनिधिः श्री चिन्नस्वामिशास्त्री वर्तते। श्री कुप्पुस्वामि-शास्त्रिणो मैलापुरसंस्कृतकालेजे मीमांसादर्शनस्याध्ययनं कृत्वा राजुशास्त्रिपरम्परायाः स्वयं रामसुब्बाशास्त्रिणश्च तस्यैव दर्शनस्याध्ययनं विधायायं द्वितीयपरम्पराया अर्थाद्रामपरम्परायाश्च प्रतिनिधित्वमवापत्। अस्मिन् विद्वत्सुधासिन्धावागत्य द्वे अपि ते धारे विलीने भूत्वा एकरूपतामवाप्नुताम्। तेन च प्राप्तशक्तिविशेषा सैका धारा सर्वतोमुखविकासाय सविशेषं प्रावहत्। शास्त्रिवर्येणानेन मद्रासप्रान्तस्य कपाल-तराकपुरं (मायण्डकुत्तूरं) स्वजन्मनालंचक्रे। देवी अन्नपूर्णा उत्तमः श्रोत्रियः कर्मकाण्डविशेषज्ञः पं० रघुनाथश्रोत्रियश्चास्य मातापितरावास्ताम्। अन्नपूर्णातुल्यानां देवीनां संख्याऽत्र भारतस्येतिहासे भूयसी नास्ति यतः सर्वविधगृहकार्यव्यापृताया अपि तस्याः कृत्स्ना तैत्तिरीयशाखा सस्वरं कण्ठस्थाऽसीत्। ईदृशादर्शदम्पति प्रजननस्यैवेदं फलं यदयं चिन्नस्वामी प्रसिद्धो मीमांसक एव न किन्तु कर्मकाण्ड-

वैदिकसाहित्यस्याप्यद्वितीयोऽधिकृतश्च विद्वानभूत्। तिरुवैय्यारसंस्कृतकालेज-बनारसहिन्दूविश्वविद्यालय-तिरुपतिसंस्कृतमहाविद्यालय-कलकत्ताविश्वविद्यालय प्रभृतिषु विख्यातोच्चतमशिक्षासंस्थानेषु विभागीयाध्यक्षपदं चाध्यासीनेनैतेन मीमांसादर्शनं यत्सर्वतोभावेनासेवि तस्यैव परिणामोऽद्य निखिलदेशे परश्शताना-मुच्चकोटिकज्ञानविलम्बितानां मीमांसकानां सद्भावः। मीमांसादर्शनमितिहासदृष्ट्या विचार्यते चेद्देशेऽस्मिन् वर्तमानकाले मीमांसायाश्चिन्नस्वामिशास्त्रिसमुद्भूता परम्परैव जीवन्ती दृश्यते। दक्षिणभारते तु एतस्य प्रयत्नात्प्रागपि मीमांसायाः प्रकाशो देदीप्यमान आसीत् किन्तूत्तरभारतेऽद्य स्थाने स्थाने श्रूयमाणो मीमांसायाः सडिण्डि-मोद्घोषोऽस्यैव महाकायस्यातएव प्रभावशालिनोऽपूर्वप्रतिभावतो महापुरुषस्यैवावदानम्। एतस्यागमनान्नियुक्तेश्च प्राग् वाराणस्यां संस्कृतविद्यायाः केन्द्रत्वमाप्तायामपि मीमांसाया या दयनीया दशाऽऽसीत्सा संस्कृतवाङ्मयेतिहासच्छात्रैर्नाविदितम्। तामपाकृत्य मीमांसां यथास्थानमधिष्ठापयितुं च महामनामालवीय एनं पूर्वमीमांसायाः प्रधानाध्यापकपदे प्रतिष्ठापयामास। काशीमधिवसता तेन मीमांसा येन सर्वतोभावेन संसेविता तत्प्रभावित एव कलकत्ताविश्वविद्यालयस्तं सादरं मीमांसाप्राध्यापकपदमलंकर्तुमामन्त्रयांचकार। ततः पश्चात्स वङ्गीय-राज्यसर्वकारस्य गवेषणाविभागे स्मृतिपुराणप्रध्यापकपदमधिरूढः स्तुत्यं कार्यं चकार। अस्मिन् वर्षे जातेन देहावसानेन मीमांसादिदर्शनस्याक्षय्या हानिरभूत्। महामहोपाध्यायश्री कुप्पुस्वामिशास्त्रिणः पश्चाच्छ्रीचिन्नस्वामिशास्त्री ईदृशो विद्वान् बभूव येन स्वीयं सकलं जीवनं केवलस्य मीमांसादर्शनस्यैव सेवया व्यजीगमत्। अस्मिन् दर्शनेऽस्य व्यापकाधिकार आसीत्। अस्य दर्शनस्य नायं सफलोऽध्यापक एवासीत् किन्तूच्चतम ग्रन्थलेखकोऽपि। वैदिकवाङ्मयस्य विभिन्नाङ्गसम्बद्धानां ग्रन्थानां सम्पादने स्वकीयस्य योग्यस्य विदुषस्तत्तच्छास्त्रमर्मज्ञाधिकारिणः शिष्यस्य श्रीपट्टाभिरामशास्त्रिणः सहयोगेन यथा परिश्रमोऽनेनाकारि तथा विरलेनैव विदुषा कृतम्। ताण्ड्यमहाब्राह्मण-वृहती-बौधायनधर्मगृह्यसूत्रमीमांसाकौस्तुभापस्तम्बश्रौतसूत्र-तौतातिकमततिलकप्रभृतीनां षष्ट्-यधिकसंख्यकानां ग्रन्थानां सम्पादनमस्यैव कार्यम्। मीमांसान्यायप्रकाशस्य यथोत्तमा टीकाऽनेन कृता तथा ततः प्राक् कापि टीका केनापि कृता नासीत्। तन्त्र-सिद्धान्तरत्नावलिः यज्ञतत्त्वप्रकाशश्चेति द्वावस्य मौलिकग्रन्थौ स्तः। एतस्यैवंविधैः प्रशस्तैः कार्यैः कीर्तनीयया सेवया वैदुष्यमहिम्ना च प्रेरितानि भूत्वा विभिन्नानि प्रशासनानि महामहोपाध्याय-वेदविशारद-शास्त्ररत्नाकरादिभिरुच्चतमैर्योग्यैरुपाधिभिरे-नमलंचक्रुः। संस्कृतजगता च जयपुरसदृक्षे संस्कृतशिक्षाकेन्द्रे समायोजितस्याखिल-भारतीयसंस्कृतसाहित्यसम्मेलनाधिवेशनस्य सभापतिं निर्वाच्य परमास्थेयमेनं प्रति स्वकीयाऽऽस्था चाभिव्यक्ता।

एकतो यथेमे ग्रन्थास्तस्य वैदुष्यसम्पादनकलाकोविदत्वयोः साक्षिणः सन्ति तथैवास्य योग्यतमगुरोः योग्यतमाः शिष्याः—आचार्यं श्रीपट्टाभिरामशास्त्री पं० श्रीराम-

स्वामिशास्त्री, बालसुब्रह्मण्यशास्त्री कृष्णमूर्तिशास्त्री, वासुदेवाचार्यः, रामपदार्थदासः महेश्वरशास्त्री इतरे च विद्वांसः—देशस्य विख्याता मीमांसका एतस्य शक्तिमतीमध्यापनकलां सूचयन्ति । अतोऽध्ययनाध्यापनप्रचारग्रन्थप्रकाशनादिविविधकार्यकलापैर्मीमांसादर्शनस्य सार्वभौमोन्नतिसाधकः कोऽपि मीमांसकोपासकोऽस्योपमायोग्यस्तदा नासीदिदानीमपि च नास्तीति कथनेऽनाल्पोऽप्यत्युक्तिदोषः । अन्तिमक्षणं यावन्मीमांसां मीमांसमानोऽयं देशस्य दौर्भाग्याद् १९५६ ई० वर्षे दिवंगतवान् ।

महामहोपाध्यायः श्रीमदुमेश मिश्रः

आधुनिककाल इति शीर्षकस्य प्रकरणस्य प्रारम्भे मया यस्याः प्रथमाया मीमांसाधाराया उल्लेखः कृतस्तस्या एवाधिकृतः संवाहको डा० श्रीमदुमेशमिश्र आसीत् । मैथिलविदुषां जन्मदायकत्वेन विख्यातं मिथिलाया गजहरा नाम ग्रामं १९५२ तमे वैक्रमे सम्वत्सरेऽसौ जन्मनालमकार्वीत् । इमकस्य पिता महामहोपाध्यायः परिभाषेन्दुशेखरदस्य विजयाख्यटीकाकारो व्युत्पत्तिवादस्य जयाख्यव्याख्या विधायकः शास्त्रार्थरत्नावलीग्रन्थलेखको जयदेवमिश्रः पितृव्यश्च मधुसूदनमिश्रो भारतस्य विख्यातौ विद्वत्तल्लजावास्ताम् । स्वपितुर्महा महोपाध्याय डा० श्री गोपीनाथ कविराजाच्चासौ संस्कृतसाहित्यं दर्शनवाङ्मयं चाध्यगीष्ट । मीमांसादर्शनन्त्वस्य वंश परम्परागता सम्पत्तिरिवाभूत् यतो हि महामीमांसकभवनाथमिश्रशङ्करमिश्रयोर्भवान् वंशज आसीत् । महामहोपाध्यायगङ्गानाथझा महोदयात् पश्चादयमेव तथाविख्यातो विद्वानभूत् यं प्रयागविश्वविद्यालयः "डाक्टर आफ लेटर्स" इत्युपाधिना सम्मानितं चकार ।

१६२३ तमे ख्रिष्टीयवर्षे समायोजितस्य प्राच्यविद्यासम्मेलनस्याध्यक्षपदं मैथिलीसाहित्यपरिषदश्चाध्यक्षास्पदं प्रयागविश्वविद्यालयस्य प्राध्यापकपदमध्यासीनेनानेन संस्कृतादिसाहित्यानामभूतपूर्वासेवाऽकारि । लेखनीत्वस्य वशवदेवासीत् । अतएवासौ यल्लिलेख तत्सर्वं विलक्षणवैचक्षण्यलक्षितमभूत् । आङ्ग्लसंस्कृतहिन्दी मैथिलीति भाषाचतुष्टयीलिखितसम्पादितप्रकाशितग्रन्थाः शतकल्पाः सन्ति । १. कन्सेप्शन आफ मैथमेटिक्स एकार्डिङ्ग टू दी न्याय वैशेषिक फिलासफी, २. मुरारिमिश्राज् ऑन मीमांसा, ३. म० म० चन्द के अनुसार मीमांसा तत्त्वविचार, ४. स्वप्नतत्त्व निरूपण, ५. शब्दतत्त्वनिरूपण, ६. न्याय कुसुमाञ्जली, ७. चार्वाकदर्शन, ८. सांख्यकारिकाटीका, ९. सांख्यतत्त्वकौमुदी का खण्डन, १ . भारतीय दर्शन का समालोचनात्मक इतिहास, ११. गीता का तात्विक विचार तथा शङ्कर मत का आलोचन, १२. विद्यापति ठाकुर इत्येवं विधनामानोऽन्ये चादसीया ग्रन्था अमुष्य विततमध्ययनं वैदुष्यगाम्भीर्यञ्च प्रत्यक्षीकुर्वन्ति । एतत्प्रभावित एव भारतसर्वकार एनं महामहोपाध्यायेत्युपाधिना व्यभूषयत् ।

अनुसन्धानं भवतो मुख्यविषयोऽभूत्। विशेषतो दर्शनशास्त्रस्यानेकेषामन्यैरनुद्भावितानां तत्त्थ्यानामुद्भावनेन परिचयदानेन च भवानस्मान्नितरामुपाकृत। मीमांसाविषयकान् मुरारिमिश्रीयसिद्धान्तान् वयं भवल्लेखाध्ययनात् प्रागत्यल्पमेवाज्ञासिष्म।

ततोऽतिरिक्तानामपि लेखकानां रचनानाञ्चेदानीं यावदन्धकारावृतानां स्वलेखप्रकाशेन प्रत्यक्षीकरणमेतस्य महत्कार्यम्। अध्यापनद्वारा विशेषतो निजलेखन कार्येणासौ मीमांसादर्शनाय यद् दृढं मौलिकं चावदानं दत्तवान् तत्परमं स्तुत्यं महनीयं चास्ति। तेन वृद्धावस्थायामपि महता प्रयत्नेन मिथिलारिसर्चइन्स्टीट्यूटं दरभंगा नगरे संस्थाप्य तदीयनिदेशकपदमध्यासीनेन या साहित्यसेवा चक्रे तत्संस्थानं सर्वतोभावेन दृढीकृत्य तत्रैव नगरे कामेश्वरसिंहसंस्कृतविश्वविद्यालयं च निर्माय तस्योपकुलपतिना भूत्वा च संस्कृतं तद्विदुषश्च गौरवान्वितान् विधातुं यन्महत् कार्यं चक्रे तस्योपमा नास्ति। मिथिलाया मिश्रवंशपरम्परायां मीमांसा पर्याप्तिं प्रौढिमानं नीतायां विद्यमानेन सा परम्परा संवर्धितेति गौरवमनुभवामः अस्माकं दौर्भाग्यादयं, दशवर्षाणि बभूवुः प्रयागे दिवंगतः। नितरामानन्दं तु तदानुभवामो यदास्य सर्वाः सन्ततीर्भारतीयसंस्कृतसमुपासिकाः प्रशंसनीयवैदुष्यविभूषिताः समुन्नतपदारूढा विलोकयामः। सन्ततयोऽपि योग्यतमाः सन्तीति सौभाग्यभागलीयानेव भवति। एतस्य षट् पुत्राः सन्ति। तेषु प्रथमो डा० श्री जयकान्तमिश्रः प्रयागविश्वविद्यालये आङ्ग्लवाङ्मयस्य प्राध्यापकः तद्विभागाध्यक्षश्च वर्तते। द्वितीयो विजयकान्तमिश्रः (एम० ए०) भारतसर्वकारस्य पुरातत्त्वविभागाध्यक्षोऽनेकेषामनुद्घाटितपुरातत्त्वानामुद्घाटयिता बड़ौदाबेंगलोरपटनादिपुरातत्त्वकार्यालयेषु स्थित्वा नवनवपुरातत्त्वान्वेषणलब्धकीर्तिः सहसैव हृदयगतिरोधात् कीर्तिमात्रशेषो बभूव। अस्य महिषमर्दिनीतिग्रन्थ एकतोऽस्य पुरातत्त्वगवेषणाशक्ति द्योतयति अपरतश्च भारतीय संस्कृतिवैदुष्यमाख्याति। तृतीयः श्रीकृष्णकान्तमिश्रः एम्० ए० मिथिलाविद्यालये दरभंगास्थे साम्प्रतं मिथिलाविश्वविद्यालयरूपेणपरिवर्तितनाम्नि चिरमितिहास विभागस्य प्राध्यापकत्वमध्यक्षत्वं च साधु निर्वहन् साम्प्रतं दरभङ्गानगरस्थचन्द्रधारि म्यूजियम (   )स्य निदेशकोऽस्ति। चतुर्थः श्री रमाकान्त मिश्रः संस्कृते समुत्तीर्ण एम्० ए० परीक्षः सर्वासु परीक्षासु लब्धप्रथमश्रेणीकः उत्तरप्रदेशीय राजकीयप्रतिस्पर्धापरीक्षोत्तीर्णस्तत्रैव प्रदेशे लब्धप्रशासनोच्चतमपदः आङ्ग्लजर्मन संस्कृतादिभाषाणां मर्मज्ञो विलक्षणेन वैचक्षण्येन सम्पन्नः नितरां योग्यप्रशासकः सन् लब्धख्यातिरस्ति। पञ्चमः श्रीप्रभाकान्तमिश्रः एम्० ए० एल् एल् बी० भूत्वा प्रयागन्यायालये प्राड्विवागस्ति। षष्ठः सुधाकान्तमिश्रः अर्थशास्त्रे कृतभूरिपरिश्रमः एम० ए० पी० एच् डी० डी० लिट् भूत्वा वाराणस्यां काशीविद्यापीठे अर्थशास्त्र प्राध्यापकोऽस्ति। एतस्य सर्वे पौत्रा अपि नितरां सुयोग्या दृश्यन्ते। परिवारेऽस्मिन्

लक्ष्मीसरस्वत्योर्यः संयोगः सोऽन्यत्र अल्पिष्ठ एव दृश्यते। सर्वमिदं म० म० श्रीमदुमेश मिश्रस्य तपःस्वाध्यायनिरतस्य पुण्यफलम्। पाश्चात्यसाहित्ये निष्णातो भवन्नपि साम्प्रतिकशिक्षासम्पन्नोऽपि भारतीयसंस्कृतावनन्यास्था तदनुकूलाचरणं च भवतो जीवनस्य वैशिष्ट्यं कं न चमत्करोति।

१४. श्री टी० आर० चिन्तामणिः

महामहोपाध्यायश्रीकुप्पूस्वामिशास्त्रिणः प्रधानशिष्येष्वयमन्यतमः; अयं च मीमांसादर्शनं विधिवदधीत्य स्वकीये शोधप्रबन्धे 'मीमांसेतिहास' इत्याख्ये स्वविततमध्ययनं मौलिकचिन्तनविश्लेषणे च तत्र प्रस्तूय पी० एच्० डी० इत्युपाधिमधिगतवान्। अस्यायं शोधप्रबन्धो यद्यपि पूर्णतो न प्रकाशितस्तथापि स्वतन्त्रलेखरूपा अस्य कतिचिदंशा 'मद्रासप्राच्यशोधपत्रिकायां प्रकाशिता जाताः। अस्माच्छोधप्रबन्धादतिरिक्ता अप्यनेके ग्रन्था एतद्विषयका अनेन लिखिताः। भवान् मद्रासविश्वविद्यालये वरिष्ठसंस्कृतव्याख्यातृपदमलमकृत।

१५. श्रीरामस्वामी

भवान् मीमांसादर्शनस्य तदतिरिक्तसंस्कृतवाङ्मयाङ्गानां च विविधानामधिकृतो विद्वान् वर्तते। तिरुवैय्यारसंस्कृतकालेजस्नातको भवन्नयं म. म. श्रीचिन्नस्वामिशास्त्रिणो मीमांसादर्शनं विधिवदधीतवान् इत्यनुपदमेव मयाख्यातम्। अनेकानि वर्षाणि बड़ौदाराज्यस्य जगत्प्रसिद्धस्य पुस्तकालयस्य श्रौतपण्डितपदेऽसौ कार्यं कृतवान्। अस्य तत्त्वावधाने सम्पादकत्वे च गायकवाडसंस्कृतग्रन्थमाला (सीरिज) प्रभृतिप्रकाशनसंस्थाभिः मीमांसाया अन्येषां विषयाणां वाऽनेके ग्रन्थाः प्रकाशिताः। येषु पार्थसारथिकृत 'न्यायरत्नमाला' मुख्यतमा। अत्र हि आङ्ग्लभाषालिखितं समालोचनात्मकं प्राक्कथनमपि विद्यते। आङ्ग्लसंस्कृतभाषयोरस्य समानोऽधिकारो वर्तते।

आचार्यः श्री पट्टाभिरामशास्त्री

श्रीचिन्नस्वामिशास्त्रिणः पश्चाच्छ्रीकुप्पूस्वामिपरम्परायाः याथातत्त्येन पूर्णौचित्येन प्रातिनिध्यं तस्यैव योग्यतमाः शिष्याः श्रीपट्टाभिरामशास्त्रिणो निर्वहन्ति। १००८ तमे ईश्वीये वर्षे मद्रासप्रान्ते काञ्चीमण्डलस्य 'पैलाशूर गावे' नाम पुरमिमे स्वजनुषाऽलमकृषत। श्रीलक्ष्मीदेवीश्रीकृष्णशर्माणौ मातापितरावेनं तनयं प्राप्य भृशममूमुदताम्। एतस्य पिता श्रीकृष्णशर्मा दक्षिणस्य आकड़मण्डलस्य पुलिस सुपरिंटेण्डेण्टपदमधिष्ठितस्तत्र राजकीयसेवां करोति स्म। वारणस्यामधीतविद्याः शास्त्रिवर्याः प्रथमश्रेण्यां मीमांसाचार्यसाहित्याचार्यन्यायाचार्यपरीक्षा यथैवोत्तीर्णा-

स्तथैव गुणग्रहणपटीयसा पूज्येन महामनसा मदनमोहनमालवीयेन स्वकीये हिन्दू विश्वविद्यालये मीमांसादर्शनस्य सहायकप्राध्यापकपदे ततश्च १९३९ तमे ईश्वीये वर्षे प्रधानप्राध्यापकपदे च नियुक्ताः स्वाध्यापनेन मीमांसादर्शनमतितरामुपाकार्षुः। संस्कृतसाहित्यस्य सर्वासु विधासु विभिन्नेष्वङ्गेषु प्राप्ताधिकारा इमे शीघ्रमेव देशे विख्याता संजाताः। एतेषां विलक्षणवैचक्षण्यमद्वितीयां सर्वतोमुखप्रतिभां च दृष्ट्वा जयपुरमहाराजमहाविद्यालयस्याधिकारिभिः प्रार्थितेन मालवीयमहोदयेनेमे जयपुरीय महाराजसंस्कृतकालेजस्य प्राचार्यकार्यं निर्वोढुं प्रेषिताः। इत्थमिमे १९४५ तमे ईश्वीये वर्षे वाराणसेयहिन्दूविश्वविद्यालयं विहाय जयपुरं समागताः तत्रेमे चाष्टौ वर्षाणि प्राचार्यपदमलंकृत्य स्वयोग्यध्यापकप्रातिनिध्येन तं महाविद्यालयं प्रगतिं नीत्वा विदुषां छात्राणामधिकारिणां च नितरामादरमुपार्जयन्। तदनन्तरं कलकत्ताविश्व-विद्यालयत आमन्त्रणमुपलभ्य तत्रत्यस्य मीमांसाविभागस्याध्यक्षा अभूवन्। ततः पश्चाच्च वाराणसेयसंस्कृतविश्वविद्यालयेन समामन्त्रितास्तत्र साहित्यविभागाध्यक्ष्यं विधाय साम्प्रतं सेवानिवृत्ता वाराणसीमधिवसन्ति। एकस्याः संस्थायाः सेवाविमुक्ता इमे साम्प्रतम् सार्वदेशिकीं साहित्यसेवां कुर्वन्ति। सर्वाः संस्था एनानाकारयन्ति सादरं लाभान्विताश्च भवन्ति। उदाहरणायैषम एव दिल्लीविश्वविद्यालयेनामन्त्रिता इमे पञ्चविंशतिकल्यानि यानि व्याख्यानान्यदुः वैदुष्यपूर्णैः प्रसादगुणविलसितैर्बोधगम्यैः सरसैस्तैर्न केवला दिल्लीविश्वविद्यालयस्तदीया विद्वांसश्छात्राश्चैवोपकृताः किन्त्वत्रत्याः संस्कृतविद्यापीठसदृशसंस्थाध्यापका अपि भृशं कातार्थ्यं नीताः।

शास्त्रिणामेतेषां वैशिष्ट्यमस्ति सर्वतोमुखप्रतिभा सर्वविधकार्येषु समाना गतिः क्षमता च। इमे मार्मिकदर्शनदर्शका अपि रसकशिरोमणयः, योग्यसमालोचका अपि ललितकाव्यकर्तारः सफलाः सकलविषयाध्यापका अपि लेखकश्रेष्ठाः वक्तृत्वकला कोविदा अपि वाग्मिनः, परम्परीणपद्धत्याऽधीतशास्त्रा अपि परोवरीणविद्वन्मूर्धन्या संस्कृतिसाक्षात्प्रतिकृतयोऽपि नान्धश्रद्धालवाः वेशभूषासाधारणा अप्यसाधारणशासका महान्तोऽपि सर्वजनसुलभाः सर्वत्र सम्मानिता अपि निरभिमानिन वृद्धा अपि यौवको-त्साहसम्पन्नाः पट्टाभिरामा अपि शैवाः सन्ति। एतान् प्रसन्नदर्शनान् तेजस्विनोऽपि विलोकनीयान् विलोक्य भारवेः पद्यमिदं सहसा स्मृतं भवति—

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि समं निरीक्षितैः।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम्॥ (कि० II/55)

सकले देशे विशेषत उत्तरप्रदेशे राजस्थाने च प्रायेण लुप्ताया मीमांसासरस्वत्याः पुनः स्रोतसः संचारणाय भवन्तस्तत्र सर्वदा स्मर्यन्ते। देशस्य सकले भागे भवतां परश्शताश्छात्रा मीमांसाकार्यरताः दृश्यन्ते। राजस्थानसंस्कृतजगद् भवादृशं नियामकं प्राप्य विहितविविधविधोन्नतिकं भवतां सर्वदा कार्तज्ञ्यं स्वीकरोति।

भवतां वशंवदा लेखनी तत्र व्यापकं प्रभूतं चाधिकारं व्यनक्ति। भवन्तः स्वगुरुणा संयुज्य स्वातन्त्र्येण च पञ्चाशतषष्टान् ग्रन्थान् सम्पादितवन्त इत्यनुपदमेवोक्तं प्राक्। तेषु ताड्यमहाब्राह्मणशतपथब्राह्मण - वेदप्रकाश - जैमिनीयन्यायमाला - तौतातिकमत - तिलकापस्तम्बगृह्यसूत्रापस्तम्बधर्मसूत्र - कृत्यकल्पतरु-वृहतीभट्टप्रभाकरमतभेदार्थसंग्रह - तन्त्रसिद्धान्तरत्नावली - रामायणसंग्रहसनातनधर्मोद्धार - मीमांसान्यायप्रकाश - शाबर भाष्य - ध्वन्यालोकमीमांसादर्शनोदय - जयवशमहाकाव्य - प्रमाणमञ्जरी-शास्त्रदीपिका प्रकरणपञ्चिकाप्रभृतयो मुख्याः सन्ति। यमाश्रित्यैते कार्यं न कृतवन्त एतादृशो मीमांसाग्रन्थो नास्तीति कथने न काप्यत्युक्तिः। एतदेव विलोक्य देशस्य बुधैरेते 'मीमांसाकेसरीति' राजस्थानराजप्रमुखेन विद्यासागर इत्युपाधिभ्यां विभूष्य संमानिताः। मीमांसाजगदिदानीमभ्याशया मीमांसैककर्णधारान् भवतः स्वोन्नतिप्रचार-प्रसारेभ्यः पश्यति। साम्प्रतं भवादृशा द्वित्रा एव मीमांसकाः सर्वविधपरम्परासंरक्षकाः सन्ति पूर्वोक्तगण्यमान्यमीमांसकातिरिक्ता अपि बहवो मीमांसासेवका देशे विद्यमानाः सन्ति। एतेषु बहवो मूकसेवारतत्वादविदिता अपि महनीयचरिताः स्तुत्याः। कतिचिच्च यथासमयं यथाप्रसङ्गं यथावसरं च व्यापकदृष्टचा मीमांसादर्शनं विलोक्य प्रकटितैर्विचारैरेनदसेवन्त। पाश्चात्यविद्वत्स्वन्यतमेन मोक्षमूलरेण भारतीयदर्शने-तिहासं लिखता मीमांसादर्शनविषयक एकोऽध्यायस्तत्र लिखितः। देशस्य द्वितीयेन राष्ट्रपतिना प्रथमेनोपराष्ट्रपतिना च डा० श्री सर्वपल्लीराधाकृष्णनमहोदयेन महामहिम्नाऽपि स्वदर्शनग्रन्थे मीमांसादर्शनमपि चर्चितम्। महापण्डितराहुल सांस्कृत्यायनेन स्वीये दर्शनदिग्दर्शनग्रन्थे मीमांसां पुरोहितानां विद्येत्युक्त्वापि अस्य-दर्शनस्य सादरं विवेचनं विधायास्य महत्वं प्रकटीकृतमेव। पं० बलदेवोपाध्यायः स्वीये भारतीयदर्शननाम्नि ग्रन्थे एकं संक्षिप्तं सारगर्भं च विवेचनमस्य कृतवान्। हिन्दी भाषया दर्शनविषयाणां प्रस्तुतीकरणे भवान् नितरामग्रगण्यः। इदानीमपि हिन्दीदर्शन-साहित्यं भवन्तमाशादृष्टचा पश्यति। संस्कृतसाहित्येतिहासलेखकः कपिलदेवो विषयमिमं साधु प्रकाशितवान्। प्राच्यसाहित्यानुसंधानक्षेत्रे लब्धख्यातिसम्मानौ डा० कुञ्जनराजा डा० माधवकृष्णशर्मा च स्वीयं विविधैर्गवेषणात्मकलेखैर्दर्शनमिदं नानाविधमौलिकावदानसम्पन्नमकृषाताम्। इत्थं विंशशताब्द्यामपि बहवो लेखका विद्वांसोऽस्यदर्शनस्य सेवाकटिबद्धा दृश्यन्ते। वयं तेषां सर्वेषां कृतज्ञा ये स्वसेवया दर्शनमिदं गौरवान्वितं चक्रुः कुर्वन्ति च मीमांसादर्शनस्य भविष्यत्कालः सर्वथो-ज्ज्वल इति।

मीमांसाया उपयोगिता

यद्यपि विचारकाण्डस्य 'दर्शनं मीमांसा चेति शीर्षकेण लेखेन मीमांसाया दर्शनेषु विशेषतो मानवजीवने किं स्थानमिति मया सामान्यतो निर्धारितम् तस्य विश्लेषणमेव मीमांसोपयोगित्वबोधनायालमस्ति तथापि सर्वत्रोपयोगिताप्रश्नपर केऽस्मिन् विंशशताब्दोयुगे विशेषेणतन्निरूपणमावश्यकं मत्वा मीमांसायाः सांप्रतिकोपयोगितात्र विचार्यते। साम्प्रतं परमात्मात्मब्रह्माद्याध्यात्मिकतत्त्वज्ञानाय निर्मितदर्शन शास्त्रोपयोगिताऽपि यदा लोकैः पृच्छ्यते तदा मीमांसादर्शनस्य यस्य सामान्यज्ञानेनापि लोकोऽपरिचितो वर्तते, विषये एतादृशप्रश्नवैविध्यं स्वाभाविकमेव। कस्यापि विषयस्य किमुपयोगित्वमिति विचारः नास्वस्थचर्चा मानवस्य तादृशप्रवृत्तेः स्वाभाविकत्वात्।

भविष्यन्ति मीमांसोपयोगमीमांसकाः साम्प्रतिका अवश्यमेव चकिता यदा ते द्रक्ष्यन्ति उपयोगितावादस्य चर्चामूलं मीमांसैव। अत्रैको न्यायोऽस्ति-प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति। उपयोगित्वविषयकजागरूकता सर्वप्रथममनेन मीमांसादर्शनेनैवोद्भाविता। तत्रापि दर्शनानां क उपयोगः, स चोपयोगः लौकिकोऽस्ति नवेति चिन्तनपरत्वमनेन दर्शनेनैव मनसि निक्षिप्तम्। अनेन दर्शनानामेव न किन्तु संपूर्णज्ञाननिधित्वेन स्वीकृतवेदानां तत्तद्विधानान्यपि लौकिकोपयोगित्वैः सम्पृक्तान्यवश्यं भवेयुरिति पर्यवस्थापितम्। इदमेव प्रथमदर्शनम् यत्र दर्शन-लोकयोर्वेदजगतोश्च सामञ्जस्यं स्थापयितुं निर्देशो दत्त उपलभ्यते। अतः उपयोगितावादस्य प्रवर्तनमेव मीमांसायाः सर्वश्रेष्ठोपयोगित्वं स्वीक्रियते।

एकेन शास्त्रीयोदाहरणेन पूर्वोक्तं तत्थ्यं स्पष्टं कर्तुं शक्यते। धर्मो मीमांसायाः प्रतिपाद्यो विषयः। तस्य लक्षणमिह सर्वप्रथमं क्रियते तदनुसारेण यः प्रयोजनवान् स एव धर्मः यश्च प्रवर्तकः स एवधर्मः प्रवृत्तिश्च सप्रयोजना भवति। इत्थं सप्रयोजनस्य सत्कार्यकलापस्य धर्मत्वमनेन प्रतिपाद्यते। अन्यस्मिन् सर्वतत्वे सत्यपि यदि प्रयोजनं नास्ति तर्हि स विधिर्न धर्म इति मीमांसाराद्धान्तः। इदं प्रयोजनं च दृष्टमदृष्टं चेति द्विविधमित्यपि तेन प्रतिपाद्योद्घोषितम्-सति दृष्टप्रयोजनेऽदृष्टप्रयोजनकल्पनमन्याय्यमिति। इत्थमुभयोः प्रयोजनयोः मध्ये दृष्टस्य (लौकिकस्य) प्राबल्यम् अदृष्टस्य च दौर्बल्यं तेन स्वीकृतम्। एतेन मीमांसादर्शनमुपयोगितावादस्य प्रथमप्रवर्तकम् तत्रापि लौकिकोपयोगस्यालौकिकोपयोगादधिकोपादेयतासाधकमिति सिद्धमेव अतएव दर्शन-

मिदं लोकवेदसमन्वयसामञ्जस्य प्रस्तावनं स्वीकुर्वन्ति तज्ज्ञाः। इयन्तु मीमांसाया मौलिकी दृष्टिर्निर्दिष्टा। इतोऽन्येऽपि तस्या उपयोगाः सन्ति। एतस्य दर्शनस्य लौकिकोऽलौकिकः पारलौकिक ऐहलौकिकः सामाजिकः धार्मिकः शास्त्रीयः किं बहुना सर्वविधोऽत्तएव व्यापक उपयोगः परिलक्ष्यते। अत्र सहस्राधिकाः ये सिद्धान्ता निर्णयाश्च अधिकरणेषु न्यायालयेषु वा समुपस्थापिताः तैः केवलो नैकभागः समाजस्य नापि कश्चन सम्प्रदायविशेषः किन्तु निखिला आगमास्तदीयाः परम्परा वा प्रभाविता एव वर्तन्ते अथ च ते तैरोतप्रोता अनुस्यूताश्च दृश्यन्ते। ये परश्शता न्याया अनेन तत्तदधिकरणेषु संसाधितास्तेषां सर्वेषां विवेचनेनैकः स्वतन्त्रो ग्रन्थो लिखितुं शक्यते। न किमपि तादृशं शास्त्रमिह दृश्यते येन सादरं तान्न्यायानङ्गीकृत्यात्मानं कृतकृत्यं नामन्यत। न कोऽपि तादृशो विवेचको विचारको वाऽभूत् येन स्वविश्लेषणविवेचन मतादिसमर्थनाय ते न्याया न शरणीकृताः न कोऽपि तथाविधो धर्मात्मा महात्मा वा च संजातो येन तेभ्यः स्वपथप्रदर्शनं नाधीतम्। तेषां संकलनमात्रेण ग्रन्थोऽयं द्विगुणस्थूल शरीरो भवेदिति कृत्वा विरम्यते। यदेत्थंभूता स्थितिरस्ति तदा कात्स्न्येंन मीमांसादर्शनस्योपयोगवर्णनं न सरलं कार्यं प्रतिभाति। स उपयोगस्तथा व्यापकः प्रगत्वरः प्रसृत्वरश्चास्ति येनैकस्मिन् ग्रन्थप्रघट्टके स्तम्भे वा सीमितीकरणं दुस्साहसमात्रम्। एतादृशः दुस्साहसो विहित एतस्य युगस्योपयोगितादर्शनशीलत्वात्।

संविधाने प्रभावः

सर्वप्रथमं धर्मशास्त्रमादीयते। तद्धि आस्माकीनजीवनस्य साम्प्रतिकजीवनस्य नियामकशास्त्रमस्ति। अतोऽत्र तद्विवेचनं प्राथम्यमर्हति। धर्मशास्त्रं च वयं भारतस्य संविधानं वक्तुं शक्नुमः। तस्य धर्मशास्त्रापरशरीरस्य संविधानस्य निर्माणे दर्शनमिदं नितरां साहाय्यकृदभूत्। अस्याधिकरणेषु निश्चिताः सिद्धान्ता आधुनिकन्यायालयेषु व्यवहृताः सिद्धान्ता इव संविधाननिर्मातॄणां प्रेरणाप्रदा अभूवन्। यथा यदि कश्चित् "मम मृत्योः पश्चान्मम सर्वविधसम्पत्तेः स्वामिनी मम पत्नी भविष्यति, मम पुत्रेषु च संजातवयस्केषु ते मम पुत्राः सम्पत्तेर्मदीयाया पूर्णाधिकारिणो भविष्यन्तीति" भविष्यत्सम्पदाधिकारविवरणपत्रं स्वपुत्राणां बाल्यावस्थायामेव मरणासन्नो लिखित्वा म्रियते तदा संशयोऽयमुत्त्थास्यते "किम् स्त्री वस्तुतः स्वामिनी अस्ति अथवा तत्पुत्राः स्वामिन" इति। स्वामीतिपदं तत्र स्त्रीपदमप्यन्वेति पुत्रपदमपि। मीमांसादर्शनन्यायालये ईदृशे प्रश्ने उत्त्थिते तत् स्वनिर्णयं दास्यति–सम्पत्तेः सर्वाधिकारसम्पन्नाः पुत्राः न स्त्री सर्वाधिकारसम्पन्नेति। स्त्रीपदेन सह स्वामिपदप्रयोगस्य तात्पर्यं सा प्रबन्धकर्त्री रक्षयित्री वर्तत इत्येतन्मात्रमस्ति, स्वामिपदप्रतिपादयस्य वास्तविकार्थस्य सम्बन्धः पुत्रैः सहैव संघटते इति। इत्थं यथाऽनेन दर्शनेन हिन्दूसंविधाननिर्माणे साहाय्यमर्पितम् तथा तदीयाभिप्राययाथार्थ्यबोधनेऽपि। अतएव मीमांसाज्ञानाहितस्य

धर्मशास्त्रिणो महत्वमस्मदीयेतिहासेन नाङ्गीकृतम्। अस्य धर्मशास्त्राधारत्व स्वीकारेण न मनस्तुष्यति वस्तुतोऽसौ मीमांसैव धर्मशास्त्रम् इति कथनमेव मे प्रतिभाति। एतद्दर्शनं विना धर्मशास्त्रस्य पाण्डित्यस्य तु का कथा तस्य सामान्यतो ज्ञानमप्यसंभवम्।

एतत्स्पष्टीकर्तुमेकमुदाहरणमन्यदप्यावश्यकं मत्वा तत्प्रस्तूयते। धर्मशास्त्रं राज्ञः कर्तव्यानि विततमभिदधत्तमादिशति—"व्यवहारान्नृपः पश्येत्' इति। अर्थाद्राजा स्वयं राजकीयकार्याणि निरीक्षेत। अस्य विधानस्य विततविश्लेषणसमये "एकाकी राजा तावन्ति कार्याणि कथं विलोकितुं प्रभवेद्" इति विचार्य धर्मशास्त्रं तं नियमं किञ्चिच्छ्लथयदुवाच–अपश्यता कार्यवशाद् व्यवहारान्नृपेण तु।

सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्॥ इति। कार्यप्राचुर्याद्राजा सर्वविधव्यवहारान् स्वयं द्रष्टुं न प्रभवेच्चेत्स समग्रविधानज्ञं ब्राह्मणं ससभ्यवर्गं नियोजयेद् व्यवहारनिरीक्षाणायेत्यर्थः। अत्र धर्मशब्दोऽतितरां व्यापकार्थे प्रयुक्तोऽस्ति। यश्च पन्थाः अस्माकं संविधानेन दर्शितः स मीमांसामात्रमेवाश्रित्य। गाम्भीर्येण विविच्य मीमांसाशास्त्रेण प्रतिनिधिपरिग्रहन्यायो निष्पादितः। तन्न्यायानुसारेण मुख्ये वस्तुनि कथंचिदनुपस्थितेऽलब्धे वा तत्प्रतिनिधिना तत्कार्यं निष्पादयितुं शक्यते इति निर्देश उपलभ्यते। अतएवैष नियुक्तो ब्राह्मणो राज्ञः प्रतिनिधिस्तस्य कार्यस्य निरीक्षणस्याधिकारी वर्तते। नह्यत्रैव लोके शास्त्रे च सर्वत्र विश्वतः प्रतिनिधिपरिग्रहन्यायस्य प्रचारोऽभूत्। मीमांसाया अनेन लघुनाऽपि प्रभावपूर्णेनावदानेन सार्वदैशिको लाभोऽजायत। अत्र वादिनः प्रतिवादिनश्च वाक्कीलं स्वं स्वं प्रतिनिधिं विधाय स्वयं निश्चिन्ता भवन्ति। शासकस्य परस्सहस्राः प्रतिनिधयः तन्नाम्ना तदीयकार्यं सम्पादयन्ति। प्रजातन्त्रे तु जनताऽपि स्वप्रतिनिधिमवचित्य स्वकीयं सर्वं भाग्यनिर्माणं तत्करतलगतं करोति। इमा सर्वाः विधानसभाः संसच्चास्माकमस्यैव न्यायस्य प्रवर्तमानार्थस्वरनयाः सन्ति। मीमांसाया जीवनेऽस्माकं संविधाने च समापतितः प्रभावोऽनेन पूर्वोक्तेन निर्वाचनेनानुमातुं शक्यते। प्रतिनिधिपरिग्रह एव प्रजातन्त्रस्य साम्प्रतिकस्य संविधानस्य च मूलं पृष्ठभूमिर्वास्ति। तुलनात्मकदृष्ट्या यदि कोऽपि मीमांसावर्णितन्यायान् संविधानं च पश्येत् तदा स संविधानस्य प्रतिपृष्ठं कमपि न कमपि न्यायमवश्यमवलोकयेदिति मदीयो द्रढीयान् विश्वासः। विषयोऽपि नितरां विस्तृतत्वात्स्वतन्त्रग्रन्थनिर्माणमपेक्षते स्वल्पेऽत्र सन्दर्भे तस्य विततचित्रणमसंभवमनावश्यकं च मत्त्वा विरमामि।

साहित्यवर्णितमहत्त्वम्

मीमांसादर्शनस्य क-ख-गानप्यजानन्तः किन्तु दुराग्रहिणः पण्डितंमन्या ;'मीमांसातिगतातीतोऽतितुच्छश्च विषयः तदीयच्छात्रः संस्कृतसाहित्यस्य संस्कृत-

भाषायाश्च ज्ञानरहितो भवति" इति वदन्तो मया दौर्भाग्याच्छ्रुताः। तद्भ्रान्ति-निराकरणायैव मयाऽयं संदर्भोऽत्रोपस्थाप्यते। जात्वपि मीमांसादर्शनेन स्वदृष्टि संकुच्य न दृष्टम्। अत एव सर्वतोमुखविचारविषयेऽत्र दर्शने सर्वे शास्त्रीया विषया अपि मीमांसिताः सन्ति। कण्ठस्थीकरणमत्र तथा न स्तुत्यं मतं यथा विवेचनम् अतएवाद्य पर्यन्तं कानिचित्सूत्राणि श्लोकान् वा मुखाग्रीकृत्य न कोऽपि मीमांसकोऽभूत् न वा भविष्यति भवितुं शक्नोति। योग्यताऽथविचारशक्तिरेवात्र प्रशस्यते। अतोऽस्य दर्शनस्यच्छात्रा भारवाहका इव फलरहिता इति स्वीकर्तुं न शक्यन्ते। वैशिष्ट्यन्तु इदमस्ति साहित्यशास्त्रीयविचारदृष्ट्याऽपि मीमांसा तज्ज्ञाश्च न कुतोऽपि न्यूनाः। साहित्ये विवृतेषु रस-वृत्ति-वाच्यार्थादिविषयमाश्रित्य मीमांसकेन स्वसिद्धान्ताः स्थिरीकृताः सन्ति। रसविषयो मीमांसासिद्धान्तानुसरणेन भट्टलोल्लटेन यथा व्याख्यात-स्तथा साहित्यालंकारशास्त्राध्येतृभिरधीयतेऽवश्यम्। भट्टलोल्लटस्योत्पत्तिवादोऽस्या एव विचारधाराया अवदानमस्ति। वृत्तिनिरूपणेऽपि मीमांसाया मौलिकसिद्धान्तो वर्तते। अभिधालक्षणाव्यञ्जनाभ्योऽतिरिक्ते अपि गौणीतात्पर्याख्येये द्वे वृत्ती अलंकार शास्त्रिभिः स्वीकृते ते मीमांसाप्रदत्ते स्त इति विदितमेव सर्वेषाम्। अनयोः स्थापना न केनापि दुराग्रहेण कृताऽऽस्ते किन्तु तर्कमाश्रित्यावश्यकतां चानुभूयैव। वाक्यार्थ-बोधविषयकोऽभिहितान्वयवादोऽन्विताभिधानवादश्चालंकारशास्त्रच्छात्रैरधीयमाना -वस्यैव दर्शनस्यावदानम्। काव्यप्रकाशे कुवलयानन्दे वानेकानि स्थलानि तथाविधानि सन्ति येषामवबोधो मीमांसाज्ञानं विनासम्भव एव। इत्थं मीमांसा शुष्कदर्शनं नास्ति किन्तु तथाविधं शास्त्रमस्ति यस्य स्पर्शेनालंकारशास्त्रं पाठ्यं विवेचनीयं चाभवत्। एतत्सर्वमज्ञात्वा अस्यावदानज्ञानविमुखो भूत्वा एवंविधगम्भीरपवित्रविचारशास्त्रे आक्षेपो हि पापमस्ति।

अन्यशास्त्रैः सम्बन्धः

पूर्वोक्तेतरशास्त्राणामध्ययनेऽपि मीमांसायाः साहाय्यं परमपेक्षणीयमस्ति। वेदान्तेन सह तस्य यो घनिष्ठसम्बन्धः यश्च तस्याध्ययने तदुपयोगः एतत्सर्वं पूर्वाध्याये यथा स्थानं विवृतम्। न्यायदर्शनमपि स्थाने स्थाने पूर्वपक्षरूपेणेदमुपस्थाप्यास्य सम्मानं महिमानञ्चाभिदधाति। वैयाकरणदार्शनिकसिद्धान्तानां सर्वोत्तमप्रतिपादक वैयाकरणभूषणसारग्रन्थं तावन्न कोऽप्यवगन्तुमवगमयितुं वा शक्नोति यावत्स तत्र प्रसंगागतमीमांसासिद्धान्तानामवगन्ता न स्यात्। इत्थं लोकजीवनवैदिकक्रियाकलाप काव्यशास्त्रविनोदेनास्य दर्शनस्य दृश्यमानः प्रभावः एतदीयमुपयोगित्वं प्रत्यक्ष-यति।

वैदिकमान्यता

सन्त्विमा लौकिक्यश्चर्चाः। इतोऽन्यत्र विलोक्यते चेदस्य दर्शनस्य प्रादुर्भावे निमित्तं वैदिकमान्यता दृश्यते। सर्वप्रथममत्र जिज्ञासते किं वेदोऽस्य शास्त्रस्य

प्रारम्भायानुमतोऽस्ति ? प्रश्नमिमं सम्यक् समाधायैव दर्शनमिदं प्रारब्धम् । तत्र कृतो विचारोऽत्र संक्षिप्य निर्दिश्यते—वेदो वदति-स्वाध्यायोऽध्येतव्य इति । अनेन वाक्येन स्वाध्यायस्याध्येतव्यत्वं विधीयते । अत्राध्ययनस्य तात्पर्यम् गुरुमुखोच्चारणा-नुच्चारणम् अस्ति, (केवलं कण्ठस्थीकरणम्) अथवा अर्थज्ञानम् ?। एतादृशे संशये समुपस्थिते, कण्ठस्थीकरणमात्रं नाध्ययनम् किन्त्वर्थज्ञानस्यैवोद्देश्यत्वादर्थज्ञानपूर्वक-स्यैव पठनस्याध्ययनत्वम् । केवलं मन्त्राभ्यासः अर्थज्ञानावेदेषु निहिततत्त्वज्ञानराशे-स्तिरस्कारकत्वात्सर्वथा परिहरणीयः । अर्थज्ञानरहितवेदाभ्यासी तु भारहारःस्थाणुरिव गर्दभ इव वास्ति । तदुक्तम् "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न जानाति योऽर्थम्" इति । अतः सार्थज्ञानमध्ययनमेवाध्ययनम् ।

विधिवाक्यस्य सार्थक्यमपूर्ववस्तुनो विधानेन भवति । अध्ययनं तु लोकसिद्धमेव अतः "स्वाध्यायोऽध्येतव्यः" इति विधेरावश्यकता का इत्युच्यते चेत् सत्यम् स्वाध्याया-ध्ययने लोकतः सिद्धेऽपि अनेन वाक्येन पुनर्विधानाज्ज्ञायते अर्थज्ञानपूर्वकं स्वाध्या-याध्ययनं कर्तव्यमिति तस्य वाक्यस्य तात्पर्यम् । एतेनार्थज्ञानस्यानिवार्यत्वदर्शनाय तद् वाक्यमिति । अयमेव नियमविधित्वेन प्रतिपादितः । अस्य नियमत्वे स्वीकृते कर्मकाण्डजगत्यस्यायं फलितार्थः स्वीक्रियते अर्थज्ञानपूर्वकं कृतेनैव कर्मणा फलप्राप्ति र्भवति नान्यथेति ।

इदमर्थज्ञानमेव अध्ययनस्य वस्तुतो दृष्टं फलम् । यदा स्वाध्यायाध्ययनेनेदं प्रत्यक्ष फलमस्माभिः प्राप्तुं शक्यते तदाऽस्यादृष्टं फलमनावश्यकत्वान्न कल्प्यते । अर्थ-ज्ञानस्येत्थं महत्त्वेऽनिवार्यत्वे च स्वीकृते तत्प्राप्तये विचारस्यावश्यकता भवति विचारं शरणीकृत्यैवार्थज्ञानस्य प्राप्तिः संभाव्यते । विचारस्येयमावश्यकतैव मीमांसाशास्त्र मुपासितुं जनान् प्रेरयति । वेदश्च न केवलमेतस्य मान्यतादाता अपि त्वस्यो-त्पत्त्यर्थमपि प्रेरणाप्रदः ।

यद्यप्यर्थबोधाय शक्तिग्राहकोपाया व्याकरणम् उपमानम् कोशः आप्तवाक्यम् व्यवहारः इत्यादय उक्ताः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवश्च संयोगविप्रयोग साहचर्यप्रभृतयो निगदिताः तथापि विचारशास्त्रस्याभावदशायां पूर्वोक्तैरुपायैः शाब्दबोधनिष्पत्तिर्यदि नासंभवा किन्तु दुःखावहा त्ववश्य शक्यते वक्तुम् । एकमुदाहरणं विलोक्यताम् तेनेदं तत्त्थ्यं स्पष्टं भविष्यति । वेदोऽत्र सन्दर्भे एकं विधिवाक्यम-भिदधाति--"अक्ता शर्करा उपदधाति ।" आर्द्राभिः शर्कराभिर्जुहुयादिति तदर्थः । तत्र शर्करा केन आर्द्रीकरणीया" इति जिज्ञासायाम् आर्द्रत्वसम्पादकं द्रव्यं घृतम् तैलम् अन्यच्च किमपि स्निग्धम् वस्तु समुपस्थितम् भूत्वा "घृतेन तैलेन अन्येन वा इति सन्देहं तथा वर्धयति यथा समाधानं दुष्करं भवति । सन्देहापनोदनाय मीमांसा एवं दक्षा भूत्वा निर्णयं श्रावयति घृतेनैवाञ्जनं कर्तव्यम् तेनैव आर्द्रीकरणीया खलु शर्करा

यतः "आयुर्वैघृतम्" इत्यादिभिस्तस्य महत्त्वोपपादकैर्वाक्यैः कृता तस्य प्रशंसा शर्कराञ्जनाय तस्योपादानं कर्तुं संकेतयति ।

अनेन संक्षिप्तनिरूपणेनास्य विचारशास्त्रापरपर्यायस्य मीमांसाशास्त्रस्यावश्यकता साधु सिद्धा विशेषतोऽस्य या वेदप्रयोगोपपादकता साऽवगता भवति । वेदार्थावबोधायास्य शास्त्रस्य सहकारोऽनिवार्यः इति निष्कर्षोऽस्य सदर्भस्य स्पष्टः । जटिलार्थकवाक्यानामर्थस्फोटनसामर्थ्यं विलोक्यैवेदं शास्त्रं वाक्यशास्त्रमिति शब्देन ससम्मानं सगौरवञ्चोच्यते । अतएव यावानस्य लौकिका उपयोगास्ततोऽप्यधिकाः शास्त्रीया उपयोगाः ततोऽप्यधिका वैदिका उपयोगा मान्यताश्च सन्ति । मीमांसायाः प्रत्येकस्मिन् ग्रन्थेऽस्या वैदिकमान्यताया पूर्णतो विश्लेषणमस्ति ।

ज्ञानकाण्डः

सामान्यपरिचयः

मीमांसायाः सामान्यस्वरूपस्य प्रस्तावनया तदीयानां समग्राणां विचारधाराणां तत्प्रवर्तकैरन्यैश्च दर्शनैः सह तासां सम्बन्धस्योपयोगित्वस्य च चर्चा प्रस्तुतग्रन्थान्तर्गतप्रथमकाण्डस्य लक्ष्यमासीत्। इमा सर्वा अपि चर्चा मूलतः प्रायः स्वतन्त्राश्चासन्। एकां दिशमभिलक्ष्य प्रस्तुता विचारा हि तत्सर्वस्वमिति शक्यते वक्तुम्, येषु मीमांसाया उदयादारभ्य साम्प्रतिकीषु गणनीयासु घटनासु समालोचनात्मक प्रणाल्याः प्रकाशो निक्षिप्तः। अत एव स भागो विचारकाण्ड इत्यभिहितः। पूर्ववर्तिनि काण्डे मीमांसादर्शनमिति लिखितम्। कर्मकाण्डस्य सिद्धान्तानां प्रतिपादनेन सहैव दार्शनिकदृष्टयाऽपि सम्पन्नां मीमांसामनुभवामः। तस्या दर्शनत्वस्य समर्थनाय सामान्येन विचारकाण्डे भृशमुल्लिखितम्। इदानीमनन्तरवर्तिभागे ज्ञानकाण्डद्वारेण तस्या दर्शनत्वं प्रत्यक्षतां नेतुमुपक्रमामहे। पूर्वं स भागः सिद्धान्तनिरूपणरूप आसीत् एष च भागस्तस्योदाहरणैः प्रमाणीकरणमस्ति। प्रकरणेनानेन मीमांसाया मूलभूतानि मन्तव्यानि प्रदर्श्यात्मनः सिद्धान्तपक्षमिमं क्रियात्मकं चिकीर्षामो यत् "मीमांसा खलु स्वतन्त्रं दर्शनं, तच्च दर्शनदृष्ट्याऽपि सर्वथा सम्पन्नमिति।" इदमुद्दिश्य ज्ञानकाण्डः प्रस्तूयते–अनेन शब्दपदपदार्थवाक्यार्थेश्वरवेदात्मप्रमाणादिषु समग्रेषु विषयेषु मीमांसाया विचाराणां न केवलं सङ्कलनमात्रं प्रस्तूयतेऽपितु अपरशास्त्रापेक्षया तेषामावश्यकत्वमुपयोगित्वं महत्त्वं प्रकाश्यते स्थाप्यते च। इमे सर्वे मम स्वोपज्ञा विचारा न सन्ति, किन्तु मीमांसाशास्त्राश्रिता विषयाः सन्ति, अत एवैते विचारकाण्डे न विचारिताः। एवमयं काण्डो मीमांसाया ज्ञाननवनीतस्य विधिः, यो हि समग्रस्य शास्त्राम्बुधेर्मथनाद् विनिर्गतः। अत एव भाण्डारमिदं ज्ञानकाण्ड इत्याख्ययाऽभिहितम्। अस्मिन् स्वतन्त्रैः प्रकरणैः सर्वथा मूलगतया दृष्ट्या मीमांसासिद्धान्तानां प्रस्तावना करिष्यते। अनेन मीमांसायाः सामान्यस्वरूपस्य (विचारकाण्डद्वारा) अवगमानन्तरं कोऽपि विचारशीलोऽध्येता स्वतः समुदितायाः सिद्धान्तज्ञानपिपासाया उपशमं तृप्तिञ्चानुभवितेति मे विश्वासः।

ईश्वरः

संस्कृतस्यैश्वर्यार्थकाद् 'ईश' धातोः 'ईष्टे इति ईश्वरः" इत्यस्यां व्युत्पत्तौ वरच् प्रत्यये[1] कृते ईश्वरशब्दः सिद्ध्यति, येन सर्वतः समर्थायाः सर्वतन्त्रस्वतन्त्रायाः

१. स्थेशभासपिसकसो वरच् (पा० अ० ३।२।७५)

सत्ताया अवगमो भवति। पुराणसाहित्येऽयमेव 'भगवान्' इत्याख्यया निर्दिष्टः, यत्र समग्रस्यैश्वर्यस्य[१] धर्मस्य यशसः श्रियः (लक्ष्म्याः, शोभायाः) ज्ञानस्य, वैराग्यस्य च पूर्णतया समावेशोऽस्ति। ज्ञानैश्वर्यप्रभुत्वानां पराकाष्ठामय्याऽनया सत्तया लोकोऽतिशयं प्रभावितः ब्रह्माद्यपेक्षया जनसाधारणस्य जीवनेऽधिकमियमेव सत्ता सम्पृक्ता। लोक इमामेव सत्तां स्वभावनानुसारमनेकै रूपैः पश्यति, एताञ्च स्थावर जङ्गमात्मकस्य जगतः सर्वाधिकारिणीं भाग्यविधात्रीञ्च मन्वाना विपत्तिकाले सर्वात्मनाऽऽत्मानं समर्पयन्ती शान्तिमनुभवति। व्यासस्याष्टादशपुराणानि तेषामेव रूपाणां द्योतकानि सन्ति। विविधैर्दर्शनैरप्यस्य माहात्म्यमनेकधोपवर्णितम्।

वेदान्तरीत्या "एकमेवाद्वितीयं ब्रह्म" इति मूलसिद्धान्तानुरूपं ब्रह्मैव समग्रस्य प्रपञ्चस्य सञ्चालकमिति। तस्य तिस्रो मूलप्रकृतियो माया वा सन्ति। तदेव शुद्धसत्त्वप्राधानमायायां प्रतिबिम्बितं सत् ईश्वर इति, रजःप्रधानमायायां प्रतिबिम्बितं सत् जीव इति, तमःप्रधानमायायां प्रतिबिम्बितं सत् जडजगदिति भवति। शुद्धे स्वच्छे च दर्पणे स्वाकारं स्पष्टतया पश्यामो, नान्धे, तथैव प्रथमावरणस्य शुद्धतया तस्मिन् ब्रह्मणो ज्योतिः स्फुटं दृश्यते, अतएव ज्योतिः स्वरूपाशक्तिः साऽन्यसृष्ट्यपेक्षयाऽलौकिकशक्तिशालिनी सतीश्वररूपतां बिभर्त्ति। किम्बहुना, अयं महापुरुष ईश्वरो मायावच्छिन्नं ब्रह्म यच्च जगतो निमित्तमुपादानञ्च कारणम्। इदञ्च सर्वतः स्वतन्त्रं, निरपेक्षं विभु च। सृष्टे रचनास्थितिप्रलयास्तस्य लीला विलासमात्रम्।

ईश्वरो जगतो निमित्तकारणमिति नैयायिकाः। जगत् कार्यरूपम्, न च कर्तारं विना तत् सम्भवति। अत एव कर्तृतया ईश्वरकल्पनाऽनिवार्या। यथा तन्तुवाय स्तुरीवेमादिभिरुपकरणैस्तन्तुभिर्विभिन्नानि वस्त्राणि वयति, ततश्च स वस्त्ररूपकार्यं प्रति कर्तृत्वेन निमित्तकारणम्, तन्त्वादीन्युपादानकारणम्, तथैव जगद्रूपं कार्यं प्रति ईश्वरः कर्तृत्वेन (हेतुना) निमित्तकारणम्, परमाण्वाद्युपादानकारणम्। ईश्वर उपादानकारणसाहाय्येन सृष्टिं रचयति। अयं न्यायसिद्धान्त ईश्वरस्य सर्वतन्त्र-स्वतन्त्रतां बाधते, उपादानादिकारणान्यधिश्रितः कर्ता (लौकिककर्त्रविशिष्टः) कथमिव प्रभुर्विभुर्वाभवितुमर्हति !

वैशेषिकदर्शने नास्ति कश्चिदीश्वरविषये स्वतन्त्रः सिद्धान्तः निरीश्वरवादी हि साङ्ख्य ईश्वरासिद्धिं स्वीकरोति। योगसाङ्ख्ययोः समग्रपदार्थेष्वन्तर्भावेऽपि[२] योगदर्शनमीश्वरपदार्थस्य सत्तां विशिष्य स्वीकरोति। योगसिद्धान्ते ईश्वरः

---

१. ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥

२. साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।

कश्चिदलौकिको महापुरुषः—यो हि क्लेशकर्मविपाकाशयैरपरामृष्टो[१] भवति। स नित्यः, प्रकृतौ च पूर्णं प्रभुत्वं बिभर्ति। तं प्रति भक्त्या समाधिसिद्धिर्भवति, तदीयः प्रसादः समस्तविघ्नानां प्रशमनेन सहास्मान् फलोन्मुखान् करोति।

अस्मिन् विषये मीमांसादर्शनस्य भिन्न एव मार्गः। वस्तुतो यदि निस्पक्षं समीक्षादृष्टयाऽवलोक्यते, ततः कटुसत्यमिदमभिधातव्यं स्यात् यन्मीमांसाया ईश्वर विषये किमपि निश्चितं मतं नास्ति। न चास्माभिरेतदेव स्वीक्रियते यन्मीमांसाया ईश्वरोऽस्वीकृत इति। न चास्माभिरङ्गीक्रियते यन्मीमांसकैरीश्वरस्य सत्ताया स्वीकृतिविषये कश्चन डिण्डिमघोषः कृत इति। विचित्रायामस्यां परिस्थितौ महनीयेऽस्मिन् विषये यत्किञ्चित् कथनं न केवलं दुःसाहसमपितु अनौचित्यपूर्णं स्यात्।

ईश्वरस्य विषये वस्तुतोऽस्माकमाचार्याणां नीतिः सर्वथा ताटस्थ्यमवलम्बते। अस्य कानिचिन्मूलकारणानि सन्ति। परं कालान्तरेऽयमेकः प्रवाहः सम्पन्नः। इयं तटस्थता बहुभिर्दुरुपयोगविषयतां नीता। कतिपयैरालोचकैरेवंविधमाधारमाश्रित्यानीश्वरवादितां साधयद्भिर्नास्तिकदर्शनमित्यभिहितम्। अस्तु, इदं नास्तिकदर्शनमास्तिकदर्शनं वेत्यस्य निर्णयोऽस्माभिर्विचारकाण्डे विहितः अत्र केवलं दुरुपयोगरूपस्य साहसस्य परिचयप्रदानार्थमयं विचार उपन्यस्तः प्रश्नेऽस्मिन् मौनावलम्बनमतिरिच्य कतिपये ईदृशा आधाराः सन्ति ये निरीश्वरवादितायाः प्रतिपत्तौ साहायकमाचरन्ति। नवमाध्यायस्य देवताधिकरणप्रसङ्गे देवतानां स्वरूपचर्चोपतिष्ठते। तत्र च सिद्धान्ततया मीमांसादर्शनं तासां विग्रहादिमत्तां निराकरोति। इदं नास्त्यभिप्रेतं यन्मीमांसया देवताः खण्डिताः इति, अपि तु तासां व्यापकप्रभुत्वार्थं तासां शरीरधारिता व्यावृत्ति विषयतां नीता। अस्माभिस्तु कर्मस्वरूपस्य निष्पत्तये देवताऽनिवार्याङ्गतया घोषिता। सत्यप्येवं पुराणैः प्रसाधिताया विग्रहादिमत्ताया उन्मूलनं यदा सिद्धान्ततां गतं, ततो जनैर्देवतानामेव निराकरणं मन्वानैः परम्परया ईश्वरनिरासेन सम्बद्धतां नीतम्।

परं वस्तुतो नेयं स्थितिरस्ति। अस्माभिः स्वीक्रियते यदस्यां दिश्यस्माकं प्राचीनैराचार्यैः सर्वथा ताटस्थ्यमङ्गीकृतम् परं तेषामभिप्राय ईश्वरस्य खण्डनं नास्ति. अपि तु तस्य कतिचन स्वतन्त्रा हेतवः। सर्वतः प्रथममिदमेव कारणमस्ति यद् विचारशास्त्रज्ञैर्यो हि स्वकीयः कार्यक्रमो घोषितः मार्गो वा निर्धारितः स स्वभावत एतावान् सरलः संवृत्तो यदत्र कस्यापि पथप्रदर्शकस्यापेक्षा नानुभूता। अयञ्च प्रवाह इव सम्पन्नः, निर्बाधं च तत् स्रोतस्तथैव गतिशीलमासीत्-एवं क्रमेण ईश्वरोऽनावश्यक इव प्रत्यपद्यत, कालेन च स परम्परातो विच्छेदमवाप। ईश्वररूपाया अस्या अलौकिक्याः शक्तेः यन्नाम सर्वतः प्रथममपेक्षणीयं भवितुमर्हति तत् कर्तृत्वेन, परमत्र न खलु तत् स्थानं रिक्ततां गतं, न च कदाचिदस्माभिस्तदीयोऽभावोऽनुभूतः। अस्माभिः सृष्टिरनादिरनन्ता च

१. योगसूत्रम्।

परिकलिता, परिणामतस्तस्याः कर्तुः कल्पनैव भवितुं नार्हति। द्वितीय आधारो य ईश्वरस्य सत्तायाः सिद्धये सहायको भवितुमर्हति स्म स आसीद् वेदस्य कर्तृत्वेन तस्य स्वीकारः। परमस्माभिर्वेदः कृतित्वेन नाङ्गीकृतः, येन तस्य कर्तृत्वेन कस्य-चिदुपदेशः (व्यपदेशः) कर्तुं शक्यते। ईश्वरस्त्रीकृतेस्तृतीय आधारः फलानां नियन्तृत्वेन दातृत्वेन वा तस्य स्थितिर्भवितुमर्हति, यथाऽन्यानि दर्शनान्यभ्युपगच्छन्ति। परमस्माकं क्षेत्रे कर्मणः फलस्य च शृङ्खलाऽपूर्वद्वारा तथा परिकल्पिता वर्तते यथा कस्याश्चिद् व्यक्तेः पृथक्तया नियन्तृत्वेनापेक्षणीयत्वं नास्ति, नापि दातृत्वेन। शास्त्र-विहितविधानानुसारं विधिपूर्वकं कर्मणि पूर्णतयाऽनुष्ठिते कथमिव तदेव कर्म फलमस्मभ्यं न दद्यात्? वेदविहितरीत्याऽनुष्ठितं कर्मैव स्वयं फलदम्, तदर्थश्चान्यस्य केनापि रूपेण कस्यापि कल्पनं गौरवमात्रम्। घटस्योत्पत्तिसाधनानि समग्राण्यादाय कुम्भकारो यदा घटोत्पत्त्यनुकूले व्यापारे प्रवर्तते ततो घट उत्पद्यत एव। तन्तूनां विधानानुसारं संयोगे कृते पट उत्पद्यत एव। ततोऽस्य प्रातिस्विकस्य कृते कस्यचिदतिरिक्तस्य वस्तुनः कल्पना कथमिव क्रियेत? एवमस्माकं शास्त्रेण कस्यचिदपि खण्डनमण्डन-बुद्धिनिरपेक्षेण स्वभावत एव कोऽपि नवीनो मार्गः प्रवर्तितः, यत्रेश्वरस्यापेक्षणीयत्वं नानुभूतम्, न तस्य प्रसङ्गोऽपि प्राप्तः। विषयेऽस्मिन्नस्माकमाचार्याणां ताटस्थ्यस्य मूल कारणमिदम्, तस्य लक्ष्यमभिप्रायो वा ईश्वरस्य निराकरणं नास्ति।

समीक्षादृष्ट्या दार्शनिकीनां परम्पराणां समीक्षणे क्रियमाणे वयं पश्यामो यद् यैर्डिण्डिमघोषपूर्वमीश्वरोऽङ्गीकृतस्तेषामीश्वरोऽपि स्वयमीश्वरतां न बिभर्तीति। कर्मापेक्षः खलु सः[१]। कर्मानुसारमेव हि स जनमनुगृह्णाति। यदि तेन विनैव कर्म फलानि दीयेरन् ततः सोऽन्यायकर्तेत्यपि शक्यते वक्तुम्। साङ्ख्यं तु प्रकृतिपुरुषातिरि-क्तस्येश्वरस्यास्तित्वमेव न सहते। योगोऽपि तं परमसाध्यं न मनुते। वेदान्तस्य (अद्वैतस्य) परमप्राप्यं ब्रह्मास्ति, तद् हि सर्वथा निर्गुणम्। ईश्वरस्य कृते तत्र न तथा प्रशस्यं पदमस्ति। सोऽप्यन्ततो ब्रह्मणो या माया तस्या एक भाग इति, कियदपि प्रभावशालित्वं बिभृयादेतेन किम्? स्थितिरियमीश्वरनाम्नो डिण्डिमघोषकारिणा-मस्ति। पुनर्यदि मीमांसादर्शनं स्वकीये प्रातिस्विके प्रवाहे किञ्चिदौदासीन्यं बिभर्ति चेत् तन्मम विचारेण न किमप्यन्याय्यमाचरति।

इदमेकं स्पष्टीकरणं सम्पन्नम्। ततश्चास्माभिर्विषयेऽस्मिन्नान्तरिकरूपेण विचारः कर्त्तव्यः। इदं तु स्वीकर्त्तव्यमेव यदस्माकं कतिपये विदितार्था आचार्या विषयेऽस्मिन् मौनावलम्बं कृतवन्तः, कतिपये च विदितार्था अस्यावहेलनामकार्षुरिति। मोक्षमूलर-महाशयेन दर्शनमिदं निरीश्वरमिति निर्दिश्यास्याचार्याणां स्वतन्त्रसमालोचनाशक्तेः

---

१ तत्कारित्वादहेतुः (न्यायदर्शनम्)

वार्तिकम्—"न ब्रूमः कार्याद्यनपेक्ष ईश्वरः कारणमिति, अपितु पुरुषकर्म ईश्वरोऽनुगृह्णाति।

परिचयं दत्तवान्। अभिहितं तावत्तेन – भारतीयदार्शनिकानामिदं सामर्थ्यं यत्तैरीश्वर सदृशस्य सर्वसम्मतस्य सिद्धान्तस्याप्यालोचनात्मकं खण्डनं कृतमिति। इदं खलु विचारस्वातन्त्र्यस्य देदीप्यमानं प्रमाणम्। शबरस्वामिनाप्यस्य निरूपणायावसरो न लब्धः। तस्य शब्दनित्यत्ववादप्रकरणेन कतिचनाक्षेपा अवश्यं कर्त्तुं शक्यन्ते। आचार्यकुमारिलेन बहुविस्तरप्रकरणद्वारा सर्वज्ञं खण्डयताऽवश्यमस्मिन् विषये सङ्केतितम्। सर्वज्ञोऽयमीश्वरः किम्? परं प्रायोऽस्य निरूपणं तादृशमेव। कुमारिलस्यास्मिन् प्रकरणे स्पष्टतयाऽभिधावृत्त्या न स्यात्, परं लक्षणावृत्तेः साहाय्येन तत्कृतस्येश्वरनिरासस्याभासोऽवश्यमुपलभ्यते। ईश्वररूपाया शक्तेर्विषये सहसा केनचित् साहसं न कृतम् परमिदमस्तु कटु सत्य तथापि मया स्पष्टमुद्घोषयितुं शक्यते यद् विषयेऽस्मिन्नाचार्यैः स्वीकृतं मौनं प्रमाणयति यत्तैरीश्वराङ्गीकारस्यापेक्षणीयत्वं नानुभूतम्। कुमारिलकृतं सर्वज्ञखण्डनमस्य साक्षीभूतम्। रहस्यमिदं जानीमो यत् कुमारिलेन सर्वज्ञस्य यत् खण्डनं कृतं तद् विशेषलक्ष्यमाश्रित्यैवेति। यदि तेन कयाऽपि दृष्ट्या सर्वज्ञस्य सत्ता स्वीक्रियेत तत इतरदर्शनैर्विचारैर्वा सिसाधयिषितेभ्यः सर्वज्ञेभ्योऽपि स्वीकृतिर्देया स्यात्। यथा अभ्युपगन्तव्यं यत् कुमारिलेन लोकोत्तरसत्तारूपेणेश्वरः स्वीकृतः, तदर्थं तर्का उपस्थापिताः, तस्यालौकिकत्वविभुत्वमपि प्रतिपादितम्। एवमेव तत्समक्षं बौद्धैर्बुद्धे तथैव प्रस्तुते तेन तत्खण्डनं कथमपि न करणीयं सम्पद्येत। स्वयमेव यादृशीं शक्तिं स्वीकुर्वाणस्तादृशीमेव परेण प्रस्तूयमानां कथञ्चिदनङ्गीकर्त्तुं न प्रभवति। इयमेका व्यावहारिकी विपदासीत्, यत आत्मानं रक्षितुं कुमारिलेन तस्य मूलोच्छेदः कृतः। अतः कुमारिलकृतं सर्वज्ञस्य खण्डनं बौद्धानां मुखमुद्रणार्थमस्ति, येन ते बुद्धे तस्यैव तर्कसाहाय्येन भगवत्त्वं प्रमाणितं न स्यात्। इयं सत्ता तेन सर्वज्ञशब्देनाभिहिता, तत्राप्येको हेतुः। बुद्धस्तदनुयायिभिः सर्वज्ञशब्देन[1] सम्मानितः। इदमस्ति विषयेऽस्मिन् कुमारिलस्य तटस्थतायाः कारणम्। अस्याभिप्रायः स्पष्टं मया तु निःसङ्कोचं स्वीक्रियते यत् कुमारिल ईश्वरस्य सत्तां न स्वीकुरुतेस्मेति। ततोऽपि तदनुयायिभिः कुमारिलस्यांशिक्यास्तटस्थताया अनेकेऽर्थाः परिकल्पिताः। कतिपये तु श्रद्धेयाचार्यवदेव तटस्थभावं स्वीकृतवन्तः, कतिचनास्य सर्वसम्मतायाः स्वीकृतेः समक्षं शिरांसि नमयाञ्चक्रुः। प्रायः सर्वैरपि स्वग्रन्थानां मङ्गलाचरणेषु नानाप्रकारैरस्य वन्दना कृता। तेष्वेतादृशं साहसं नोत्पन्नं येनास्या अलौकिक्या शक्तेर्निराकरणं तैः कर्त्तुं शक्येत, यद्यपि नेदं किमपि महत् कार्यमासीत्। आचार्यखण्डदेवेनास्य सत्तायाः स्वीकृतिविषये स्वकीयो विचारः स्पष्टीकृतः। भट्टमतानुयायिनामेव सदृशी स्थितिः प्रभाकरस्य तदनुयायिनामपि चास्ति। प्रभाकरः स्वयमस्मिन् विषये मौनमालम्बते तस्य पट्टशिष्यः शालिकनाथस्तु चर्चामप्येतद्विषयेऽकृत्वा मौनमालम्बते। नन्दीश्वरेण स्वीकीये प्रभाकरविजये ईश्वरखण्डनोद्देश्येन स्वतन्त्रं प्रकरणमेव लिखितम्—किन्तु तेन तत्र विशेषणं योजितम्—आनुभाविकेश्वरनिरास इति, अर्थात् तेनेश्वरस्यानु-

१. सर्वज्ञः सुगतो बुद्धो ………(अमरकोशः)

भाविक्या एव सत्ताया निरासः कृतः, न तु पूर्णसत्ताया इति। एवमुभयोरेव परस्परयो रस्माभिरीश्वरविषये कस्यापि निश्चयस्य संकेतो नोपलभ्यते। न स्पष्टतयेदं खण्डयितुं शक्यं न च मण्डनमपि कर्तुं शक्यम्। तथापीश्वरस्य विषये गृहीता महद्भिराचार्यै स्तटस्थता खल्वेकं रहस्यम् यस्या व्याख्या पूर्वं कृता। एतदतिरिक्तं विषयेऽस्मिन् कथन मनावश्यकमेव स्यात्।

वस्तुतः सुपरिचिता अपि कतिपये विद्वांसो हठपूर्वकमीश्वरं विचारस्यास्या-नुरूपं साधयितुं प्रयतन्ते। केवलमेतदर्थमेवैतेषां प्रयासो यद् यदि मीमांसयाऽस्य स्वीकृतिर्न प्रदर्श्यते ततोऽस्मिन् शास्त्रे महत्यपूर्णता समापत्स्यते इति। नास्ति मदीया सिद्धान्तेनाभिप्रायेणानेनाभिमतिः। मन्मते ईश्वरेऽस्वीकृतेपि मीमांसाया महत्त्वं न कथञ्चिन्न्यूनतामापन्नं स्यान्न च काचित्तत्रापूर्णताऽपि स्यात्। अत एव नहि कैश्चिदप्यस्वाभाविकैस्तर्कैरीश्वरं प्रमाणयितुमपेक्षणीयतामनुभवामि, नापि च तदभावे दर्शनस्य महत्त्वं क्षीणतां गत कलयामि। इदन्त्वस्मत्कृते महत्त्वसूचकमेव स्याद् यदस्माभिर्न कस्याप्यन्धानुकरणं कृतम्, अथ च महता साहसेन स्वकीय विचार स्वातन्त्र्यं रक्षितम्।

२. वेदापौरुषेयत्वम्

वेदः खल्वस्माकं ज्ञानविज्ञानयोरादिम स्रोतः, अयमेव च विश्वस्य सर्वसम्मत मादिमं साहित्यम्। अत एवास्य सर्वविदिते महत्त्वे किमपि कथनं दिवा प्रज्वालनम्। आस्तिकदर्शनेषु नास्ति किमपि वेदप्रामाण्यविषये संशयस्थानम्। तथापि तानि वेदरचनाविषये पूर्णमतभेदमुपस्थापयन्ति। वेदः पौरुषेयः (पुरुषकर्तृकः) इति न्यायदर्शनस्य पक्षः। स च पुरुष ईश्वरः। नैयायिकाः स्वकीयेनानुमानास्त्रेण तस्येमां पौरुषेयतां प्रमाणयन्ति। तेषामनुमानस्यायं प्रकारः--"वेदः पौरुषेयः, वाक्यत्वात् महाभारतादिवाक्यवत्।" अद्वैतिनो (वेदान्तिनः) पौरुषेयं इति न मन्वते, पर तेषामपौरुषेयता मीमांसापेक्षया विचित्रैव। तेषां मते पौरुषेयशब्दार्थः—केनचित्पुरु-षेणान्यप्रमाणसाहाय्येन रचितत्वमिति। वेदो नास्त्येवं विधः, अत एवापौरुषेय इति। केषाञ्चिदन्येषां प्रमाणानां साहाय्येन स नास्ति रचितः। एवं सत्यपि वेदान्तिनोऽनेन सममीश्वरस्य रचयितृरूपेण सम्बन्धं स्वीकुर्वन्ति--इदमेव तेषां मीमांसया सह वैमत्यमस्ति।

नास्तिकदर्शनानां विषये किमिव वक्तव्यम्? तेषामेतद्विषये प्रत्येकमुक्ति-स्तर्को वा उपसहनीयः, न तु विचारपूर्णः। यावद्युक्तैर्युक्तिमद्भिर्वा साधनैरेतत्खण्डनं न क्रियते तावत् तेषां स्वरूपरक्षा न भवितुमर्हतीति तेषामभिप्रायः। अत एव निरर्थको वाग्जालमात्रमिति वदद्भिस्तैर्वेदस्याप्रामाण्यं घोषितम्। इयं भिन्नानां पुरुषाणां कृतिरिति तेषां वक्तव्यम्। यानि वेदभागानां काठक-कौथुम-कलापकादी-

न्यभिधानानि सन्ति तानि खलु कर्त्राश्रितानि सन्ति, तात्पर्यमस्ति यत् कठकलापादिभिराचार्यैस्ते भागा रचिता इति। एभिः प्रतिपादितो ज्ञानराशिः कर्मजालञ्च ब्राह्मणानामुदरपूर्त्यै[१] पिटकमिति चार्वाकैरभिहितम्। इत्थं वेदविषये समुत्पन्ना विचारणा मीमांसकैः खण्डिता। तेषामेव सामर्थ्यस्य प्रभावो येन भयङ्करेऽपि काले तैर्वेदस्य निरपेक्षं प्रामाण्यं स्थापितम्. रक्षितुं प्रयतितञ्च।

तैरुक्तम्-वेदोऽपौरुषेय इति। यद्यस्य रचयिता कश्चन पुरुषो भवेत् ततः कथमिव सम्भाव्येत यदेतादृशस्य ग्रन्थराशेः प्रणेता पुरुषविशेषोऽस्माकं पूर्ववर्तिभिर्न स्मृतः। केवलं तद् वाङ्मयमस्ति अस्मादेव कारणात् अनुमानाश्रयेण ईश्वरो हिरण्यगर्भः प्रजापतिर्वा कर्तृरूपेण सम्बद्धः स्वीक्रियते—इदं नास्त्यपेक्षणीयम्। सर्वाण्यनुमानानि सत्यान्येव न भवन्ति सत्स्वप्यनेकेषु प्रमाणेषु प्रयुज्यमानेषु। यदि सर्वाण्यनुमानानि सत्यानि तर्हि—स्वस्त्रिया सम्भोगो न कार्यः, स्त्रीत्वात्, परस्त्रीवत्'' इदृशामप्यनुमानानां प्रामाणिकत्वं स्यात्। अनुमानानामीदृशदोषग्रहणायैव हेत्वाभासाः परिकल्पिताः। हेतवो यत्र दूषिता भवन्ति तादृशान्यनुमानानि प्रामाणिकतां न बिभ्रति। वेदस्यापौरुषेयत्वसिद्धयेऽपि यादृशमनुमानं विहितं तदुपाधिग्रस्तमिति। साध्ये सदपि यत् साधने न तिष्ठति स उपाधिरित्युच्यते। अत्रापि जन्यमानान्तरमूलकत्वस्मर्यमाणकर्तृत्व रूपमुपाधिद्वयम्, यच्च पौरुषेयवाक्यं सदपि वेदवाक्ये न तिष्ठति। अयमभिप्रायः—यत् पौरुषेयं भवति तत् परतः प्रमाणं भवति, तस्य कर्त्ताऽपि स्मर्यते। परमेतद्द्वयमत्र नास्ति। अत एवैतदनुमानं दोषग्रस्तत्वेन वेदस्यापौरुषेयतां साधयितुं न क्षमम्।

नास्तिकमतं--कठकलापादीनां कर्तृरूपेण प्रस्तुतीकरणमिति सङ्गतं नास्ति—एतेषां प्रकरणानामाख्या न हि रचनाकर्तृत्वमूलाः, किन्तु प्रवचनकर्तृत्वमूलाः। तत्तद्भागस्य सर्वोत्तममसाधारणं वाऽध्ययनं कठेन वा कलापेन कृतम्--अतएव ''कठेन प्रोक्तम्'' काठकम् एतत्पाणिनिप्रतिपादनानुसारं नामकरणानीमानि प्रवचननिमित्तकानि सन्ति। भगवतः पाणिनेः ''तेन प्रोक्तम्'' इति शासनमिदमस्य साक्षिभूतम्। इयमेव स्थितिः बबरः प्रावाहणिरकामयत, वनस्पतयः सत्रमासत, सर्पाः सत्रमासत, गावो वा'' इत्यादिवाक्यानामस्ति। नास्तिकाः समालोचकाः प्रावाहणिं कस्यचित्पुरुषविशेषस्य वाचकं परिकल्प्य वेदं पुरुषसम्बद्धं, अत एवानित्यं प्रावाहणेः पूर्ववर्तिनं मन्वते, परं 'प्रावाहणिः' इत्यस्यार्थः पुरुषविशेषो नास्ति, अपि तु प्रवहण कर्त्ता' इत्यस्ति। वनस्पतयः सत्रमासत, सर्पाः सत्रमासत—एवमादीनि वाक्यानि नास्तिका 'उन्मत्तप्रलाप' इत्युक्त्वाऽपि वेदस्य प्रामाण्यं व्याहन्तुं प्रयतन्ते-परमेतत् सर्वं तेषां भ्रान्तविचाराणां निदर्शनमात्रम्। इमानि सर्वाण्यर्थवादवाक्यानि सन्ति, पुरुषेषु उत्साहस्य प्रेरणानां वा सञ्चार एषामुद्देश्यम्--अयमभिप्रायः, वनस्पतिभिः

---

१. बुद्धिपौरुषहीनानां जीविकाधातृनिर्मिता।

सर्वैरपि सत्रं कृतञ्चेत् मानवेन त्ववश्यं कर्त्तव्यमिति । ईदृशो भ्रान्ता विचारा मीमांसकानां समक्षमुपस्थातुं नाशक्नुवन् ।

तैः पूर्णया योग्यतया वैदुष्येण चैषां विचाराणां खण्डनं कृतम् । वेदा पौरुषेय इति साधयित्वा तैरेतन्निर्दिष्टं यत्कथञ्चिदपि पुरुषगतदोषाणां समावेशोऽत्र न भवितुमर्हतीति । वस्तुत एतावतोऽक्षय्यस्य ज्ञानराशे रचना केनापि पुरुषविशेषेण सम्भाव्यो नास्ति । पूर्वाभिहितानुमानप्रकार इव वेदापौरुषेयतायाः साधकोऽयमनुमानप्रकारो नास्ति दोषग्रस्तः, यथा—

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा ॥ (मीमांसान्यायप्रकाशः)

इदं लोकसिद्धमपि । यथाद्यत्वेऽपि कमपि वेदज्ञं तस्य वेदाध्ययनविषये पृच्छामो वयम्, तदा स स्वकीयां गुरुपरम्परां वर्णयति । यदि पुरुषविशेषरूपेण ईश्वरोऽपि कल्प्यते, ततस्तेनेश्वरस्य किमपि गौरवमथवा वेदस्यैव गौरवमुपजायते । सर्वज्ञेनेश्वरेण कथमिव वेदरचनायां प्रवृत्तेन भाव्यम् ? यदि कश्चित् सम्बन्ध इष्ट एव चेत् ततः स उपदेशकरूपेण कर्तुं शक्यते अत एव योगदर्शने वेदं गुरूणां गुरुरित्याधीयते ।

अपौरुषेयतां प्रसाध्य मीमांसकैः स्वकीयं महल्लक्ष्यं साधितम्-नास्त्यत्र सन्देहः । यदि पुरुषस्य केनापि प्रकारेण प्रवेशोऽत्र स्वीक्रियते ततः पुरुषसम्बन्धभवा अनेके दोषा अत्र प्रविष्टा उपलभ्येरन्, येन नास्तिकदर्शनैरस्य व्यापकं प्रामाण्यमुच्छिन्नं कृतं भवेत् । परं विचारकुशलैरमीभिस्तदर्थमवसरो न दत्तः, सर्वाश्चाशङ्का भ्रान्तयश्च समूलोच्छेदमुपशमिताः । इदमेवास्त्यस्या अपौरुषेयताया रहस्यमस्यावदानञ्चेति ।

शब्दखण्डः

शब्दस्य महत्त्वम्

प्रकान्तरेण शब्दः खलु ब्रह्म। जगतः समग्रः क्रियाकलापोऽनेनैव परिचाल्यते। न केवलं मानवस्य, किन्तु प्राणिमात्रस्य जीवने प्रत्येकं क्षणमेतं विना गतिमद् भवितुं नार्हति। लौकिक्या पारलौकिक्या च दृष्ट्याऽस्य महत्त्वम्--अयं (शब्दः) प्रकारद्वयेन यथेष्टफलदः वैयाकरणाः पदे पदे शब्दो ब्रह्मेति साधयन्त्येव। परमेतेन सहैव तस्यैक मात्रलाघवमपि[1] पुत्रोत्सववत् सुखकरमभ्युपगच्छन्ति। महाभाष्यकारेण पतञ्जलिना महाभाष्यस्य प्रारम्भ एव घोषितं यत् शब्दज्ञानं विना मानवस्यैहिकामुष्मिक श्रेयांसि न भवितुमर्हन्ति। अयमेव शब्दः संस्कारशीलं पुरुषं. मरा-मरेति भजन्तं नृशंसं शबरमादिकविबाल्मीकिं करोति। अस्यैव शब्दसमूहस्य वेदात्मकस्याध्ययने-नोच्चारणमात्रेण वा मनुष्यः सर्वतन्त्रस्वतन्त्रतामखिलफलाधिकारिताञ्च प्रतिपद्यते। तान्त्रिकदृष्ट्या शब्दजालेन निर्मितस्य मन्त्रस्य विध्यनुसारं जपति मनुष्ये विलक्षणा शक्तिः प्रादुर्भवति यया तदीयोपास्यदेवः तत्समक्षमुपस्थाय नृत्यति। अयमेव शब्दोऽखिलस्य ज्ञानस्य शरीरं ब्रह्मानन्दसहोदरस्य रसस्य चाश्रयः। शब्दस्यैतेन व्यापकेन प्रभुत्वेनाकृष्टैर्विभिन्नैरपि दर्शनैर्विषयेऽस्मिन् पृथक् पृथग् विचारः कृतः।

शब्दस्य स्वरूपम्

आप्तवाक्यं शब्द इति न्यायदर्शनम्। स चाकाशगुणकम् अयञ्च शब्दो न्याय दर्शनदृष्टयोत्पद्यते विनश्यति च। कण्ठताल्वाद्याघातप्रयत्नजः शब्दः प्रथमक्षणे जनितः द्वितीयमुत्पाद्य नश्यति, द्वितीयश्च तृतीयमिति क्रमः। यथा जलस्य प्रथमस्तरङ्गो द्वितीयं तरङ्गमुत्पाद्य नश्यति। शब्दोऽनित्यः। यद्ययमनित्यः स्यात् ततः प्रथमं श्रुतेनापि तेनार्थविबोधः सम्पद्येत। इदं स्पष्टमुपलक्ष्यत एव यत् उच्चारणप्रयत्नेन स उत्पद्यते। स च विनश्वरः। अत एवोत्पत्तेः पूर्वमुच्चारणानन्तरञ्च तस्योपलब्धिर्न भवति। "शब्दं कुरु" "शब्दं मा कुरु" इति लोकस्य व्यवहारः शब्दं क्रियाशीलं साधयति। नित्य एक एव पदार्थः एकस्मिन्नेव समये सर्वत्रोपलब्धो न भवितुमर्हति, किन्तु शब्द उपलभ्यते। नित्यस्य वस्तुनः प्रकृतिविकृती न भवतः, परं शब्दे प्रकृतिविकृतिभावो दृश्यते। यथा 'इत्यादि' इत्यत्र 'इति आदि' इत्यनयोः सन्धौ कृते इकारस्य विकृतिर्य-कारो भवति। नित्यं वस्तु न्यूनतां वृद्धिं वा न गच्छति परं शब्दो बहुभिर्जनैरुच्चारि-तत्वेन वर्धते। तस्य श्रवणेन प्रतीयते यत् अवश्यमेव शब्दस्य कस्मिंश्चिदवयवे वृद्धिः

सञ्जातेति। इयमवयवसत्ता नित्यत्वस्य सर्वथा विरुद्धा। एवं स्वकीयैः प्रबलैस्तर्कैर्नैयायिकाः शब्दोऽनित्य इति आकाशस्य गुण इति च साधयन्ति।

मीमांसायाः पक्षो न्यायस्य पक्षेण पूर्णतया विपरीतः—श्रोत्रेन्द्रियग्राह्यं वस्तु तन्मते शब्द इति, स च वर्णात्मको ध्वन्यात्मक इति द्विधा। वर्णात्मकः शब्दो विभुर्नित्यश्च। स च न कस्यापि गुणः, गुणस्य स्वतन्त्रसत्ताया अभावस्याभ्युपगमात्, स च किमप्याश्रित्य तिष्ठति। किन्तु शब्दः किमप्याश्रित्य न तिष्ठति। अत एव द्रव्यं सः। ध्वन्यात्मकः शब्दो निश्चयेन वायोर्गुणोऽनित्यः एतद्द्वारा च वर्णात्मकः शब्दोऽभिव्यज्यते।

किमिदं नित्यत्वमिति ? तदस्माकमभिव्यक्तिप्रक्रियैव स्पष्टं भविष्यति। कण्ठतालुसंयोगः स्तिमितं वायुं प्रेरयति, अभिघातेनानेन वायावान्दोलनमुत्पद्यते, येन वायोर्यावति गतिः तावति शब्दोऽभिव्यज्यते। प्रक्रियेयं लोकसम्मताऽपि। रजकः शिलायां वस्त्रेणाहन्ति, शतघ्न्यां पावकः प्रदीप्यते, परं शब्द एतादृशीनां क्रियाणामनेकक्षणानन्तरं श्रवणगोचरतामापद्यते। अत्र वायुप्रेरणया विलम्बितत्वेन शब्दश्रुतावपि विलम्बोऽनुभूयते। वायोर्गतिरियं शक्तिविशेषेण वर्द्धते, तत्क्षण एवं सहस्रक्रोशपर्यन्तं विनैवव्यवधानं शब्दं नयति आधुनिक आविष्कार आकाशवाणी रेडियो अस्य साक्षिभूता। अयमेव मीमांसाया अभिव्यक्तिवाद उत्तरमीमांसादर्शनस्याप्यभिमतः।

वादिनाऽस्य नित्यतां खण्डयितुं ये तर्का उपस्थापितास्ते खलु निराधाराः। शब्दस्य श्रवणात् पूर्वमनन्तरं वा तस्य याऽनुपलब्धिः न सा तस्यानित्यत्वं साधयितुं क्षमा। स तु सदैव विद्यते, केवलं कण्ठवायोः संयोगविभागौ तस्य व्यञ्जकौ। यदा तौ व्यवस्थितौ भवतस्तदा शब्दस्योपलम्भो भवति। तयोरव्यवस्थायां सत्यां सैव तस्यानुपलम्भस्य कारणम् नह्यनित्यता। द्वितीयस्तर्कः शब्दं कुरु शब्दं मा कुरु इत्यादि व्यवहारेण शब्दं क्रियाश्रय साधयितुमुपस्थापितः, स नोचितः।

एकस्मिन्नेव कालेऽनेकत्र नित्यस्य वस्तुन उपलब्धिर्न भवति, इयमपि भ्रान्तिः। पश्यतु भवान् सूर्यम्, एकोऽपि सोऽनेकेभ्यो देशेभ्यो दृश्यते। अनेन सूर्यस्य नानात्वं साधयितुं न शक्यम्। आदौ प्रदर्शितः प्रकृतिविकृतिभावो वस्तुतः प्रकृतिविकृतिभावो नास्ति। इकाराद्यकारो भिन्नः। यकारस्य प्रयोगस्थले इकारो न प्रयुज्यते। इदं तु केवलं सादृश्यम्, यः प्रकृतिविकृतिभाव इति वक्तुं न शक्यते। अन्यथा दध्नि कन्दनिर्मिते मिष्टान्ने च वर्णैक्यात् इदं सम्पद्येत। बहुभिर्जनैरुच्चारिते भवता या शब्दावयवानां वृद्धिः स्वीक्रियते, न सा तेषां किन्तु नादस्यास्ति। शब्दस्योच्चारणमन्यस्यार्थज्ञापनार्थं भवति, यच्च शब्दस्य नित्यत्व एव सम्भाव्यते।

शब्दो यदि निर्मीयेत चेत्प्रत्युच्चारणकालं शब्दस्य नवत्वेन श्रोतुः सम्बन्ध ग्रहणाभावेऽर्थज्ञानं न सम्पद्येत। एको जनोऽभिप्रायमेकमादाय रचनायां प्रवर्तते ततोऽन्यः

कथमिव तस्य तमाशयमवगन्तुं शक्नुयात्। यथा गोशब्दे समधिगतेऽश्वशब्दस्यार्थो न ज्ञायते। अतः क्षणिके शब्दे तत्काल नष्टे सति सम्बन्धज्ञानं न भवितुमर्हति। अर्थज्ञानं तु दूरे तिष्ठतु लोके 'गोशब्दो वारत्रयमुच्चारितः' 'इदमेवोच्यते, वारत्रयं गोशब्दो निर्मित इति नोच्यते। अतः नित्यत्वं व्यावहारिकं स्वतः सिद्धञ्च सत्यम्।

शब्दार्थयोः सम्बन्धः

शब्दार्थौ तथा सम्पृक्तौ यथा जलतरङ्गौ, जीवब्रह्मणो, पार्वतीपरमेश्वरौ। अत एतद् द्वयं पृथक् कर्तुं न शक्यते। अर्थरहितस्य शब्दस्य नास्ति महत्त्वम्, अर्थश्चाश्रयभूतं शब्दं विना स्थातुं न शक्नोति। शब्दार्थयोरस्य शाश्वतस्य सम्बन्धस्य विषयेऽप्यस्माकं विचारा नैकत्वमासादितवन्तः। नैयायिकैरुच्यते—शब्दार्थयोर्नास्ति सम्बन्धः कश्चित्। स्यात् सम्बन्धस्तदा मोदकशब्देऽभिहिते लड्डुनाम्ना पदार्थेन मुखे समुपस्थितेन भूयेत। नैतयोः कार्यकारणभावः सम्बन्धः, न च नित्यनैमित्तिकभावः। यदि नित्यः सम्बन्धः स्यात् ततः प्रथमं श्रुते शब्देऽप्यर्थज्ञानं भवेत्। अनयोः सम्बन्धस्तु कृत्रिमः—शब्दो मुखान्निर्गच्छति, अर्थश्च पृथिव्यां तिष्ठति। मोदकस्योच्चारणं देवदत्तस्य मुखात् भवति, मोदकश्चापणे तिष्ठति। अयं शब्दः, अयमर्थः, नायं शब्दः, नायमर्थ इत्यादि लौकिको व्यवहारोऽपि द्वयोरनयोः पार्थक्यं साधयति। रूपभेदोऽप्यनयोरस्ति, गोशब्द उच्चार्यते, सास्नादिमान् पशुश्च तेन ज्ञायते। अत इदं स्वीकर्त्तव्यमेव यत् केनचित् पुरुषविशेषेण शब्दार्थयोः सम्बन्धः कृतः, एतयोर्व्यवहार ज्ञानार्थश्च वेदा निर्मिता इति।

यद्यपीदृशसम्बन्धस्य कर्तुर्नाम नास्ति विदितम्, तथाप्यर्थापत्तिप्रमाणं तस्य कल्पनायां साहाय्यमाचरति। यथा पीनोऽयं देवदत्तो दिवा न भुङ्क्ते। अत्र देवदत्तस्य पीनत्वसिद्धये रात्रिभोजनं कल्प्यते। सम्बन्धं विना शब्दस्यार्थज्ञानं भवितुं नार्हति - सम्बन्धो हि कार्यम्, कर्तारं विना सम्पन्नं न भवति, अतस्तदर्थमवश्यं कस्यचित् कर्त्तुः कल्पना कर्तव्या।

मीमांसामते तु शब्द इव शब्दार्थयोः सम्बन्धोऽपि नित्योऽपौरुषेयश्च। किं नश्छिन्न यद्यनयोरुपर्युक्तं सम्बन्धद्वयं न स्यात्, संज्ञासंज्ञिभावश्चावश्यमस्ति। शब्दो हि संज्ञा, अर्थबोधकत्वात्, अर्थः संज्ञी, अर्थात् प्रत्याय्यः। शब्दादुत्पन्नः (अभिव्यक्तः) बोधः, प्रत्ययः। प्रथमं श्रुतमात्र एवार्थज्ञानमिति नित्यत्वाभिप्राये भ्रान्तिमात्रम्। शब्दोऽर्थस्य प्रत्यायकः (बोधकः), किन्तु स बोधः (प्रत्ययः) संज्ञासंज्ञिज्ञानं विना कथमिव भवितुमर्हति। लौकिको व्यवहारोऽप्यत्र साक्षी। तमसि विद्यमानमपि वस्तु दोषरहितेन चक्षुषाऽप्यवलोकयितुं न शक्यते। परं वस्तु नास्तीति चक्षुषि वा शक्तिर्नास्तीति न तात्पर्यम्। एवमेव शब्दात् शक्तिग्रहाभावे प्रथममर्थावबोधो न भवति, अस्य नास्त्यभिप्रायो यत् शब्दार्थयोः सम्बन्धो नास्तीति। अयं सम्बन्धः पौरुषेयः, इदं

तु प्रत्यक्षतोऽपि विरुद्धम्। यच्च प्रत्यक्षविरुद्धम्, तत्र प्रत्यक्षमूलकानामन्येषां प्रमाणानां गतिरपि कथमिव भवितुमर्हति? अर्थापत्त्याऽपि कर्तुः कल्पनाऽसम्भवा। यदि कर्ता भवेत् तर्ह्यवश्यं नाम्नाऽभिधीयेत। अन्यच्च, केनचिदन्येन द्वयोरनयोः सम्बन्धः कृतोऽपि स्याच्चेत् तस्य परिचयव्यवहारनामस्मरणानन्तरमेवास्माकं शब्दार्थयोर्ज्ञानेन भवितव्यम्। यथा पाणिनिसिद्धान्तानभिज्ञो जनः वृद्धिपदेन आदैचां ग्रहणं कर्तुं न शक्नोति, यथा च पिङ्गलमतापरिचितो "मेन" मगणं 'गेन' गुरुमवगन्तुमसमर्थः, ततः कथमिव सम्बन्धकर्तुर्ज्ञानं विनैव शब्देनार्थज्ञानं भवेदिति सम्भाव्येत। अत एव कर्त्तुः कल्पनाऽप्यन्याय्या।

नास्त्येतत्सम्भवमपि। यदा कश्चिच्छब्दोऽर्थवान्नासीत् ततस्तस्यामज्ञानावस्थायां कथमिव सम्बन्धः सञ्जातः? अवश्यमयं सम्बन्धकर्ता केनचित् शब्देन कुर्यात्। येन शब्देन स एवं कुर्यात्, तस्य केन कृतः, पुनश्च तस्य केन कृत एवं विधायामनवस्थायां नित्यत्वस्वीकृतिमतिरिच्यान्य आश्रयो नास्ति। लोकव्यवहारेऽप्येवमेव दृश्यते। वृद्धव्यवहारमवलोक्य बाला अर्थमधिगच्छन्ति। वृद्धत्वमापन्नेषु च तेषु तेषां सन्ततयस्तेभ्यो व्यवहारमधिगच्छन्ति, परम्परेयमनन्तकालं यावत् प्रचलति। महात्मना तुलसीदासेन[१] महाकविना कालिदासेन[२] चास्य नित्यत्वं स्वीकृतम्।

पदमर्थश्च

अर्थोऽयं शब्दात् कथमिव स्फुटीभवति? अस्य प्रक्रिया अपि भिन्नाः। मीमांसामते वर्णा एवार्थबोधकाः सन्ति। वर्णेभ्यः पदानि, पदैः पदार्थाः, पदार्थैर्वाक्यार्थो भवति। नहि वर्णातिरिक्तं किमपि पदम्, न पदातिरिक्तः पदार्थः न च पदार्थातिरिक्तः कश्चन पदार्थः। गौरित्यत्र गकारौकारातिरिक्तः शब्दनामा न खलु कश्चन वस्तुविशेषः, यतः श्रोत्रेन्द्रियग्राह्यः पदार्थ एव शब्द इति विचारशास्त्रसम्मतः। 'टन' 'खट' आदि स्वरं श्रुत्वा लोकः शब्द इति व्यवहरति। अत एव मीमांसा लोकसम्मतं शास्त्रसम्मतञ्च पन्थानमङ्गीकरोति।

शब्दशास्त्रस्य मतमेतस्मात् सर्वथा विपरीतम्। गौरिति गकारौकारातिरिक्तः पदार्थोऽस्ति यश्चार्थबोधे हेतुर्भवति। स च स्फोट इत्युच्यते। स्फुटत्यर्थोऽस्मादिति। स्फोटवादस्यास्य स्थापनं वैयाकरणैर्महता प्रयासेन कृतम्। स्फोटं विनाऽर्थबोधोऽसम्भवः। यतो गौरित्यत्र वर्णा एवार्थबोधका इति यदि मन्येत, ततस्तत्प्रकारः कीदृशः? किं व्यस्तैः वर्णैरर्थज्ञानं भवति, अथवा मिलितैः? अथवा वर्णातिरिक्तः कश्चन समुदायो येनार्थज्ञानं भवति? तत्र न प्रथमः, गकारस्याकारस्य वा कथन

१. गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न (रामचरितमानसम्)
२. वागर्थाविव सम्पृक्तौ.........(रघु०)

मात्रेण पूर्णोऽर्थो न लभ्यते। वर्णातिरिक्तः कश्चित् समुदायो न लभ्यते येनार्थज्ञानं स्यात्। यथा नित्यत्वेन विभुत्वेन च वर्णानामवयवा न भवन्ति तथैव तेषामतिरिक्तः समुदायोऽपि भवितुं नार्हति, अत एव द्वितीयः पक्षोऽपि न सङ्गतः। वर्णाः क्रमेण व्यज्यन्ते—यदा गकारो व्यज्यते तदा औकारो न तिष्ठति, व्यज्यमाने चौकारे गकारो न तिष्ठति। एवं वर्णानां साहित्यम् सम्भूयार्थबोधकत्वेन कथमिव भवितुमर्हति? अत एव तृतीयो मार्गोऽपि गतार्थः। अस्यां दशायामनिवार्यतयेदं स्वीकर्त्तव्यं यत् गकारौकारातिरिक्तोऽपि कश्चन गोशब्दो वर्तते, येनार्थप्रतीतिर्भवति, अयमेव गोशब्दः स्फोट इत्युच्यते।[1] शब्दज्ञैरष्टौ स्फोटाः परिकल्पिताः—१. वर्णस्फोटः, पदस्फोटः, ३. वाक्यस्फोटः, ४. अखण्डपदस्फोटः ५. अखण्डवाक्यस्फोटः, ६. वर्णजातिस्फोटः, ७. पदजातिस्फोटः वाक्यजातिस्फोटः। तेषामियमर्थाभिव्यक्तिप्रक्रियाऽस्ति।

मीमांसामते प्रक्रियेयं व्यर्था गौरवपूर्णा चास्ति। सा प्रक्रियामिमां सर्वथा निराकरोति। यथा, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्येकेन वाक्येनास्य सर्वेषां परस्परं साहित्यं न भवति तावत् फलं न लब्धुं शक्यते। अत एव तस्य साहित्यस्य व्यवस्था कर्तव्या, यतः सर्वाणि समकालमेव न क्रियन्ते, किञ्चित् प्रथमं किञ्चिदनन्तरं क्रियते। साहित्यमिदमवान्तरेणापूर्वेण निष्पद्यते, मिश्रितैश्च सकलैः समुदायैरपूर्वस्य सृष्टिर्भवति। एवमेव वर्णाः पृथगर्थबोधका न भवन्ति, यावत् समग्रा नोच्चार्यन्ते, तावदर्थज्ञानं न जायते। यदा च समग्रा उच्चार्यन्ते तदा द्वितीयस्योत्पत्तिक्षणानन्तरं प्रथमस्योपलब्धिर्न भवति। एवं तेषां साहित्यं साक्षाद् रूपेण नास्ति सम्भवम्। तथापि संस्कारद्वारा तत्कर्तुं शक्यते। स च संस्कारः पूर्वनिर्दिष्टैर्वर्णैरुत्पद्यते, पूर्ववर्णजनित सस्कारसहितान्त्यवर्णोऽर्थज्ञाने हेतुरिति तात्पर्यम्। वर्णैः संस्कारा उत्पद्यन्ते संस्कारैश्चार्थप्रतीतिर्जायते। संस्कारद्वारेण वर्णा एवार्थबोधने समर्था भवन्ति। स्फोटस्याङ्गीकारं विनाऽपि यद्यर्थज्ञानं सुष्ठुतया भवितुमर्हति तद् गौरवरूपोऽयं कथमिव स्वीक्रियेत।

यद्यप्युक्तोयां प्रक्रियायामप्यर्थज्ञापनार्थं संस्काररूपमदृष्टवस्तु कल्प्यते तथापि तत्र स्फोटापेक्षया पर्याप्तं लाघवमस्ति। वैयाकरणैः स्फोटः स्वीक्रियत एव, ततोऽपि शब्दैरर्थाभिव्यञ्जकः संस्कारोऽपि स्वीक्रियते। एतदपेक्षया केवलस्य संस्कारस्य स्वीकार एव श्रेयान्। वर्णेषु निहितेयमर्थाभिधानशक्तिर्वैयाकरणैरन्ततोऽवश्यमेव स्वीकार्या तेषां वर्णस्फोटोऽस्य साक्षिभूतः। एतयोः पारस्परिक-सम्बन्धखण्डनमण्डनादि काले वैयाकरणैरिदं स्वीकृतं यद् वर्णा मूलकारणमिति। एवं तेषामियं स्फोटकल्पना बुद्धेर्व्यायाममात्रम्।

१. विशेषतो द्र० वैयाकरणभूषणसारः।

वाक्यमर्थश्च

एवं पदार्थज्ञानमवश्यं भवति, परं तत् पूर्णमिति न शक्यते वक्तुम्। एतस्योच्चारणमात्र एवानेका आकाङ्क्षा उत्पद्यन्ते। पदं खलु साधनमस्ति, किमपि साधनं यावत् क्रियान्वितं न भवति तदा तदीयं साधनत्वं सफलीभवितुं नार्हति। इदं पदमेव यदा क्रियान्वितं भवति तदा तत्र विशेषार्थव्यञ्जनस्य सामर्थ्यमुत्पद्यते। "सुबन्तं पदं यदा[1] तिङन्तक्रियया समुच्चितं भवति, अथवा काचित् क्रिया कारकान्विता भवति" तदा तद् वाक्य भवति।" कोशकारस्य मतमिदं खण्डयित्वा वैयाकरणैः 'एकतिङ् वाक्यम्' इति पक्षः स्थापितः। अनेन वाक्येनास्यार्थज्ञानार्थं तैः खण्डवाक्यस्फोटः स्वीकृतः, यतस्तेषां मते वर्णादयो नश्वराः, अतस्तेभ्यो पदानि पदेभ्यो वाक्यानि, वाक्येभ्यो वाक्यस्फोट उत्पद्यते। तेषामिदं वाक्यमखण्डम्।

बौद्धानां दृष्टया विज्ञानमेवैकतत्त्वमस्ति, जगतोऽखिलानि च वस्तूनि विज्ञानरूपाण्येव सन्ति। वाक्यमेकशब्दात्मकमस्ति तथा वाक्यार्थोऽर्थात्मकज्ञानमस्ति। वाक्यवाक्यार्थयोर्न प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। वाक्यं कारणम्, वाक्यार्थश्च कार्यम्।

नैयायिकानां वैशेषिकाणाञ्च मतमेतस्माद् भिन्नमस्ति। तेषां मते प्रत्येकं वर्णः पदार्थस्य वाचको भवितुं नार्हति, न च तेषां समुदायशः उपलब्धिरेव भवितुमर्हति। अतएव पूर्वपूर्ववर्णानुभवसमुत्पन्नसंस्कारसाहितान्त्यवर्ण एव पदार्थस्य वाचकः इति ते मन्वते। एवमेव पूर्वपूर्वपदार्थानुभवजनितसंस्कारसहितान्त्यपदं वाक्यार्थमभिधत्ते। नियतक्रमयुक्ताः वर्णा एव पदम् नियतक्रमानि पदान्येव वाक्यम्। यस्यावयवा भवन्ति। इदं वाक्यं वैयारणानामिव नास्त्यखण्डम्।

'पदैरभिहिताः पदार्था एव वाक्यार्थं प्रकटीकुर्वन्ति"-- अस्मिन् विषयेऽयं मीमांसाशास्त्रस्य सिद्धान्तः। प्रसङ्गेऽस्मिन् संस्थापितान्युपर्युक्तानि त्रीणि मतानि खण्डयित्वैव मीमांसकैः सिद्धान्तोऽयं स्थिरीकृतः। वाक्यस्य खण्डानां सत्वे 'अखण्डं वाक्यमिति कथमिव वक्तुं शक्यते! केवलं 'रामो गृहं गच्छति' इदमेकं वाक्यम्—एवं कथनमात्रेण इदमखण्डं भवितुं नार्हति। यथा 'राम' इदमेकपदं सदपि वर्णानां भेदेन त्रिषु भागेषु विभाजयितुं शक्यते, इयमेव स्थितिर्वाक्यस्याप्यस्ति। 'इदमेकं वाक्यम्' इत्ययं लोकव्यवहारो न खलु वाक्यस्याखण्डत्वमाश्रित्य वर्त्तते, परमनेकपदानामेकस्यार्थस्य सिद्धये एकत्र सँघटनाभिप्रायेण वर्तते। लोकेऽपि अनेके जना पद लक्ष्यमेकमादाय सङ्घटिता भवन्ति तदा ते सङ्घटनसूचकेन नाम्ना व्यवह्रियन्ते। यथा सेना। यथा एकाऽपि सेना कथमप्यविभाज्येति वक्तुं न शक्यते तथैव वाक्यमप्यखण्डमिति कलयितुं न शक्यते। स्फोटप्रक्रियायाः खण्डनं तु पूर्वमेव कृतम्।

---

१. सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता।

विज्ञानवादिनां बौद्धानां सिद्धान्तः प्रत्यक्षविरुद्धः। तथाहि, वाक्यवाक्यार्थश्चैतद्द्वयमपि ज्ञानात्मकम्। विषयोऽपि ज्ञानम्, विषय्यपि ज्ञानमिति कथमिव सङ्गतं भवितुमर्हति। एवं कारणं कार्यञ्चैकमिति कथमिव प्रकल्पयितुं शक्यते अन्यच्च, ज्ञानाधिकरणमात्मा। वाक्यमपि ज्ञानम्, तदधिकरणेनात्मना भाव्यम्। वाक्यार्थोऽपि ज्ञानम्—तदधिकरणेनाप्यात्मना भाव्यम्। इदं तु दृष्टविरुद्धम्। वाक्याधिकरणतया यथा तथाऽऽत्मा स्वीक्रियेतापि, पर वाक्यार्थस्तु बहिः प्रत्यक्षीक्रियते। आत्मनि विद्यमानेन तु वस्तुना बहिर्न दृष्टेन भाव्यम्। अतएव यद्यपि पक्षो नाङ्गीकरणीयः।

शब्दार्थो जातिर्व्यक्तिर्वा

जातिर्व्यक्तिर्वा शब्दार्थ इति प्रश्नेऽपि दार्शनिकेषु मतभेदः। द्रव्यगुणकर्माणि यत्र सामान्येन तिष्ठन्ति सा जातिः, यत्रासामान्यं वैशिष्टयं भवति सा व्यक्तिरित्युच्यते। गौरित्यस्मिन् शब्दे श्रूयमाण एव प्रथमं गोत्वस्य बोधो भवति–अतएव जातिः शब्दार्थ इति मन्तव्यम्। परमेवं कृते जातौ क्रिया-सम्बन्धाभावापत्तेः। अमूर्तत्वाल्लिङ्गकारकं संख्याश्च तत्रान्विता भवितुं नार्हन्ति। गुणद्रव्ययोः सामानाधिकरण्यमप्यत्र न सिद्धचति। 'व्रीहीनवहन्ति', पशुमानय'' ब्राह्मणो न हन्तव्यः' इत्यादिवाक्यैर्विहितान्यव घातानयनहवनानि जातेर्भवितुं नार्हन्ति। जातौ शब्दार्थत्वेन स्वीकृतायां कस्यचित् प्राप्तिर्न भवति, निषेधस्य तु का कथा? अतएव जात्यपेक्षया व्यक्ते: शब्दार्थत्वकल्पन मधिकमुपयुक्तम्। एवं कृते व्यक्तौ सर्वाः क्रिया उपपद्यन्ते।

कामपि गोव्यक्तिमवलोक्य शब्दशक्त्याऽर्थज्ञानं कृतम् पुनः स एवाभिप्रायोऽन्यथा गोव्यक्त्या सङ्गमयितुं न शक्यते। इत्यस्त्येकाऽत्रापत्तिः। अस्या आपत्तेः समाधानं सामान्यमुपलक्षणं मत्वा कर्तुं शक्यते। इयं या तत्सदृशाकृतिमती सा गौरित्येवं बोधः करिष्यते। जातिरूपलक्षणं भविष्यति व्यक्तिश्च प्रधानम्।

शब्दार्थविषये स्थापितोऽयं व्यक्तिवादो मीमांसकानां नास्त्यभिप्रेतः। तैरिमं खण्डयित्वा तत्स्थाने जातिवादः स्थापितः। यदि व्यक्तिः शब्दार्थः कल्प्येत तदाऽनन्तव्यक्तीनां कृतेऽनन्ताः शब्दाः कल्प्येरन्। व्यक्तयो विभिन्नाः। एको जनः समग्रस्य जगतो व्यक्तीर्ज्ञातुं न शक्नोति, अनन्तशक्तिकल्पनापत्तेः। अतो व्युत्पत्तये जातिरेव मुख्योऽर्थ इति कल्पनं सङ्गतम्। मार्गे चलन्नस्मि, पश्चादागतां गामवलोक्य कश्चिद कस्माद् वदति-आः गौः? एवं श्रवणमात्र एव प्रथमक्षणे गोजातेः प्रतीतिर्भवति, द्वितीये च क्षणे पश्चाद्भागेऽवलोकनेन विशेषव्यक्तिः प्रतीता भवति। अतो जातिरेव शब्दार्थः। केवलं व्यवहारोपपत्तये तदनन्तरं व्यक्तिर्गृह्यते। यदि जातिरूपलक्षण मात्रं स्वीक्रियते ततो गोशब्देन प्रतीयमाना गोव्यक्तिरश्वादिभ्यस्तां पृथक्कर्तुं न शक्नोति। यतोऽसाधारणमाकारं विना द्रव्यमन्यस्य द्रव्यस्य व्यवच्छेदं कर्तुं न

शक्नोति। लोकेऽपि द्रष्टव्यम्—कश्चन भारतीयो विदेशं गच्छति ततः प्रथमं स भारतीयो भवति, ततोऽन्यत् किञ्चित्। जातेरभिधानं विना व्यक्तेरभिधानं न शोभते। जाति विशिष्टाया व्यक्ते: शब्दार्थ इति स्वीक्रियेत ततो 'गामानय' इति श्रवणमात्र एव संशय उत्पद्येत यत् का गौरानेतव्येति। यत्र संशयः स्यात् स शब्दार्थ इति न कल्पयितुं शक्यते। यतः शब्दः सर्वथा निश्चयजनकः उच्चारणमात्र एव व्यक्तौ संशयो भवति, परं न जातौ। अवघातावहननलम्भनादिक्रियासम्बद्धप्रश्नस्तदवस्थः, परं तत्रापि न काचिदापत्तिः। यतोऽस्माकं मते जातिव्यक्त्योस्तादात्म्यसम्बन्धः। न जातिं विना व्यक्तिः स्थातुमर्हति न वा व्यक्तिं विना जातिः। सामान्येन यस्य वस्तुनो बोधो भवति, तस्यैव विशेषप्रकारेण व्यक्तेर्ग्रहणं भवितुमर्हति। यदि जातिर्व्यक्तिश्च भिन्ने कल्प्येताम्[१] ततोऽपि व्यक्तेराश्रयणं लक्षणया भविष्यति। अतो जातिरेव शब्दार्थः।

---

१. अव्यपदेश्यत्वेन सर्वत्राविशेषात्।
तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदना।
जातिव्यक्त्योर भेदो वा वाक्यार्थेषु विवक्षितः॥ (वार्तिक)

४. आत्मा

शब्दशास्त्रानुसारं 'अत सातत्य गमने' इति धातोः 'आत्मशब्दः सिद्ध्यति, येन 'अतति सर्वं सततं व्याप्नोति' अनया व्युत्पत्त्या 'सर्वव्यापक' इत्यर्थो लभ्यते। विष्णुपुराणेऽपि-यथा

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य सन्ततो भावः स आत्मा इति कथ्यते ॥

आत्मनोऽस्य वैभवस्य समक्षं समग्रं जगत् तदीयो ज्ञानराशिश्च पराभूतः। अनेकै विचारशीलैरस्या महनीयायाः सत्ताया विविधा उपासनाः कृताः, तैश्च विभिन्नेषु रूपेषु तं गोचरीकृत्य स्वकीयं स्वतन्त्रं मतं स्थिरीकृतम्।

शरीरात्मवादः

आत्मनः स्वरूपं शब्दातीतं शब्दसन्दर्भरूपशास्त्रातीतञ्च। तच्चानुभूते विषयः। सर्वेषामनुभूतिरेकविधैवेति नास्ति नियमः। यथाऽनेकेऽन्धा जना गज-मधिगन्तुकामास्तदुपलब्धाङ्गानुसारं तद्रूपमधिगच्छन्ति, तथैवात्मज्ञानार्थं प्रवृत्ता अपि स्वस्वानुभूत्यनुसारं तत्स्वरूपं निर्दिशन्ति। यस्य यावती गतिः स तावत्पर्यन्तं प्रयाति, तदेव च स्वसम्मतसिद्धान्ततया प्रतिपादयति। न चात्र कश्चन तदीयो दोषः। एवंविधेष्वात्मस्वरूपनिर्देशकेषु चार्वाकः प्रथमः, यत आत्मा स्थूलरूप एव तेनाधिगतः। तत्परवर्तिभिः साधकैरस्यां दिशि विशिष्य प्रयतितम्। आत्मनः सूक्ष्मतमं स्वरूपञ्च समनुभूतं तैर्यच्चार्वाकेन कल्पयितुमपि न शक्येत। तेनोक्तम्—'शरीर-मेवात्मेति। एतदतिरिक्त आत्माऽङ्गीकर्त्तुं न शक्यते। यतश्चैतन्यमात्मनो धर्म स्तच्च शरीरमात्रवर्ति। शरीरं विना चैतन्यस्य नास्ति स्थितिः। वयं पश्यामः, यावच्च शरीरं तावदेव प्राणधारणक्रियाऽपि भवितुमर्हति। लोकव्यवहारोऽपीदृशः-अद्य स मृतः, अहं स्थूल इति। स्थूलत्वकृशत्वादयो शरीरस्यैव धर्माः, तन्मूलकश्चाहमिति व्यवहारः। यथा जल-गुड-यवादिपदार्थेषु पृथक् पृथक् मादनशक्तिर्न तिष्ठति, परं तेषामेकीकरणेन स्वतो मदिरा प्रस्तुता भवति। तथैव पृथ्वीजलतेजोवायुषु पृथक् पृथगविद्यमानमपि चैतन्यं सयुक्तं सङ्घातरूपं वा सत् प्रतिभासते। इदमेव चैतन्य मात्मेति। एवं विधाः कल्पिता युक्तीराश्रित्य ततः किञ्चित्प्रगतिशालिनो विचारका इन्द्रियाण्यात्मेत्याहुः।

ईदृशः शरीररूप इन्द्रियरूपो वाऽऽत्मा सर्वथाऽनुपपन्नः। शरीरमात्मा भवितुं नार्हति, प्राणनचैतन्यादीनां तद्गुणत्वात्। कार्यद्रव्यवर्तिनो ये विशेषगुणा तद्विरुद्धानां गुणानामागमनेनाथवा तद्द्रव्यनाशेन तेऽपि नष्टा भवन्ति। अयं सामान्यनियमः। एतदनुसारं यदि प्राणनादयो शरीरद्रव्यस्यैव विशेषगुणा अभविष्यन् ततस्तेऽपि तस्य विद्यमानतायामेव शाश्वतरूपेण विद्यमाना भवन्ति। अतः प्राणनादयो शरीरस्य गुणा इति वक्तुं न शक्यते। परमेतद् विपरीतमेव पश्यामः, मृतावस्थायां शरीरं तथा वदेव तिष्ठति, तत्र प्राणनादयो गुणा न तिष्ठन्ति। एतदतिरिक्तं "सर्वे विशेषगुणाः कारणे तिष्ठन्त एव तद्द्वारेण कार्यद्रव्यस्य गुणा भवन्ति, इयमपि सामान्यकथा। अस्यां स्थितौ, शरीररूपस्य द्रव्यस्य कारणभूतेषु पार्थिवपरमाणुषु चैतन्यमस्त्येव न चेत् सङ्घातावस्थायां कुत आगतं स्यात्? मदिराया भिन्ना स्थितिः। अतः शरीरगुणरूपं चैतन्यं स्वीकर्तुं न शक्यते, परं तदपि तदतिरिक्तम्। शरीरमाश्रित्य 'अहमिति व्यवहार आत्मसन्निधानादस्ति। 'इद मे शरीरं' इत्यादि बुद्धिः शरीरातिरिक्तस्यात्मनो लौकिकत्वे प्रमाणीकरोति। श्रुतिवाक्यसहस्राणि शरीरातिरिक्तस्यात्मनः प्रतिपादकानि सन्ति येषां गणनाऽपि दुःशका इन्द्रियातिरिक्तोऽपि येन मया रूपं दृष्टं सोऽहं स्पृशामि इति व्यवहारो ज्ञातृभेदेनात्मनः प्रतिपादकः।

इदं मयीदृशं चक्षुर्मनो मे भ्रान्तमित्यपि।
इन्द्रियेष्वपि भेदेन व्यवहारश्च दृश्यते॥

अत इन्द्रियात्मवादोऽपि स्वत एव खण्डितः सञ्जायते।

विज्ञानात्मवादः

एतद्द्वयमतिशय्य बौद्धदर्शनं कमपि सूक्ष्मं सिद्धान्तमस्मिन् प्रसङ्गे प्रस्तौति। तत्रोक्तम्—"रूपं संज्ञा, वेदना, संस्कारः, विज्ञानम्—एतत्पञ्चस्कन्धातिरिक्त आत्मा नाम कश्चन स्वतन्त्रः पदार्थो नास्ति। भूतभौतिकपदार्था रूपमिति कस्यचिद् वस्तुनः साक्षात्कारः संज्ञेति, तज्जन्यं सुखं दुःखं औदासीन्यञ्च वेदनेति, अतीतानुभवेन जनितस्मृतिकारणभूता सूक्ष्मा चित्तप्रवृत्तिः संस्कार इति चैतन्यं विज्ञानमित्युच्यते। इदं विज्ञानमेवात्मा। अनया दृष्ट्या ज्ञानज्ञात्रोर्नास्त्यन्तरम्। ननु ज्ञानं क्षणिकञ्चेत् प्रथमदिवसे प्राप्तस्य वस्तुनोऽन्यस्मिन् दिने स्मृतिरिच्छा वा कथं जायते? बौद्धैरेवमस्याः समाधानं दत्तम्—एतदर्थमात्मनः कल्पनाया नास्त्यावश्यकता। स्मृतिरिच्छा वा एकसन्तिततया सम्भाव्यते। सन्ततिरियं प्रवाह एव-यदाधारेण स्मरणाद्युपपद्यते। अतो ज्ञानमेव ज्ञाता। तदतिरिक्तो ज्ञातृनामा न किमपि स्वतन्त्रं वस्तु।

मीमांसकाः प्रथममतस्येवास्य विज्ञानस्यात्मत्वमपि नाङ्गीकुर्वन्ति। कर्मणः पूर्वं पश्चाच्च स्फुटतया कर्त्तुः प्रतिपत्तिर्भवति, या क्षणभङ्गुराद् विज्ञानात् सर्वथाभिन्ना 'यो मया पूर्वं दृष्टः स एव मयाऽधुना दृश्यते' इत्येवंविधे वाक्ये पूर्वोत्तरकालयोरेक

एव ज्ञातोपलभ्यते, पुनस्तदपह्नवः कथमिव कर्तुं शक्यते । ज्ञातुरिदमेकत्वं तु प्रत्यभिज्ञयैवावगम्यते । अतो ज्ञानमेव ज्ञाता भवितुं नार्हति । ज्ञातैव ज्ञानं कथमिव भवितुमर्हति ? एकस्यैव वस्तुनः कर्मत्वकर्तृत्वापत्तेः । ज्ञानाधिकरणं त्वात्मा ।

अयमात्मा शरीरेन्द्रियविज्ञानादेर्भिन्नः । अस्य परिमाणविषये त्रयः पक्षाः- १. अणुः, २. शरीरपरिमाणः, ३. विभुः । आत्मनोऽणुत्वकल्पने समकालं शिरसि पदे च वेदनाया उपपत्तिरसम्भवा, या च प्रत्यक्षमनुभूयते । यदि शरीरपरिमाण आत्मा स्वीक्रियेत, ततः पुनः शरीरस्येवास्याप्यवयवानां कल्पना कृता स्यात् । गजशरीरस्य कृते महत आत्मनः, पिपीलिकाशरीरस्य कृते क्षुद्रस्य आत्मनः कल्पना कर्तव्या भवेत्, या च सर्वथाऽरुचिजनिका । अतः प्रथमं पक्षद्वयमस्वीकृत्यास्य विभुरूपपक्ष एव शास्त्रव्यवहारसम्मतः । श्रुतौ[1] गीतायाञ्चास्य[2] व्यापकत्वं सादरमङ्गीकृतम् । उपनिषदादिशास्त्रेषु पुराणेषु[3] च यत्र कुत्राप्यस्याणुरूपत्वं निर्दिष्टम् तदस्य सूक्ष्मत्वमाश्रित्यैव ।

आत्मन इदं व्यापकत्वं स्वीकुर्वन्तोऽपि मीमांसकाः सर्वैः शरीरैः सहास्यैकत्वं न स्वीकुर्वन्ति । एको विभुरपि स नाना । यदि सर्वेषु शरीरेषु तस्यैकरूपत्वं स्वीक्रियते, ततो देवदत्तशरीरवर्तिनाऽऽत्मना दृष्टं वस्तु यज्ञदत्तशरीरवर्तिनाऽऽत्मनापि परिज्ञातं स्यात्, द्वयोः प्रत्यभिज्ञामात्रभेदात् । यथा एकेन मनुष्येण भिन्नैरङ्गैः कृतानि कार्याणि एक आत्मा गृह्णाति, येन च स वक्ति 'येन मया दृष्टं सोऽहमिदानीं स्पृशामि', अत्र चक्षुरिन्द्रियं त्वगिन्द्रियञ्च भिन्ने स्तः, परं प्रत्यभिज्ञातुरेकत्वादेवंविधं ज्ञानं जायते । एवमेव सर्वेषु शरीरेष्वेकस्यात्मनः कल्पने सत्यन्येकेन दृष्टमपरेण ज्ञात सम्पद्येत, तच्च दृष्टविरुद्धं व्यवहारविरुद्धञ्च । अतोऽयमात्मा सन्नेकोऽपि प्रतिशरीरं भिन्नः ।

अन्यच्च, आत्मन एकत्वेनानेका अव्यवस्थाः सम्भवेयुः । यः कर्मकृत् स एव फलभागिति नियमो विरुद्ध्येत । एकत्वे सति यदीयात्मना विहितानां सत्कर्मणां फलानि यज्ञदत्तेनापि प्राप्तव्यानि स्युः, तदात्मन ऐक्यात् । अस्यां स्थितौ क एव कर्मणि प्रवृत्तो भवेत् ? समग्रः कर्मकाण्डभागश्च निष्फलः सम्पद्येत । यत्र कुत्रापि, श्रुतिस्मृतिपुराणेषु अस्यैकत्वस्य निर्देशो वर्तते स केवलं तद्विभुत्वमाश्रित्यैव, न तु व्यावहारिकत्वम् । अधिकं स्पष्टीकर्तुमत्र वायुर्ग्राह्यः[4] । वायुरेकः, वेणुरन्ध्राद्यनुसारं षड्जादिभेदेन स भिद्यते । तथाऽऽत्मनोऽपि स्थितिः । आत्मन्यपि यत् पशुमनुष्यादिवैलक्षण्यम्, तद्देहसम्बन्धजनितम्, न तु स्वाभाविकम् । अतः प्रतिशरीरं भिन्नस्यात्मनः स्वतः सिद्धिर्भवति, यश्च सर्वगतो नित्यश्च । अत एव बन्धनमोक्षादिव्यवस्थाऽप्युपपद्यते ।

---

१. अनन्तमपारम् ।

२. नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ।

३. अङ्गुष्ठमात्रं पुरुषम् ।

४. वेणुरन्ध्रादिभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथा तस्य महात्मनः ॥

अयमात्मा मनसा गम्यः। श्रुतिप्रमाणमत्र—"स मानसीन आत्मा जनानाम्।" न चास्य पुत्रत्वपितृत्वादिना केनचित् सम्बन्धः[१], जन्यजनकभावस्य शरीरविषयत्वात्। शरीरमेव शरीरादुत्पन्नं भवति, नात्माऽऽत्मनः। अहम्प्रत्ययगम्यत्वेनायमात्मा ज्ञातृस्वरूपः, सर्वातिरिक्तश्च सः। उपनिषदो[२] गीता[३] चास्याहम्प्रत्ययगम्यतायां प्रमाणम्। मन्त्रवर्णोऽपि—"अहं मनुरभवं सूर्यश्च।"

आत्मनोऽस्य स्वरूपं व्यापकमुपनिषत्सु च सविस्तरं वर्णितम्। अत एव महामनसा कुमारिलेनोक्तम्—"दृढत्वमेतद्विषयप्रबोधः प्रयाति वेदान्तनिषेवणेन।" मीमांसादर्शनविषयकः सिद्धान्त उपरि निर्दिष्टः। मीमांसासिद्धान्तेऽयमेव कर्त्ता भोक्ता च। इदमेव कारणं यत् "यजमानः स्वर्गलोकं याति" इत्यादीनि वाक्यान्युपपद्यन्ते। अस्य कर्तृत्वेऽपि मीमांसायाः प्रभावः। अयं सर्वगत आत्माऽपि[४] ज्ञानसङ्कल्पादीनां साक्षात्कर्त्ताऽस्ति। यथा साङ्ख्यदर्शनमेनं निर्लिप्तस्तेजःपुञ्जरूप इति परिकल्प्यास्य कर्तृत्वं न स्वीकरोति, न तथाऽस्माकं (मीमांसकानां) मतम्। यथा वैशेषिकदर्शने स्वीक्रियते, तथा न वयं स्पन्दमात्रं क्रियेति परिकल्पयामः, येनात्मनि कर्तृत्वं नोपपद्येत। अस्माकं मतेऽपि धात्वर्थमात्रं क्रिया।

स्पन्दनस्य प्रयोजकत्वेनायं कर्ता भवितुमर्हति। अयं हि यत्नेन शरीरं स्पन्दने प्रयुनक्ति। स्पन्दनं प्रति साक्षात्कर्तृत्वमस्य नापत्स्यते, सर्वगतत्वेनास्य स्पन्दनमसम्भवम्। इममसाक्षात्सम्बन्धमुपादायैव पुराणेषूपनिषत्सु चात्मनोऽकर्तृत्ववादः, स च न वास्तवः वस्तुतोऽयमात्मैव कर्ता भोक्ता च। यो न साक्षात्, परं लक्षणया शरीरद्वारेण यज्ञसाधनेषु सम्बद्ध्यते। अस्य कर्तृत्वकल्पनेनैव मीमांसायाः कर्मव्यवस्था सङ्गच्छते।

---

१. "नास्य कश्चिन्नायं कस्यचित् निर्मुक्ताहङ्कारममकार एवायमिति।"

२. ब्रह्म वा इदमग्र आसीत्, तदात्मानमेवावेदहं ब्रह्मास्मि।

३. तथा च येऽपि योगस्य परां काष्ठामुपागताः।
योगेश्वरेश्वरास्तेऽपि कुर्वन्त्यात्यन्यहम्मतिम्॥
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥
मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
एवमादावहं शब्दः परस्मिन् पुंसि हि ध्रुवम्॥

४. सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीति (उपनिषद्)

इन्द्रियनिरूपणम्

यदर्थेन (विषयेण) सम्बद्धं सत् स्पष्टं ज्ञानजनकं भवति, तदिन्द्रियमित्युच्यते। तच्च द्विविधम् बाह्यमाभ्यन्तरञ्च। बाह्येन्द्रियञ्च पञ्चविधम्--१. घ्राणं, २. रसना, ३. चक्षुः, ४. त्वक्, ५. श्रोत्रम्। आभ्यन्तरमिन्द्रियमेकमेव मन इति। प्रथमेषु पञ्चसु चत्वारि पृथिव्यप्तेजोवायुप्रकृतिकानि, यथा च न्यायदर्शनं मन्यते। नैयायिकाः श्रोत्रमाकाशात्मकं मन्वते, परः मीमांसकाः श्रोत्रेन्द्रियं दिगाश्रितं परिकल्पयन्ति। "दिशः श्रोत्रं" इति श्रुतिवाक्यानुसारं कर्णशष्कुल्यवच्छिन्नो दिग्भाग एवास्माभिः श्रोत्रमित्युच्यते। आभ्यन्तरमिन्द्रियं मन इति। आत्मनस्तद्गुणानाञ्च ज्ञान एव तत् स्वातन्त्र्येण प्रवर्तते। बाह्यरूपादेर्ग्रहणे तु न। रूपादिज्ञाने यदि प्रवृत्तमपि भवति, तदा चक्षुरादीनां साहाय्येन, न तु साक्षात्।

५. सृष्टिप्रपञ्चो मोक्षश्च

सृष्टिः

आत्मवत् सृष्टिविषयेऽपि दर्शनानां भेदेन भिन्नाः सिद्धान्ताः सन्ति । वेदान्तानुसारं संसारादौ केवल एक आत्मैवासीत्--स एव स्वेच्छयाऽऽकाशादिप्रपञ्चरूपेण परिणतः यथा बीजवृक्षरूपेण परिणमति । शाश्वतं सत् चित् आनन्दमयं ब्रह्म जडरूपेण कथमिव परिणमति ? अस्मिन् प्रश्ने समाधत्ते यत् वस्तुतस्तन्न परिवर्तते परमपरिवर्तितमेव सत् अविद्यया (भ्रान्त्या) परिवर्तितमिव प्रतीयते । दर्पणादौ मुखमिव । अविद्यया जायमानेयं प्रक्रियैव सृष्टिः सा च स्वप्नप्रपञ्चसदृशी । वस्तुतः परमात्मा[१] एक एवास्ति, तदीयमिदं यद् रूपं दृग्गोचरं भवति, तत्र हेतुर्माया ।[२] माययैवेदं जगद् भिन्नं दृश्यते । जागतिक्याऽनया मायया ब्रह्मणो नानात्वदर्शनमेव[३] मृत्युः, अस्मान्मायाबन्धनान्मुक्तो भूत्वा तस्य ब्रह्मण ऐक्यदर्शनमेव मोक्षः । दृष्ट्याऽनयाऽयं सृष्टिप्रपञ्चः सर्वथाऽसत्यः, स चाविद्यामूलकः ।

परं सृष्टिप्रपञ्चस्येयमसत्यता प्रत्यक्षविरुद्धा । पृथ्वीपर्वतनदीसमुद्रनगरादीन्यसंख्यातानि चराचराणि जन्तवो प्रत्यहं दृग्गोचरीक्रियन्ते तैश्च व्यवहारोऽपि भवति, पुनः कथमिवास्याः सृष्टेरसत्यतायां विश्वासः कर्तुं शक्यते । यदि केवलमुपनिषदादिशास्त्राणां प्रमाणान्युपादाय चराचरस्य जगतोऽसत्यत्वं सिषाधयिषितं चेत्तन्न, शास्त्रेण प्रत्यक्षबाधनाक्षमत्वात् । प्रत्यक्षं शीघ्रं प्रवर्तते, अत एव तदितरेभ्यः प्रमाणेभ्यः प्रबलतरं भवति । प्रत्यक्षे रोधिका शक्तिर्विद्यते ययाऽऽगमोऽवरुध्यते । यथोत्पद्यमानो घटो दण्डाभिहतः सन्नोत्पद्यते, तथैव प्रपञ्चासत्यत्वसाधक आगमः प्रत्यक्षेण प्रतिहतः सन्न प्रवर्तते । अन्यच्च, प्रपञ्चासत्यत्वेऽभ्युपगते तदन्तर्गतं शास्त्रमप्यसत्यमेवाभ्युपगम्यते । स्वतस्तस्मिन्नसद्रूपे कथमिव तत् कमपि विषयं प्रति प्रमाणतया स्वीकर्तुं न शक्यते ।

एताभ्य आपत्तिभ्योऽस्पृष्टैर्वेदान्तविद्भिरुक्तम्—न ह्यस्माभिरयं प्रपञ्चः 'असन्' इत्युच्यते, अस्य प्रत्यक्षादिप्रमाणसिद्धत्वात् । न चास्माभिरयं 'सन्' इत्युच्यते, आत्मज्ञानेनास्य सद्रूपस्य बाधितत्वात् । अतोऽयं न पूर्णतयाऽसन्, न च पूर्णतया सन्नस्ति –परमुभाभ्यामनिर्वचनीयोऽस्ति । अयं मार्गोऽपि सर्वात्मना न सुरक्षितः ।

---

१. (A) सर्वं खल्विदं ब्रह्म । (B) आत्मैवेदं सर्वं नेह नानास्ति किञ्चन ।
२. इन्द्रो मायाभिः पुरुरूप ईयते ।
३. 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।'' (उपनिषत्)
प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न तत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः ।।

नास्ति संश्चेत्तेनासता भाव्यम्, नास्त्यसंश्चेत्, तेन सता भाव्यम्। यश्चोभयातिरिक्तः, स कथमिव तृतीयतां भजेत! प्रपञ्चोऽयं स्पष्टं प्रतीयते, अतो नायमनिर्वाच्य इति वक्तुं शक्यते। न चायं कथञ्चन बाधितुमपि शक्यते, जगति स्थितिकाले (जीवनकाले) दृग्गोचरो भवति। मोक्षावस्थायामपि नास्य बोधो ज्ञातुं शक्यते, एतस्मिन् काले तु ज्ञानस्य समग्राणि साधनानि नश्यन्ति, अत एव बाधकं साधकं वा किमपि ज्ञानं तत्कालमसम्भवम्। प्रपञ्चोऽयं सर्वथाऽबाध्यः, अत एव सन्नस्ति।

यदि प्रपञ्चोऽयमविद्यया जनित इति स्वीक्रियते इति चेत्तन्न। अविद्या हि भ्रान्तिः। इयं भ्रान्त्यपरपर्यायाऽविद्या कस्यास्ति? ब्रह्मण इति न शक्यते, तस्य विद्यारूपत्वात्। प्रकाशे तमसो नास्त्यवकाशः यदि जीवानां भ्रान्तिरियमभ्युपगम्यते, ततस्तेऽपि ब्रह्मातिरिक्ता न सन्ति। यद्यस्या अविद्याया आश्रयरूपेण ब्रह्मजीवातिरिक्तस्य वस्तुनः कल्पना क्रियते चेदद्वैतत्वं छिन्नं स्यात्। अतोऽविद्येयं निराश्रया, अतएवायमविद्यावादो मायावादश्च सर्वथाऽसङ्गतो निर्मूलश्च। अस्मात्तु शून्यवादोऽथवा क्षणिकवाद एव श्रेयान्। प्रपञ्चममुं असन्' इति निर्दिशता यदेतदुच्यते—'अज्ञानेनोत्पन्नोऽयं प्रपञ्चो ज्ञानेन नाश्यते, यथा मृगजलं स्वप्नप्रपञ्चश्च।' यथा कुम्भकारः स्वकीयैः समग्रैर्व्यापारैर्घटमुत्पादयति, मुसलप्रहारश्च तं नाशयति, तथैवा ज्ञानं (कुम्भकारः) प्रपञ्चमुत्पादयति, ज्ञानं (मुसलप्रहारः) तं नाशयति। परमनेन प्रपञ्चस्य नश्वरताऽनित्यतैव च सिद्ध्यति-अस्य सर्वथाऽभावो न सिद्ध्यति; एवं भवत एव युक्तिभिः प्रपञ्चस्य सत्ता स्वतः प्रमाणिता भवति।

आत्मपरिणामवादः

अस्मिन्नात्मपरिणामवादे कतिपये उपनिषद्विदः नवीनं मार्गमुपस्थापयन्ति, अनेनैव तेषां पूर्वप्रतिपादितानां युक्तीनां प्रभावहीनत्वं स्वतः सिद्ध्यति। एतेषां मन्तव्यमस्ति यदात्मैव स्वेच्छया प्रपञ्चरूपेण परिणमति। आत्मन एतेषां विभिन्नानां रूपाणां परिणमनावस्थाया विषयेऽपि उपनिषत्सु पुराणेषु[१] चानेके वादाः प्रचलिताः सन्ति। यथाऽनेकशाख एक एव वृक्षो दूरवर्तिभिर्जनैरनेक इत्यालोच्यते निकटवर्तिभिश्चाभिधीयते 'एक एवायमनेकशाखः, तथैव नामरूपात्मनः सांसारिकप्रपञ्चं नानारूप इति कल्पयद्भ्यो जनेभ्यस्तत्त्वं निर्देष्टुमेवंविधस्यैकत्ववादस्यैव कार्यम्। सकलोऽयं प्रपञ्चस्तस्या एवैकस्याः सत्ताया विस्तारः, अत्र नास्ति कश्चन नाना। ये च प्रपञ्चासत्त्वबोधकाः, अविद्या वा भ्रान्तिर्वा मायावादो वा, ते सर्वेऽप्यौपचारिकाः,

१. (A) तदैक्षत बहु स्यां प्रजायेय।
(B) तस्माद् वा एतस्मादात्मनः आकाशः सम्भूतः।
पुरुष एवेदं सर्वं नेह नानास्ति किञ्चन।

न तु वास्तवाः, यथा मृगजलम्, रज्जौ सर्पज्ञानम्, स्वप्नप्रपञ्चश्च, किञ्चिन्मुहूर्त्तमात्रं यावदुत्पन्नाः पुनर्नश्यन्ति, तथैव भेदप्रयञ्चरूपो ब्रह्मपरिणामोऽप्युत्पद्यते नश्यति च। अत एवायमौपचारिकः 'असन्' इत्युच्यते। स नासन्नपि असन्निवास्ति, अत एव तत्सम्बद्धे ज्ञानेऽप्यौपचारिकरूपेण स्वतो भ्रान्तत्वमापद्यते। एवंविधाः समग्रा व्यवहारा वाक्यानि चौपचारिकाणि, अर्थवादरूपाणि वा। प्रपञ्चे याऽसत्यता निर्दिष्टा, सा वैराग्योत्पादनार्था, आत्मनि च या परमार्थता साधिता, सा मुमूक्षूणा मुत्साहसंवर्धनार्था। अतोऽयं प्रपञ्च एकस्यैवात्मनः परिणामः, नास्ति सर्वथाऽसन्। यद्यसन् स्यात् ततो विज्ञानेनाप्यस्य ज्ञान न सम्भवं भवेत्, शशविषाणवत्।

परमयमात्मपरिणामवादोऽपि अविद्येव वा मायेव वा असद्वाद इव वाऽयुक्तः। यश्चात्मा सर्वथा चिद्रूपः, तस्य जडतया परिणतिरसम्भवा। यद्यात्मन एकत्वमेव मन्येत, देवदत्तस्य सुखं यज्ञदत्तस्यापि सुखं सम्भाव्यं स्यात्। आत्मन एकत्वे सत्यप्यन्तःकरणानां भेदेन सर्वेषु प्राणिषु अभेदज्ञानं नोत्पद्यते इत्युच्यते चेत् तन्न सङ्गतम्। अन्तः करणस्याचेतनत्वात्। अत एव स सुखदुःखानुभवकृत् स चैकः, अत एव सिद्धान्तो परस्परस्य सुखदुःखाद्यनुभवः समान एव भवेत्। परं न भवति, अत एवायं सिद्धान्तोऽप्यसङ्गतः।

प्रकृतिपरिणामवादः

संसारः प्रकृतेः परिणाम इति साङ्ख्यदर्शनस्य पक्षः। साङ्ख्यदर्शनं द्विविधम्, निरीश्वरं साङ्ख्यं सेश्वरञ्च। निरीश्वरवादिनोऽभिदधति सत्त्वं, रजः तमः इति गुणत्रयवती अचेतना प्रकृतिर्महदादिविशेषतत्त्वेभ्यः प्रपञ्चरूपेण चेतनव्यक्तीनामुपभोगाय परिणमति। सेश्वरवादिनो (योगाचार्याः) अप्येवमेवाभिदधति--परमेतावद् वैशिष्टयमवश्यमस्ति। इय प्रकृतिः पुरुषापरपर्यायस्येश्वरस्याश्रयेण जगद्रचनायां प्रवर्तते। सुक्षेत्रपतितं बीजं तत्सम्पर्कादङ्कुरादिक्रमेण वृक्षरूपेण परिणमति, तथैव सर्वव्यापकस्येश्वरस्याश्रयेण प्रकृतिर्महदहङ्कारतन्मात्रादिक्रमेण परिणमन्ती विशेषान्तं प्रपञ्चमारभते। इतिहासपुराणेष्वपीयमेवास्ति। इयमेव प्रकृतिमूला सृष्टिः, ईश्वरस्तु निमित्तमात्रम्। प्रकृतिरियं सर्वत्रैकैव। भोक्तारोऽनेके। अत एव बन्धनमुक्त्यादिव्यवस्थोपपद्यते। इदमेव शास्त्रसम्मतमप्यास्ति। उपनिषदां य एकात्मवादः, स केवलम विलक्षणतामाश्रित्य। वस्तुतः स परमपुरुषः सृष्टिरियञ्च भिन्नौ स्तः।[२] गीतायामप्ययं भेदः स्फुटीकृतः।

---

१. अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥

२. उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
उपद्रष्टाऽनुमन्ता च कर्ता भोक्ता महेश्वरः॥
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः।

प्रकृतिपरिणामवादोऽप्ययमात्मपरिणामवाद इव मीमांसकानामनभिमतः। प्रकृतिरेकरूपा सती मनुष्यपशुपक्ष्याद्यनेकरूपं प्रपञ्चं कथमिवारभते। कारणेनेव कार्येणापि भाव्यम्। अविलक्षणं कारणं न खलु विलक्षणं कार्यमुत्पादयितुमर्हति। न चास्मिन् विकारे कारणरूपेणेश्वरेच्छापि स्वीकर्तुं शक्यते। सकलक्लेशापरामृष्टः समग्रकामनानभिमृष्ट ईश्वरः कथमिवेच्छावान् भवेत्। अन्यच्च, प्रलये सति भवतामेव पक्षेण केवला प्रकृतिरात्मानश्चावस्थिता भवन्ति। समग्रा आत्मानश्चेतनरूपाः सन्ति, अत एव समानाः सन्ति। धर्माधर्मजं वैलक्षण्यमपि तत्र नास्ति। यतस्तेऽन्तःकरण गुणाः सन्ति। तदानीमन्तः करणस्याभावः। सृष्टिकाले प्रकृतिः शरीरैरात्मनो योजयति। सृष्ट्यारम्भे मुक्तानमुक्तांश्च योजयति। योऽश्वमेधः तत्सदृशं वा पुण्यकर्म कृतवान्, यश्च वधसदृशमपापञ्चकार तदा किन्तयोर्भेदः स्यात्? प्राक्कृतानां धर्माधर्माणां तदानी मभावात्। इमाः सर्वा अप्यवस्थाः प्रकृतिपरिणामवादेऽपि सन्ति। ताश्च शास्त्र-प्रामाण्यमपि बाधितुमीशते। अतः सृष्टिर्नित्या। उपनिषत्सु निर्दिष्टौ सृष्टिप्रलयवादा वर्थवादरूपेणावगन्तव्यौ।

वैशेषिकाः शब्दार्थसम्बन्धं वेदञ्च पौरुषेयं मन्वाना अनुमानस्य साहाय्येन सृष्टिप्रलयावीश्वरञ्च साधयन्ति। ईश्वरेच्छा प्रलयानन्तरं परमाणूनां साहाय्येन सृष्टि रचनां कारयति। इमे परमाणवः प्रलयकालेऽपि न नश्यन्ति। पार्थिवा आप्यास्तैजसा वायव्याश्चतुर्विधाः परमाणवः क्रमेण पृथ्वीं जलं तेजो वायुम्प्रति समवायिकारणानि सन्ति। परमाणुद्वयसंयोगेन द्व्यणुकानि, तैश्च चतुरणुकादिक्रमेण सृष्ट्युत्पत्तिर्भवति। प्रलयकालेऽस्याः सामग्र्येण विनाशो भवति।

सृष्टिविषयेऽयं सिद्धान्तोऽपि मीमांसकानामभिप्रेतो नास्ति। प्रयत्नं विना केवलेनेश्वरेच्छामात्रेण काचिन् क्रिया (वैशेषिकदर्शनानुसारं स्पन्दः) न भवितुमर्हति। इच्छया कृतेन प्रयत्नेनाद्यापि शरीरे स्पन्दो भवति, परं केवलेच्छया न भवति। यद्युच्येत ईश्वरोऽपि प्रयतते' इति चेत्तदनुचितम्। अशरीरवता प्रयत्नोऽसम्भवः। आत्मानः शरीरे सन्त एव यत्नमारभन्ते, न बहिर्वर्तिनः। अतः प्रयत्नस्य शरीरापेक्षा भवति। यस्य शरीरं नास्ति तस्येच्छाऽपि न प्रवर्तते। यदीश्वरस्य शरीरं कल्प्येत, तर्हि प्रलयकाले शरीरमात्रे तस्यापि नाशः कल्पनीयः स्यात्। किं बहुना, शरीरं विना नेच्छा न प्रयत्नः, नापि ज्ञानं प्रवर्तते, तदानीमिन्द्रियादीनां सर्वथाऽभावात्। अतः सृष्टिः कस्यचिन्निर्माणमिति न शक्यते वक्तुम्। असौ तावत् सर्वथा नित्या। तस्या नित्यतैव मीमांसादर्शने निर्दिष्टा सर्वासामापत्तीनां समाधानमस्ति। "यः कल्पः स कल्पपूर्वः" इत्यादयो न्याया अप्यत्र साक्षिणः। ईदृशः कश्चन कालो न दृश्यते यस्मिन् काचित् सृष्टिर्न स्यात्। प्राणिनां गमनागमनाभ्यामेव सृष्टेर्विनाशो न कल्पयितुं शक्यते। गोकुलनामा कश्चन म्रियते, इत्यस्य तात्पर्यं नास्ति यत् सृष्टिर्वा मनुष्यो वा म्रियत

इति। अयं खलु प्रवाहः, यः सर्वदाऽविच्छिन्नो भवति। नास्ति तस्य कश्चन कर्ता। इयमेवास्या नित्यता।

मोक्षवादः

सृष्टिनिरूपणस्य मोक्षस्य सम्बन्धो द्रढीयान्। भारतीया हि वयं विशिष्य मोक्षाकांक्षिणः। धर्मार्थकाममोक्षरूपेषु चतुर्विधेषु पुरुषार्थेषु मोक्ष एव नः परमं लक्ष्यम्। अत एव स्वकीयस्यास्य चरमोद्देश्यस्य विषये सर्वैरपि विचारकैः स्वस्वमतानि स्थापितानि। चार्वाकमहाशस्य मतेन शरीरान्मोक्ष एव मोक्षः, स च मरणानन्तरं काञ्चित् साधनां विनैव सर्वस्यापि संसिद्ध्यति। यतस्तेन शरीरमात्मेति सिद्धान्तितम्। एतच्चास्माभिः खण्डितम्। अत एवैतदपि गतार्थं संवृत्तम्। कतिचन (बौद्धाः) वदन्ति विचित्रवासनावशात् नीलपीतादिरूपेषु प्रवहन्ती ज्ञानधारा समग्रवासनानां विनाशे सति केवलविशुद्धज्ञानरूपा सती मोक्ष इति। जगतः समग्राणि दृश्यानि वासनया प्रवहन्ति ज्ञानरूपाणि सन्ति। अस्या वासनाया विनाशे सति सर्वोऽयं प्रपञ्चः स्वत एवानेकरूपो न स्थास्यति। परं तेषां मतमिदं तदैव सङ्गतं भवितुमर्हति यदा जगतः समग्रस्य दृश्यपदार्थजातस्य सर्वथाऽभावः कल्प्येत। इमे सिद्धान्ताः बाह्यार्थाभावमधिश्रित्य प्रवृत्ताः। बाह्यार्थाभावमनङ्गीकृत्य तस्य सत्यसत्ताऽस्माभिः प्रमाणिता तर्हि तेषां मतं स्वत एव खण्डितं भवति।

एतेभ्योऽग्रे पदं न्यस्य कतिपये विचारका अस्य सृष्टिप्रपञ्चस्य विनाशमेव मोक्ष इत्याचक्षते। प्रपञ्चोऽयमविद्यया विनिर्मितः। यथा प्रबोधमात्र एव स्वप्नकालस्य सर्वः प्रपञ्चो नश्यति तथैव ब्रह्मविद्ययाऽविद्यायां नष्टायामयं प्रपञ्चोऽपि स्वयमेव विलीयते। श्रुतिरप्यत्र प्रमाणम्—"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य, सर्वमात्मैवाभूत् तत्केन कं पश्येत्।"[१] परमस्य मतस्यापि नास्ति किञ्चिदखण्डनीयमस्तित्वम्। प्रपञ्चोऽविद्यानिर्मित इति मत्वा मतमिदं प्रवर्तते। प्रपञ्चस्याविद्याजन्यत्वं विस्तरेणास्माभिः खण्डितम्। तेनैवैतन्निर्मूलं भवति। प्रपञ्चस्त्वयं सत्यः। "यत्र त्वस्य सर्वमात्मैवाभूत्" इत्यादीन्युपनिषद्वाक्यानि प्रपञ्चस्वरूपखण्डनपराणि न सन्ति। परं "आत्मैवास्य सर्वस्य भोक्ता" इत्यभिप्रायममुं प्रकटीकुर्वन्ति। यथा "यः कामयेत राष्ट्रं स्यामिति" वाक्येऽस्मिन् राष्ट्रमित्यस्यार्थो राष्ट्रभोक्तृपरः, तथैवात्रापि सर्वस्य भोक्तृत्वं तात्पर्यविषयीभूतम्। अन्यच्च, मुक्तावस्थायामात्मनः कृते किञ्चिदपि न ज्ञेयं (दृश्य), न च ज्ञानसाधनं (इन्द्रियादि) न च ज्ञातैव, किन्तु आत्मैव सर्वस्वम् "तत्केन कं पश्येत्" प्रसङ्गमेनमुद्दिश्य प्रथमवाक्यमुक्तम्, न तु प्रपञ्चासत्यत्वमुद्दिश्य। यथा लोके यस्य द्रव्यादि, पुत्रादि किमपि न भवति स वदति 'न मे किञ्चन विद्यते, अहमेव सर्वः।' तादृगेवात्र स्थितिः। एवं प्रपञ्चोऽयं नास्त्यसत्यः। न चास्य कदाचिद् विलयोऽपि भवति, अतः प्रपञ्चस्य विलयो मोक्ष इति कथनं सर्वथा निराधारम्।

एतत् सर्वं खण्डयित्वैतन्मतद्वयातिरिक्तं मतं प्रस्तुवन्ति मीमांसकाः। तेऽभिदधति—अनेन सृष्टिप्रपञ्चेन सह विद्यमानस्य सम्बन्धस्य विलयो मोक्ष इति। सृष्टि प्रपञ्चोऽयं त्रिविधेन प्रकारेण मनुष्यं बध्नाति—भोगपात्रं शरीरं, भोगसाधनानीन्द्रियाणि, भोगयोग्याः शब्दादयो विषयाः। इमानि चास्य त्रीणि रूपाणि। भोगेनात्र सुखदुःखादेः प्रत्यक्षानुभवोऽभिप्रेतः एभ्यस्त्रिविधेभ्यो बन्धनेभ्य आत्यन्तिकरूपेण विच्छेदो मोक्षः। अयमात्यन्तिको विलयो (बन्धनानां) कारणद्वयेन भवितुमर्हति। प्रथममुत्पन्नं शरीरं, इन्द्रियाणि विषयाश्च नष्टा भवेयुः, तथा यानि नोत्पन्नानि, ते सर्वथोत्पन्ना न भवेयुः। अयं सर्वथोत्पत्त्यभावस्तदैव सम्भाव्यते, यदा उत्पादका धर्मा अधर्माश्च सर्वथा नष्टाः स्युः। अस्तित्वदशायां धर्मोऽप्युत्पादयत्येव, तथैवाधर्मोऽपि। अतोऽनेन प्रपञ्चेन सह सम्बन्धो बन्धनम्, अस्माच्च सम्बन्धाद् विच्छेदो मोक्षः।

मुक्तावस्था

विवेचनेनानेनेदं प्रमाणितं भवति यन्मीमांसकानां मतेन मोक्षे धर्माधर्मयोः सम्बन्धो न भवति कतिचनात्र शंकन्ते मुक्तावस्थायां भवतां मतेन सर्वेषु धर्मेषु नष्टेषु मुक्तः किमपि सुखमनुभवितुं न शक्नुयात्। एवं मुक्तावस्थायां सुखं न स्यात् तर्हि मोक्षः कथमिवाभीप्सितो भवेत्? न च स पुरुषार्थ एव स्यात्। साधारण्या एतस्या आपदो रक्षणार्थं वेदान्तज्ञैर्मुक्तावस्थायामानन्दस्य सत्ता[1] स्वीकृता। ते वदन्ति—मुक्तावस्थायां मुक्तः स्वाभाविकमानन्दमनुभवति, स चानन्दो लौकिकानन्दादत्यन्तमुन्नतः, अतएव स आत्मानन्द इत्युच्यते। एवमेवानन्दस्य सत्तायामनेकाः[2] श्रुतयोऽपि प्रमाणम्। स्वप्रकाशोऽयमानन्दः। मुक्तावस्थायां यद्यपि बाह्येन्द्रियाणि निवर्तन्ते तथापि मनो विद्यमानं भवति—एवं-विधमनुमानं तत्कालभाव्यानन्दस्य निर्देशिकाभिः श्रुतिभिः कर्त्तुं शक्यते। आनन्द इव तत्कालं ज्ञानमपि[3] न लुप्यति ···, एवमपि श्रुत्याधारेण तेषां मतमस्ति। अतो मुक्तावस्थायां मानसप्रत्यक्षेण परममानन्दमनुभवन्नात्मा भवति। अनेन मोक्षेऽपि पुरुषार्थताऽप्युपपद्यते।

विचारकाः साधारणेभ्योऽमीभ्यः प्रश्नेभ्यो भीता स्वसिद्धान्तान्न विचलन्ति। ते वदन्ति—मुक्तावस्थायामानन्दानुभवो न भवति, न च ज्ञानस्य। य आनन्दो भवता मुक्तावस्थायामानन्द इत्युच्यते-स संसारदशायां कुतो[4] भाति। अन्यच्च, आनन्दमनु

१. आनन्दं ब्रह्म।

२. निजं यत्त्वात्मचैतन्यमानन्दश्चेष्यते च यः।
यच्च नित्यविभुत्वादि तैरात्मा नैव मुच्यते ॥

३. नहि विज्ञातुर्विज्ञाते विपरिलोपो भवति।

४. अथ संसारवेलायामानन्दो न प्रकाशते। न ह्यप्रकाशनं युक्तं स्वप्रकाशस्य वस्तुनः, यद्यसौ न प्रकाशेत, किं तर्ह्यन्यत् प्रकाशते।

भवितुमिन्द्रियाणि कुतो लप्स्यन्ते, यैरानन्दानुभवः कर्त्तुं शक्येत। यथा बाह्येन्द्रियाणि तथा मनोऽपि मुक्तावस्थायां न तिष्ठति—यत्साहाय्येनानन्दलाभः कर्त्तुं शक्येत। श्रुतिः साक्षादिदं प्रतिपादयति—अमनोऽवाक्। तस्यामवस्थायां मनो न तिष्ठति, अतो मुक्तावस्थायामानन्दस्य स्वीकारो वेदविरुद्धः। इयमेव स्थितिर्ज्ञानस्यापि। ततो कथमिव ज्ञानेन भाव्यम्? "न हि ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यते।" ज्ञानस्य सत्तां प्रमाणयितुं प्रस्तुतायाः श्रुतेरयमभिप्रायो नास्ति यत् मुक्तावस्थायां ज्ञानं तिष्ठति, किन्त्वयमस्ति यत् "ज्ञातुर्ज्ञानशक्तेर्विपरिलोपो न भवति"। ईदृशान्यनेकानि सन्ति वाक्यानि, यानि तस्यात्मनः सर्वशक्तिमत्तायाः प्रतिपादकानि सन्ति। मुक्तावस्थायामपि तदीयाज्ञानशक्तिर्न नश्यति, परमिन्द्रियसाधनाभावे ज्ञानमवश्यं नोत्पद्यते। "यद्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते।" "जिघ्रत् वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते।" इमानि वाक्यानि शक्त्युद्देश्यकानि सन्ति, तस्य ज्ञानदर्शनघ्राणादयः शक्तयो न विपरिलुप्यन्ति। परं एतेषां ज्ञानं तस्मिन्नुदेतीति नास्ति तात्पर्यम्। एतादृशस्य सर्वस्यापि ज्ञानस्याभावे साधनानामभावो हि मूल-कारणम्। अतो मुक्तावस्थायामात्मा न कमप्यानन्दमनुभवति, न च ज्ञानमेव।

एवं सत्यपि साधकानां कृते सा परमा साध्या। तस्यामवस्थायामानन्दो न भवति, तथापि सा पुरुषस्य चरमोऽर्थः, तत्र सर्वविधदुःखक्षयत्वात्। इदं नास्ति न्यूनं फलम्। अतः सुखदुःखादिसमग्रात्मगुणानामुच्छेद एव मोक्षः[१], एवं सुखदुःखोच्छेदे धर्माधर्मोच्छेद एव कारणरूपेण कल्पनीयः स्यादस्माभिः। धर्मे सति सुखेनावश्यं भाव्यम्, अधर्मे च सति दुःखेनावश्यं भाव्यम्। एतयोः कस्यचिदपि सत्ता यावत् स्थास्यति तावन्मुक्तिः कुतः? शरीरस्य प्रवृत्तिस्तु कर्मण उत्पन्नं फलं भोक्तुं भवति। कस्मिंश्चिदप्यशुभे कर्मण्यस्माकमसति[१] कथमिवास्माभिः शरीरं धार्यं स्यात्? अर्थान्न। अतएव मीमांसाशास्त्रेण विहितम्—यो मोक्षमभिलषति स काम्यं[२] निषिद्धञ्च कर्म न कुर्यात्, यतस्तेन काम्ये कर्मणि कृते सुखादेः प्राप्तिः स्यात्, निषिद्धे च कृते दुःखस्य प्राप्तिः स्यात्। एवं सुखदुःखाभ्यां मुक्तः सन् तस्यामवस्थायां[३] स्वस्थस्तिष्ठति।

---

१. सुखदुःखोपभोगो हि संसार इति शब्द्यते।
तयोरनुपभोगं तु मोक्ष मोक्षविदो विदुः॥

१. कर्मजन्योपभोगार्थं शरीरं नः प्रवर्तते।
तदभावे न किञ्चिद्धि हेतुस्तदवतिष्ठते॥

२. मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्याद् प्रत्यवायजिहासया॥

३. सुखदुःखविहीनोऽन्तो मुक्तः स्वस्थोऽवतिष्ठते।

मोक्षस्याधिकारिणःसाधनानि च

तादृशस्य चरमसाध्यभूतस्य मोक्षस्य प्राप्तये प्रत्येकं जन्तुना स्वभावतो लालायितेन भाव्यमेव। किन्तु तत्प्राप्तेरधिकारित्वं नास्ति साधारणम्—एतदर्थं पूर्णयोग्यत्वमपेक्ष्यते। तस्य विवेचनेऽपि शास्त्रमिदं न शिथिलम्। अस्ति शास्त्रकाराणां वक्तव्यम्—

बहुदुःखपरिष्वक्तं यन्नाम स्वल्पकं सुखम्।
सुरापानादि सुखवद् वर्जनीयं विवेकिनाम्॥
एवंभूतेऽपि संसारे ये रक्ताः सुखतृष्णया।
न तेषामधिकारोऽस्ति मुक्तिशास्त्रे कथञ्चन॥
संसारादुद्विजन्ते ये दृष्टलोकपरावराः।
त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः॥
तेषामेवापवर्गाख्यः पुरुषार्थो महात्मनाम्।
तेषामेवाधिकारश्च मुक्तिशास्त्रे मनीषिणाम्॥

एवं विचारशास्त्रिणामभिप्रेतमस्य साधनानां किञ्चिन्निरूपणमस्माभिः कृतम्। मोक्षसाधनरूपेणास्यात्मज्ञानस्य[१] स्वीकृतेः परम्पराऽद्वैतवादिभिः प्रवर्तिता। सा च प्रायः सर्वसम्मता संवृत्ता। मीमांसादर्शनमप्युपनिषद्वाक्यानि द्विधा स्वीकरोति—यावत् क्रतुना साक्षात् परम्परया वा तेषां सम्बन्धो भवति तावत् तत् (मीमांसादर्शनं) तानि तत्रैव सङ्गमयति। यानि तत्र सङ्गतानि न भवन्ति, तानि न दृष्टमूलकानीति वदति। तदीयमिदमदृष्टं द्विविधम्—एकमभ्युदयरूपमन्यच्च निःश्रेयसरूपम्। अतोऽनया योजनयाऽन्यया परम्परया सहास्मिन् पक्षे तस्यापि समन्वयो भवति। न च पुनरावर्तते" इत्यादि—वाक्यानां प्रमाणत्वस्वीकार एवास्य साक्षी। अत आत्मज्ञानं मोक्षेऽपि सहायकम्।

सगुणधाराया उपासका अपि मोक्षोपलब्धये साधनायां प्रवर्तन्ते। किन्तु तेषां मते मोक्षस्य रूपं विचित्रमस्ति। तेषु कतिपये सायुज्यमुक्तेः समर्थकाः सन्ति, यत्र ब्रह्मणा (रामकृष्णादिना) समं येन केनापि रूपेण सहवासप्राप्तिरन्तर्हिता। अतएव रसखानेनोक्तम्—

"मानुस हौं तो वही रसखान, बसौं नित गोकुल गांव के ग्वारन।
जो खग हों तो बसेरो करौ नित कालिन्दी कूल कदम्ब की डारन॥

(यदि मनुष्यः स्यां तदा नित्यं गोकुलस्य गोपालबालकैः सह निवसेयम्, खगश्चेत्स्यां तदा नित्यं कालिन्दीकूलवर्तिनां कदम्बानां शाखासु निवासं कुर्याम्)।

---

१. आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

इत्यादयः समग्रा अपि चर्चाः सृष्टेर्ब्रह्मणश्च विषये व्यवस्थापितेषु विभिन्नेषु सिद्धान्तेष्वाधारिताः सन्ति। सृष्टिब्रह्मणोरभेदे तु मोक्षस्येयमवस्थाऽसङ्गता। परं तेषां रूपभेदेन कृते स्वीकारे सायुज्यमुक्तिः स्वतः सङ्गता भवति। उदाहरणेनैकेनेद मन्तरं स्फुटीकर्तुं शक्यते। वेदान्तविदां मते ब्रह्म परमान्नम्, जीवोऽपि मुक्तावस्थायां तस्मिन् परमान्ने निपतति, तत्र स आनन्दमनुभवति। विशिष्टाद्वैतिन एतस्माद् विभिन्नं मतमुपस्थापयन्ति--तेषां गतेन परमान्नतालाभे स आनन्दो जायते, यश्च तद्भक्षणे जायते। अतएव ते कृष्णादिना ब्रह्मणा कृतसन्निधाना अस्यामवस्थायामक्षय्यमानन्द मनुभवन्ति। अस्यां स्थितौ मीमांसकः सुखदुःखादिभिर्निर्लिप्तः स्वस्थस्तिष्ठति, इयमेव वास्तविकी मुक्तावस्थाया उच्चता। आनन्द आनन्द एव किमिव न स्यात्, दृष्ट्यैकया तदपि बन्धनमेव, यस्मान्मुक्तिः परमावश्यकी।

६. स्वतः प्रामाण्यवादः

परिभाषा

प्रामाण्यस्य विषये कतिचनाभिदधति—ज्ञाने जायमाने यः पदार्थो येन रूपेणावभासते स वस्तुतस्तथैवावतिष्ठते चेत् तत् प्रमाणमित्युच्यते। समक्षमुपस्थितेन पदार्थेनाभिव्यभिचरितेन भाव्यम्। तदीयेन वास्तविकत्वेन तदवभासतः पृथङ् न भवितव्यम्।

"अर्थस्य च तथा भावः प्रामाण्यमभिधीयते" (न्यायरत्नमाला पृ० ४ पृ० २) अन्ये वदन्ति—अनधिगताबाधितार्थनिश्चायकत्वमेव प्रामाण्यम्। एवं यथार्थज्ञानमेव प्रमा। प्रामाण्यञ्चानयैव प्रमया जीवितम्। अयथार्थज्ञानस्याप्रमात्वमप्रामाण्यस्य बीजमस्ति।

प्रकारः

प्रामाण्यमिदमभिलक्ष्य विभिन्नेषु दर्शनेषु विभिन्नाः सिद्धान्ताः प्रचलिताः सन्ति। तत्र चत्वारः प्रमुखाः सन्ति—१. प्रामाण्यमप्रामाण्यं वा स्वतो भवतः; २. एतद्द्वयमेव परतो भवतः (तार्किकः पन्थाः); अप्रामाण्यं स्वत उत्पद्यते, परं प्रामाण्यं परतो भवति (बौद्धाः); ३. प्रामाण्यं स्वतो भवति, अप्रामाण्यं तु परतो भवति (मीमांसकाः)।

प्रामाण्याप्रामाण्ये स्वतः

प्रथमपक्षस्य प्रतिपादनमेवं क्रियते--प्रत्येकं कारणे स्वकार्यस्य सम्पादनशक्तिः स्वभावतस्तिष्ठति। यथा माषैः परस्परविरुद्धौ पित्तकफावुत्पद्येते, तथैव ज्ञानेनापि स्वभावत एव स्वकीयं प्रामाण्यमप्रामाण्यं वा प्रकटीक्रियते—एतद्द्वयमपि स्वभावत एव ज्ञानस्य कार्यम्—कार्येऽस्मिन् स्वकारणातिरिक्तकारणान्वेषणमयुक्तम्। अत एव ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च स्वतः सिद्धे।

मतमिदमयुक्तम्--यतः प्रामाण्यमप्रामाण्यञ्च परस्परं विरुद्धे स्तः। यद् वस्तु यथा ज्ञायते तथैव तद् वस्तुतः स्यात्तदा प्रामाण्यमित्युच्यते। यदा च तद् वस्तु तथा न स्याद् यथा वर्णितं भवति। अभिप्राय एष 'अर्थतथात्वमिति अतथात्वमिति शब्देनाभिव्यज्यते। एवं ज्ञानं स्वविषये एककालावच्छेदेन विरुद्धौ पक्षौ कथमिव बोधयेत्! अतो ज्ञानं प्रामाण्यमप्रामाण्यमिति द्वयमपि स्वतोऽभिव्यञ्जयितुं नार्हति।

२९

प्रामाण्यमप्रामाण्यञ्च परतः

किञ्चिदत्र संशोधनं विधाय नवीन एको मार्ग उपस्थापितः। स चैष--उक्तस्य विरोधस्य समाधानं सुशकम्। एकैव ज्ञानव्यक्तिः स्वनिष्ठं प्रामाण्यमप्रामाण्यञ्च बोधयेत् ततश्चेद् विरोधापत्तिः, परं यदैकज्ञानव्यक्तिः स्वप्रामाण्यं व्यञ्जयति (यथैतद् गृहम्), अन्या च ज्ञानव्यक्तिः स्वमप्रामाण्यं (शुक्तौ रजतज्ञानमिव) प्रकटयेत् ततो व्यक्तिभेदेनायं मूलभेदः सुशकः। किन्तु मतमिदमनवस्थापेतं वर्तते। यतः कस्यचिदन्यस्य कारणस्यापेक्षां विनैव केवलं ज्ञानं प्रामाण्यस्याप्रामाण्यस्य चोपलम्भकमस्ति। एवं विनिगमनाविरहात् तथात्वस्यातथात्वस्य व्यवस्था न भवितु मर्हति। अयमभिप्रायः-एकया ज्ञानव्यक्त्या घटज्ञानस्य प्रामाण्ये प्रतिपादिते सति स्वत-उत्पद्यमानत्वात् तत्राप्रामाण्यं कथमिव न स्यात्। एवं प्रामाण्यं कस्मिन्, ज्ञाने मन्येत, अप्रामाण्यञ्च कस्मिन् ज्ञाने मन्येत—एतद्विवेचनामार्गतो दूरापास्तम्। तदुभयमपि स्वाभाविकं नास्तीति कल्पनीयं स्यात्। ज्ञानं किञ्चित् स्वयं न बोधयति, परं ज्ञान कारणे गुणानां ज्ञानेन प्रामाण्यं, ज्ञानकारणे दोषाणां ज्ञानेनाप्रामाण्यमित्येदुभयस्य परतस्त्वं तार्किकैस्तर्कसम्मतमङ्गीकृतम्। उक्तञ्च –

"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।"

अप्रामाण्यं स्वतः प्रामाण्यञ्च परतः

अस्यामपसिद्धान्तभित्तौ नवीन एकः सिद्धान्तः स्थितः। यतः प्रामाण्याप्रामाण्ययोर्द्वयोरेव परतस्त्वे स्वीकृते यावज्ज्ञानकारणानां गुणानां ज्ञानं न स्यात् तावत् प्रामाण्यं, यावच्च दोषाणां ज्ञानं न स्यात् तावदप्रामाण्यमुपपन्नं भवितुं नार्हति। अस्याः प्रामाण्याप्रामाण्यदशायां निर्युक्तं भूत्वा ज्ञानं गुणदोषज्ञानानधीनत्वेन न प्रामाण्यरूपेण न चाप्रामाण्यरूपेणैव पदार्थं बोधयितुं समर्थम्, एवं तेन स्वरूपरहितेन (निःस्वभावेन) स्थातव्यम् – उत्पत्तिसमकालमेव विषयनिवेदनं हि ज्ञानस्वभावः। विषयं प्रकाशयदेवोत्पद्यते तदिति वस्तुस्थितिः। एवं तद् विषयस्य (अर्थस्य) समर्पणं न कर्त्तुं शक्नुयात्, ततस्तेन स्वस्वभावोऽपि त्याज्यः सम्पत्स्येत। स्वस्वभावापरित्यागो द्देश्येन यदि तद् विषयस्य समर्पणं कुर्यात् यदि च तत् समर्पणं प्रामाण्यरूपं स्यात् तर्हि ज्ञानस्य प्रामाण्यं स्वतो मन्येत, अप्रामाण्यरूपे च सति अप्रामाण्यस्य स्वतस्त्वं स्वीकार्यं भवेत्, तद्भिन्नस्य च परतस्त्वम्। तर्कस्य निकषोऽयं द्वयोः परतस्त्वं स्थातुं न ददाति। अतोऽप्रामाण्य स्वतः प्रामाण्यञ्च परतः कल्प्येतेत्युपयुक्तः पन्थाः। बौद्धानामिदं मतम्, तच्चाभिर्युक्तिभिरुपपाद्यते।

उत्पत्तिमात्रेण ज्ञानस्य तथात्वं निश्चेतुं न शक्यते, तद्व्यभिचारस्योपलब्धेः, अतस्तदप्रमाणं सदेवोत्पद्यते। एतद्रजतमिति ज्ञानं यदा शुक्तौ जायते, ततश्च तत्र रजतालाभे तज्ज्ञानस्य व्यभिचारः प्रत्यक्षसिद्धः। एवं "स्थाणुर्वा पुरुषो वा" इत्यादिषु

स्थलेष्वनिश्चयोऽपि भवति। अत एवोत्पन्नं सदेव ज्ञानं प्रमाणरूपेणोत्पन्नं भवेत्, तत उक्तोदाहरणमिव कुत्रापि व्यभिचारः, अनिश्चयात्मकता वा नोपलभ्येत, परमुपलभ्यते। तदेवैतत् साधयति यज्ज्ञानोत्पत्तेरेव तत्र तथात्वं न निर्धारणीयं किन्तु तदुत्पत्तेरनन्तरं (१) संवादज्ञानेन (प्रवृत्तिसाफल्येन), (२) अर्थक्रियाज्ञानेन (रजतलाभानन्तरं तेनाभूषणादिनिर्माणक्रियया, जललाभादनन्तरं पिपासोपशमनेन) (३) कारणगुणज्ञानेन तत्र प्रामाण्यमवगम्यते। तेनैव तस्य तत्स्वभावजन्यमप्रामाण्यमपनोद्यते। वेदविहितानां यज्ञादीनां स्वर्गादीनि फलानि प्रत्यक्षोपलब्धेर्बहिर्भूतानि। अत एवंविधानां शास्त्राणां प्रामाण्यं संवादज्ञानादिना नहि, किन्तु कारणगुणज्ञानैरुत्पद्यते। शब्दराशेः प्रामाण्याङ्गीकारे आप्तप्रणीततैव वस्तुतो गुणो यत्साहाय्येन तस्य प्रामाण्यमङ्गीक्रियेत। तत्र तादृशगुणसमावेशस्तु दूरे, किन्तु तत्रानाप्तप्रणीतत्वादयोऽनेके दोषाः समाविष्टाः सन्ति। यथा, 'वनस्पतयः सत्रमासत' इत्यादि। इदं तु केवलं मत्तप्रलापः। अतएव वेदानामप्रामाण्यं प्राप्तम्।

प्रामाण्यं स्वतः, अप्रामाण्यञ्च परतः

यदि प्रामाण्यस्य परतस्त्वं मन्येत चेत् तस्य प्रामाण्यमनवस्थितं स्यात् यतो ज्ञानस्य प्रामाण्येऽनज्ञानाधीने सति पोषकस्य प्रामाण्यप्रतिपादकस्यान्यस्य ज्ञानस्यापि स्वप्रामाण्योपपत्तयेऽवश्यमितर ज्ञानमपेक्षितं स्यात्। तदपि तदितरस्य, तदपि च तदितरस्य, एवंविधं ज्ञानं कदाचिदपि स्वकीयां सत्तामुपलब्धुं क्षमं न भवेत्, ततस्तन्मूलश्चोच्छिद्येत। एवं विधश्च पक्षं क एव स्वीकुर्यात्?[१]

यतः सर्वमेव ज्ञानं स्वतथात्वावधारणार्थं स्वस्यासामर्थ्यमनुभवत् स्वेतरज्ञानानपेक्षं स्यात्, ततः कारणगुणज्ञानं संवादज्ञानंमर्थक्रियाज्ञानमपि स्वविषयनिष्ठगुणावधारणार्थमितरज्ञानापेक्ष स्यात्। एवं जन्मसहस्त्रैरपि कस्मिंश्चिदर्थेऽसञ्जातनिश्चये प्रमाणताऽपि यदि स्वीक्रियेत चेत् किमपि वैशिष्ट्यमुत्पन्नं न स्यात्। यद्यप्यर्थक्रियायाः फलरूपतया तत्राप्रामाण्यशङ्काया अवकाशो नास्ति, परं स्वप्नावस्थायां जलाहरण जलपानादिक्रियास्तामपि व्यभिचरितां कर्त्तुमीशन्ते। यदि केवलं सुखज्ञानमव्यभिचरितं मत्वा तत्पर्यन्तमेवार्थक्रियासीमिता क्रियेत ततस्तयाऽपि पूर्वज्ञानस्य प्रामाण्यमध्यवसितं कर्त्तुं न शक्येत। स्वप्ने प्रियासङ्गज्ञानेन सुखं जायते, तस्य ज्ञानमपि भवति। परं तत्सुखज्ञानस्य मिथ्यात्वेन तत्राप्रामाण्यं प्रतिष्ठापितं भवति अत एवैतन्मन्तव्यमेव यत्प्रामाण्यं स्वत एव प्राप्तं भवति। परं यदि कारणदोषज्ञानादिना तत्रान्यथात्वमुपतिष्ठते चेत् तत् प्रामाण्यं नष्टं भवति।

---

१. परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित्।
मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति ॥

शा० दी० पृ० ७७।

इदमेवोपपन्नमप्यस्ति । वस्तुतश्च चोदनायाः प्रामाण्ये इदं स्वतः प्रामाण्यमेव हेतुः । यतः स्वतः प्रामाण्येऽस्वीकृते परतः प्रामाण्यमेव मन्येत । एवं चोदनाविहित विषयाणामन्यप्रमाणैः प्रमाणयितुं सामर्थ्याभावे चोदनायाः प्रामाण्यं कदापि सम्भवं न स्यात् । प्रामाण्ये स्वतोऽङ्गीकृते चोदनया प्रतिपादितविषयस्य बाधप्रत्यक्षत्वा भावे, अपौरुषेयत्वदृष्ट्या च दोषाणां प्रवेशमात्रस्य सम्भावनाया अभावेन चोदनायाः स्वतः प्रामाण्यं सिद्धं भवति । अयमेवाशयः कुमारिलभट्टेन[१] स्फुटीकृतः एवमेव प्रामाण्ये स्वतः सिद्धे सति चोदनाया अपि प्रामाण्यस्येतरसाधनैः परीक्षणमावश्यकं न भवति ।

उपरि प्रतिपादिताः सर्वे विषया भट्टेनैवं स्वीकृताः—

जातेऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते ।
यावत्कारणशुद्धत्वं न प्रमाणान्तराद् भवेत् ॥

तत्र ज्ञानान्तरोत्पादः प्रतीक्ष्यः कारणान्तरात् ।
यावद्धि न परिच्छिन्ना शुद्धिस्तावदसत्समा ॥

तस्यापि कारणे शुद्धे तज्ज्ञाने स्यात् प्रमाणता ।
तस्याप्येवमितीच्छंश्च न क्वचिद् व्यवतिष्ठते ॥

यदा स्वतः प्रमाणत्वं तदान्यन्नैव गृह्यते ।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः ॥

तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ इति

१. A. 'तस्माद्गुरुभ्यो दोषाणामभावस्तदभावतः ।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः ॥
प्रत्ययोत्पत्तिहेतुत्वात् प्रामाण्यं नापनीयते ।''

B. ''परतस्तु कारणदोषादयथार्थलक्षणमप्रामाण्यमिति दोषाभावाद् वेदस्य यथार्थत्वमिति''
पार्थसारथिः (न्यायरत्नमाला ४८)

७. प्रमाण-परिच्छेदः

प्रमाणस्य लक्षणं तत्सङ्गतिश्च

तार्किकप्रक्रियायां प्रमाकरणं प्रमाणमित्युच्यते। अथ प्रमयाऽज्ञानस्य तथा सत्यभूतस्य पदार्थस्य ज्ञानमभिप्रेतम्। अयमाशयः यद् भवता पूर्वमज्ञातं तद् भवतो ज्ञानं यथावदुत्पद्यमानं प्रमाणमिति। किम्बहुना, यत्र यद् वस्तु स्यात् तस्य तथैवानुभवनमेव प्रमा। तस्य ज्ञानस्य नावीन्यं तस्य च कारणेषु दोषबाधकज्ञानाभावोऽनिवार्यः। यथोक्तं शास्त्रदीपिकाकारेण—"कारणदोषबाधकज्ञानरहितमगृहीतग्राहिज्ञानं प्रामाण्यम्।" अत्र ज्ञानस्याज्ञातत्वं नूतनत्वं वाऽनिवार्यतयाऽधिगतम्। यतः सापेक्षज्ञानविषयेऽनुवादे स्मृतौ च मौलिकरूपेण प्रमाणता नापद्येत, यत एतयोर्विषयी न कश्चन नवीनः पदार्थः, किन्तु प्रतिपादितः पदार्थः। प्रामाण्यार्थं तेन ज्ञानेन सत्यताया अप्यपेक्षणमनिवार्यम्। न चेत्, मन्तव्यं यत्—अग्रे रज्जुर्वर्तते, भवता च स पदार्थो यदि रज्जुरित्यवगम्यते ततो भवतोऽनुभवोऽयथार्थः, प्रमा, सत्यमस्ति। परं यदि स सर्पतया गृह्यते ततो भवदनुभवः सर्वथाऽसत्यः। अतएव सोऽयथार्थज्ञानमित्युच्येत।

अतएव भ्रमात्मकं संशयात्मकञ्च ज्ञानं प्रमाणकोटौ प्रवेष्टुं नार्हति। यत्र वस्तुनोऽभावेऽपि तज्ज्ञानस्य प्रतीतिर्भवति एवंविधे अनुभवोऽयथार्थज्ञानमित्यप्रमा वेत्युच्यते। अस्य गणना प्रमाणतो विपरीतायां दिशि भवति। किं बहुना विषयस्य यथार्थरूपेण प्रतीतिः सर्पे सर्प इति, रज्जौ रज्जुरिति ज्ञानमेव प्रमाज्ञानमस्ति। एतस्मात् सर्वथा विपरीतं विषयेऽतथाभूते रज्जौ 'सर्प' इति, सर्पे वा रज्जुरिति ज्ञानं याथार्थ्यशून्यत्वेना प्रमाऽस्ति। अस्या एव प्रमाया अतिशयमुपकारकं प्रकृष्टतमं साधनं प्रमाणमित्युच्यते। येनाधिगतेन क्रियायाः फलनिष्पत्तिर्जायेत, तत्साधनं प्रमाणमित्यर्थः न तत्र मध्ये कस्यचिद् व्यवधानस्य प्रवेशो सम्भाव्येत। यथा, रामस्य बाणेन रावणो हतः—अत्र बाणो हननरूपायाः क्रियाया एवंविधं प्रकृष्टतमं साधनमस्ति यस्य सम्पर्के जाते विनैव किञ्चिद् व्यवधानं हननक्रिया शीघ्रं सम्पद्यते एवमेव प्रमाणस्य संसर्गे सत्येव प्रमाज्ञानं यथाशीघ्रमुत्पन्नं भवति।

प्रमाणस्यावश्यकत्वं महत्त्वञ्च

लौकिकेन व्यवहारेणैवानुभवः कर्त्तुं शक्यते यत् प्रमाणस्य कियन्महत्त्वमिति? यथार्थज्ञानार्थं (वस्तुस्थितेर्ज्ञानार्थं) तदेकं कियन्महत्त्वपूर्णं साधनमस्तीति। तत्तु

ज्ञानस्य मापदण्डः, यश्च यथार्थञ्चैकत्र विन्यस्य पृथक् करोति। विलक्षणः कश्चन हंसोऽपि तत्, यस्य नीरक्षीरविवेकिता लोकशास्त्रप्रसिद्धा। तन्नाम निकषः, यत्र परीक्ष्य ज्ञानस्य वास्तविकता परिचीयते अतएव तत् समग्रपदार्थानां व्यवस्थापकं ज्ञानसामान्यस्य निर्णायकमित्युक्तम्[१]। ज्ञानयाथार्थ्यस्य च सिद्धिरेतदधीनेति स्फुटी कृतम्। यत्र पश्यामस्तत्रास्य साम्राज्यमस्ति। न्यायाधीशो न्यायस्याधाररूपेणैतदेव स्वीकरोति, प्रमाणञ्चापेक्षते। इदमेव यथार्थज्ञानस्य साधनमद्यापि राजदूताध्यापकादिभिः स्वकार्यस्य वास्तविकपरिचयप्रदानार्थमुपस्थाप्यते, प्रमाणपत्रञ्च प्रस्तूयते। अनेनैवास्योपादेयताया व्यापकतायाश्च परिचयः सुशकः। अस्यैतदेव महत्त्वमादाय नैयायिकैरिदमीश्वरस्य समकक्षतां नीतम्। अर्थनिर्णयकाले इन्द्रियाणां स्वच्छता हेतूनां (कारणानां) सत्यता, अस्य कृतेऽपेक्षिता।

प्रमाणानां परिगणना

प्रमाणानां संख्याविषयेऽनेकैर्दार्शनिकैर्विभिन्नानि मतानि दर्शितानि। परमस्य महत्त्वं सर्वेषां कृते समानरूपेण शिरोधार्यम्। चार्वाका भूतवादितया प्रत्यक्षमित्येकमेव, वैशेषिकाः प्रत्यक्षमनुमानञ्चेति द्वयं, सांख्याः प्रत्यक्षमनुमानं शब्दश्चेति त्रयं नैयायिकाः प्रत्यक्षानुमानशब्दोपमानानि, प्रभाकरमीमांसासम्प्रदायानुसारिणः प्रत्यक्षानुमान शब्दोपमानार्थापत्तीः, भट्टमीमांसानुसारिण उत्तरमीमांसानुसारिणश्च प्रत्यक्षानुमानोपमानशब्दार्थापायनुपलब्धीः प्रमाणतयाऽङ्गीकुर्वन्ति। एतेषां स्थापना प्रबलतर्काधारेण कृता वर्तते।

प्रत्यक्षस्य विवेचनम्

यथा च शब्दव्युत्पत्त्या स्फुटं (अक्षिणी प्रति प्रत्यक्षम्), अस्य प्रमाणस्य साक्षात् सम्बन्ध इन्द्रियैः (अक्षैः) अस्ति। एतच्च ज्ञातस्य तथात्वनिर्णयाय सर्वतः स्थूलं साधनम्। अतएव 'आंख्या देखी परशुराम कदे न झूठी होय'' अनया लोकोक्त्या धारेण 'प्रत्यक्षे किं प्रमाणम्' इत्यादयो युक्तयः प्रचलिताः सन्ति। आभिरिदं ज्ञानं सर्वथाऽसन्दिग्धमिति साध्यते। किं बहुना, कस्यचिद् विद्यमानस्य पदार्थस्येन्द्रियैः सम्बन्धे (साक्षात्) सति या बुद्धिरुत्पद्यते तज्ज्ञानं[२] प्रत्यक्षम्। समक्षमुपस्थितेन घटेन चक्षुःसंयोगे सति यद्घटज्ञानमुत्पद्यते तत् प्रत्यक्षम्। शुक्तौ रजतज्ञानं जायते, वस्तुतस्तत्र रजतं न भवति। अतएव विद्यमानेन पदार्थेनेन्द्रिययोगेऽसति एवं विधानां भ्रान्तज्ञानानां प्रत्यक्षत्वं नोच्यते। अनुमानादौ तु विषयस्येन्द्रियैः सम्बन्धोऽपि न भवति। इन्द्रियैः साक्षात् सम्बन्धेन जातेन हेतुना ज्ञानमिदं सापेक्षमिति न वक्तुं शक्यते। इतरज्ञानानाश्रितमिदं हि ज्ञानम्।

१. प्रमाणस्य सकलपदार्थव्यवस्थापकत्वम् (विश्वनाथः)
२. सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्। (शबरः)

अनुमितिज्ञानमपि मनोजन्यम्। मनश्चेन्द्रियम्। किन्तु तेनेन्द्रियेण विषयस्य साक्षात् सम्बन्धो न भवति। अतएव तत् प्रत्यक्षमिति वक्तुं न शक्यते। सुखस्य प्रत्यक्ष मपीन्द्रियस्य साहाय्येन भवति। तदिन्द्रियं मनोऽस्ति, येन साक्षात् सम्बन्धे सति सुखस्य प्रत्यक्षं भवति अतएव सुखदुःखयो प्रतिपत्तोः साधनरूपेण मनः[1] परिभाष्यते।

प्रत्यक्षभेदः

इदमेव प्रमाणं सर्वातिशायि, सर्वस्य मूलञ्च। प्रत्यक्षं द्विविधम्—१. निर्विकल्प कम्, २. सविकल्पकम्। इन्द्रियसन्निकर्षानन्तरमेव विशेषणविशेष्यभावरहितं विषय-स्वरूपमात्रग्राहकं शब्दानुगमशून्यं सम्मुग्धाकारकं ज्ञानं निर्विकल्पकमित्युच्यते। निर्विकल्पकज्ञाने केवलं किमपि सत्तामात्रमुपलब्धं भवति, न खलु तत्प्रकारता विशेष-तादीनाम्। यथा शिशुपालवधमहाकाव्येऽम्बरादवतरन् नारदः प्रथमं त्विषां चयरूपेण दृष्टिगोचरो भवति, न च तस्य किमपि वैशिष्ट्यं तत्कालं प्रतीतं भवति, ततश्चाग्नि-रूपेण सूर्यरूपेण च प्रतीतः सन् क्रमेण पुरुषरूपेण परिज्ञायते, ततश्च नारदरूपेण। ज्ञानस्य प्रथमावस्थायां केवलं तेजःपुंजमात्रं दृष्टिगोचरमासीत्। तद्विषये किमपि विशिष्टं ज्ञानं नासीत्।

अत एवंविधं ज्ञानं निर्विकल्पकं ज्ञानमित्युच्यते। तच्च सम्मुग्धाकारमेकपिण्ड स्वरूपमनिर्णीतस्थितिकं स्फुटीभवति। अस्य प्रत्यक्षं साक्षाद् भवति। यथा बोधरहितः कश्चिद् बालको गजं पश्यति, परं स तद्विषये किमपि न वेत्ति। तस्य समक्षं किमपि कृष्णकृष्णं स्थूलस्थूलं पिण्डस्वरूपमात्रमुपतिष्ठते। तस्य जात्या नाम्ना गुणैश्च तस्य सम्बन्धो न भवत्यवगतः। अतएव विशेष्यज्ञानशून्यं प्रत्यक्षं निर्विकल्पकमित्युच्यते। इयमेव हि ज्ञानस्य प्रथमाऽवस्था।

यदा ज्ञानस्येयमेवावस्थाऽन्यैरुपकरणैः क्रमेण परिपुष्यते, तस्य (ज्ञानस्य) च विशेषण-नाम-गुण-क्रियाभिः सम्बन्धो भवति, ततस्तत् सविकल्पकमित्युच्यते। यथोक्त उदाहरणे नारदस्य परिज्ञानम्। सविकल्पकमिदं तावज्ज्ञानं पञ्चविधविकल्पैः प्रतिभासितं भवति। ज्ञातिः, यथा नारदस्य कृते पुरुष इति, वीणापाणिरिति द्रव्यम्, तेजस्वीति गुणः, तपस्वीति क्रिया, नारद इति च नाम विकल्पः। एषु पञ्चसु विकल्पेषु सविकल्पकं ज्ञानं सन्तिष्ठते।

निर्विकल्पकमेव सविकल्पकस्याधारभूतम्। तच्च विस्तृतं क्षेत्रम्, विस्तीर्णा पृष्ठभूमिर्वा, यत्रानेकाः क्रिया, विशेषणानि नामान्यादीन्यवस्थितानि भवन्ति। क्रिया-नामविशेषणगुणादयो विविधा वर्णा इव सन्ति, येषु सम्पृक्तेषु सत्सु विस्तृतं ज्ञान-मेकस्यां सीमायां चित्रितं क्रियते।

---

१. "सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति।
"तत्पूर्वकत्वाच्चानुमानाद्यपि"[2]

निर्विकल्पकस्य स्थापना सविकल्पकस्य च खण्डनम्

बौद्धा निर्विकल्पकस्यैव प्रत्यक्षत्वं स्वीकुर्वन्ति, न तु सविकल्पकस्य। तस्य निर्विकल्पकानन्तरमुत्पद्यमानत्वात्। अनधिगतार्थं गन्तृत्वं हि प्रमाणस्वभावः। सविकल्पकेन निर्विकल्पकाधिगतार्थस्यैवावगमे जाते कथमिव तस्य प्रत्यक्षप्रमाणत्वं स्वीकर्तुं शक्यते। इदमेव निर्विकल्पकं प्रति निमित्तम् येन स्वरूपमात्रं ग्राह्यते। भावानामिदमात्मीयं स्वरूपमात्रं बौद्धैः[1] स्वलक्षणमित्यभिधीयते।

अस्यैव स्वलक्षणस्य विशदं ज्ञानं जातिनामादिसम्बद्धं सद् भवति, एतदर्थं सविकल्पकस्य शरणागतिस्तदवदानमिति वा कथनमुचितं नास्ति यत इदं निर्विकल्पकस्यैव विशदं रूपम्, तस्यैव च संसर्गेण समुत्पन्नम्। यथाऽचेतनाऽपि बुद्धिरात्मनः सम्बन्धाच्चेतनरूपेणोपतिष्ठति तथैवाविशदरूपेणावभासितः सन्नपि सविकल्पकः प्रत्ययः स्वस्मात् पूर्वमुत्पन्नस्य स्वमूलकारणभूतस्य विशदावभास इव प्रतीयते। यद्यस्य सविकल्पकस्येदं वैशद्यं निर्विकल्पकं सविकल्पकस्यावदानमिति न मन्येत चेत् तत्संसर्ग रहिताभ्यां शब्दज्ञानानुमानाभ्यामप्यस्यावस्थितिः सम्पद्येत। परं न सम्पद्यते—एतेन प्रतीयते यत् सविकल्पकस्य यद् वैशद्यं तत् निर्विकल्पकेन समं सञ्जातस्य सम्बन्धस्यैवावदानम्। अतएव निर्विकल्पके खलु विशदस्य स्वरूपस्य प्रकाशके सति तदतिरिक्तस्य सविकल्पकस्य प्रत्यक्षत्वकल्पनायाः काऽवश्यकता ? उक्तमपि धर्मकीर्तिना—

कल्पनापोढमभ्रान्तप्रत्यक्षं निर्विकल्पकम्।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥ इति

सविकल्पकस्य स्थापना

बौद्धानां सिद्धान्तमिमं खण्डयित्वा विचारशास्त्रज्ञैः कौशलेन सविकल्पकं प्रत्यक्षं स्थापितम्। ते वदन्ति–जातिगुणक्रियासम्बद्धमिदं ज्ञानं वस्तुतः सविकल्पकस्यैवावदानमस्ति। यस्य वैशिष्ट्यस्योत्पादकत्वेन निर्विकल्पकमूलकत्वेऽप्यस्मिन् प्रत्यक्षताऽनिवार्यतयोपतिष्ठति। सविकल्पकवैशद्यस्यान्यसंसर्गेणोत्पन्नत्वे न किञ्चित् प्रमाणम्। यद् वस्तु यस्मादुत्पद्यते तस्य तस्मिन् सर्वेऽपि गुणा अवगुणाश्च तथैव तिष्ठन्तीत्यत्र नास्ति कश्चन नियमः। पंकादुत्पन्नस्य कमलस्य सुगन्धिः पंकस्यावदान मिति वक्तुं न शक्यते। अस्य प्रत्यक्षतायां स्पष्टो युक्तिसङ्गतस्तर्कोऽप्यस्ति। दूरादेव कमप्यागच्छन्तं व्यक्तिमात्रमवलोक्य गौर्वाऽश्वो वेति निश्चेतुमशक्नुवानः कश्चित् यदा तस्य हेषाध्वनिं शृणोति तदा तस्मिन् स्वलक्षणे तस्याश्वत्वमनुमिनोति, तथापि तस्याश्वत्वज्ञानं परोक्षं न भवति। अतएव लोकेऽपि प्रचलितम्, अयं तु अश्वः, परमक्षिभ्यामनेन रूपेण नावलोक्यते।

---

१. इह भावानामन्यासाधारणमात्मीयं यत्स्वरूपं तत्स्वलक्षणम्।

तस्मिन् वस्तुनि सन्निकटमागते सति स वदति—अधुनाऽस्याश्वत्वमक्षिभ्यामवलोक्यते। एभिरुदाहरणैरयं प्रतीयते यदयं भेदव्यवहारो नास्ति व्यक्तिगतः, अपि तु जातिजन्यः, यस्य विकल्पस्य हेतुनाऽस्माभिः सविकल्पकस्य प्रत्यक्षस्याङ्गीकारोऽनिवार्यः। सम्बन्धग्राहकस्य सविकल्पकस्य प्रत्यक्षत्वेनैव प्रत्यक्षस्यानुमान मूलकतोपपन्ना।

निर्विकल्पकस्य खण्डनम्

यदा निर्विकल्पकज्ञानेन कस्यापि व्यवहारो न सिद्धयति, ततो निर्विकल्पक स्वीकारोऽनावश्यक इति मन्वानैर्वैयाकरणैः केवलं सविकल्पकमेव स्वीकृतम्। यदुक्तं भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति

कैश्चिदन्यैरप्युक्तम्—जात्यादियोजनारहितं निर्विकल्पकज्ञानं प्रत्यक्षमिति कथनं नास्त्युपयुक्ततरम्, यतोऽस्माभिर्जातिगुंणश्च प्रत्यक्षतया न दृश्येते तद्रहितं प्रत्यक्षं पुनः किमिवावशिष्यते।

निर्विकल्पकस्य स्थापना—

किन्त्वेतत् सर्वं वास्तविकप्रतीतेः सर्वथा विपरीतम्। विषयस्येन्द्रियेण सम्बन्धेसत्येकं सामान्यविशेषविवेचनारहितं विशेष्यविशेषणसम्बन्धशून्यं सम्मुग्धवस्तुमात्रगोचरमालोचनज्ञानं भवत्येव, यस्य च स्वीकार उपयुक्तः। अन्यथा तदभावे सविकल्पकस्य सिद्धिर्न भवितुमर्हति। यतः, यावद् 'घटघटत्वे आदि समूहालम्बनात्मकं ज्ञानं न भवति तावद् घटत्वरूपवैशिष्ट्ययुक्तस्य घटरूपविशेष्यस्य सविकल्पकरूपेण ज्ञानं भवितुमर्हति। यथा कारणं विना कार्योत्पत्तिर्न भवति। सविकल्पकज्ञानकर्तृपुरुषद्वारा निर्विकल्पेन ज्ञातं जातिविशेषं संज्ञाविशेषं वाऽनुस्मृत्य तेन च पुरः स्थितं वस्तु सम्बद्धं कृत्वा गोत्वविशिष्टो गौरित्यादिप्रकारैः सविकल्पकं ज्ञानमुत्पादयितव्यम्। अयमाशयो न्यायरत्नाकरेणाप्युक्तः—

तदभावे हि निर्निमित्तं शब्दस्मरणं स्यात्। अस्मृतशब्दस्य च न शब्दानुविद्धो विकल्पः सम्भवतीति। अतएव सविकल्पकात् पूर्वं जात्यादिरहितं पदार्थमात्रबोधकं निर्विकल्पकमवश्यं स्वीकार्यम्। अन्यथाऽज्ञातैर्जात्यादिभिः सह पुरः स्थितं वस्तु कथमिव विशिष्टं सम्बन्धं कर्तुं शक्यते। जात्याद्यदर्शिनः पुरुषस्य तेषां स्मरणमपि कथं भवितुमर्हति, यतोऽनुभव एव स्मरणस्य मूलम्। अत एव जात्यादेरनुभवः स्वीकार्य एव।

निर्विकल्पकस्य केवलं चैतन्यग्राहकत्वम्

निर्विकल्पकज्ञानं स्वीकुर्वन्तोऽप्यद्वैतवादिनस्तद्ग्राहकानां तथ्यानां विषयेऽपि पर्याप्तं मतभेदं प्रस्तुवन्ति। तैरभिधीयते शुद्धं चैतन्यं विना निर्विकल्पकं घटघटत्वादि विशेषाणां ग्राहकं भवितुं नार्हति, भेदग्रहणं विना विशेषग्रहणासम्भवात्। इयं भेद-ग्राहकता सविकल्पक एव तिष्ठति। अत एतत्सर्वं कार्यं सविकल्पकस्यैवास्ति। अस्य भेदस्य सम्बन्धोऽपीतरेतराभावेनैव (अन्योन्याभावेन) वर्तते। अत एवाभावस्या-नुपलब्धिप्रमाणगम्यत्वेनास्य भेदस्य ग्रहणं निर्विकल्पकेन कुतो भवितुमर्हति, यदि प्रत्यक्षेणैव न भवति चेत्। अत एव तु 'नेह नानाऽस्ति किञ्चन–एकमेवाद्वितीयम्' इत्यादयोऽद्वितीयब्रह्मप्रतिपादिकाः श्रुतय उपपद्यन्ते। अन्यथा यदि प्रत्यक्षमेव भेद ग्राहकं स्यात् तत एतासामभेदबोधकश्रुतीनां प्रत्यक्षविरोधेन हेतुनाऽप्रामाण्यं स्यात्। अनुपलब्धिप्रमाणेन सत्यपि भेदस्य ग्रहणं स्यादपि, तथापि सा शब्दापेक्षयाऽत्यन्तं निर्बलं प्रमाणमस्ति। अत एव सा श्रुतिप्रामाण्यं बाधितुं न शक्नोति यदि नाम मन्येत, प्रत्यक्षस्य भेदग्राहकताऽपि स्वीक्रियेत चेत् ततोऽपि तत् केवलं व्यावहारिकं भेदं ग्राहयितुं शक्नोति। अत एव तस्य पारमार्थिकाभेदबोधकश्रुत्या विरोधोऽपि न वक्तुं शक्यते। यतस्तदर्थं समानविषयताऽपेक्ष्यते। तत् अभेदश्रुतौ[१] बाधकमपि न भवति। अत एवास्य भेदस्य निरूपणेऽशक्यत्वागमहेतोः प्रत्यक्षं केवलं सन्मात्रस्यैव (शुद्धचैतन्य स्वरूपस्य) ग्राहकमस्ति।

निर्विकल्पकस्य भेदग्राहकता

इयमेका व्यावहारिकी समस्या, योपेक्षितुं न शक्यते। किं भवता नीलपीतयो-र्भेदो न दृश्यते ? न चेत् तर्हि भवादृशान् लोकस्य सर्वथा विपरीतगामिनः प्रति किञ्चिद् वक्तव्यं नास्ति। 'एकमेवाद्वितीयं ब्रह्म' इत्यादीनि वाक्यानि ब्रह्मणः प्रशंसापराणि सन्ति, न तु तदद्वैतस्य प्रतिपादकानि सन्ति।

निर्विकल्पकस्य व्यक्तिमात्रग्राहकता

बौद्धा एवमाहुः—निर्विकल्पकेन केवलं स्वलक्षणमात्रस्य (व्यक्तेः) बोधो भवति। तत् स्वरूपेणापि विशेषणं ग्रहीतुं न शक्नोति। "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्" इत्यनेन न्यायेन तज्ज्ञानं स्वलक्षणग्रहणानन्तरं विशेषणस्य स्वरूप मात्रमपि ग्रहीतुं न शक्नोति। अतो भवतां मते द्वितीयं सविकल्पकं ज्ञानं यदि विशेषण

---

१. भेदोऽयं भिन्नधर्मिप्रतिभटविषयज्ञानजज्ञानवेद्यो धर्म्यादिर्भेदसिद्धिः पुनरपि च तथेत्यापते-श्चानवस्था।
भेदे धर्म्याद्यभेदे बत भवति मृषा भेदबुद्धिर्विभेदे प्रादुःस्युः पूर्वदोषा न च गतिरपदा तेन भेदो मृषैव।।

स्वरूपं विषयीकरोति चेत् पारिशेष्यात् निर्विकल्पकं ज्ञानं स्वतो स्वलक्षणमात्रस्य बोधकं भवति। एकेनैव ज्ञानेन कार्यद्वयं न सम्पद्यते-यथैकमेव ज्ञानं गन्धमपि गृह्णीयात् रसञ्चापि। अतः स्वलक्षणमात्रस्य ग्राहकमेतदिति कल्पनमुपयुक्तम्।

निर्विकल्पकसविकल्पकयोर्मूलतो भेदः

किन्तु मीमांसकैरस्यापि विरोधः कृतः, यत इन्द्रियैः सम्बन्धे सत्यकस्माद्-विशेषणभावरहितं वस्तु प्रतीयते--ततस्तस्य वस्तुन इदं गम्यम्-इति जातिः, अयं दण्डीति द्रव्यम्, अयं श्वेत इति गुणः, इयं गच्छतीति क्रिया, अयं देवदत्त इति नाम, एवमेभिः पञ्चभिर्विकल्पैरिदं सम्बद्धं क्रियते। निर्विकल्पके ज्ञाने वस्तुनोऽनेकैराकारैः सम्बन्धो भवति। सा चैकविधा विशेष्यविशेषणविभाज्या लेखा। सविकल्पके वैशिष्ट्य मेतावन्मात्रमेव –तद् हि तानि पृथक्तया विभज्य गृह्णाति। घटो विशेष्यः, घटत्व-ञ्चास्य विशेषणम् एवं विधो विवेको निर्विकल्पके न भवति। सविकल्पकेऽयं जात्यशः, अयञ्च व्यक्त्यंशः एवं पृथक्त्वेन विवेचनं भवति। निर्विकल्पकेऽप्येते सर्वे विषया निहितास्तिष्ठन्ति, येषामग्रक्षणेषु प्रकाशो भवति। इदमेवैतयोर्द्वयोर्व्यावहारिक मन्तरम्। एतद्द्वयमेवानिवार्यतया स्वीकार्यम्। पूर्वोक्ताः पञ्च विकल्पा भेदस्यैतस्य निर्देशकाः सन्ति।

कतिपये विद्वांसः प्रत्यभिज्ञां षष्ठविकल्परूपेण स्वीकुर्वन्ति, परं वस्तुतस्त-न्नामैव। अत एव सा नाम विकल्पान्तर्युक्ता भवति। एतैः सकलैर्विकल्पैःसविकल्पकेऽ-स्माभिर्निर्विकल्पकापेक्षया वैशिष्ट्यानि स्पष्टतया प्रतीयन्ते, पुनस्तस्य सर्वस्वीकृतायां सत्तायां केन संशयशीलेन भूयते।

इदं सविकल्पकनिर्विकल्पकभेदवत् प्रत्यक्षमपि धर्माधर्मयोः प्रमाणं भवितुं नार्हति, धर्माधर्मयोरिन्द्रियैः समं सत्सम्प्रयोगस्यासम्भवात्। स च भावी, अत एव केवला चोदना तत्र प्रमाणम्।

सन्निकर्षः

विषयस्येन्द्रियैः सह प्रत्यक्षज्ञाने भावी सम्बन्धोऽयं सन्निकर्ष इत्युच्यते। अयं तावन्मुख्यतया द्विविधः—१. लौकिकः २. अलौकिकश्च। लौकिकश्च त्रिविधः-- १. संयोगः, २. संयुक्ततादात्म्यम्; ३. संयुक्ततादात्म्यतादात्म्यञ्च। यत्रेन्द्रियाणि द्रव्यं विषयीकुर्वन्ति तं सम्बन्धं संयोगसन्निकर्ष इति, यत्र द्रव्यवर्तिन्या जातेर्गुणस्य कर्मणो वा ग्रहणं भवति स संयुक्ततादात्म्यसन्निकर्ष इत्युच्यते। भट्टमते जातिगुणकर्मणां द्रव्येण तादात्म्यसम्बन्धः[१] स्वीकृतः। अत्र तादात्म्येन नैयायिकानामिवात्यन्ताभेदः

१. द्र०-तन्त्रसिद्धान्तरत्नावली पृ० ५८ (इदमेव युक्तं प्रतिभाति)

पूर्णैकता वेत्यभिप्रायो नास्ति, अपितु भेदयुक्तोऽभेदः कस्मिंश्चिदंशे भेदः, कस्मिंश्चिदंशे चाभेदोऽपि। एवमेव यत्र गुणत्वक्रियात्वयोर्ज्ञानं भवति तत्र स ग्राहकः सम्बन्धः संयुक्ततादात्म्यसन्निकर्ष उच्यते, अयं त्रिविधः सन्निकर्षो मुख्यतया भट्टस्य सम्मतः।

एवमेवालौकिकः सन्निकर्षोऽपि द्विविधः। १. सामान्यलक्षणः २. ज्ञानलक्षणश्च। यत्रेन्द्रियेण सम्बद्धे जने वर्तिन्या जातेर्ज्ञाने समुत्पन्ने तज्जात्याश्रितं सकलजनज्ञानं भवति स सम्बन्धः सामान्यलक्षणसन्निकर्ष इत्युच्यते। एवमेव 'सुगन्धिचन्दनखण्डः' इत्यादिषु वाक्येषु चन्दनखण्डे यत्सुगन्धिज्ञानं तज्ज्ञानलक्षणस्य सन्निकर्षस्यावदानम्। समालोचका अलौकिकमिदं सन्निकर्षद्वयं खण्डयन्ति। एतत्सन्निकर्षसमुत्पन्नं प्रत्यक्षं चोदनातिरिक्तानां सर्वेषां प्रमाणानां मूलाधारः।

अनुमानम्

यथा च धर्माधर्मयोः प्रत्यक्षं प्रमाणं न प्रभवति तथैवानुमानमपि। स्वाभाविकरूपेण निश्चिते सम्बद्धे पदार्थद्वये व्याप्यस्य दर्शने इन्द्रियासम्बद्धे विषये यज्ज्ञानं जायते तदनुमानमित्युच्यते। अनधिकदेशकालवर्तित्वं व्याप्यत्वम्, अधिकदेशकालवर्तित्वञ्च व्यापकत्वम्। यथा धूमवह्न्योः स्वाभाविकः संयोगसम्बन्धो निश्चितः। पर्वते धूमो दृश्यते, तस्मिन् धूमे दृष्टे, अदृश्यस्य (इन्द्रियासन्निकृष्टस्य) व्यापकस्य वह्नेर्विषये यज्ज्ञानमुत्पद्यते तदेवानुमानमित्युच्यते। अत्र धूमो व्याप्यः, अग्निरहिते जलादौ तदभावात्, वह्निश्च व्यापकः, धूमाभाववति अयोगोलकेऽपि तत्सत्त्वात्।

अनु पश्चात् मानमनुमानमित्यन्वर्थकं नाम। कस्मिंश्चिद् वस्तुनि ज्ञाने सति तद्द्वाराऽन्यस्य वस्तुनो ज्ञानं भवति, ततोऽनुपश्चाद्भाविज्ञानत्वेन तदनुमानमित्युच्यते। पर्वते धूम उद्गच्छति स च प्रत्यक्षविषयीभूतः, परं वह्निर्न प्रत्यक्षविषयीभूतः तथापि प्रत्यक्षविषयीभूतं धूममाश्रित्याप्रत्यक्षस्याग्नेर्ज्ञानं भवति। पर्वतवर्तिनो वह्नेश्चिह्नं धूमः, अत एव धूमो लिङ्गमित्युच्यते। स धूमो यद् वस्तु परिचाययति तद् वस्तु [वह्निः] तस्य लिङ्गीत्युच्यते।

व्याप्तिः

अनुमानस्याश्रयभूतो लिङ्गलिङ्गिसम्बन्धोऽयं व्याप्तिरित्युच्यते। शब्दव्युत्पत्ति दृष्ट्यापि व्याप्तिः विशिष्टप्रकारेण प्राप्तिर्विशिष्टः सम्बन्ध इत्यर्थो भवति। धूमं दृष्ट्वा वह्निरनुमीयते सर्वत्र हि धूमेन सह वह्निर्दृश्यते। महानसे धूमो वर्तते वह्निश्च। एवमग्निधूमयोः साहचर्यरूपा व्याप्तिरस्ति। येन च सम्बन्धोऽयमविदितः, तेन धूमं पश्यताऽपि वह्निरनुमातुं न शक्यते। अत एव व्याप्तिरनुमानस्याधाररूपेण कल्पनं युक्तिसङ्गतम्। मीमांसकैरियमेवानुमितिरित्युच्यते। परं नैयायिकैर्मध्ये परामर्शं स्वीकुर्वद्भिः सा मध्यगतत्वेन स्वीक्रियते।

व्याप्तिरियं द्विविधा—१. अन्वयव्याप्तिः, २. व्यतिरेकव्याप्तिश्च। यत्र साधने सति साध्यं स्यात् तत्रान्वयव्याप्तिः। यथा यत्र यत्र धूमस्तत्र तत्र वह्निः। अत्र धूमः साधनम्, तस्मिन् सति साध्यो वह्निरप्यस्ति। अत एवेयमन्वयव्याप्तिरित्युच्यते। एतस्मात् विपरीतं, यत्र साध्याभावे साधनाभावः स्यात्, तत्र व्यतिरेकव्याप्तिर्भवति। यथा यत्र यत्र वह्निर्नास्ति तत्र तत्र धूमोऽपि नास्ति। प्रथमाऽन्वयव्याप्तिः तत्र परस्परस्यान्वयः साहचर्यमस्ति, द्वितीया व्यतिरेकव्याप्तिः तत्र हि परस्परस्य व्यतिरेकोऽविनाभावको वर्तते [तस्मिन् असति तदपि नास्ति] महानसमन्वयव्याप्तेरुदाहरणम्। यत्र धूमस्तत्राग्निरपि। जलाशयो व्यतिरेकस्योदाहरणम्, तत्राग्निर्नास्ति धूमोऽपि नास्ति।

त्रयो हेतवः

एवंविधाया व्याप्तेर्विशिष्टा हेतवस्त्रिविधाः सन्ति—१. अन्वयव्यतिरेकी, २. केवलान्वयी ३. केवलव्यतिरेकी। यत्रान्वयव्यतिरेकेतिद्वितीयव्याप्तिस्तत्रान्वयव्यतिरेकी हेतुः। यथा, यत्र यत्र धूमस्तत्र तत्र वह्निः (अन्वयः), यत्र यत्र वह्निर्नास्ति तत्र तत्र धूमोऽपि नास्ति (व्यतिरेकः)। इदं व्याप्तिद्वयं पर्वतो वह्निमानित्यस्मिन्ननुमाने लभ्यते। अतो धूमोऽयमन्वयव्यतिरेकी। यत्र केवलमन्वय एवोपलभ्यते, न व्यतिरेकः स केवलान्वयीत्युच्यते। घटः प्रमेयोऽभिधेयत्वात्। अत्रानुमाने व्यतिरेको न लभ्यते। यद् यत् प्रमेयं तदभिधेयम्। परमेतन्नास्ति यत् यद् यद् अभिधेयं नास्ति तत् प्रमेयमपि नास्तीति। यतः योऽभिधेयो नास्ति तादृशः कश्चन पदार्थो न दृश्यते। अस्य व्यतिरेकस्यालाभेनैवंविधेषु स्थलेषु हेतुः केवलान्वयी मन्यते। एवं यत्र केवलं व्यतिरेक एव लभ्यते, नान्वयः, तत्र केवलव्यतिरेकी हेतुः। यथा पृथ्वीतरेभ्यो भिद्यते गन्धवत्त्वात्। यत्र, यो यो गन्धवान् स इतरेभ्यो भिद्यते इत्यन्वय दृष्टान्तो नोपलभ्यते। पृथ्वी पक्षः, दृष्टान्तः सदा पक्षातिरिक्तो भवति। व्यतिरेकोऽवश्यं लभ्यते। कतिपये मीमांसकाः पक्षदोषात्मके हेत्वाभासेऽन्तर्भावं कुर्वन्तो केवलव्यतिरेकिनं न स्वीकुर्वन्ति। कतिपयेऽर्थापत्त्यैव गतार्थयन्तः केवलव्याप्तिं न स्वीकुर्वते। तेषामेतन्मतं म. म. श्री चिन्नस्वामिशास्त्रिणापि समर्थितम्।

अनुमानस्य भेदाः

अनुमानं मुख्यतया द्विविधम्—१. स्वार्थानुमानं परार्थानुमानम्। यत्र स्वयमेव हेतुमवलोक्य व्याप्त्यादिस्मृत्या साध्यमनुमीयते तत् स्वार्थानुमानम्। इदमनुमानं स्वबोधार्थं क्रियते। अत इदं स्वार्थानुमानमित्युच्यते। अत्र प्रतिज्ञोदाहरणयोरावश्यकता नास्ति। यदनुमानमन्येषमवबोधनाय क्रियते तत् परार्थानुमानमित्युच्यते। यदनुमानमन्याबोधनार्थं क्रियते तत् परार्थानुमानमित्युच्यते-अत्रानुमानेन ज्ञातस्यार्थस्य परप्रत्यायनार्थं वाक्यमुच्चार्यते वाक्यस्यास्यप्रतिज्ञा (पक्षस्य साध्य-

विशिष्टतया कथनम्), हेतुः (लिङ्गनिर्देशकं वाक्यम्), उदाहरणं (दृष्टान्त-निर्देशपुरःसरं व्याप्तिनिर्देशकं वाक्यम्), उपनयः (हेतोः पक्षेण सह सम्बन्धपूर्वकं कथनम्), निगमनम् (पक्षस्य हेतुना साध्येन च सम्मेलनम्) इतीमे पञ्चावयवा नैयायिकैः स्वीक्रियन्ते। पर्वतो वह्निमान्—इयं प्रतिज्ञा, धूमवत्त्वात्—अयं हेतुः, यो यो धूमवान् स स वह्निमान्—यथा महानसम्—इदमुदाहरणम् पर्वतोऽपि तथा धूमवान्-अयमुपनयः। अतः पर्वतोऽपि वह्निमान् = इति निगमनस्योदाहरणम्। एषु मीमांसकाः प्रतिज्ञा, हेतुः, उदाहरणम्—एतत्त्रयमेव स्वीकुर्वन्ति। निगमनस्यान्तर्भावः प्रतिज्ञायामुपनयस्य च हेतौ भवति। यथा—पर्वतो वह्निमान् धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसम्।

अनुमानस्येदं भेदद्वयं प्रयोजनाधारेण कृतम्। सामान्येन तस्यान्यद् भेदद्वयमस्ति—१. विशेषतो दृष्टसम्बन्धः, २. सामान्यतो दृष्टसम्बन्धः। विशेषतो दृष्टसम्बन्धे द्वयोर्विशेषवस्तुनोः सम्बन्धो गृह्यते, यथा पर्वतो धूमवान्, अत्र धूम-वह्न्योः। सामान्यतो दृष्टे केवलस्य सामान्यज्ञानस्य बलेन सम्बन्धस्थापनपूर्वकं लिङ्गमनुमीयते—यथाऽऽत्मनोऽस्तित्वानुमानमिच्छादिद्वारा भवति। इच्छादयो गुणाः न च ते निराधारा स्थातुमर्हन्ति। अतः सामान्यज्ञानबलेन स आधार आत्मरूपेण प्राप्यते। यद्यपि सोऽप्रत्यक्षः। 'देवदत्तो गत्याऽन्यं देशं गच्छति – अस्मिन् सामान्य-ज्ञानाधारे सूर्यो प्येकस्माद् देशादन्यं देशं गच्छति—अतस्तत्रापि गतिरनुमीयते। एव-मनुमानानि सामान्यतो दृष्टान्यनेन सामान्यज्ञानेनोच्यन्ते।

हेत्वाभासः

अनुमानं सदा सत्यं न भवति इति प्रायोऽस्माभिर्दृश्यते। तस्यासत्यत्वे मुख्यो हेतुरनुमानार्थं प्रस्तुतानां हेतूनां दोषपूर्णत्वमस्ति। हेतूनां ते दोषा हेत्वाभासास्त्रिविधाः- १. असिद्धयः, २. अनैकान्तिकाः, ३. बाधकाः। नैयायिका एतेषां त्रयाणां स्थाने पञ्च हेत्वाभासान् स्वीकुर्वन्ति। मानमेयोदयकारा असाधारणो नाम चतुर्थो हेत्वाभास इति मन्यन्ते; परं पार्थसारथिमिश्रा एतं खण्डयन्ति सर्वेषामेतेषां विशेषेणाध्ययनाय शास्त्रदीपिकाया (१।१।५ पृ० ६६) अध्ययनमपेक्षणीयम्।

शाब्दम्

प्रत्यक्षानुमानातिरिक्तं तृतीयं शाब्द प्रमाणमस्ति। शब्दस्य यन्महत्त्वं यथा च शक्त्या तत् प्रमाणमित्युच्यते तस्य विस्तृत विवेचनमस्माभिः शब्दखण्डे कृतम्। इदं खलु स्वतन्त्रं प्रमाणम्, यतः शास्त्रपुराणेतिहासादीनां विश्वसनीयेभ्यो वचनेभ्यो ज्ञानं लभ्यते, न खलु तत् प्रत्यक्षमिति वक्तुं शक्यते, न चानुमानमित्यपि। दृष्टचाऽनया पद-श्रवणानन्तर पदपदार्थसम्बन्धविदः पुरुषस्य पदार्थस्मृतौ जातायां तैरेव स्मृतैः पदार्थै-

रज्ञाताबाधितार्थविशिष्टवाक्यार्थज्ञानं यज्जायते तत् शाब्दप्रमाणमित्युच्यते, यस्योत्पादकः शब्दः समग्राणि शास्त्राणि तदुदाहरणम् ।

धाराद्वयम्

अस्मिन्नेव शब्देऽर्थाभिधानस्य विशेषशक्तावुत्पन्नायां शब्दः पदमित्युच्यते। पदेन पदार्थबोधो जायते। इम एव पदार्था लक्षणया वाक्यार्थं बोधयन्ति। 'गामानय' इत्यस्मिन् वाक्ये आनयेति क्रियापदं प्रथममानयनार्थमभिधत्ते, गामिति पदं गामभिधत्ते। पुनरिमे द्वे अन्योन्यं क्रियारूपेण कर्मरूपेणान्विते भूत्वा 'गामानये' ति वाक्यार्थं साधयतः। प्रक्रियायामस्यां स्वार्थाभिधानानन्तरमन्योन्यान्वयो दर्श्यते। अत एव वाक्यार्थबोधिका प्रक्रियेयमभिहितान्वयवाद इत्युच्यते। अयमेव पक्षो भट्ट-सम्प्रदायाभिमतः। प्राभाकरा भिन्नमेव मतमाश्रयन्ति। तेऽभिदधति—'गामानय' एतस्य वाक्यस्य श्रवणे गवानयनसम्बद्धमेकमेव पदं ज्ञायते। इमानि पदान्येव पुनरन्वितानि भूत्वाऽर्थं बोधयन्ति, न तु पदार्थम्। एष्वेव पदेषु स्वाभाविकी शक्तिः। अत एवान्वितरूपो वाक्यार्थः पदद्वारेणाभिधेयः, न तु पदार्थद्वारेण। अत एव प्रक्रियेयमन्विताभिधानवाद इत्युच्यते।

त्रीणि सहायकानि

एतैः पदार्थैर्वाक्यार्थमवगन्तुं प्राचीनास्त्रीणि सहायकानि कारणानि मन्वते। तथाहि, १. आकांक्षा, २. आसत्तिः; ३. योग्यता। पदानां या परस्परापेक्षा (पूर्णमर्थमभिधातुं) साऽऽकांक्षा यथा 'गामानय' इत्यत्र न केवलेन गामित्यनेन, न वा केवलेन 'आनय' इत्यनेनार्थो लभ्यते। वाक्यार्थं प्रकटीकर्तुमेते द्वे परस्परापेक्षे भवतः, इयमेवाकांक्षयां सम्मिलिता। द्वयोः पदयोर्निकटवर्तित्वं तथैवावश्यकम्। अद्य 'गा'मित्युच्चार्य 'आनय' इत्यस्यान्यस्मिन् दिने उच्चारणे कृते न तयोः सम्बन्धः, न चार्थोऽपि ग्रहीतुं शक्यते। अतो वाक्यार्थज्ञानाय द्वयोरनयोः सहवर्तित्वमावश्यकम्। अनयोरियं निकटतैवासत्तिरित्युच्यते। तृतीयं सहकारिकारणं योग्यता आकांक्षा स्यात्, आसत्तिश्च स्यात्, ततोऽपि यदि योग्यता न स्यात्, ततोऽपि सङ्गतिर्न स्यात्। यथा, अग्निना सिञ्चतीत्यत्राकांक्षाऽऽसत्तिश्चेति द्वयं विद्यते, तथाऽपि योग्यता नास्ति। अग्निना सेचनमसम्भवम्। अतो योग्यताऽपि सहकारित्वे नापेक्ष्यते।

वृत्तयः

पदानामर्थाभिधायकशक्तिर्वृत्तिरित्युच्यते। वृत्तिश्च त्रिधा—१. अभिधा, २. लक्षणा, ३. गौणी[1]। या वृत्तिः पदानां मुख्यमर्थमभिधत्ते साऽभिधेत्युच्यते। गौरित्यभिहिते तेन सास्नावान् पशुरवबुध्यते-स च लोकेऽप्रसिद्धतयाऽभिधया बोधितोऽर्थः।

---

१. अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥

यत्राभिधा बाधिता भवति तत्र लणक्षाऽऽश्रीयते। 'गङ्गायां धोष' इत्यत्राभिधया प्रवाहे घोषस्यासम्भवाल्लक्षणया गङ्गया गङ्गातटं लक्ष्यते। गौण्यां शक्यार्थवर्तिगुणैः सजातीयगुणानां सम्बन्धो निर्दिश्यते। यथा सिंहो माणवक इत्यस्मिन् वाक्ये सिंहवर्ति-समानबलयोगेन बालके सिंहशब्दः (गौणरूपेण) युज्यते। लक्षणायां केवलं शक्य-सम्बन्धो भवति, किन्तु गौण्यां तद्वर्तिगुणसमानगुणयोगो भवति। इयमेव द्वयोर्मूल मन्तरम्। अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिश्च तयोर्निमित्तम्।

गौणीवृत्तौ मीमांसकानां विशिष्टमवदानम्। आलङ्कारिका व्यञ्जनावृत्ति स्वी-कुर्वन्ति। कतिपये तात्पर्याख्यां वृत्ति मन्वते। मीमांसकैः सर्वमिदं गौणीवृत्तावन्त-र्भाव्यते।

पदस्य त्रयः प्रकाराः

पदं मुख्यतया त्रिविधम्—रूढं, यौगिकं, योगरूढञ्च। यत् प्रसिद्ध्याधारेणार्थं बोधयति तद् रूढमित्युच्यते। इदं समुदायशक्त्याऽर्थबोधकं भवति यदवयवानां शक्त्याऽर्थं बोधयति तद् यौगिकमित्युच्यते। इदं शब्दशास्त्रनियमानाश्रित्य विहितम्। यदेतत्प्रकारद्वयसंवलितरूपं भवति तद्योगरूढमित्युच्यते। घट इति रूढं पदम्, चित्र-गुरिति [चित्रा गावो यस्य सः] इदं यौगिकम्, पङ्कजमिति योगरूढम्।

वाक्यस्य द्वौ भेदौ

एवमेव वाक्यमपि मुख्यतया द्विविधम्--सिद्धार्थबोधकम्, विधायकञ्च। सिद्धार्थबोधकं वाक्यं प्राय इतिहासवाक्यं भवति। "एष राजा पाञ्चालः"-इदं सिद्धार्थबोधकं वाक्यमस्ति। विधायकं विधानं करोति, तच्च द्विविधम्--१. औपदे-शिकम्, २. आतिदेशिकञ्च। 'इदमेवं कुरु' एतद् वाक्यमौपदेशिकम्। यतस्तेनोपदिश्यते। 'इदं तथा कर्त्तव्यम्-इत्येवं विधं वाक्यमातिदेशिकमित्युच्यते।

उपमानम्

प्रमाणानां परिगणनयोपमानस्य चतुर्थं स्थानम्। प्रथमं इष्टमर्थं स्मृत्वा दृष्टपदार्थ-विषये यत् सादृश्यज्ञानं भवति तदेवोपमितिरित्युच्यते। अत्र सादृश्यमाश्रित्य ज्ञानं प्राप्यते। एवं ज्ञातव्यम्-कश्चन नागरिको दृष्टधेनुर्वनं गतो गवयं पश्यति। तं गामिव प्रत्येति। ततो गोवर्तिगवयसादृश्यं स्मरति। मदीया गौरेतद्गवयसदृशी। प्रक्रियेय-मुपमितिरित्युच्यते। गवयपिण्डदर्शनमस्या उपमितेः कारणम्। एतदर्थं नैयायिका अतिरिक्तां प्रक्रियां स्वीकुर्वन्ति। मीमांसकानां कृतेऽतिदेशसिद्धिदृष्टचोपमानस्यान्यद-प्यधिकमुपयोगित्वमस्ति।

---

१. भिन्नानुमानादुपमेयतोक्ता सौर्यादिवाक्यैरसहाऽपि दृष्टम्।
सादृश्यतोऽग्न्यादियुतं कथं नु प्रत्याययेदित्युपयुज्यते नः॥ (वार्त्तिकम्)

अर्थापत्तिः

मीमांसकानां मतेऽर्थापत्तिः पञ्चमं प्रमाणम् । अन्यमर्थं विना निश्चितस्यार्थस्यानुपपत्तिं विना तत्सङ्गतयेऽर्थस्य या कल्पना क्रियते साऽर्थापत्तिरित्युच्यते । यथा, कस्यचिदन्यस्य प्रमाणस्य साहाय्येनैतन्निश्चीयते यत् देवदत्तो जीवति इति । एवं गृहे यदि स नोपलभ्यते तदा तस्य बहिःस्थितिं विना तस्य जीवनमनुपपन्नं भवति यस्योपपत्तये जीवनं तस्य बहिःस्थितिकल्पनां स्वतः एवं करोति–इयमेवार्थापत्तिः । नैयायिका अर्थापत्तिमनुमान एवान्तर्भावयन्ति । तच्चासङ्गतम् । अर्थापत्तिश्च द्विविधा-दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्च । उपर्युक्तमुदाहरणं दृष्टार्थापत्तेर्वर्तते । श्रुतार्थापत्तौ केवलं द्वारं' इत्युच्यते ततः 'पिधेहि' इत्यादीनां शब्दानां कल्पना क्रियते ।

अनुपलब्धिः

अनुपलब्धिः षष्ठं प्रमाणम् । प्राप्तेरभावो ह्यनुपलब्धिः । इदं पञ्चभ्यः प्रमाणेभ्यो विपरीतम् । यत्र प्रवृत्तियोग्यानामुक्तानां पञ्चानां प्रमाणानां प्रवृत्तिर्न भवति तत्रानुलब्धिः । इयमभाव इत्युच्यते । प्रमाणस्यास्येन्द्रियैर्ग्रहणं न भवति । इन्द्रियव्यापाराभावादभावो भवति । प्रातर्गृहवर्ती कश्चन मध्याह्ने पृच्छ्यते--प्रातस्त्वयात्र कृष्णवर्णो जनो दृष्ट इति । तत्कालमिन्द्रियाणां व्यापारं विनैव तस्याभावं च निश्चिनोति । इन्द्रियसम्बद्धज्ञानाभावेऽस्य प्रमाणस्य न प्रत्यक्षे, लिङ्गलिङ्गिसम्बन्धग्रहणाभावेनानुमाने, सादृश्यज्ञानाभावेन नोपमाने चान्तर्भावो भवितुमर्हति । शब्देऽर्थापत्तौ च प्रसङ्ग एवास्य नास्ति । अतएवानुपलब्धिप्रमाणस्य स्वीकृतिरनिवार्या ।

प्रभाकरोऽभावं पदार्थान्तरतया न स्वीकरोति । ततोऽभावस्य ग्रहणार्थं कस्यचित् प्रमाणस्य कल्पनं तत्कृतेऽपेक्षणीयं नासीत् । अभावातिरिक्तानि केवलानि पञ्च प्रमाणान्येव तदभीष्टानि । भाट्टैस्तु प्रयुक्तप्रबलतर्कैरभावस्यानुपलब्धेश्चोपयोगित्वं प्रमाणीकृतम् ।[१]

इमानि षट् प्रमाणानि मीमांसकेषु भट्टसम्प्रदायस्याङ्गीकृतानि । कतिपये सम्भवमैतिह्यञ्च पृथक् प्रमाणतयोपकल्पयन्ति । सम्भवस्त्वनुमान एवान्तर्भवति ऐतिह्यञ्च शब्दे । एतेषां षण्णां प्रमाणानां स्वीकारेऽपि नास्ति किञ्चिदेतेषु येन धर्मो विषयीक्रियेत । तदर्थं तु वेद एवाधारः ।

---

१. "प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तु सत्तावबोधार्थं तत्राभावप्रमाणता ॥" (वर्तिकम्)

८. पदार्थनिरूपणम्

मीमांसकाः पदार्थानां विषयेऽपि स्वतन्त्रं मतमुपस्थापयन्ति। भट्टसम्प्रदायानुसारं षट् पदार्थाः—द्रव्यं, गुणः, कर्म सामान्यम्, शक्तिरभावश्च। प्रभाकरस्तु पदार्थमष्टविधं परिकल्पयति—द्रव्यं, गुणः, कर्म, सामान्यं समवायः, शक्तिः, संख्या, सादृश्यञ्चेति। नैयायिका वैशेषिकाश्च सप्तपदार्थवादिनः।

द्रव्यम्

द्रव्यं परिमाणस्याश्रयो भवति। परिमाणञ्च द्विधा—१. अणुत्वं, २. महत्त्वञ्च। द्रव्यमेकादशविधं भवति। नैयायिका नवविधमेव तत् स्वीकुर्वन्ति। द्रव्यप्रकाराः-पृथ्वी, जलं, तेजः, वायुः, गगनं, कालः, दिक्, आत्मा, मनः, शब्दः, तमश्च। पृथ्वी खलु गन्धवद्द्रव्यम्। सा च पर्वतवृक्षशरीरघ्राणेन्द्रियरूपेण गोचरीक्रियते। शरीरञ्च चतुर्विधं भवति—जरायुजाण्डजस्वेदजोद्भिज्जभेदात्। मनुष्यमृगादीनां शरीरं जरायुजम्, पक्षिसर्पादीनामण्डजम्, मशकवृश्चिकादीनां शरीरं स्वेदजं तथा वृक्षादीनां शरीरमुद्भिज्जं भवति। प्रभाकर उद्भिज्जं नाङ्गीकरोति।[1] जलं स्वाभाविकद्रवत्वाधिकरणम्। उष्णस्पर्शवत्तेजः, तच्च सूर्यचन्द्रनक्षत्राग्निचक्षुरिन्द्रियरूपेणगोचरी भवति। सुवर्णमपि तैजसपदार्थ एव। तत्र पृथ्व्वंशस्य शक्तिसम्पन्नत्वात् उष्णस्पर्शस्योपलब्धिर्न[2] भवति। कतिपये सुवर्णं पृथ्व्यंशमेव[3] स्वीकुर्वन्ति। रूपरहितस्पर्शवान् वायुः। स च झंझामन्दनिःश्वासत्वगिन्द्रियरूपेण गोचरीभवति। पृथ्वीजलतेज आदिवत् वायुरपि प्रत्यक्षविषय एव। न वयं नैयायिका इव तमानुमानिकं कल्पयामः। शरीरादिधारणेन वायुर्विशेष एव प्राण इत्युच्यते। आकाशं विशिष्टावकशाश्रयः, तच्च नित्यम्। शब्दः खलु द्रव्यम्। शब्द-गुणकमाकाशमिति नैयायिकाः कृतं लक्षणमसङ्गतम्। कालः सर्वाश्रयभूतः, विभुरेकश्च। अक्षिनिमेषाणां स्वाभाविकस्फुरणावधिकः कालो निमेष इति, अष्टादशनिमेषावधिकः कालः काष्ठेति, त्रिंशत्काष्ठावधिकः कालः कलेति, त्रिंशत्कलावधिको मुहूर्त इति, पञ्चदशमुहूर्तावधिकः रात्रिन्दिवमिति, त्रिंशद्दिनावधिकः कालो मास इति, द्वादशमासपरिमितः कालो वर्षमित्युचयते। एवमेव दिगप्येका नित्या च। आत्मा

---

१. "शरीरं जरायुजाण्डजस्वेदजभिन्नं त्रिविधम्, उद्भिज्जं शरीरं न भवत्येव। प्रकरणपञ्चिका पृ.१५०

२ अभिभूतरूपस्पर्शतेजः सुवर्णम्। अभिभवस्तु बलवद्भिः पार्थिवरूपादिभिरिति द्रष्टव्यम्, मानमेयोदयः पृ० १५५

३, सुवर्णञ्च पार्थिवम्—परिशेषात् पार्थिवमेव सुवर्णमिति सिद्धम्।

तावच्चैतन्याश्रयः। अयं हि पृथङ् निरूपितः। अन्धकारश्चक्षुर्मात्रग्राह्यः, स च प्रकाशाभावे कृष्णरूपो दृश्यते। स च भावरूपः। न च नैयायिकानामिवाभावरूपः गुणकर्मविशिष्टतया तत्प्रतीतेः। तेज[1] इवैषोऽपि ब्रह्मणः शरीरम्, अस्य सृष्टिरपि पृथक्तया[2] कृता।

अतएवायं पृथक्पदार्थरूपेणानिवार्यतया स्वीकार्यः[3]। शब्दः श्रोत्रेन्द्रियग्राह्यः, स च द्विविधः—१. वर्णात्मकः, २. ध्वन्यात्मकश्च। वर्णात्मकः शब्दो द्रव्यम्, विभुरात्मवन्नित्यश्च। न खलु स गुणः[4]। ध्वन्यात्मकः शब्दस्तु गुणोऽनित्यश्च। अयमेव वर्णात्मकशब्दव्यञ्जको वायुगुणश्च, वाय्वभिघाताच्च तदुत्पत्तेः[5]। द्रव्यस्येमे एकादशप्रकाराः।

गुणः

एकविंशतिप्रकारो गुणः—रूप-रस-गन्धस्पर्श-संख्या-परिमाण-संयोग-विभाग-परत्वापरत्व-गुरुत्व-द्रवत्व-स्नेह-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्राकट्य-ध्वनि-संस्कार भेदात्। रूपं चक्षुरिन्द्रियमात्रग्राह्यम्। तच्च पृथ्वी-जलतेजोऽन्धकारेषूपलभ्यते। तच्च शुक्लनीलपीतरक्तभेदेन चतुर्विधम्। तदेतत् सर्वं नित्यम्। केवलसंसर्गभेदेनाधिकश्वेताधिकनीलादिप्रतीतिर्जायते। अत एव मीमांसकैश्चित्ररूपं नाङ्गी क्रियते। रसनेन्द्रियग्राह्यो गुणो रसः। स च षड्विधः, मधुराम्ललवणकटुकषायतिक्त भेदात्। अयं च पृथिव्यां जले च तिष्ठति। घ्राणेन्द्रियग्राह्यो गुणो गन्धः। स च सुरभ्यसुरभिभेदेन द्विविधः। स पृथ्वीमात्रवर्ती। त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः, शीतोष्णमध्यमभेदात् त्रिविधः। जले शीतः, वह्नावुष्णः, पृथ्वीवाय्वादौ मध्यमः (नात्युष्णः, नातिशीतः)। एकत्वादिव्यवहारकारणं संख्या। प्रभाकर इमां पृथक् पदार्थतया स्वीकरोति। परिमाणस्य विश्वासविषय एवं परिमाणं भवति। तच्चाणु-महद्ध्रस्वदीर्घभेदाच्चतुर्विधम्। परमिद सर्वं सापेक्षम्। एतच्चास्मादणु, अस्माच्च

---

१. यस्य तमः शरीरम्, यस्य तेजः शरीरम्।

२. तमः ससर्ज भगवान्।

३. तमो नाम द्रव्यं बहुलविरलं मेचककलं
प्रतीमः केनापि क्वचिदपि न बाधश्च ददृशे।
अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते
निरालोकं चक्षुः प्रपतति हि तद्दर्शनवशात्॥

४. वर्णात्मकास्तु ये शब्दा नित्याः सर्वगतास्तथा।
पृथग्द्रव्यतया ते तु न गुणाः कस्यचिन्मताः॥

५. अभिघातेन प्रेरिता वायवः स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् संयोग विभागानुत्पादयन्ति। (शाबरभाष्यम्)

महत्—इत्यादि प्रकारैः। नैयायिका एतत् परं पृथक्त्वमित्यतिरिक्तं गुणं कल्पयन्ति। स नास्त्यस्माकमभिमतः। स च भेदातिरिक्तं न किञ्चित्। व्यवहारेऽपि पश्यामः—एतच्चैतस्मात् पृथगिति। अत्र भेदातिरिक्तं न किञ्चित्। एतद् द्वयं संयुक्तमिति विश्वासकारणं संयोगः, स च द्विविधः प्रथमः कार्यो द्वितीयो नित्यः। व्योमात्म-मनःकालादेः संयोगो नित्यः, स्थागुणो संयोगजसंयोग[१] इति तृतीयं संयोगं मन्वते, स च भट्टसिद्धान्तात् प्रतिकूलः[२]। प्राभाकरा अपि तत्समर्थकाः सन्ति। एवं विभाग-विश्वासनिमित्तं विभाग इति। संयोग इव सोऽपि द्विविधः। परत्वापरत्वे दिक्काला-पेक्षया भवतः। दवीयोवस्तुवर्ति परत्वं निकटस्थवस्तुर्वाति अपरत्वं दिक्प्रयुक्तम्। एवमेव प्रवयसि प्रतीयमानं परत्वं यूनि च प्रतीयमानमपरत्वं कालप्रयुक्तम्। गुरुत्वं भारवत्, तच्च स्वतः पतनहेतुः। तच्च पृथ्व्यां जले च तिष्ठति। द्रवत्वप्रत्ययविषय एव द्रवत्वम्, तच्च सांसिद्धिकं पाकजमिति द्विविधम्। जले स्वाभाविकं, घृतादौ च पाकजं द्रवत्वम्। स्नेहस्तथैव, स च जलमात्रवर्ती। द्वयोरनयोः सादृश्यमुत्प्रेक्षमाणाः कतिपये आचार्या द्रवत्वातिरिक्तं स्नेहं नाङ्गीकुर्वन्ति। सकलव्यवहारहेतुर्बुद्धिः। ज्ञानं सकर्मकम्। तच्च स्वकर्मभूतेऽर्थे फलं जनयति, पाकादिवत्। एतदेव फलं स्वकारणभूतं विज्ञानं कल्पयति, अतएवैतज्ज्ञानमनुमेयम्। प्रभाकरस्येव स्वयं प्रकाशं नास्ति। तार्किका अपीदं सुखादिवत् मानसप्रत्यक्षज्ञेयं साधयन्ति। किंतु भट्ट-सम्प्रदायानुसारं बुद्धेः प्रत्यक्ष न भवति। परं ज्ञानसद्भावमाश्रित्य साऽनुमीयते। स्वेच्छाया अन्येच्छानधीनत्वमेव सुखम्, एतद्विपरीतं च दुःखम्। सुखदुःखेच्छाद्वेष प्रयत्ना आत्मनि तिष्ठन्ति। सुखं द्विविधम्-ऐहिकामुष्मिकभेदात्, तथैव दुःखमपि। ऐहिकस्य त्रयः प्रभेदाः—आध्यात्मिकमाधिभौतिकमाधिदैविकञ्चेति। ममेदं स्यादित्यादिसङ्कल्प एवेच्छा, इदं मे न स्यात् इति भावनैव द्वेषः। वासना नामानु-भवजन्यः स्मरणहेतुः संस्कारः। स चान्यवर्ती। ज्ञानजन्यो विषयवर्ती गुणः प्राकट्य मिति। लौकिकव्यवहार एवास्य सत्तायां प्रमाणम्। यथा लोकव्यवहारः "घटो ज्ञायते, घटः प्रकाश्यते।" अयं व्यवहारः स्वोपपत्तये प्रकाशविशिष्टस्यार्थस्य कल्पने प्रवर्तयति, अयमेव प्रकाशः प्राकट्यमिति। न चेदं ज्ञानस्य स्वरूपमिति वक्तुं शक्यते अस्य (प्राकट्यस्य) विषयनिष्ठत्वात्। ज्ञानमात्मनि तिष्ठति, इदञ्च विषये। न चेदं विषय एव, परमेतद् द्वयातिरिक्तो गुणः। मीमांसकानामियं नूतना दृष्टिः कतिपये शक्तिप्रयत्नादृष्ट पृथक्त्वानि पृथग्गुणतया परिगणयन्ति। शक्तिस्तु स्वतन्त्रः पदार्थः। प्रयत्नो भावना-रूपत्वात् क्रिया। यागादीनां शक्तावेवादृष्टस्यान्तर्भावो भवति। पृथक्त्वं भेदातिरिक्तं नास्त्यन्यत्। अत एवैतेषां स्वतन्त्रगुणतया कल्पनं नास्ति सङ्गतम्। एतत्तथ्याधारेण मीमांसकाः केवलमेकविंशतिगुणानङ्गीकुर्वन्ति।

---

१. एतेन संयोगजसंयोगो निरस्तो वेदितव्यः। (पार्थसारथिः)

२. मानमेयोदयः पृ.२४६

कर्म

चलतीत्यादिप्रत्ययस्य विषयः कर्म । भट्टसम्प्रदायानुसारं स चलनात्मकः, प्रत्यक्ष-विषयः, एकविधश्च । प्राभाकराः कर्मणः प्रत्यक्षं नाङ्गीकुर्वन्ति, परं तन्मते कर्मसंयोग-विभागादिनाऽनुमेयं भवति । भाट्टैरस्यानुमेयता खण्डिता यद्यनुमानं क्रियेत चेत् पर्वतमेघसंयोगेन पर्वतेऽपि कर्मानुमितं स्यात् । वैशेषिका इदं पञ्चविधं मन्वते । मीमांसकैरेकस्मिन्नेव प्रकारेऽन्तर्भाव्यते ।

सामान्यम्

'गौरयम्', 'अयमश्वः' इत्येवं सकलगवाश्वादिव्यक्तिनिष्ठं विजातीयव्यक्ति व्यावृत्तं व्यावृत्तानुवृत्ताकारेण देशान्तराबाधितं कालान्तराबाधितञ्च यज्ज्ञानमुत्पद्यते तदेव सामान्यम् । तच्च प्रत्यक्षम् । इदमेव प्रत्यक्षं सामान्यविशेषरूपस्य प्रकारद्वयं व्यवस्थापयति । गोत्वमनुष्यत्वादिजातिस्तस्य सामान्याकारः, एको गौरेको मनुष्य इति व्यक्तिस्तस्य विशेषाकारः । अत एव जातिः प्रत्यक्षतया सिद्ध्यति । इयं च जाति र्व्यक्तिभिन्ना व्यक्त्यभिन्ना च । इयमेवाकृतिरित्युच्यते । अस्याः प्रकारद्वयम्— महासामान्यमवान्तरसामान्यञ्चेति महासामान्यमेव सत्तेत्युच्यते, तच्च द्रव्यगुणकर्म सामान्यवर्ति । द्रव्यादिनिष्ठं द्रव्यत्वादि अवान्तरसामान्यम् । एवमेव शब्दत्वब्राह्मण त्वादयो जातयः सिद्ध्यन्ति । सर्वमिदं प्रत्यक्षम् । ब्राह्मणत्वादिजातयो न कर्मानुरो-धिन्यः किंतु मातापितृजातिज्ञानाश्रितम् । जातेर्विशेषनिरूपणं शब्दप्रस्तावे कृतम् ।

शक्तिः

शक्तिर्मीमांसकैः प्रतिपादितः स्वतन्त्रः पदार्थः । स च लौकिकवैदिकभेदेन द्विविधः । अग्न्यादिवर्तिनीज्वलनादिशक्तिर्लौकिकी । यागादिवर्तिनी स्वर्गफलदातृत्व-शक्तिर्वैदिकी । एतद्द्वयमप्यर्थापत्तिप्रमाणेन कल्प्यते । बीजादावङ्कुरादिजननसामर्थ्ये सत्यपि मूषकादिघ्रातत्वेऽङ्कुरानुत्पत्तिः । यदा बीजनिष्ठं तत् सामर्थ्यमन्यथा जातं, ततः कल्प्यते यत् प्रत्यक्षदृष्टाद् बीजाद् व्यतिरिक्तमिन्द्रियापेतं किञ्चिद् विशिष्टं रूपम्, यद् विनाशेऽङ्कुरानुत्पत्तिः । तदेव रूपं शक्तिरिति ।

एवमेव यागादयो जायन्ते नश्यन्ति च, ततश्च तैः स्वर्गादिफलस्य सिद्धिः कथमिव भवति । एवं वेदबोधितस्यार्थस्यान्यथात्वापत्तिः स्यात् । तदुपपत्तयेऽपूर्वाभिधः कश्चन पदार्थः कल्प्यते । अपूर्वमिदं यज्ञे नष्टेऽपि फलोत्पत्तिपर्यन्तं तिष्ठति । इयमेव यागवर्तिनी वैदिकी शक्तिः । सा चापूर्वमित्यभिधीयते । इयं गुण इति न शक्यते वक्तुम् । गुणेऽपि तस्या विद्यमानत्वात् । न च सामान्यादावन्तर्भावयितुं शक्यते, तत्रापि तस्या विद्यमानत्वात् । अतः शक्तिरतिरिक्तः पदार्थ इति युक्तिसङ्गतः पक्षः ।

अभावः

नास्तीति प्रत्ययो यस्माज्जायते सोऽभाव इत्युच्यते। अभावश्चतुर्धा—१. प्रागभावः, २. ध्वंसाभावः, अत्यन्ताभावः, ४. अन्योन्याभावश्चेति। सत्यपि मृत्पिण्डादौ उत्पत्तिपूर्वं घटादेर्योऽभावः स प्रागभाव इत्युच्यते। एवमेव दुग्धे दध्नो योऽभावः, सोऽपि प्रागभाव एव। घटे मुसलप्रहारे सति योऽभावः, दध्नि दुग्धस्य योऽभावः स प्रध्वंशाभावः। 'इदमेतन्नास्ति' इत्येवं विधायाः प्रतीतेर्यो विषयो भवति सोऽन्योन्याभावः। यथा वाजिनि गोः। इदमेव पृथक्त्वमित्यप्युच्यते। यस्मिन्नधिकरणे यस्य त्रिकालाभावः, सोऽत्यन्ताभावः। यथाऽऽकाशे कुसुमाभावः, शशस्य शृङ्गाभावः। इमे चत्वारोऽप्यभावाः अनुपलब्धिप्रमाणगम्याः।

प्रभाकरमतेऽतिरिक्तः कश्चन पदार्थो नास्ति। तन्मतेऽभावप्रतीतिर्भूमिप्रतीतेरतिरिक्ता न किञ्चित्। अभावः कश्चन पृथक् पदार्थ एव नास्ति चेत् तद्ग्रहणायानुपलब्धिप्रमाणकल्पनमप्यनावश्यकमेव। किन्तु तन्मतमेतत् लोकव्यवहारस्य सर्वथा विपरीतम्। यद्यभावो भूतलरूपः कल्प्येत ततो घटवद्भूतले घटो नास्तीति व्यवहार आपद्येत। परं न दृश्यते, अत एवाभावस्य, सिद्धिर्भवति। इमे एव षट् पदार्था भट्टसम्प्रदायाभिमताः सन्ति। एतदतिरिक्ताः समवायादयोऽन्ये पदार्था अस्य सम्प्रदायस्य दृष्ट्याऽनुपयुक्ताः।

एतत् सर्वं मीमांसादर्शनस्य दृष्ट्या पदार्थानां संक्षिप्तं सङ्कलनम्। मीमांसाया अयमंशो नास्त्यपूर्ण इति निर्देष्टुमेवेदमुपनिबद्धम्। एतदतिरिक्ता भट्टलोल्लटादीनां रसविषये उत्पत्तिवादादयोऽप्यनेकानि मतानि स्वतन्त्रविचारकाणामेतेषां समुल्लसन्ति। इदमप्येकं दर्शनं, न खलु कर्मभागस्य विवेचनमेवास्य सर्वस्वमित्येतैः प्रतीयते। किं बहुना, ये च भ्रान्तास्तेषां भ्रान्तेर्निराकरणायैष मद्विचारेण स्तम्भः पर्याप्तः। भ्रान्ता एव जना इदं पुरोहितानां जीविकेत्याचक्षते, न च तैर्दर्शनेषु स्वतन्त्रतयाऽस्यास्तित्वमङ्गीक्रियते। अस्या भ्रान्तेर्निराकरणमेवास्य स्तम्भस्य लक्ष्यम्। स च सफलो वा निष्फलो वेति निश्चयो विदुषां कार्यम्।

कर्मकाण्डः

सामान्यपरिचयः

मीमांसायाः कर्मैव मुख्यो विषयः। वस्तुत इदमेव कर्म धर्मयज्ञहोमादिभिरनेकैः शब्दैरभिहितं शास्त्रस्यास्य प्रतिपाद्यम्।[१] महर्षिजैमिनिर्दर्शनमारभमाणो धर्ममेव विषयरूपं प्रतिजानीते। इदमेव कर्म धर्मो वाऽध्यायेषु विवेच्यमानो मीमांसाया मते ईश्वरः सर्वतः समर्थः, अत एव चरम उपास्यः। कर्मेति मीमांसका इत्यादीनि वाक्यानि मीमांसाया अभिमतं कर्मयोगमाश्रित्यैव प्रचलितानि। गीता हि अस्यैव कर्मयोगस्य प्रतिफलितं रूपम्। सा च स्वकीयया सुस्पष्टनीत्या दृढैश्च सिद्धान्तैः कर्मयोगशास्त्रमित्यप्युच्यते। 'जातु तिष्ठत्यकर्मकृत्' इत्यादीनि गीताया अनेकानि वाक्यानि कर्मोपासनायाः प्रतिपादकानि। आस्ताम्, मीमांसाया कर्मयोगिताया धर्मयोगिताया विषयेऽधिकप्रतिपादनस्य निरूपणस्य वाऽपेक्षा नास्ति, यतस्तदेवैकं चरमं सत्यम्। तच्च विवादसंशयापेतम्।

तस्यैव व्यापकस्य विषयस्य व्यापकतया निरूपणार्थं परमकारुणिको महर्षिजैमिनिः शास्त्रमिदं रचयामास। अस्यावश्यकताया उपयोगिताया विषये पर्याप्ततया विवेचनमुपरि कृतम्। शास्त्रमिदं द्वादशस्वध्यायेषु विभक्तम्। यत्र सहस्राधिकान्यधिकरणानि, षष्टिः पादाः सन्ति।[२] द्वादशानामध्यायानां स्वतन्त्रा विषयाः सन्ति, येषां साङ्गोपाङ्गं विवेचनं महर्षिणा जैमिनिना तदनुयायिभिश्च कृतम्। प्रमाणनिरूपणं प्रथमाध्यायस्य विषयः अस्य चतुर्षु पादेषु विध्यर्थवादमन्त्रस्मृत्याचारनामधेयानां विचारः कृतः। कर्मानुष्ठाने सर्वमेतत् क्रमिकं प्रमाणम्। कर्मभेदो द्वितीयाध्याये निरूपितः। अस्य चत्वारः पादाः। अङ्गानां विवेचनं तृतीयाध्यायस्य विषयः, तच्चाष्टसु पादेषु विभक्तम्। यज्ञप्रयोगश्चतुर्थाध्यायस्य प्रतिपाद्यः तस्य चत्वारः पादाः। क्रमस्य निरूपणं पश्चिमाध्यायस्य चतुर्षु पादेषु कृतम्। षष्ठाध्यायस्याष्टसु पादेषु कर्मणोऽधिकारिणां योग्यताया विश्लेषणं विहितम्। सप्तमस्य चतुर्षु पादेषु सामान्यातिदेशस्य,

---

१. अथातो धर्मजिज्ञासा, जैमिनिः (१।१।१)

२. धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञया ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदितः क्रमात् ॥ (न्यायमाला, ११।१२)

अष्टमस्य चतुर्षु पादेषु विशेषातिदेशस्य व्याख्या वर्तते। नवमाध्यायस्य चतुर्षु पादेषु ऊहस्य, दशमाध्यायस्याष्टसु पादेषु बाधस्य, एकादशाध्यायस्य चतुर्षु पादेषु तन्त्रस्य चतुर्षु पादेषु प्रसङ्गस्य विवेचनमस्ति। सर्वेषामेव पादानां मिलितानामधिकरणानि गणनया सहस्राधिकानि सन्ति। एतच्चोक्तमेव। इमे सर्वेऽपि विषयाः कर्मणां नियन्त्रणस्य तेषामनुष्ठानस्य सफलतामभिलक्ष्य विभाजिताः सन्ति। एतेषां निरूपणप्रसङ्गे शताधिका न्यायाः सिद्धान्ताश्च स्थापिताः, येषामुपयोगो वेदान्तवाक्यानामिव समानेनादरेण प्रायः सकलेषु शास्त्रेषु, विशिष्य धर्मशास्त्रे कृतः। अस्य (मीमांसादर्शनस्य) न्यायानामुपयोगस्य महत्त्वस्य च परिचयाय लौकिकन्यायाञ्जलेरध्ययनं कर्त्तव्यम्। अस्य विषयनिरूपणशैली विषयो विचारकाण्ड एव स्फुटीकृतः।

शास्त्रीया मान्यता

अस्यैव कर्मणो धर्मस्य वा कृते शास्त्रस्यास्योत्पत्तिरिति निर्विवादम्। स्वाध्यायोऽध्येतव्यः' (स्ववंशपरम्परया प्राप्तानां शाखानां गुरुमुखोच्चारणानुकूलमुच्चारणं कार्यम्) वैदिकेनानेन वाक्येनाध्ययनस्य विधानं क्रियते चेत् इदं विधानमध्ययनस्य लोकतः प्राप्तत्वे व्यर्थतामेति। एवमिदं विधानमात्मनः साफल्याय नियमर्मािममं प्रस्तौति— यजमानस्य यज्ञापूर्वसिद्धिर्यज्ञविषयाणामध्ययनेनैव भवतीति। अध्ययनं शब्दग्रहणमात्रमत्र नाभिप्रेतम्। परमर्थज्ञानपूर्वकमपेक्षितम्। एवंविधं ज्ञानं विना विचारो भवितुं नार्हति। अत एव 'स्वाध्यायोऽध्येतव्यः' इति विधिरेव समग्राणां वैदिकानां कर्मणां साफल्यायास्य दर्शनस्य प्रस्तावः स्वतः प्रेरयति। कर्मणोऽधिकतरं फलवत्त्वप्राप्तये शास्त्रारम्भ इति सर्वमान्यम्।

१. धर्मस्य लक्षणं प्रमाणञ्च

धर्मः खल्वस्य दर्शनस्य प्रतिपाद्यः। अत एव तस्य जिज्ञासायां महर्षिणा जैमिनिना सूत्रेण तस्य तथ्यत्वं सङ्केतितम् (चोदनालक्षणोऽर्थो धर्मः १।१।१।)। वेदबोधितत्वे सति साक्षात् फलद्वारा वा यदनर्थनिवारकमिष्टसाधकञ्च तदेव धर्मः। अयं महामुनेर्जैमिनेः सूत्रस्याभिप्रायः। वेदेनात्र विध्यर्थवादमन्त्रनामधेयात्मकाश्चत्वारो भागा अभिप्रेताः। इमे चत्वार एव धर्मे प्रमाणम्, तद्बोधका इत्यर्थः। धर्मो न खलु चक्षुरादिन्द्रियबोध्यः कश्चित्। अत एव प्रत्यक्षस्य, तदाश्रितत्वेनानुमानोपमान-शाब्दार्थापत्त्यनुपलब्ध्यादिप्रमाणानाञ्च प्रवेशो भवितुं नार्हति। तथापि धर्मः प्रमाण-रहितो नास्ति, वेदप्रमाणाश्रितत्वात्।

धर्मोऽयं लोकस्य सामान्यरुचेर्विषयः। प्रायः सर्वोऽपि जन आत्मानं धार्मिक इति ख्यापयति, अत एव सर्वस्यापि सम्प्रदायस्य शास्त्रकारैः स्वसाफल्यायानिवार्यतयाऽस्य विवेचनं कृतम्। क्वचिद् धर्मः कर्त्तव्याभिप्रायको भवति, क्वचिच्च शिष्टाचारार्थकः। केचित्तु यज्ञाध्ययनदानादिक्रियास्वयं विभाजितः। वेदाधारेण विहितो लिङ्-लेट्-लोट्-तव्यप्रत्ययाद्यभिहितोऽपूर्वनामा कार्यः, नियोगादिपर्यायो व्यापार एव प्रभाकर-मतेन धर्मः। एवमेव वेदेन निषिद्धस्य कर्मणोऽनुष्ठानेनोत्पन्नं तन्मतेऽधर्मः। नैयायिकानां[१] वैशेषिकाणाञ्च मतेन वेदविहितया क्रिययोत्पन्नो धर्मः, वेदनिषद्धया च क्रिययोत्पन्नो-ऽधर्मः। तदुभयमपि क्रमेण पुण्यपापाभिधानेनाभिधीयते। तथा चात्मनिष्ठो गुणः। यागाद्यनुष्ठानेनोत्पन्नाऽन्तःकरणस्य विशिष्टा वृत्तिर्धर्म इति साङ्ख्याः[२], एकेन ज्ञानेनान्य-स्मिन् ज्ञाने उत्पना वासना धर्म इति बौद्धाः[३], अन्य शरीरप्रारम्भकाः पुद्गलशब्द वाच्या विशिष्टाः परमाणवो धर्म इति जैनाः[४]।

यथाऽन्धा गजं ग्रहीतुं प्रयतन्ते तथैव सर्वैरपि धर्मस्य तत्त्वं वेत्तुं प्रयत्नः कृतः इत्यत्र नास्ति सन्देहः। परं सर्वेऽपि प्रयासा दर्शनस्यास्य विचारकाणां समक्षं न तथा

---

१. प्रशस्तपाद भाष्यम् पृ. १२८

२. साङ्ख्यकारिका, २३

३. धम्मपद, १

४. न्यायकुमुदचन्द्रः पृ. ८११

महत्वं भजन्ते, यतोऽनेन धर्मो यथा मुख्यविषयतयाऽङ्गीकृतः, तथा न केनापि। पूर्वोक्तानि सकलानि लक्षणानि मीमांसाया भट्टसम्प्रदायेनैकवाक्यत्वं न बिभ्रति, अत एव तेनैतानि खण्ड्यन्ते। तदनुसारं याः परिभाषा उपरिनिर्दिष्टास्तासु धर्मशब्दस्य प्रयोगो वेदेनोपलभ्यते। न च तेषु कल्याणसाधनशक्तिरेव। येऽन्तःकरणवृत्तेश्चित्तस्य वासनायाः पुद्गलस्य पुण्यस्यापूर्वस्य च स्वरूपं नाधिगच्छन्ति ते लौकिकीनामप्येतासां क्रियाणामकर्तृषु धार्मिका अधार्मिकाश्चेति प्रयुञ्जते। यो यत्कर्म करोति स तन्नाम्नैव व्यपदिश्यते। यथा कुम्भकर्मकृत् कुम्भकारः। एवं यो [1]यज्ञादीन्यनुतिष्ठति स धार्मिक इति, यश्च ब्रह्महत्यादीनि करोति स धार्मिक इति लोकेन परम्परयाऽभिधीयते। अत एव यज्ञादीनां धर्मता (वेदविहितत्वेनापि), ब्रह्महत्यादीनाञ्चाधर्मता (वेद निषिद्धत्वेन) लोकेनापि स्वतः सिद्धा। मीमांसकानां मते इम एव यज्ञादयो धर्माः; यत्र सर्वविधा धर्माः समाविष्टाः। वेदेन[2] स्वयं ते प्रथमधर्मरूपेण समादृता।

एतैः सकलैरपि तथ्यैः परिचितेन महामनसा जैमिनिना यथोक्तं धर्मलक्षणं कृतम्। सर्वथाऽलौकिकः सन्नपि जैमिनेरयं धर्मो लौकिकतां नातिक्रामति। धर्मेणा-निवार्यतया प्रयोजनवता भाव्यम्। यतो मीमांसकाः तथ्येनैतेन परिचिताः सन्ति यत्— प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते। एतत्प्रवृत्तिसिद्धय एव धर्मे प्रयोजनरूपेणेष्ट साधनताया आवश्यकत्वं मतम्। प्रयोजनवत्तया समं धर्मेऽपेक्षणीयमन्यद् यदस्ति तदेतत् तस्य वेदबोधिततेति। यदि वेदबोधितता धर्मेण सम्बद्धा न क्रियते ततो घटचैत्य-वन्दनादयोऽपि धर्माः स्युः, प्रयोजनवत्त्वात्। धर्मस्य कृते यत् तृतीयं विशेषणमनिवार्यं मतं तदस्ति तस्यार्थतेति। तेनानर्थवता न भाव्यमित्यर्थः। यदीदं विशेषणं न स्यात् तर्हि श्येनयागादिकर्माण्यपि धर्मत्वं लभेरन्। 'यः शत्रुवधं काङ्क्षेत् स श्येनमनु तिष्ठेत्' एतद्वेदेन विहितम्, शत्रुबधश्चास्य प्रयोजनमपि। गुणद्वयेऽस्मिन् सत्यपि नायं 'धर्म' इति वक्तुं शक्यते, यतः शत्रुवधस्य सम्बन्धो हिंसाद्वारा नरकेणाप्यस्ति, स च निषिद्धः। य अनया दृष्ट्या श्येनयागः साक्षादनर्थकृदसन्नपि परम्परयाऽनर्थेनैव सम्बद्धः। यज्ञे पशुवधो यज्ञार्थं क्रियते, परं न सा हिंसा। सा हि यागजन्यफलान्त-र्भूतत्वेन स्वतन्त्रफलरहिता। एतेषु श्येनादियागेषु धर्मता नापद्यते, अत एव धर्मेणार्थ इति विशेषणमनिवार्यम्। किं बहुना, प्रयोजनवत्त्वे सति, वेदविहितत्वे सति अनर्थासम्बद्धत्वं धर्मत्वमिति मीमांसकानां पक्षः[3], स नास्ति कर्मातिरिक्तः कश्चित्, यस्मिन् सर्वस्यापि समावेशो भवति। एतद्विपरीतोऽधर्मः।

---

१. यो हि यागादिकमनुतिष्ठति तं धार्मिक इति समाचक्षते, यश्च यस्य कर्ता स तेन व्यपदिश्यते— यथा पाचको लावक इति। (शबरस्वामी)

२. यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। (यजुर्वेदः)

३. फलतोऽपि च यत्कर्म नानर्थेनानुबध्यते।
केवलं प्रीति हेतुत्वात् तद्धर्म इति गीयते॥

प्रमाणम्

एवमपि जैमिनिना धर्मोऽन्धविश्वासाद् रक्षितः, तच्च तत्कृते सर्वथा योग्यम्। अत एव तेनोक्तम्—"एवं तस्य निमित्तमपि परीक्षणीयम्।।"[१] सर्वविधैः प्रमाणैः परीक्ष्यैव सोऽनुष्ठातव्यः, नान्धेनेवानुसर्त्तव्यः। अनेनैव विचारेण धर्मस्य कृते प्रमाणानामावश्यकता। इन्द्रियगत्यपेतं धर्मं प्रति प्रत्यक्षानुमानशब्दोपमानार्थापत्यनुपलब्धीनां लौकिकानां प्रमाणानां सामर्थ्यं नास्ति। तथ्यमिदं विस्तरेण निरूपितम्। तथापि धर्मः सर्वथा प्रमाणैर्गम्यः। धर्मो नाम न किञ्चनाव्यस्थितं वस्तु, यस्य नास्ति कश्चिदाधारः। मुख्यतया धर्मविषये विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यान्यिष्ट प्रमाणानि। एतेषां संक्षिप्तं निरूपणं क्रमशः क्रियते।

विधिः

वेदस्य सर्वोत्कृष्टभागरूपेण विधिभागः स्वीकृतः। विधिरयं लिङ्लेट्लोट्तव्यप्रत्ययैरभिधीयमानोऽर्थः। नैयायिकास्तु इष्टसाधनत्वे सति कृतिसाध्यत्वे बलवदनिष्टाननुबन्धित्वमिति रूपत्रयात्मक विधिं मन्यन्ते, तेषाञ्च मते त्रयाणामेतेषां बोधः समकालमेव भवति। एतेषां ज्ञानं प्रवृत्तिं प्रति कारणम्। कस्मिंश्चिदपि कर्मणि प्रवृत्तः कश्चिदपि पश्यति यत् अनेन कर्मणा यदिष्टं सिद्ध्यति नवेति। अन्यच्च विचारयति, इदं कर्म मत्कृतिसाध्यं न वेति, तथा चिन्तयति यत् कर्मण्यस्मिन् मदनिष्टानुबन्धित्वमस्ति न वेति। एतेषां त्रयाणां सत्युचिते समाधाने कोऽपि कस्मिंश्चिदपि कर्मणि प्रवर्तते। एतत्सर्वं विधेरेव रूपम्। तच्च प्रवृतिं प्रति कारणम्। प्रवृत्तिं प्रति कारणत्वेनैव विधिः प्रवर्तनेत्युच्यते। तन्मते सर्वेऽप्येते लिङर्थाः सन्ति।

मीमांसका एतान्येवं नाङ्गीकुर्वते। ते वदन्ति, इष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टानुबन्धित्वमितित्रितयमपि नास्ति लिङर्थः। एतत् त्रितयमपि लिङ्निर्देशं विनैव स्वतआक्षिप्यन्ते। विधिवाक्येन 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यनेन दर्शपूर्णमासस्य विधानं कृतम्। परं यावत् कश्चिदप्यत्र स्वाभीष्टं फलं न पश्यति तावत् स स्वकर्मणि न प्रवर्तते। यावत् कोऽप्येवं कर्मसु न प्रवर्तते तावद् विधौ प्रवर्तकत्वशक्तिर्न स्यात् अत एव विधिरेव स्वविहितयज्ञादौ स्वप्रवर्तकत्वसिद्धये इष्टसाधनत्वमाक्षिपति। सर्वेषां विश्वसनीयो विधिः कदाचिदप्यनर्थकृते स्वकृत्यसाध्ये कर्मणि कमपि नैव प्रवर्तयेत्। अतः स्वत एव कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वञ्च प्राप्येते। तत एतेषां त्रयाणामेव लिङर्थतया स्वीकृतिरसङ्गता। वस्तुतः प्रवर्तकपुरुषवर्ती 'अयमस्मिन् कर्मणि प्रवृत्तः स्यात्' इत्येवंविधो योऽभिप्रायः स एव लिङर्थः। न्यायसुधाकाराः प्रवृत्त्यनुकूलव्यापारमेव

---

१. तस्य निमित्तपरीष्टिः।

लिङर्थं परिकल्पयन्ति। परं पार्थसारथिमिश्राः सर्वत्र प्रवृत्तिं प्रति इष्टसाधनत्वमेव कारणत्वेन कल्पयन्तः (यज्ञयागादिवर्ति) प्रवृत्यनुकूलव्यापाररूपेण लिङर्थं[१] स्वीकुर्वन्ति। इयमेव लिङादिवर्तिन्यभिधा नाम शक्तिः प्रवर्तकत्वेन प्रवर्तनेति नाम्ना सम्बोध्यते।

एवं लिङ्-लेट्-तव्यप्रत्ययैरभिधीयमानोऽयमर्थो धर्मे प्रमाणम्। यतोऽनेनेतरप्रमाणानधिगतमलौकिककल्याणसाधनं यज्ञादि विधीयते। अयमेवानेन विधीयमानो यज्ञादिर्धर्मः एतन्मया प्रथममेवोक्तम्। यच्च प्रमाणस्य लक्षणं अनधिगताबाधितार्थबोधकत्वमिति-तदप्यत्राक्षरशः सङ्गतं भवति। एतस्मिन् यज्ञहोमादौ या धर्मता, सा क्रियारूपाऽभवन्ती तस्या लौकिककल्याणसाधनमस्ति, तस्य चेदं रूपं वैदिकशब्दं विना केनापि प्रमाणेन ज्ञातुं न शक्यते। अतोऽयमेव तस्य सर्वतः प्रथमः[२] प्रामाणिक आधारः।

अर्थवादः

अर्थवादस्तावद् वेदस्य द्वितीयो भागः। अर्थवादाविधेयार्थस्तावकतया प्रमाणम्। यथा, "वायव्यं श्वेतमालभेत भूतिकामः" वाक्येनानेन वायव्ययागो विहितः। तदनन्तरमस्य निकट एव "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इति वाक्यमिदं श्रुतम्। तस्य यद्ययं मुख्योऽर्थ एव गृह्येत चेत् स सर्वथाऽसम्बद्धप्रलापतयाऽनर्थकः स्यात्। यतोऽस्माभिः पूर्वमेवं प्रतिज्ञातं यत् यद्वाक्यं क्रियाया स्तत्सम्बद्धस्य वाऽर्थस्य बोधकं भवेत्-तदेव प्रमाणम्, न तु शेषः। एवं यदि वेदस्य प्रत्येकं वाक्यं निरर्थकं स्यात् तर्हि वेदस्य सर्वसम्मतं प्रामाण्यं नश्येत। एतस्या आपत्ते रक्षणार्थमर्थवादवाक्यानां सार्थकत्वं साध्यते। इमेऽर्थवादा विधिनाऽपेक्षितां प्रशंसां तस्मै कुर्वन्ति। विधिना किमप्येकं कर्म विहितम्, तथापि यदि तत्र कश्चिन्न प्रवर्तते तर्हि विधिरेतदपेक्षते यत् कश्चन तस्य कर्मणः प्रशंसां कृत्वा तत्र प्रवर्तयेत्, येन तस्य प्रवर्तकत्वं सार्थकं स्यात्। एवं विधिः स्वप्राशस्त्यमपेक्षते। एवमर्थवादानामभिधेयार्थमात्रस्वीकारेणैव तेषां काचन सङ्गतिर्न स्यात्। निरर्थका मा भूम इति कदाचित् क्रियया कामयन्ते। एवमुभयतो जातायां परस्पराकाङ्क्षायां स्वतस्तयोरन्वयो भवति। विधिनैतयोरेकवाक्यतायां सत्यां विधिः प्रशंसितो भवति, अर्थवादानां स्तुतिद्वारेण क्रियया सम्बन्धो भवति। अनेन विधेः प्रवर्तकतायां वैशिष्ट्यमुत्पद्यते। स्पष्टीकरणायोपर्युक्तमुदाहरणं ग्राह्यम्— 'वायव्यं श्वेत.......' अनेन विधिवाक्येन वायव्ययागे प्रवृत्तये तु

---

१. अभिधाभावनामाहुरन्यामेव लिङादयः। (वार्तिकम्)

२. तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता।
भेदसाधनता ह्येषा नित्यं वेदात् प्रतीयते॥
ता (द्रू ?) प्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः। (वार्त्तिकम्)

प्रेरितम्. परं यदा प्रमादालस्यादेर्मानवप्रवृत्तौ शैथिल्यमुत्पन्नं तदा "वायुर्वै क्षेपिष्ठा" इत्यर्थवादवाक्येन.वायोः प्रशंसां कृत्वा तद्द्वारा वायुदेवताकं यज्ञं प्रति तस्य प्रवृत्तये प्रेरितम्। एवमर्थवादवाक्यानि क्वचिद् विधेयक्रियया साक्षात्, क्वचित् तत्सम्बद्धद्रव्य-देवतादिस्तुत्या प्रमाणतां प्रतिपद्यन्ते। एतेषु कतिपयानि फलविधेः कतिपयानि च हेतुविधेः समानान्यपि भवन्ति, तानि क्रमशो 'विधिवन्निगदम्,' 'हेतुवन्निगदम्' इति नामद्वयेनाभिधीयन्ते। "औदुम्बरो यूपो भवति, ऊर्ग्वा उदुम्बरः" "शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्यादीनि क्रमश उदाहरणानि।

शैलीदृष्टयेमानि त्रिप्रकारतया विभाजयितुं शक्यन्ते-गुणवादोऽनुवादो भूतार्थवादश्चेति। प्रमाणान्तरविरोधे सति अर्थवादो गुणवाद इत्युच्यते। यथा 'स आत्मनो वपामुदखिदत्, तामग्नौ प्रागृह्णात्'। प्रजापतिः किल जगत् स्रष्टुमैच्छत्, तदर्थञ्च कमपि यज्ञं कर्तुमैच्छत्। यदा यज्ञार्थं किमपि द्रव्यं तेन नासादितम् तदा स्वकीया वपैव तेनोत्खायाग्नौ निक्षिप्ता तेन च विषाणहीनः पशुरुदपद्यत तस्यायं प्रासङ्गिकोऽभिप्रायः। अस्य खलु प्रत्यक्षविरुद्धता सुस्पष्टा। स्वकीयां वपामुत्खायाग्नौ हुत्वा च कश्चिज्जीवितुं शक्नुयात्? अनेन प्रत्यक्षेण विरुद्धार्थबोधनहेतोरेवायं गुणवाद इति मन्येत। अनेन प्रकृतः पशुयागः प्रशंसितः। सृष्ट्यादावेतावान् पशूनामभाव आसीत् यत् प्रजापतिना पशूनामप्राप्तौ स्वकीया वपाऽपि हुता। इदं तस्यैव पशुयागस्य सामर्थ्यम्, यस्यानुष्ठानमात्रेण प्रजापतौ प्रजानां पशूनामुत्पादनस्य शक्तिरुत्पन्ना, चैतावान् महनीयः सञ्जातः। प्रमाणान्तरावगतार्थबोधकोऽनुवादः। यथा वायुर्वै क्षेपिष्ठेति वाक्यं ग्राह्यम्। वायु द्रुतगामिनी देवतेत्यर्थः। अयमर्थो लोकतोऽपि ज्ञायत एव। एतदर्थं कस्यचिद् वैदिकस्य प्रमाणस्य गवेषणं नापेक्ष्यते। एवमिदं वाक्यमनुवादमात्रम्। भूतार्थवादस्त्वेताभ्यां द्वाभ्यामपि विलक्षणः, तत्र केवलमितिहासवत् भूतमर्थं प्रति सङ्केतो भवति, यथा, इन्द्रो वृत्रमहन् इत्यादि। एवमेतान्यपि धर्मे प्रमाणम्।

मन्त्रः

मन्त्रो वेदस्यैव तृतीयो भागः। तत्तत्कर्मणामनुष्ठानकाले तत्सम्बद्धक्रियाङ्गद्रव्य-देवताप्रकाशनं मन्त्राणां कार्यम्। कर्मकाण्डे चेदमेव तेषां महत् प्रयोजनम्। एतत् स्मरणं विना कर्माङ्गानां सङ्गतिर्न भवति, न च तेषां क्रम एव सुष्ठुतया प्रतीयते। विधिरपि वदति—अन्यैः साधनैः कृतं स्मरणं फलदं न भवति यथा मन्त्रद्वारा कृतम्। अत एव "मन्त्रैरेव स्मरणं कुर्यात्" एवमेको नियमोऽपि मन्त्राणां सार्थकत्वदृष्ट्या संजातः एवं स्मारकत्वरूपे दृष्टे प्रयोजने मन्त्राणां प्राप्ते सति कस्यचिददृष्टस्य प्रयोजनस्य कल्पनं नापेक्ष्यते। ये मन्त्रा यत्र पठ्यन्ते तत्रैव यदि किमप्यर्थप्रकाशनरूपं प्रयोजनं सिद्ध्यति चेत् तेषां विनियोगः क्रियते। येषां तत्रोपयोगो न भवति तेऽन्यत्र नीयन्ते यत्र तेषामुपयोगो भवितुमर्हति। यथा पूषानुमन्त्रणमन्त्राणाम्। दर्शपूर्णमासे कस्याश्चित् पूषदेवताया अभा-

वात्। येषां तत्रापि सम्बन्धो न भवति, अन्यस्मिन् स्थानेऽपि च प्रयोजनं सम्भवं न प्रतीयते, तेषां तस्मिन् प्रकरणे लक्षणादिद्वारा विनियोगः क्रियते। यथा 'त्वमग्ने प्रथमो मनोता' अस्य मन्त्रस्य। अयमग्निषोमीयपशुप्रकरणे पठितः, तत्र कश्चिदग्निदेवताको यज्ञो नास्ति, तथाप्यस्य मन्त्रस्याग्नेरग्निषोमीये लक्षणयाऽस्य तत्रैव सम्बन्धः क्रियते। यत्र लक्षणयाऽपि सम्बन्धो नोपपद्यते, उत्कर्षोऽपि न सिद्ध्यति, तादृशा मन्त्राः केवलमदृष्टार्था इति कल्प्यन्ते, यथा जपमन्त्राः। एवं सकलस्यापि प्रयोजनवत्ता सङ्गता भवति।

एषां शैलीदृष्ट्या त्रैविध्यमस्ति—१. करणमन्त्राः, २. क्रियमाणानुवादिमन्त्राः, ३. अनुमन्त्रणमन्त्रा। यत्र पूर्वं मन्त्रमुच्चार्यते ततश्च कार्यं क्रियते, तत्र करणमन्त्रो भवति। यथा 'इषेत्वा'' आदि, याज्या पुरोनुवाक्यादि। यत्र मन्त्रोच्चारणसमकालमेव कर्मणोऽनुष्ठानं क्रियते तत्र क्रियमाणानुवादिमन्त्रो भवति। यथा "युवा सुवासा" इति मन्त्रोच्चारणसमकालमेव वस्त्रेण यूप आव्रियते। ये कर्मानन्तरं पठ्यन्ते तेऽनुमन्त्रणमन्त्रा इत्युच्यन्ते। यथा 'अग्नेरहं देवयज्ययाऽन्नादो भूयासम्' इत्यादि मन्त्राणां सर्वे भागाः फलवन्तः सिद्ध्यन्ति। अनेके समालोचकास्तेषां प्रामाण्ये संशेरते। तेषां कथनं यत् मन्त्रैर्बोधितोऽर्थोऽनधिगतार्थो नास्ति। मीमांसकाः पदार्थद्वारा तेषां प्रामाण्यं स्वीकुर्वन्ति। यतो मन्त्राः पदार्थाः, तत एव ते मन्त्रस्य विनियोजकवाक्यार्थप्रत्यायकाः सन्ति। अस्मन्मते पदार्थज्ञानं वाक्यार्थज्ञानं प्रति कारणम्। एवं मन्त्रेष्वपि स्वभावत उपपद्यते।

नामधेयम्

नामधेयैर्विधेयार्थस्यान्येभ्यः पदार्थेभ्यो व्यावृत्तिः क्रियते, अत एव तदपि धर्मे प्रमाणम्। ज्योतिष्टोमादीनि यानि यानि यज्ञनामानि सन्ति तानि तान्यन्यभागेभ्यः परिच्छेदं कुर्वन्ति। विधेयार्थस्य परिच्छेदकतयैव तेषां विधिनाऽपि सममेकवाक्यता सम्पद्यते। नामधेयत्वं चतुर्भ्यो निमित्तेभ्यः सिद्ध्यति। १. मत्त्वर्थलक्षणाभयात्, २. वाक्यभेदस्य भयात्, ३. तत्प्रख्यशास्त्रात्, ४. तद्व्यपदेशाच्च। 'उद्भिदा यजेत पशुकामः' अत्र इदं नामधेयमिति प्रथमेन निमित्तेन मन्यते, नो चेत् 'उद्भिद्वता' इत्यर्थः क्रियेत, मत्त्वर्थलक्षणा चाङ्गीक्रियेत। 'चित्रया यजेत पशुकामः' इत्यादि स्थलेषु द्वितीयेन निमित्तेन नामधेयत्वमस्ति। अन्यथा, एकेन विधिप्रत्ययेनानेकेषां चित्रगुणानां विधानमसम्भवमापद्येत, तेषां विधाने कृते वाक्यभेदः शिरस्यापद्येत। 'अग्निहोत्रं जुहोति' इत्यादि स्थलेषु नामधेयत्वं तृतीयेन निमित्तेनास्ति, यतोऽनेन विधीयमानाः सकला गुणाः 'अग्निर्ज्योति' रित्यादिवाक्यैः पूर्वमेव प्राप्ताः सन्ति। अतो विधित्सितगुणस्य प्रख्यापकं (बोधकं) अन्यत् शास्त्रमस्ति ततोऽत्र तत्प्रख्यशास्त्रं नामधेयस्य निमित्तमस्ति। 'श्येनेनाभिचरन् यजेत' इत्यत्र नामधेयत्वं चतुर्थेन निमित्तेनास्ति, यतः, 'यथा वै श्येनो निपत्यादत्ते एवमयं' इत्यस्मिन्नर्थवादवाक्ये श्येनसादृश्यस्य व्यपदेशः कृतः। सादृश्यं

सदा भिन्नेषु वस्तुषु भवति, अत एवायमेव तद्व्यपदेश इदं नामधेयमिति साधयति। एवमेव 'वैश्वदेवेन' इत्यादि स्थलेष्वपि तत्प्रख्यशास्त्रेण नामधेयत्वं मन्तव्यम्। तदर्थमुत्पत्तिविशिष्टगुणबलीयस्त्वाद्यतिरिक्तनिमित्तानां स्वीकृतेः काचिदपेक्षा नास्ति। उक्तैरेभिर्निमित्तैरेतत् सर्वमपि तत्तद् यज्ञनामानि भवन्ति। एतेषां प्रामाण्यविषये लिखितमेव पूर्वम्। एवमेव वाक्यशेषोऽपि सन्दिग्धार्थस्य निर्णायकः सन् धर्मे प्रमाणम्। सामर्थ्यमप्येवंविधमेव निर्णायकम्।

स्मृतिः

एतान् वैदिकान् भागानतिरिच्य स्मृतयोऽपि धर्मे प्रमाणम्। परन्तु तेषां वेदवत् स्वतन्त्रं प्रमाणं प्रामाण्य नास्ति, परं वेदमूलकत्वेन। सर्वज्ञकल्पैः सकलवेदशास्त्रपारङ्गतैर्मनुयाज्ञवल्क्यपाराशरादिभिरितस्ततो विकीर्णानि परस्परशाखान्तर्गतानि वाक्यान्युद्धृत्य मन्दबुद्धिषु जनेष्वनुग्रहाय तानि स्मृत्वा तत्तद्ग्रन्थेषु ग्रथितानि। एतादृशस्मृतेराधारेणैव तेषां ग्रन्थाः स्मृतय इत्युच्यन्ते, एवमनयैव वेदमूलकतया तेषु प्रामाण्यमप्यायाति। यदि स्वतन्त्रं प्रामाण्यं तेषामङ्गीक्रियेत, तत इमे पौरुषेया इति कृत्वा भ्रान्त्यादिदोषसमावेशः सुशक इति तेषां प्रामाण्यं सर्वथा लुप्तं स्यात्। अस्मादृशेषु मन्दबुद्धिषु विविधवैदिकशाखासु विकीर्णानां वाक्यानां सङ्ग्रहस्य, विध्यर्थवादयोर्विवेचनस्य, न्यायसिद्धार्थनिर्धारणस्य, धर्मस्वरूपनिर्णयस्य च सामर्थ्यं नास्ति। अनयैव दृष्ट्या ताः स्मृतयो निर्मिताः। तासु कतिचन प्रत्यक्षवेदवाक्येषु, कतिचिदनुमितवेदवाक्येषु, कतिचिच्चार्थवादेषु मन्त्रेषु चाश्रिताः सन्ति।

एतासां प्रामाण्यं स्थापयता महर्षिणा जैमिनिनाऽन्धविश्वासादेः प्रश्रयो न दत्तः। विचारपूर्वकं वेदसम्बद्धताया निर्णये सत्येव स्मृतेः प्रामाण्यम्। यद्यन्यानि कानिचिन्मूलानि प्राप्यन्ते तदा स्मृतिरप्रमाणं स्यात्। यथा "वैसर्जनहोमीयं वासोऽध्वर्युः परिगृह्णाति" अस्यां स्मृतौ वस्त्रपरिग्रहणेऽध्वर्योर्लोभः प्रतीयते। अत एव लोभमूलकत्वेन स्मृतय ईदृशोऽप्रमाणम्। एवमेव यत्र वेदेन विरोधः प्रतीयते तथापि स्मृतिरप्रमाणम्। यथा "औदुम्बरी सर्वा वेष्टयित्वा" इति स्मृतिः। अनया समलाया औदुम्बर्या वेष्टनं विहितम्, या "औदुम्बरीं स्पृष्ट्वा गायेत्" अनया स्मृत्या विरुद्धा। (स्मृत्यनुसारं) वेष्टनानन्तरं स्पर्शोऽसम्भवः। एवमेव पदपदार्थनिर्णये व्याकरणस्मृतिः[1] प्रमाणम्।

शिष्टाचारः

शिष्टानामाचारोऽप्येवमेव धर्मे प्रमाणम्। इमे शिष्टा[2] आचार्यबोधायनेनैभिः

---

१. साधुपदप्रयुक्त्यधिकरणम् (१।३।९)

२. धर्मेणाधिगतो येषां वेदः स हि वृंहणः।
शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः ॥

शब्दैर्लक्षिताः । ये खलु कथञ्चिदीर्ष्याहङ्कारलोभदम्भमोहक्रोधानपहताः कुम्भीधान्याः । कुम्भीधान्यत्वेन सन्तोषोऽपरिग्रहवृत्तिश्च सङ्केतिते भवतः । एवंविधैर्गुणैर्विशिष्टानां शिष्टानामाचारः कथमिव धर्मतो न्यूनतां भजेत । अतस्तस्यापि प्रमाणत्वं सङ्गतम् । स्मृतेर्वेदेन साक्षात् सम्बन्धः, आचारस्य च स्मृतिद्वारा । आचारस्याधारेण स्मृतेः कल्पना स्मृत्या च श्रुतेरनुमानं क्रियते । श्रुतिस्मृत्योर्विरोधे सति श्रुतिस्मृत्याचाराणां विरोधे च सति स्मृतिरेव प्रबलं प्रमाणम् । दाक्षिणात्येषु मातुलकन्यया सह विवाह आचारसिद्धः, तथापि स्मृत्या विपरीतत्वेन [1]तदप्रमाणम् । आचारा भिन्नदेशानुसारं भिन्नाः सन्ति, सर्वे च [2]स्वेषु स्वेषु क्षेत्रेषु प्रमाणम् । शब्दानामर्थस्य प्रसङ्गेऽपि आर्यम्लेच्छयोरार्याणामर्थः[3] प्रमाणत्वेन कल्पितः, यतः स शास्त्रस्याधिकं निकटे भवति । परं, म्लेच्छेषु[4] प्रचलित उचितोऽप्यर्थो न ग्राह्य इति न तात्पर्यम् । अयमाचार एव लोके धर्मस्य प्रत्यक्षनिर्णायकरूपेण प्रचलितः । एतान्यष्टप्रमाणानि धर्मस्याधारभूतानि ।

---

१. मातुलस्य सुतामुढ्वा मातृगोत्रां तथैव च ।
समानप्रवराञ्चैव त्यक्त्वा चान्द्रायणञ्चरेत ॥

२. होलकाधिकरणम् (१।३।८)

३. आर्यम्लेच्छाधिकरणम् (१।३।५)

४. पिकनेमाधिकरणम्

२. भावना

भावना खलु मीमांसकानां सर्वस्वम् । भावनेयं न खलु विचारः, यथा लोके प्रचलितः परं विशिष्टो व्यापारः । भवितुर्भवनानुकूलो व्यापारो मीमांसकानां मते भावना । यजेतेत्यादिविधायकप्रत्ययेषु मीमांसका रूपद्वयं परिकल्पयन्ति । प्रथमं लिङ्त्वं द्वितीयमाख्यातत्वञ्च । द्वाभ्यामप्येताभ्यां भावनाऽभिधीयते । भावना च द्विधा-शाब्दी भावना । आर्थी भावना च । पुरुषप्रवृत्यनुकूलप्रयोजके आचार्यादौ शब्दे वा विशिष्टो व्यापारः इयञ्च लिङ्त्वेनाभिधीयते । यतो लिङि श्रुते 'अयं मां प्रवर्तयतीति' अयं मे प्रवृत्यनुकूलं व्यापारं करोतीति वा नियमेन प्रीतीयते । अयं प्रवृत्यनुकूलो व्यापारविशेषो लोके पुरुषवर्त्यभिप्रायविशेषः, किन्तु वेदे तस्या पोरुषेयत्वेन पुरुष प्रवेशस्तु न सम्भाव्यते, तत्र तु लिङादयः शब्दा एव । अत एव व्यापारोऽयं तत्र पुरुषेऽसन् शब्देषु तिष्ठति, अत एवेयं शाब्दीभावनेत्यभिधीयते । शाब्दीभावना ह्यंशत्रयम-पेक्षते-साध्यं, साधनम्, इति कर्तव्यतां च । साध्याकाङ्क्षायां वक्ष्यमाणाऽर्थीभावना साध्यरूपेण, साधनाकाङ्क्षायां लिङादिज्ञानं तद्रूपेण, इति कर्त्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानस्येतिकर्तव्यतारूपेणान्वयो भवति ।

शाब्दीभावनायाः साध्यरूपेणार्थीभावनाऽस्माभिः प्रस्ताविता । वस्तुतः पुरुषे स्वर्गस्येच्छयोत्पन्नो यो यागविषयकः प्रयत्नः, स आर्थीभावना । प्रवर्तनं शाब्दी भावनायाः कार्यम्, तस्याः साध्यमेव प्रयत्नरूपेणास्माकं समक्षमुपतिष्ठति । आख्यात-त्वेनास्याभिधानं क्रियते, यतो "यजेत" अस्याख्यातस्य श्रवणे सति "यागे यत्नं कुर्यात्" इतीदृशी प्रतीतिर्भवति । अयमेव प्रयत्न आख्यातस्य वाच्यः । इयमपि अंशत्रय-माकाङ्क्षते । साध्यस्याकाङ्क्षायां सत्यां स्वर्गादिफलानां भाव्यत्वेनान्वयो भवति । साधनाकाङ्क्षायां यज्ञादीनां करणत्वेन, इतिकर्तव्यताकाङ्क्षायां प्रयाजादीनां तद्रू-रूपेणान्वयो भवति ।

उक्तमाख्यातत्वं लिङ्त्वञ्चैतयोर्द्वयोस्तिष्ठति, किन्त्वाख्यातत्वं दशसु लकारेषु तिष्ठति, लिङ्त्वं केवले लिङ्येव । अस्य सर्वसामान्यस्याख्यातस्यार्थो भावना-इति मीमांसकानां सिद्धान्तः । वैयाकरणानां मते तु आख्यातस्य वाच्यः कर्ता । किम्बहुना, वैयाकरणानां शाब्दबोधः कर्तृप्रधानम्, मीमांसकानां तु भावनाप्रधानम् । कर्ता ताव-दाक्षेपतो लभ्यते—अर्थ रूपेण तस्य स्वीकारो नोचितः । यतोऽर्थः स एव भवति योऽन्येभ्यः प्रकारेभ्यः प्राप्तुं न शक्येत । एवमाख्यातस्य वाच्या भावना कर्त्तारं विनाऽनुपपन्ना

सती तमाक्षिपति, पुनः स आख्यातार्थ इति कल्पनं कथमपेक्ष्यते ? एवं भावना प्रथमं शब्देन सम्बद्धा सती शाब्दी-भावनेत्युच्यते । अर्थस्यार्थः फलम् । फलेन च सम्बद्धत्वे-नैवेयं द्वितीया भावनाऽऽर्थी भावनेत्युच्यते ।

अपूर्वम्

आर्थीभावनया सम्बद्धं फलं यज्ञयागादिविनश्वरैः कारणैः साक्षाल्लब्धुं न शक्यते । यत आर्थीभावनायाः समग्राणि करणानि यज्ञादीनि शीघ्रं विनश्यन्ति, फलो-त्पत्तिपर्यन्तञ्च नावस्थातुं शक्नुवन्ति । अत एवार्थीभावनायाः साध्यस्य स्वर्गादिफलस्य आर्थीभावनायाः साधनस्य यज्ञहोमादेश्च मध्ये वस्त्वेकं कल्पनीयं स्यात्, तच्चापूर्वमिति व्यपदिश्यते । इदं खल्वाचार्यशङ्करस्य[1] दृष्टया कर्मणः सूक्ष्मोत्तरावस्था, फलस्य च पूर्वावस्थेति । यथाऽङ्गारेभ्य उत्पन्नमुष्णमङ्गारैः शान्तं सदपि जलादौ सङ्क्रामति तथैव यागेभ्य उत्पन्नमपूर्वं यागेषु नष्टेष्वपि कर्तुरात्मन्यवतिष्ठति, फलञ्चोत्पाद्य नश्यति । अपूर्वमिदं चतुर्विधम्--परमापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गा-पूर्वम् इति । प्रधानस्यानुष्ठानमात्रेण यदपूर्वमुत्पद्यते तदुत्पत्त्यपूर्वमित्युच्यते । एतदनन्तर मुत्तराङ्गेभ्यो यदपूर्वमुत्पद्यते तदङ्गापूर्वमित्युच्यते । एतदनन्तरमुत्तराङ्गेभ्यो यान्यपूर्वा-ण्युत्पद्यन्ते तान्यङ्गापूर्वाणीत्युच्यन्ते । एभिरङ्गापूर्वैरुपकृतं प्रधानापूर्वं परमापूर्वमुत्पाद्य नश्यति । इदं परमापूर्वं फलोदयपर्यन्तं यजमानस्यात्मन्यवतिष्ठति, फलञ्चोत्पाद्य नश्यति । अनया व्यवस्थया प्रत्येकं कर्मणा पुनः पुनः फलोत्पत्तिप्रसङ्गोऽपि नोपैति । क्वचित् समुदायापूर्वमपि भवति । यथा, दर्शपूर्णमासयागे दर्शस्य त्रयः प्रधानयागाः स्वाङ्गैः सममेकं समुदायापूर्वमुत्पादयन्ति तथैव पूर्णमासस्यापि । द्वितीयमिदं समुदाया-पूर्वेण मिलितं सत् परमापूर्वं जनयति, तच्च फलोत्पादकम् ।

१. न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत् कालान्तरितं फलं दातुं शक्नोति, अतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा पूर्वावस्थाऽपूर्वं नामास्तीति तर्क्यते ।

३. अध्यायानां रूपरेखा

कर्मभेदः

उपरि प्रतिपादितमपूर्वं यागहोमदानादिधात्वर्थेभ्य उत्पद्यते। यागे देवतोद्देश्येन द्रव्यत्यागः क्रियते। स एव यदाहवनीयादिमग्निमधिकरणमिति मत्वा क्रियते तदा होत्र इत्युच्यते। यागो यजतिना, होमश्च जुहोतिना बोध्यते। ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इतीदं यागस्य, 'अग्निहोत्रं जुहोति' इतीदं होमस्योदाहरणम्। दाने स्वकीयं स्वत्वमपसार्य परस्य स्वत्वं तत्र स्थाप्यते। एतान् परस्परं भेदयितुं मीमांसकैः षट् प्रमाणान्यङ्गीकृतानि--१. शब्दान्तरम्, २. अभ्यासः, ३. सङ्ख्या, ४. संज्ञा, ५. गुणः, ६. प्रकरणान्तरम्। एकस्मिन्नेव प्रकरणेऽनेकैर्धातुभिर्निर्मिता आख्याता यदा प्रयुज्यन्ते तदा तत्र शब्दान्तरत्वेनानेकानि कर्माणि मन्यन्ते यथा ''तेन सोमेन यजेत'', ''हिरण्यमात्रेयाय ददाति, दक्षिणानि जुहोति' इत्यत्र यजेत', ददाति', 'जुहोति इति त्रयो भिन्ना धात्वर्थाः सन्ति, अत एव भिन्ना भावनाः, भिन्नान्यपूर्वाणि, भिन्नानां फलानामाश्रयाश्च सन्ति। एवमेकस्मिन् धात्वर्थे (विधौ) पुनः पुनरभ्यस्ते कर्मभेदो भवति यथा समिधो यजति, तनूनपातं यजति, बर्हिर्यजति, स्वाहाकारं यजति' एतेषु वाक्येषु यजतिः वारपञ्चकं श्रुतः। अत एवात्र कर्मभेदो मन्यते। काम्येष्टिकाण्डे ''वैश्वदेवीं साङ्ग्रहणीं निर्वपेद् ग्रामकामः'' इत्यनेन विहिता साङ्ग्रहणी इष्टिसन्निधौ श्रुता—

आमनमस्यामननस्य देवा इति तिस्र आहुतीर्जुहोति।

अत्राहुतीनां त्रित्वं श्रुतम्। अस्य स्वाश्रितकर्मभेदं विना निवेशोऽसम्भवः। अत एवैषु स्थलेषु संङ्ख्याया आधारेण कर्मभेदो ग्राह्यः। ''अथैषज्योतिः, अथैष विश्वज्योतिः, अथैष सर्वज्योतिः, एतेन सहस्रदक्षिणेन यतो'' इत्यस्मिन् वाक्ये भिन्ना सङ्ख्या उल्लिखिताः सन्ति, येन कर्मभेदः सिद्धयति। एवं पूर्वं कर्मणि कस्यचिद् गुणस्य प्रवेशो न स्यात् स गुणोऽपि कर्मभेदस्य स्थितिमुत्पादयति, यथा ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति'' इत्यस्मिन् वाक्येऽग्निदेवतापुरोडाशकपालतत्सङ्ख्याकालाद्यनेकगुणानां विधानेनोत्पद्यमानो वाक्यभेदः पूर्वकर्मतः पृथक् कर्मणो विधानं कारयति। अनुपादेयगुणविशिष्टस्य पूर्वकर्मणोऽनुपस्थितिः प्रकरणान्तरमित्युच्यते। साऽपि कर्मभेदस्य मूलम्। एकसत्रविशेषस्य निकटे श्रुतम्—''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजन्ते'' अत्र मासोऽनुपादेयगुणः, पूर्वकर्मणोऽग्निहोत्रस्योपस्थितावपि किमपि प्रमाणं नास्ति, अत एवेदं नित्याग्निहोत्रात् दर्शपूर्ण-

मासाच्च पृथक् कर्म स्वीकार्यम् । एवं देशनिमित्ताफलसंस्कार्यादियोगेऽपि सति प्रकरणान्तरेण कर्मभेदो भवति । एतत् सर्वं प्रमाणं कर्मस्वरूपमात्रबोधकोत्पत्तिविधे सहायकम् । अस्योत्पत्तिविधेर्निरूपणं विस्तरेण प्रथमस्य द्वितीयस्य चाध्यायस्य विषयः । "अग्निहोत्रं जुहोति" इत्यादि उत्पत्तिविधेरेवोदाहरणम् । अयं विधेः प्रथमः प्रकारः ।

अङ्गत्वम्

उत्पत्तिविधेरनन्तरं द्वितीयः प्रकारो विनियोगविधिरस्ति । अस्य निरूपणं तृतीयेऽध्याये कृतम् । विनियोगस्यार्थोऽङ्गत्वबोधनम् । अत एवाङ्गत्वबोधको विधिर्विनियोग विधिरित्युच्यते । अङ्गत्वमिदमन्यस्योद्देश्येन प्रवृत्तायाः क्रियायाः कारकरूपेण विहितत्वम् । अस्य बोधनार्थं श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याः षट् सहकारिभूतानि प्रमाणानि । यस्य श्रवणमात्रेणैवाङ्गत्वबोधो भवति स शब्दः श्रुतिरित्युच्यते । सर्वासु विभक्तिषु मध्ये तृतीयया साक्षादेवाङ्गत्वबोधः कार्यते । श्रुतिरियं त्रिविधा—१. विभक्तिरूपा, २. समानाभिधानरूपा, ३. एकपदरूपा चेति । विभक्तिरूपायां श्रुतौ प्रथमया षष्ट्या च विभक्त्या च रहितानां सकलानां विभक्तीनां समावेशः । "व्रीहीन् प्रोक्षति" इति द्वितीयाश्रुतेः, "दध्ना जुहोति" इइि तृतीयाश्रुतेरुदाहरणम् । व्रीहिःप्रोक्षणं प्रति, दधिहोमं प्रति अङ्गम् । यजेतेत्यादौ भावनायां सङ्ख्यादेरङ्गता समानाभिधानश्रुतेः धात्वर्थस्य च भावनां प्रति अङ्गता एकपदश्रुत्या भवति श्रुतिकल्पनानुकूलशब्दार्थवर्तिसामर्थ्यं लिङ्गम्, तच्चान्यदङ्गत्वबोधकं प्रमाणम् । 'बर्हिर्देवसदनं दामि' अत्र शब्दगतं लिङ्गम् । येनास्य-मन्त्रस्य बर्हिषोऽऽकरणे विनियोगः क्रियते । 'स्रुवेणावद्यति' इत्यादौ सामर्थ्यमर्थगतम् । इदं लिङ्गं सामान्यसम्बन्धप्रमाणान्तरसापेक्षं निरपेक्षञ्चेति भेदाभ्यां द्विविधम् । तृतीयं प्रमाणं वाक्यम्, तच्चाङ्गाङ्गिभावयोग्यपदानामेकत्रोच्चारणम् । 'खदिरो यूपो भवति" इत्यस्मिन् वाक्येऽङ्गत्वबोधिका काचन श्रुतिर्नास्ति तथापि खदिरयूपाभ्यां सहोच्चारणत्वेन खदिरं यूपं प्रत्यङ्गं भवति । प्रकरणं चतुर्थं प्रमाणम् । अत्रफलसहितफलरहितकर्मसु परस्परमुपकार्योपकारकयोराकाङ्क्षा भवति । यथा दर्शपूर्णमासप्रयाजादेः । दर्शपूर्णमासस्याङ्काङ्क्षा वर्तते यत् स्वर्गस्य सम्पादने तस्मै कश्चन साहाय्यं दद्यादिति, एवमेव प्रयाजस्याकाङ्क्षाऽस्ति यत् केनचित् फलेन सम्बद्धः स्यामिति । एवमियमन्योन्यस्याकाङ्क्षा प्रकरणद्वाराऽङ्गत्वेनान्विता सती शान्ता भवति । प्रकरणमिदं क्रियाया एव विनियोगं करोति, न खलु द्रव्यगुणादीनां सिद्धवस्तूनाम् । यद्येषां ग्रहणं कार्यते चेत् क्रियाद्वारैव, न तु साक्षात् । प्रकरणमिदं द्विविधम् —महाप्रकरणावान्तरप्रकरणभेदाभ्याम् । फलभावनायाः प्रकरणं महाप्रकरणम् । यथा दर्शपूर्णमासादि । इदं प्रकृतावेव भवति, न तु विकृतौ । यत्र सकलानामपेक्षितानामङ्गानामुपदेशो भवति, सा प्रकृतिरित्युच्यते । यत्र प्रकृत्याऽऽवश्यकान्यङ्गानि गृह्यन्ते, तत्र विकृतिकर्म भवति । फलभावनान्तर्गताया अङ्गभावनाया यत् प्रकरणं तदवान्तरप्रकरणमित्युच्यते । यथाऽभिक्रमणादेः प्रयाजाङ्गता । स्थानं पञ्चमं प्रमाणम्, तद् हि देशसामान्यम्, एकदेशे स्थितिः । इदं

द्विविधम्—पाठेनानुष्ठानेन च। पाठोऽपि द्विविधः—यथासङ्ख्यपाठः, सन्निधिपाठश्च। काम्येष्टिकाण्डे "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः", 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् वर्धमानः" एताभ्यां वाक्याभ्यां विहिताभ्यामिष्टिभ्यां 'उभा वा मिन्द्राग्नी" "इन्द्राग्नी नवतिं पुरः" याज्यापुरोनुवाक्यायुगलं क्रमशः प्रथमं प्रथमस्य, द्वितीयं द्वितीयस्याङ्गं भवति, स्थानप्रमाणेन। एवमनुष्ठानक्रमोऽपि भवति। समाख्या क्षेत्रेऽस्मिन् पार्यन्तिकं प्रमाणम्, सा च यौगिकशब्दरूपेण परिभाषिता। इयमपि लौकिकभेदाभ्यां द्विधा। आध्वर्यवहौत्रादयो याज्ञिकैः कल्पिता आख्या लौकिक्याः समाख्यायाः; होतृचमसमैत्रावरुणचमसादयो वैदिक्याः समाख्याया उदाहरणम्। प्रमाणान्येतानि क्रमशो दुर्बलतराणि। श्रुत्यपेक्षया लिङ्गं दुर्बलतरम्, लिङ्गापेक्षया वाक्यं दुर्बलतरम्, वाक्यापेक्षया प्रकरणं, प्रकरणापेक्षया स्थानं, स्थानापेक्षया समाख्या दुर्बलतरा। अनेनैव क्रमेण परस्परं विरोधे समुत्पन्ने परस्परं बाधो भवति। सामान्येन सर्वाण्येतान्यङ्गानि द्विप्रकाराणि—सन्निपत्योपकारकारादुपकारकभेदाभ्याम्। यत्र कर्मणोऽङ्गभूतं द्रव्यं देवतादि उद्दिश्य तेषां संस्कारार्थं विधानं क्रियते तत्र सन्निपत्योपकारकमङ्गं भवति। द्रव्यादीनां संस्कारो भवति, अतस्तानि प्रधानम्, कर्म गुणः। एतद्विपरीतं द्रव्याद्यनुद्दिश्य साक्षादेव तत्कर्माङ्गतया विधीयमानं कर्म आरादुपकारकं कर्म भवति। इदमारादुपकारकं सन्निपत्योपकारकापेक्षया दुर्बलतरम्। "व्रीहीन् प्रोक्षति" इतिद्वारा विहितं प्रोक्षणादि कर्म सन्निपत्योपकारकमस्ति, प्रयाजानुयाजादि चारादुपकारकम्।

प्रयुक्तिः

प्रयोगस्य निरूपणं चतुर्थाध्यायस्य विषयः। अत्र किं प्रयोज्यं किञ्च प्रयोजकं—इत्यस्य स्पष्टीकरणं क्रियते। अन्यस्योद्देश्येन प्रवृत्तायाः क्रियाया अनुष्ठाप्यतैव वस्तुतः प्रयोज्यत्वम्, तच्च प्रयाजदध्योरानयनादौ विद्यमानम्। अत्रामिक्षा दध्न आनयनं प्रति प्रयोजकम्, दध्यानयनं प्रयोज्यम्। एवं यद् दोहनादि क्रत्वर्थमस्ति, पुरुषार्थाय वा—इत्यादिसंशयानां निराकरणमस्मिन्नध्याये कृतम्, किं केन किमर्थञ्च प्रयुक्तमिति।

क्रमः

क्रमः पञ्चमाध्यायस्य विषयः। तस्य सम्बन्धो विधेस्तृतीयेन प्रकारेण प्रयोगविधिना वर्तते। अनुष्ठानस्य शीघ्रतया निर्देश एव प्रयोगविधेः कार्यम्। स्वकीयस्यैतस्य कार्यस्य पूर्तये प्रयोगविधिर्विधेयानां पदार्थानां नियतं क्रममपेक्षते, यस्याधारेणानुष्ठानं शीघ्रतया स्यादिति। क्रमोऽयमानन्तर्यम्, अस्मात् परमेतदित्येवं रूपः। एतस्य बोधार्थमपि मीमांसकैः श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तीः सहकारिकारणरूपेण स्वीकृताः। यत्रार्थः, ततःक्त्वा, ल्यप् आदिक्रमबोधकैः शब्दैरेव साक्षात् क्रमो बोध्यते तत्र श्रुतिः प्रमाणम्।

यथा "वेदं कृत्वा वेदिं करोति" अत्र 'कृत्वा' इत्यनेन वेदकरणानन्तरं वेदिकरणक्रमः श्रुत्यैव बोध्यते। एतदनन्तरं प्रयोजनानुरोधेन यः क्रमो निश्चीयते सोऽर्थक्रमो–भवति। यथा, "अग्निहोत्रं जुहोति, यवागूँ पचति। अत्र यवागूपाकस्यानन्तरं पाठे सत्यपि प्रथममेवानुष्ठानं भवति, तस्य हवनकर्मणि प्रयोजनात्। मन्त्रपाठैर्ब्राह्मणपाठैः कृतानुष्ठानेषु पदार्थेषु यः क्रमो निर्दिष्टः स पाठक्रमस्योदाहरणम् – "समिधो अग्न आज्यस्य व्यन्तु" "तनूनपादग्न आज्यस्यवन्तु" इत्यादि मन्त्रपाठस्य क्रमेणैव प्रयाजादिषु क्रम आश्रितः। स्थानस्याधारेण जनितः क्रमः स्थानक्रम इत्युच्यते। कालभेदेन जनिता अनेके पदार्था अतिदेशेन यदा विकृतिमायान्ति, तेषाञ्च वचनबलेन यदा एकस्मिन्नेव कालेऽनुष्ठानं प्राप्तं भवति तदा प्रथमोपस्थितस्य प्रथमं अनन्तरोपस्थितस्यानन्तरमनुष्ठानं स्यादित्येव यो निर्णयः क्रियते स एव स्थानक्रमः। यथैकदिवससाध्ये साद्यस्कसोमयागे सवनीयपशोः पूर्वमुपाकरणमस्यैव बलेन भवति। प्रधानस्यानुष्ठानस्य क्रमेणैव यत्राङ्गानामनुष्ठानस्य क्रमो गृह्यते तत्र मुख्यः क्रमो भवति। यथाऽऽग्नेयाग्नीषोमीययोः पौर्वापर्यस्य क्रमेणैव तयोर्निर्वापपुरोडाशश्रयणादेः क्रमो गृह्यते, येन तयोः स्वकीयैरङ्गैः सह समानं व्यवधानं भवति। एतेषां सर्वतः पार्यन्तिकं प्रमाणं प्रवृत्त्याक्रमो वर्तते। प्रवृत्तिप्रथमस्याङ्गस्यानुष्ठानमभिप्रेतम्, तेनैव च क्रमेण द्वितीयतृतीयाद्यङ्गानामनुष्ठानं क्रियते तदा स प्रवृत्तिक्रम इत्युच्यते। यथाऽग्नीषोमीयसवनीयानुबन्ध्येष्वेषु त्रिषु पशुयागेषु उपाकरणं स्थानक्रमद्वारा सम्पन्नम्, नियोजनादि तु प्रवृत्तिक्रमेण सञ्जातम्, येन स्वाङ्गेन समं तेषां समानं व्यवधानं तिष्ठति। एतेषु सकलेष्वपि श्रुतिलिङ्गाद्यङ्गबोधकप्रमाणवदेव परम्परापेक्षया दौर्बल्यमस्ति—श्रुत्यपेक्षयाऽर्थस्य, अर्थापेक्षया पाठस्य, पाठापेक्षया स्थानस्य, स्थानापेक्षया मुख्यस्य, मुख्यापेक्षया प्रवृत्तिक्रमस्य दौर्बल्यं भवति। परस्परं विरोधे च समुपस्थिते च क्रमेणानेनैव परस्परं बाधते। इदमेव क्रमनिरूपणं पञ्चमाध्यायस्य विषयः।

अधिकारः

अधिकारस्य निरूपणं षष्ठाध्यायस्य विषयः। 'कोऽधिकारी, कश्चानधिकारी' इत्यधिकारस्य बोधको विधिरधिकारविधिरित्युच्यते। दर्शपूर्णमासाभ्यां 'स्वर्गकामो यजेत' इति वाक्यमधिकारविधेरुदाहरणम्, यत्र स्वर्गकामादेरधिकारितयोपादानं कृतम्। परं कर्मण्ययमधिकारः केवलं फलेच्छावतः पुरुषस्यैव कृते प्राप्तो न भवति। परं तस्मिन्नधिकारिणि स्वाध्यायपूर्वकाध्ययनेन सम्पादितादक्षरग्रहणविशिष्टतत्तत्क्रतुविषयकमर्थज्ञानम्, आधानसिद्धाऽग्निमत्ता, तस्य कर्मणोऽनुष्ठानशक्तिश्च योग्यतारूपेणानिवार्यतयाऽपेक्ष्यते। एतत्सर्वमधिकारिणः सामान्ययोग्यता। प्रत्येकं क्रतवे काचिद् विशिष्टा योग्यता भवति। सामर्थ्यमप्येतासु सामान्ययोग्यतासु सम्मिलितम्। आधानसिद्धस्याग्नेरध्ययनस्य चाभावात् शूद्राणां कर्मण्यधिकारो नास्ति। एवमेव पक्षिणामपि

नास्ति । मीमांसकानां मते देवताः शरीरधारिण्यो न भवन्ति । अत एव तासामपि कर्मण्यधिकारो नास्ति । एवमङ्गहीनानामपि कर्मण्यधिकारो नास्ति । ते खलु विधानानुसारं कर्म कर्तुं समर्था भवन्ति । अन्धो घृतादि द्रष्टुं न शक्नोति, मूको मन्त्रमुच्चारयितुं न क्षमते, पङ्गुरितस्ततः परिक्रमितुं न समर्थः मूको मन्त्रादि श्रोतुं न पारयति । अत एतेभ्योऽनधिकारो व्यावहारिक एव । "वर्षासु रथकारोऽग्निमादधीत", ',एतया निषादस्थपतिं याजयेत्" इत्यादिविशेषवाक्यै रथकारनिषादस्थपतिसदृशेभ्यः शूद्रेभ्योऽपि विशेषोऽधिकारो दीयते । प्रायोऽग्निहोत्रादिकर्मसु स्त्रीसंवलितस्य पुरुषस्यैव सामान्याधिकारः ।

एतेषु सकलेष्वप्यधिकारेषु प्रतिनिधिरपि स्थानमर्हति । विहिते द्रव्येऽप्राप्ते तत्सदृशं तत्कार्यसमर्थमन्यद् द्रव्यं तस्य स्थाने गृह्यते, तच्च प्रतिनिधिरित्युच्यते । यथा, दर्शपूर्णमासयागे 'व्रीहिभिर्यजेत' इत्यनेन वाक्येन विहिता व्रीहयो यदा नोपलभ्यन्ते तदा तत्स्थाने नीवारा गृह्यन्ते । इदं खलु प्रतिनिधिग्रहणं केवलं दृष्टार्थस्थले भवति । इत एव सिद्धः प्रतिनिधिपरिग्रहन्यायो लोके सर्वथा प्रचलितः यत्र वादिनः प्रतिवादिनश्च वाक्कीलरूपेण स्वकीयं प्रतिनिधिं प्रस्तुवन्ति, राजा चाधिकारिणः ।

अतिदेशः

षष्ठाध्यायपर्यन्तमुपदेशेन सम्बद्धा विषया निरूपिताः । सप्तमतः परवर्त्तिनि षट्केऽतिदेशेन सम्बद्धा विषया विचार्यन्ते । एकत्र श्रुतानामङ्गानामन्यत्र प्रवर्तकं शास्त्रमतिदेश इत्युच्यते । अयमतिदेशो मुख्यतया त्रिविधः—१. वचनातिदेशः, २. नामातिदेशः, ३. चोदनालिङ्गातिदेशश्च । यत्र प्रत्यक्षवचनेनैवातिदेशः श्रूयते तत्र प्रत्यक्षवचनातिदेश इत्युच्यते । यथा, वैश्वदेवस्य वरुणप्रघासनामके पर्वणि 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इत्यादि वाक्यं श्रुतम्, तच्च समग्रान् ब्राह्मणविहितान् पदार्थान् "एतद् ब्राह्मणान्येव" इत्यनेन प्रत्यक्षवचनेन प्रापयति. तत्र नामातिदेशो भवति । यथा, उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इत्यस्मिन् वाक्ये श्रुतमग्निहोत्रमिति नाम प्रसिद्धादग्निहोत्रात् धर्मान् आकर्षति, अत एवायं नामातिदेशः । शब्दगतेनार्थगतेन च लिङ्गेन सामान्येन यत्र पदार्थानां कल्पना क्रियते तत्र चोदनालिङ्गातिदेशो भवति । यथा, सौर्ययागे निर्वापः, एका देवता, औषधं द्रव्यमिति लिङ्गत्रयम् । एतत्सर्वमाग्नेययागेऽप्यस्ति । अत एवाग्नेयसदृशत्वेन सौर्ययागे तेषां सर्वेषां धर्माणामतिदेशो भवति । एषु त्रिष्वतिदेशेषु प्रत्यक्षवचनातिदेशः प्रबलतमः, तस्य प्रत्यक्षश्रुतवाक्याश्रितत्वात् । नामातिदेशस्तदपेक्षया, चोदनालिङ्गातिदेशो नामातिदेशापेक्षयाऽपि दुर्बलः । अयमतिदेशः सामान्यविशेषरूपेण सप्तमाष्टमाध्याययोर्विषयः ।

ऊहः

ऊहो नवमाध्यायस्य विषयः । अयमतिदेशानन्तरवर्ती । अतएवातिदेशनिरूपणानन्तरमेष निरूप्यते । प्रकृतेः पदार्था विकृतौ कार्यमुखेन प्राप्ताः, किन्तु विकृतौ तादृशं

कार्यं न भवति, अन्यादृशमेव भवति तदा तत्र प्राप्तं पदार्थं तत्कार्यानुसारं परिकल्प्य येन शास्त्रेण गृह्यते तत् शास्त्रमूह इत्युच्यते। ऊहस्त्रिविधः—मन्त्रोहः, समोहः संस्कारोहः। 'अग्नये जुष्टं निर्वपामि' अयं निर्वापमन्त्रो यदा सौर्ययागेऽतिदेशेन प्राप्यते तदा प्रकृतयागस्य देवतायाः प्रकाशनार्थं मन्त्रेऽस्मिन्नग्नेः स्थाने सूर्यो गृह्यते। अत एवायं मन्त्रोहः। एवं प्रकृतेः साम्नि भावादिरूपाणि भवन्ति चेत् तानि विकृतेः स्थित्यनुसारमेकारादिरूपेण परिवर्त्यन्ते, अयं खलु सामोहः। प्रोक्षणादयः संस्कारा व्रीहिस्थाने प्राप्तानां नीवारादीनामपि भवन्ति, ते संस्कारोहस्योदाहरणानि। सर्वे धर्मा अपूर्वार्थं स्वीक्रियन्ते तदैव ऊहो भवति।

बाधः

बाधो दशमाध्यायस्य विषयः। अस्याभिप्रायो निवृत्तिरिति। प्रकृतेरतिदेशेन येषामङ्गानां प्राप्तिः सम्भवा तेषां केनापि कारणेन विकृतावनुष्ठानाभावो बाधः: अयं त्रिभिर्निमित्तैर्भवति—अर्थलोपेन, प्रत्याम्नानेन, प्रतिषेधेन च। यथा, "प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्लमायुष्कामः" अस्यामायुष्कामेष्टौ द्रव्यरूपेण विहितं कृष्लं (सुवर्णचूर्णं) व्रीहिस्थानेऽस्ति। अत एव व्रीहीनामिवातिदेशेन तस्याप्यवघातः प्राप्तो भवति। किन्त्वत्र न भवति, अत्र हि तुषाभावात् अवघातस्य नास्ति किमपि प्रयोजनम्। अवघातस्यायं बाधः प्रयोजनलोपजन्यो बाधः। विकृतिविशेषे "नैवारश्चरुर्भवति' इत्याम्नानम्। अनेनातिदेशप्राप्तानां व्रीहीणां नीवारेण बाधो भवति। अयं बाधः प्रत्याम्नानबाधस्योदाहरणम्। प्रतिषेधबाधेऽतिदेशेन प्राप्तस्य होतृवरणादेः 'नार्षेयं वृणीते न होतारम्' इत्यादिनिषेधवाक्यैर्निवृत्तिः कार्यते। एतन्निमित्तत्रयजन्यो बाधः प्राप्ताप्राप्तबाधभेदाभ्यां द्विविधः। प्राप्तबाधो दशमाध्यायस्य विषयः, अप्राप्तबाधस्तृतीयाध्यायस्य विषयः।

तन्त्रम्

तन्त्रमेकादशाध्यायस्य विषयः। अतिदेशेन प्राप्तानां पदार्थानां बाधद्वारा समुच्चयद्वारा च यात्रायां निर्धारितायामपि क्वचित् क्वचित् अनेकानि प्रधानानि यदा समकालमनुष्ठीयन्ते तदा तदुद्देश्येनाङ्गानामनुष्ठानमेव प्रयोगविधिर्बोधयति। इदमेव समकालमनुष्ठानं तन्त्रमिति। तच्च, अनेकेषामुद्देश्येनाङ्गानां समकालमनुष्ठानमिति लक्षितम्। इदं प्रकृतौ विकृतौ च भवति। प्रकृतौ दर्शपूर्णमासयोराग्नेयादियागत्रयस्योद्देश्येन प्रयाजानुयाजादेः समकालमनुष्ठानं तन्त्रेण भवति। एवं विकृतावपि चातुर्मास्यस्य वैश्वदेवादिपर्वसु प्राप्तमाग्नेयाद्युद्दिश्यादिष्टं प्रयाजानुयाजादिसमकालमेवानुष्ठीयते। अत एव प्रकृतिर्विकृतिश्च द्वयमपि तन्त्रस्य क्षेत्रम्। एवमेव यत्र कुत्रापि वैशिष्ट्येन (हेतुना) आवृत्तिरपि भवति, सा खल्वावाप इति नाम्ना निर्दिश्यते।

प्रसङ्गः

प्रसङ्गो द्वादशाध्यायस्य विषयः। अन्यतउपकारस्य लाभेन प्रयुक्तानामङ्गाना-मननुष्ठानं प्रसङ्गः। यथा, भोजनं गुरवे प्रस्तुतमासीत्, परं तदानीमेव जामातरि प्राप्ते तत्स्वागतमपि तेनैव सञ्जातम्, न च पृथक् किञ्चित् सम्पादितम्। वैदिकदृष्टया पशु-यागार्थं प्रयाजानुष्ठानं कृतम्। तेनैव पशुपुरोडाशस्याप्युपकारः सम्पन्नः। तदर्थं प्रयाजस्य पृथगनुष्ठानापेक्षा नाभवत्। अयमेव प्रसङ्गः। तन्त्रेऽनेकेषामुद्देश्यैनैकस्यानुष्ठानं क्रियते, प्रसङ्गे तु अन्यार्थमनुष्ठितमेव स्वयमुपकारकं भवति। एवं द्वादशाध्यायानां द्वादशेमे स्वतन्त्राः पदार्थाः सन्ति, येषां रूपरेखाऽस्मिन् प्रकरणे प्रस्तुता। विस्तरेण ज्ञानार्थं म. म. चिन्नस्वामिशास्त्रिवर्यैं रचिता तन्त्रसिद्धान्तरत्नावली शास्त्रदीपिका वाऽध्येतव्या।

एतेषां द्वादशाध्यायानां प्रकरणे संक्षिप्य, उत्पत्तिविधिः विनियोगविधिः, प्रयोग-विधिः, अधिकारविधिरिति विधेः प्रमुखाः प्रकारा निरूपिताः। एतदतिरिक्ता अपि अपूर्वविधिः, नियमविधिः, परिसंख्याविधिः इति त्रयो विधिप्रकाराः शैली-दृष्टयाऽभि-मताः। अपूर्वविधौ सर्वथाऽप्राप्तोऽर्थो बोध्यते यथा, "अग्निहोत्रं जुहोति"। अस्य विधेः प्रवृत्तेः पूर्वमग्निहोत्रं सर्वथाऽप्राप्तमासीत्। नियमविधिः पक्षेऽप्राप्तस्यार्थस्य प्रापको भवति। "व्रीहीनवहन्ति" इत्यादिविधय एतस्योदाहरणम्। अस्य विधेरभावे व्रीहीणां तुषविमोकः(पुरोडाशार्थं) उलूखलमुसलप्रस्तरघातनखविदलनादिभिरनेकैः साधनैःप्राप्यते, परमेतेषां साधनानामेकस्मिन्क्षणे उपयोगो भवितुं नार्हति। क्रमशः प्रत्येकं ग्रहीतुं शक्यते। यदा प्रस्तरेण घातः प्राप्तः स्यात् तदा नखविदलनमप्राप्तं स्यात्। यस्मिन् काले नखविद-लनं प्राप्तं स्यात् तस्मिन् कालेऽवहननमप्राप्तं भवेत्। अनेन क्रमेणावहननयाप्तिः प्राप्तिर्जाता परं सा पाक्षिकी। एकस्मिन् पक्षेऽस्ति, अपरस्मिन् पक्षे च नास्ति। यस्मिन् पक्षेऽवहन-नस्य प्राप्तिर्नास्ति, तदपसार्य विधिरयं तस्य प्राप्तिं कारयति, सर्वेषु पक्षेष्ववहननमेव कर्त्तव्यम्। "अवघातेन निष्पन्नान्येव ताण्डुलान्यपूर्वस्योत्पादकानि, नान्येन साधनेन" एवं नियमोऽयं विधिना सिद्ध्यति, अत एवायं नियमविधिरित्युच्यते। नियमस्यास्या-दृष्टमेव फलम्, न तु दृष्टं फलम्। परिसङ्ख्याविधावेकस्मिन्नेव स्थानेऽङ्गद्वयस्य, कर्मद्वये एकस्याङ्गस्य समकालमेव प्राप्तिर्भवति, तयोर्द्वयोरेकस्य निवृत्तिः कार्यते। परिसङ्ख्याया वर्जनमर्थः। गृहमेधीयायामिष्टावाज्यभागस्यान्याङ्गानाञ्च समकालमेव प्राप्तिर्जाता, तां "आज्यभागौ यजति" इत्यनेन विधिना केवलमाज्यभागं यावत् परिमितां कृत्वाऽन्येषामङ्गानां व्यावृत्तिः कार्यते, अतोऽयं परिसङ्ख्याविधिः। लाक्षणिकः श्रौत इति परिसङ्ख्याविधिर्द्विप्रकारः। तत्र लाक्षणिकः परिसङ्ख्याविधिः स्वार्थहानिः, परार्थस्वीकारः प्राप्तबाधः इत्येभिस्त्रिभिर्दोषैर्ग्रस्ता भवति, परं श्रौतयां परिसंख्यायामिमे दोषा न भवन्ति।[१] इमेऽभिप्रायाः वार्तिककारेण शब्दैरेभिः सूत्रिताः—"विधिरत्यन्त-

१. विधिभागस्य विशेषाकलनाय। अप्पय्यदीक्षितस्य विधिरसायनमध्येतव्यम्।

मप्राप्ते नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते ॥'॰ नियम-विधिः सतां बोधयति, परं परिसङ्ख्याविधिस्तां निराकुरुते। इदमेवैतयोर्मौलिकमन्तरम्। 'सोमेन यजेत' इत्यादिस्थलेषु विशिष्टविधिरपि मन्यते।

उपसंहारः

काण्डत्रयमिदं मीमांसादर्शनस्य संक्षिप्ताया रूपरेखाया परिचायकम्। विचार-काण्डस्य दर्शनस्य बाह्या रूपरेखा। ज्ञानकाण्डकर्मकण्डावस्याभ्यन्तरस्वरूपस्य सङ्कलनम्। त्रितयमिदं मिलितं सत् निर्देष्टुमिदं पर्याप्तं यद् दर्शनमिदमितरदर्शनापेक्षया कियद् विशालं विचारप्रधानञ्च। अस्याध्ययनार्थं विस्तृतविचारशक्त्या-समं गम्भीरं वैदुष्यमावश्यकम्। कर्मकाण्डस्य विषय आधुनिके काले ज्ञानकाण्डस्य बिषयादपि दुर्भरतरः सञ्जात इत्यस्माकं दौर्भाग्यम्। आसीत् कश्चन कालः, यस्मिन्नस्माकं देशस्य गृहलक्ष्म्यो महानसव्यापारवत् विषयेऽस्मिन्नधिकृता आसन्। प्रतिगृहं यज्ञयागादीनां प्रचार आसीत्। स्थाने स्थाने विषयस्यास्य प्रायोगिकं स्वरूपं दृष्टिपथमायाति स्म। अद्यत्वे तु विषयोऽयं केवलं शास्त्रीयचर्चारूपतां गतः। अयमेवास्यं काठिन्यस्य मौलिकं कारणम्। कर्मकाण्डस्याध्ययनात् पूर्वं तत्तद्वैदिकशाखानां-मध्ययनमनिवार्यम्, तद्द्वारा च तस्य विषयस्य गाम्भीर्यं यावत् प्राप्तुं शक्यते। विशेषेण यदि विचारः क्रियते चेत् यस्य ज्ञानभागो भागेऽस्मिन्नवलम्बितः। यतोऽयमेवास्य प्रति. पाद्यः। मीमांसकैः कर्मकाण्डातिरिक्तः कश्चन प्रतिपाद्यो नास्तीति मन्यते। तेषामयं कर्मकाण्डः न खलु कश्चन साधारणो विषयः। किन्त्वत्र सकलज्ञानविज्ञानसम्पदां समावेशः। अत एव भारतीयैर्विचारकैरयं स्वजीवनसर्वस्वतया सम्मानितम्। गीतायां कर्मयोगोऽस्यैव सम्मानस्य प्रतीकमूलः। उपनिषदादिभिरात्मनः स्तुत्याऽस्य कर्ता प्रोत्साहितः। एवं यथार्थे कर्मणि आदर्शज्ञानस्य समन्वयं कृत्वा दर्शनेनानेन क्षेत्रेऽस्मिन् महती प्रतिष्ठा समर्जितेत्यत्र नास्ति संशयः। अनेन स्पष्टीकृतं यद् दर्शनं गुहासु निविश्य चिन्तनस्य विषयो नास्ति, किन्तु तत् कर्मणाऽपि द्रष्टुं शक्यत इति। अस्मिन् कर्मणि सकलस्य दार्शनिकस्य स्वरूपस्य प्रतिष्ठाऽस्य दर्शनस्य महदवदानम्, यस्य सङ्कलनरूपोऽयं ग्रन्थः।